ॐ अर्हं श्रीशंखेश्वर पार्श्वनाथ स्वामिने नमः

# सुभाषित सूक्त रत्नमाळा (संस्कृत)

(लगभग ९०० प्रकरणो ३८०० श्लोक ग्रन्थाग्र ५०००

卐

संयोजक अने संपादक

आचार्यदेव विजयभद्रसूरीश्वरजी महाराज साहेब

प्रशिष्य

पंन्यासजी महाराज चरणविजयजी गणिवर

卐

मूल्य-सद्हृदयानो करी आत्मोद्धार वांचो.

卐

प्रकाशको

चिमनलाल नाथालाल गांधी मोटेरावाळा

छोटालाल कालुभाई भांखड वाराहीवाळा

ॐ અર્હં શ્રીશંખેશ્વર પાર્શ્વનાથ સ્વામિને નમઃ

# સુભાષિત સૂક્ત રત્નમાલા (સંસ્કૃત)

( લગભગ ૨૦૦ પ્રકરણો ૩૮૦૦ શ્લોક ગ્રન્થાગ્ર ૫૦૦૦ )

卐


સંયોજક અને સંપાદક

આચાર્યદેવ વિજયભદ્રસૂરીશ્વરજી મહારાજા સાહેબ

પ્રશિષ્ય

પંન્યાસજી મહારાજ ચરણવિજયજી ગણિવર


卐

મૂલ્ય–મહેરબાની કરી અનેકવાર વાંચો.

卐


પ્રકાશકો

ચિમનલાલ નાથાલાલ ગાંધી મોઢેરાવાલા

છોટાલાલ લલુભાઈ આંખડ વારાહીવાલા

૧ પ્રકાશક : ચિમનલાલ નાથાલાલ ગાંધી મોઢેરાવાળા

c/o ભારત લેબોરેટરી સપ્લાયર્સ

૨૯૭ જુની પોષ્ટ ઓફીસ લેન, મંગલદાસ માર્કીટ

મંગલદાસ રોડ, મુંબઈ નં. ૨

૨ પ્રકાશક : છોટાલાલ લલુભાઈ આંખડ વારાહીવાળા

ખેતવાડી, બેંક રોડ, ૩/ ૯ તુલસી બીલ્ડીંગ

મુંબઈ નં. ૪

સંવત ૨૦૨૯ સને ૧૯૭૨ વીર સં. ૨૪૯૯

નકલ ૧૦૦૦ પ્રથમ આવૃત્તિ

---

મુદ્રક : કાંતિલાલ સોમાલાલ શાહ સાધના પ્રીન્ટીંગ પ્રેસ, ઘીકાંટા રોડ

અમદાવાદ.

# પ્રકાશકીય નિવેદન

અમારા આ પુસ્તકનો કેટલોક ભાગ નાનામોટા ૧૪૫ પ્રકરણો અને તેમાં લગભગ બે હજાર કાવ્યો (ગાથાઓ અને શ્લોકો) વિક્રમ સંવત ૨૦૦૭માં પ્રકાશક કેસરબાઈ જ્ઞાનમંદિર સંચાલક શેઠ નગીનદાસ કર્મચંદ્ર સંઘવી પાટણથી બહાર પડેલો. પુસ્તકો બધાં ભેટ અપાઈ ગયાં. અને વળી નવાં અઢારસો જેટલાં કાવ્યો અને પંચાવન જેટલાં પ્રકરણો તૈયાર થયા.

અને લગભગ એકવીશ વર્ષના ગાળે આ પુસ્તક વળી કેટલાક સુધારા વધારા કરી ઉપરના **સુભાષિત સૂક્ત સંગ્રહને** પણ પ્રસ્તુત કાવ્યો સાથે મેળવી, કેટલાક ટુંકાં પ્રકરણો હતાં તેને વિસ્તૃત બનાવી તથા વિસ્તૃત પ્રકરણોને અલગ પ્રકરણ નંબર આપીને **સુભાષિત સૂક્ત રત્નમાલા** નામનો આ ગ્રન્થ મહાભાગ્યશાળી વાચક મહાશયોના કરકમલમાં ભેટ ધરીને, અમે પોતાની જાતને ભાગ્યશાળી માનીએ છીએ.

**આ ગ્રન્થ કોઇનો રચેલો નથી.** પરંતુ સંપાદક મુનિરાજે પોતાના વાચનમાં જ્યાં જ્યાંથી સૂક્ત રત્નો સારાં જણાયાં અને પોતાના સ્વાધ્યાય માટે લખી લીધાં. ક્રમે સારો એવો સંગ્રહ થયો. તેને વિષય વિભાગે ગોઠવી ગ્રન્થ રુપે તૈયાર કર્યો છે. બધાં જ સૂક્ત રત્નો મોટા ભાગે જૈન આગમો-ગ્રન્થો અને ચરિત્રોમાંથી ચુણેલાં છે. કોઈ કોઈ અન્યાન્ય ગ્રન્થોમાંથી પણ મળ્યા અને લીધાં છે.

આ ગ્રન્થમાં વીતરાગ શાસનને સમજવા યોગ્ય ઘણી સામગ્રી ગોઠવાઈ છે. દેવ-ગુરૂ-ધર્મનું સ્વરૂપ સુવિસ્તૃત અપાયું છે. દાન-શીલ-તપનું વર્ણન છે. આગમ-સિદ્ધાન્ત-આજ્ઞા-રત્નત્રયી=સમ્યગ્દર્શન

– જ્ઞાન–ચારિત્ર–બોધિ–મુનિધર્મ–શ્રાવકધર્મ–પુણ્ય–પાપ–ભાગ્ય–નસીબ કર્મ – કષાય-લેશ્યાનાં વર્ણનો–જિર્ણોદ્ધાર – જિનબિંબ – જિનચૈત્યનાં વર્ણનો લખાયાં છે.

સામાયિક-પૌષધ–વિનય–વૈયાવચ્ચ–સ્વાધ્યાય–ધ્યાન–જુદી જુદી ભાવનાઓ–ઉપદેશ સિત્તરી–પ્રમાદ–આત્મનિંદા, ગુણાનુરાગ, સાત્વિક ભાવ, પ્રભાવકો–ગુરૂના ગુણો–શિષ્યની લાયકાત=ગુણો–દોષો–છંદોનાં લક્ષણો–નમસ્કાર મહામંત્રનો પ્રભાવ–બીજા પણ ટુંકા–લાંબા બધા મળીને લગભગ બસો વિષયોથી આ ગ્રંથ સમૃદ્ધ બન્યો છે.

ગ્રન્થનો શબ્દકોષ આપવા ઈચ્છા હતી. વિસ્તૃત અને ઝીણવટથી વિષયદર્શન આપવું હતું. પરંતુ સંપાદક મુનિરાજનું શરીર સ્વાસ્થ્ય ગ્રન્થના પ્રકાશન કાળમાં જ બગડ્યું–તેથી ધારેલી ઈચ્છા પાર પામી નથી. ઉપરાંત શુદ્ધિપત્રક પણ ઝીણવટથી થઈ શક્યું નથી. આવી બધી અપૂર્ણતાઓ માટે વાચક મહાશયો પાસે ક્ષમાયાચના કરીએ છીએ.

આ ગ્રંથ છપાવવા પહેલાં કેટલીક તૈયારીઓ કરવા સારા અનુભવી પંડિત મહાશયની શોધ કરી પરંતુ મનપસંદ કામ કરી આપનાર મલ્યા નથી. ઉપરાંત આવા ગ્રંથને વડીલભાવે અથવા મિત્રભાવે શોધી આપનાર કે સૂચનાઓ આપનાર પણ મલ્યા નથી. તેથી પણ વાચકોને આ ગ્રન્થમાં અપૂર્ણતા લાગી જશે તે માટે પણ સજ્જન આત્માઓ પાસે ક્ષમા યાચિયે છીએ.

તથા અમારાં આજ સુધી થયેલાં પ્રકાશનો **પંચપરમેષ્ઠિ નમસ્કાર** યાને **જૈનધર્મનું સ્વરૂપ**–પહેલી–બીજી આવૃત્તિ–નકલ ચાર હજાર તથા **નવપદ દર્શન** નકલ એક હજાર–**સંસ્કૃત સુભાષિત સૂકત સંગ્રહ, ગુજરાતી સુભાષિત સૂકત સંગ્રહ, જિનેશ્વર દેવની આજ્ઞા** યાને **સાચી માણસાઈ** તથા **સુભાષિત સૂકતરત્નાવલી** (ગુજરાતી) અને પ્રસ્તુત **સુભાષિત સૂકત રત્નમાલા.**

આ બધા ગ્રન્થો છપાવવામાં મદદ કરનાર જુદા જુદા ગામોના સંઘો અને અનેક સદ્‌ગૃહસ્થો તરફથી યથાસમય જરૂર અનુસાર ખૂબ સહાયો મળી છે. જે કારણથી અમારા બધા ગ્રન્થો દળદાર અને ટકાઉ હોવા છતાં ભેટ આપી શક્યા છીએ. તેનો બધો જ યશ તે તે શ્રી સંઘો અને શ્રાવક મહાશયોને ફાળે જાય છે.

આ વખતે બે પુસ્તકો સાથે છપાયાં છે. ૯૬૭૧ ના સહાયકોના નામની યાદી ગુજરાતી સુભાષિત સૂક્ત રત્નાવલી પુસ્તકમાં પ્રકાશકોના નિવેદન પૃ. ૪ ઉપર લીધી છે ત્યાર પછી બાકી રહેલા સહાયકોના નામોની શુભ યાદિ નીચે મુજબ છે.

૧૦૦૦) શ્રી દાદર (મુંબાઈ–૨૨) આરાધના ભુવન જ્ઞાન ખાતું.
૧૦૮૮॥ શ્રી દાદર (મુંબાઈ–૨૨) આરાધના ભુવન જ્ઞાન ખાતું.
૩૦૦૦) શ્રી માલેગામ ગુજરાતી સંઘ-જૈન ઉપાશ્રય જ્ઞાન ખાતું.
૫૦૦) પંન્યાસજી મહારાજ રાજવિજયજી ગણિવરના ઉપદેશથી મહેસાણા ઉપધાનમાં જ્ઞાન ખાતાની ઉપજમાંથી.

૫૦૧) શેઠ ભાગચંદ દગડુશાહ માલેગામ.
૫૦૧) શાહ પોપટલાલ કંકુચંદ નેરવાળા.
૫૦૦) શાહ મણીલાલ ચુનીલાલ કોપરગામ.
૨૫૧) શાહ રતિલાલ વીરચંદ માલેગામ.
૨૫૧) શ્રી. સરસ્વતીબેન શાન્તિલાલ ચુનીલાલ ચાંદવડકર માલેગામ
૧૦૧) શા. કુંવરલાલ રૂપચંદ માલેગામ.
૧૦૧) કેસરીચંદ સંપતરાજ મહેતા માલેગામ.
૧૦૧) શાહ કાન્તિલાલ જુહારમલ માલેગામ.
૧૦૧) નવીનચંદ રતનચંદ અમલનેરવાળા માલેગામ.

ઉપર મુજબ બે પુસ્તકમાં લીધેલ યાદી મુજબ ૧૭૬૬૭॥ ની સહાય મળી છે. તે તે મહાભાગ્યવાન મહાશયોનો આ સ્થાને અમે

આભાર માનીએ છીએ. અને અમને મલેલી સહાયમાંથી નીચે મુજબ ઉપયોગ થયો છે.

૨૦૦૦) સાધ્વી સુલોચનાશ્રીજીને સ્યાદ્વાદ–મંજરી ભાષાંતર છપાવવા સહાય અપાવી.

૫૦૦) પંડિતજી શિવલાલ નેમચંદને સ્વર્ગસ્થ મહાતપસ્વી ત્યાગી વિદ્વાન પંન્યાસજી મહારાજ કાન્તિવિજયજી ગણિવરે કરેલી ભલામણ અનુસાર સંસ્કૃત હેમ પ્ર. ભા–૧ લા માટે સહાય

૩૬૦૦) પંડિતજી હિંમતભાઈ. પ્રો. ગિરીશભાઈ–શ્રીમાન અમૃતભાઈ–તથા પં. હરજીવનદાસ વિગેરેને મેનતાણામાં (આશરે)

એ પુસ્તકોના કાગળો છપાઈ, બાઈંડીંગ કવર વિગેરે ખર્ચ હવે લખાશે.

આ પુસ્તક છપાવવા, તૈયાર થવા–જેનો નિસ્વાર્થ સહકાર મળ્યો છે તે તે સર્વનો આભાર માની, વિરમીએ છીએ.

લી. શ્રી સંઘના સેવકો

| | |
|---|---|
| એ જ વીરનિર્વાણ સં. ૨૪૯૮ ભાદરવા સુદી ૬ ગુરૂવાર વિ. ૨૦૨૮ | ચિમનલાલ નાથાલાલ ગાંધી મોઢેરાવાલા<br>છોટાલાલ લલુભાઈ આંખડ વારાહીવાલા |

# સંસ્કૃત સુભાષિત સૂક્ત રત્નમાલાની પ્રસ્તાવના

**પ્રશ્ન–ગ્રન્થ** એટલે શું ? **ઉત્તર**–ગ્રન્થ એટલે આગમો–આગમો એટલે આપ્ત પુરૂષોના બનાવેલા ચાર અનુયોગ પૈકી કોઈ એક બે ત્રણ વા ચારેનું સંક્ષેપથી કે વિસ્તારથી બતાવેલ સ્વરૂપ. ગ્રન્થ એટલે ચાર પૈકીના એક અનુયોગનું અથવા તેના પણ અંતર્ગત એક પેટાવિષયનું સ્વરૂપ બતાવનાર એક નિબંધ.

ગ્રન્થ એટલે ૭ દ્રવ્યો અથવા નવતત્ત્વોને સમજાવનાર નિબંધ. કર્મગ્રન્થ–લોકપ્રકાશ–પ્રવચન સારોદ્ધાર–તત્ત્વાર્થ–આવા આગમાનુસારી વિષયોના નિચોડ બતાવનાર બધાજ નિબંધો–ગ્રન્થો–આગમો શાસ્ત્રો–સિદ્ધાંતો નામોથી ઓળખાય છે.

**પ્રશ્ન**–ગ્રન્થ કે ગ્રન્થો બનાવવાનુ પ્રયોજન શું ? **ઉત્તર–ગ્રન્થ** બનાવનારને પોતાને સ્વાધ્યાયનો લાભ થાય છે. સ્વાધ્યાયથી ચિત્તની એકાગ્રતા થાય છે. ચિત્તની એકાગ્રતાથી સંવર થાય છે. અર્થાત્ ભાવ સામાયિકની સ્પર્શના થાય છે.

સમ્યગ્દર્શન–જ્ઞાન–ચારિત્રની પ્રાપ્તિ થાય છે. પ્રાપ્ત થયા હોય તે નિર્મલ થાય છે, અને મળેલા ગુણો સ્થિર થાય છે. ઉત્તરોત્તર તત્ત્વજ્ઞાનની વૃદ્ધિ થાય છે. બહિરાતમ ભાવો પાતળા પડે છે. ભવાભિનંદી–દશા, નષ્ટ થાય છે. પૌદ્ગલિક વાસનાઓ રોકાય છે. ઉત્તરોત્તર આત્મગુણો ખીલે છે. ગુણોનું રટણ વધે છે. છેવટે સર્વજ્ઞદશા, સ્વભાવદશા, વીતરાગદશા અને મોક્ષની પ્રાપ્તિ થાય છે.

બીજો લાભ–ભવ્ય જીવોને ધર્મમાં આકર્ષણ જાગે છે. વીતરાગની વાણીના ગ્રન્થો જે કોઈ વાંચે, તેમને સંસારથી નિર્વેદ થાય છે. સન્માર્ગની પ્રાપ્તિ થાય છે. અનાચારોના કટુવિપાકો સમજવાથી,

તોડવા ભાવના જાગે છે. સદાચારો ગમે છે. સદાચારો વધે છે. ઉત્તરોત્તર અનાચારો ઘટીને નિર્મૂલ નાશ પામે છે.

આવા પંચમકાળમાં પણ ચાર પ્રકારનો સંઘ-જીવદયામય ધર્મને સમજે છે, પામ્યો છે. સમ્યકૂત્વ, દેશવિરતિ, સર્વવિરતિ, વિશસ્થાનક, વર્ધમાનતપ-વર્ષીતપ આદિ અનેક નાના-મોટા તપ, દાન-શીલ-ભાવના-વૈયાવચ્ચ, અભય-સુપાત્રાદિ દાનો આવી અનેક નાની-મોટી આરાધનાઓ ચાલતી આવી છે, ચાલી રહી છે. તે બધો પ્રભાવ આગમાનુસારી-વિદ્યમાન-આગમો અને ગ્રન્થોનો છે.

અને તેના ઉપકારનો યશ ગણધરદેવો અને ઉત્તરોત્તર થતા ગયા સ્થવિર સૂરિ ભગવંતોના ફાળે જાય છે. જે મહાપુરુષોએ પ્રારંભમાં વ્યાકરણ, કાવ્યો, કોષો, ન્યાય અને દર્શનશાસ્ત્રો આદિ અનેક શાસ્ત્રોનો અભ્યાસ કર્યો. રાત દિવસ જાગતા રહી; પોતાના મહાવ્રતો અને ઉત્તર ગુણોને સાચવી-વિકસાવીને શકય સાહિત્ય સેવા પણ કરી છે.

આ વિષયમાં ગણધરો પછી શય્યંભવસૂરિ-મ, ભદ્રબાહુસ્વામી, શ્યામાચાર્યસ્વામી, સિદ્ધસેનદિવાકર, પાદલિપ્તસૂરિ, હરિભદ્રસૂરિ, મલયગિરિસૂરિ, ધનેશ્વરસૂરિ, ઉમાસ્વાતિવાચક, અભયદેવસૂરિ, કલિકાલસર્વજ્ઞ હેમચંદ્રસૂરિ, મહામહોપાધ્યાય યશોવિજયગણિ, વિનયવિજયગણિ આદિ સેંકડો સૂરિભગવંતો અને વાચક મહાશયો મહામુનિરાજો. ગ્રન્થો બનાવી ઉપકાર કરી ગયા છે.

**પ્રશ્ન**-" યોગ અસંખ્ય છે જિન કહ્યા " આવા પ્રમાણિક વાકયોથી સમજાય છે કે ઉપકાર કરવાના યાને આરાધના કરવા-કરાવવાના માર્ગો દાન-શીલ-તપ-વૈયાવચ્ચ વિગેરે ઘણા છે. તો શું બીજા આરાધનાના માર્ગો નકામા છે?

**ઉત્તર**-વીતરાગ વચનાનુસારી, આરાધનાના બધા જ માર્ગો ઉપયોગી છે. જે આત્માને જેમાં રસ હોય, જેમાં પોતાને વધારે

સફલતા મલે, વિરાધના વગરની આરાધના પમાય; આવા બધા જ માર્ગો મુખ્ય અને ગૌણુ ભાવે લાભનું જ કારણુ છે.

તો પણુ બધામાં વીતરાગ વાણીનો સૌ પ્રથમ જ નંબર આવે છે ज्ञानक्रियाभ्यां मोक्षः જ્ઞાન અને ક્રિયા બંને મોક્ષમાર્ગનો ઉપાય હોવા છતાં, જ્ઞાનનો નંબર જ પ્રથમ રહે છે. જ્ઞાનવાનની જ ક્રિયાઓ ફલવતી બની છે. જ્ઞાનથી જ ક્રિયાઓ પમાય છે.

દાન–શીલ–તપ અને વૈયાવચ્ચ વિગેરે આરાધનાના માર્ગોને પણ જ્ઞાન જ સમજાવે છે. જ્ઞાનથી જ તે તે ક્રિયામાં રુચિ જન્મે છે. જ્ઞાનથી જ શ્રદ્ધા મજબૂત બને છે. જ્ઞાનવડે જ સુપાત્રોની ઓલખાણુ આદર–સત્કાર–અનુમોદન પમાય છે. જ્ઞાનથી જ વિષયો પ્રત્યે રાગ પ્રકટે છે અને વિષયો છોડાય છે.

જ્ઞાનથી જ દ્રવ્ય અને ભાવદયાના પરિણામો પ્રકટ થાય છે. જ્ઞાનથી જ સર્વ જીવોને સુખિયા બનાવવાની વિચારણાઓ–ભાવનાઓ આવ્યા કરે છે. જ્ઞાનથી જ સર્વ જીવોને, શાસનના રસિયા બનાવવા અભિલાષો પ્રકટ થાય છે. જ્ઞાનના જ પ્રતાપે જિનનામ જેવા અતિ ઉચ્ચતર પુણ્યનો બંધ પડે છે.

જ્ઞાનથી જ નંદન મુનિ જેવા મહાપુરૂષો–લાખો માસક્ષમણો (૧૧–૮૦ ૬–૪૫) કરી શક્યા છે. જ્ઞાનની સહાયથી જ બાહુ–સુબાહુ અને નંદિષેણુ જેવા આત્માઓ અજોડ વૈયાવચ્ચ કરી શક્યા છે. જ્ઞાનથી જ મેતાર્ય–સુકોશલ–કીર્તિધર, ગજસુકુમાર, ઝાંઝરિયા મુનિ, ખંધક–મુનિ, ખંધકસૂરિના ૪૯૯ શિષ્યો વિગેરે હજારો–લાખો મુનિરાજો ભયંકર ઉપસર્ગોને પણુ ક્ષમાની તાકાદથી પચાવી શક્યા છે.

માટે જ સર્વ આરાધનાઓનું અસાધારણુ કારણુ વીતરાગદેવોની વાણી–જ્ઞાન જ છે અને બધા બીજા આરાધનાઓના માર્ગો તે જ્ઞાનનું કાર્ય છે.

**પ્રશ્ન**–તો પછી ज्ञानवान् ज्ञानदानेन निर्भयोऽभयदानतः । अन्न-दानात् सुखीनित्यं, निर्व्याधिरौषधात् भवेत् ॥११॥

**અર્થ** :– જ્ઞાનના આપનારા જ્ઞાની બને છે. એટલે જ્ઞાનના દાનથી આત્મા પોતે પણ જ્ઞાની થાય છે. અભયદાન આપનાર સર્વભયોથી મુક્ત બને છે. અન્નના દાનથી નિત્ય સુખ પ્રાપ્ત થાય છે. અને ઔષધના દાનથી સર્વ રોગ નાશ પામે છે. આ બધા ઉપકારો જ્ઞાન જેવા ખરા કે નહીં ?

**ઉત્તર**–આ સ્થાને પણ શ્રીવીતરાગની વાણીનો સહકાર મલે તો જ ઉપરના કારણો ફલ દેનારા થાય છે.

જ્ઞાન–તે પણ વીતરાગ દેવની વાણીની આગેવાની–સર્વક્રિયાઓમાં મુખ્ય હોવી જરૂરનું છે. માત્ર જ્ઞાન શબ્દના વાચ્યથી લાભ નથી–જ્ઞાન એટલે સમ્યગ્જ્ઞાન–આવા સમ્યગ્જ્ઞાનવાળો આત્મા બીજાને સમ્યગ્જ્ઞાનનું દાન કરે તો ઉત્તરોત્તર કેવલજ્ઞાન પણ પામે છે.

વીતરાગની વાણી તેજ સમ્યગ્જ્ઞાન ગણાય છે. વીતરાગની વાણીથી જ પુણ્ય–પાપની સાચી સમજણ પમાય છે. વીતરાગ સર્વજ્ઞભગવંતો–એ જ પોતાના જ્ઞાનથી–લોકાલોકના અને ત્રણેકાળના ભાવો જોયા છે, પ્રાણિમાત્રને સંસારના બંધનોથી છુટવાના ઉપાયો પણ સર્વજ્ઞ ભગવંતોએ જોયા છે, તેથી ધર્મ બતાવવાની સંપૂર્ણતા તેમનામાં જ હોય છે. બીજે નહિ. બીજી બાજુ આ જગતના આર્ય અનાર્યોમાં વ્યાપીને રહેલા ધર્મશબ્દને જગત માને છે. પરંતુ ધર્મના મર્મને કોઈ વિરલા જ સમજે છે. જગતના મનુષ્યોમાં જુદા જુદા દર્શનોમાં સંતપુરૂષો ઘણા થાય છે. તેમનો આશય પણ ધર્મને આચરવો–ધર્મ કરાવવો–પરલોક સુધારવો. જીવનું પતન થવા દેવું નહી પણ ઉત્થાન કરવું આવો હોવા છતાં,

સર્વજ્ઞપણાના અભાવે. જીવ–અજીવનું. સ્વરૂપ સર્વજગતથી અજાણ્યું છે. આત્માની. ચારદશા, ચૌદગુણસ્થાનકો, ચારગતિ, છકાય,

નિગોદના સૂક્ષ્મ અને બાદર ભેદ, અભક્ષ્ય અને અનંતકાયોની સમજણ, હિંસાના અનુબંધ-હેતુ-સ્વરુપ ત્રણપ્રકારો, રાગદ્વેષ, ચારકષાય, ચારસંજ્ઞા, ચારવિકથા,

પાંચ-આશ્રવ, પાંચક્રિયા, પાંચમિથ્યાત્વ, પાંચપ્રમાદ, આઠપ્રમાદ, આઠમદનાં સ્થાન, નવનિયાણા-દેવ-ગુરૂ-ધર્મની શુદ્ધતા-આવી હેય, જ્ઞેય, ઉપાદેય વસ્તુઓ જૈનાગમો સિવાય અન્યત્ર જોવા મલતી નથી. છે જ નહી.

પરંતુ વધારામાં ઈશ્વરને=બ્રહ્મા-વિષ્ણુ-મહેશ્વરને. અથવા દરેક દર્શનકારોએ પોતાના ચમત્કાર બતાવનારા દેવોની માન્યતા સ્વીકારીને, અને તેમની પ્રાર્થનાઓ કરવાને જ ધર્મમનાવીને-હિંસાના રૌદ્ર માર્ગને પ્રોત્સાહન આપ્યું છે.

લગભગ ઘણા દર્શનકારોએ "અહિંસા પરમો ધર્મ." માન્યો ખરો પણ જરાપણ આચરણમાં મુકયો નથી. "અહિંસા પરમો ધર્મ :" બોલનારા, સાંભળનારા અને સમજનારા અહિંસાને વર્તનમાં મુકે તો. પ્રાણિઓને મારી નાખીને-તેમના શરીરમાંથી નિકળેલુ માંસ, આમીષ, મટન, ખવાય જ કેમ? કતલખાનાં રહે જ કેમ?

**"માંસને ખાનારા રાક્ષસો જેવા છે."** આમ કહેવામાં આવે છે તે અનુભવથી સાચું લાગે છે, પ્રાણીઓના કાન ફાડી નાખે તેવા પોકારો સાંભળવા છતાં જેમને દયા આવતી જ નથી. તેવાઓ અહિંસા પરમો ધર્મ : માત્ર બોલે તેનાથી લાભ શું ?

**પ્રશ્ન**-આપણી વર્તમાન સરકાર અહિંસાને માને છે ને? **ઉત્તર**-હિંદુસ્તાન પ્રજાસત્તાક થયું. અને ચુંટાએલાઓનું રાજ્ય બન્યું. ત્યારથી. મુસલમાનો અને અંગ્રેજોના રાજ્યકાલમાં હિંસા થતી હતી. તેનાથી હજારો ગુણી હિંસા વધી છે. તેથી આપણે તેઓને પુછીયે છીએ કે અહિંસા કહેવાય કોને?

માણસો સિવાયના બીજા જીવોના નાશ કરનારા–કરાવનારા અને શક્તિ, લક્ષ્મી અને અધિકાર હોવા છતાં કપાતા ક્રોડો જીવોના કરુણ પોકારો કાને નહી ધરનારા મનુષ્યોને અભયદાન જેવી વસ્તુ સમજાવી જ મુશ્કેલ છે. તો પછી આચરણ આવે જ ક્યાંથી ?

અહિંસાની મોટી મોટી વાતો કરનારા પણ માંસાહારિઓના માંસ સ્વાદોને પોષવા માટે ગાયો વિગેરેના પણ માંસોનું ઉત્પાદન કરવામાં–કરાવવામાં ફરજ સમજનારાઓમાં અહિંસાનું સ્થાન કેટલું છે ? તે સહેજે સમજી શકાય તેવું છે. માટે જ કહેવું પડે કે વીતરાગની વાણીનો મર્મ સમજેલા જ ભાગ્યશાળી જીવો અભયદાનનો લાભ પામી શકે. બીજામાં ભજના.

અન્નદાન પણ વિવેકથી અપાય તો જ અન્નદાનનું ફલ મલે. અન્નદાન પણ એંઠવાડ હોય, સડેલું હોય. ફેંકી દેવા યોગ્ય હોય, જરૂર વગરનું હોય, પછી વળી ગર્વથી અપાય, અનાદરથી અપાય, તિરસ્કાર કરીને, અપાય, રાત્રિમાં–અપાય, એંઠવાડની ચાટમાં અપાય, આવાં બધાં દાનો આત્મકલ્યાણના સ્થાને, વખતે અકલ્યાણ પણ કરનારાં બનવા સંભવ ખરો.

**પ્રશ્ન**–ઔષધ દાન તો મહા ફલનું કારણ ખરૂંને ?

**ઉત્તર**–ઔષધ દાનનું જૈન શાસનમાં ખંડન નથી પણ સમર્થન છે. દાન આપવાના પ્રકારોમાં અશન–પાન–ખાદિમ–સ્વાદીમ–વસતિ–વસ્ત્ર–પાત્ર, પાટ–પાટલા અને ઔષધ–બધી નિર્વદ્ય–પાપ રહિત વસ્તુઓ સુપાત્રને અપાય તો મહા લાભનું કારણ બને છે. અહીં જીવાનંદ વૈદ્ય અને ખરક વૈદ્ય અને વૈતરણી વૈદ્યનાં ઉદાહરણો ઔષધ દાનના ફળને ખૂબ સમર્થન આપે છે.

પરંતુ દેડકાં વિગેરે લાખો જીવોની હિંસાઓ કરીને માત્ર પેટ ભરવા કે પત્ની અને પૈસાની કમાણી માટે, ડીગ્રીધર થઈને, (દરદીઓ–રોગિઓના ઉપકાર માટે નહી જ) માત્ર પૈસા કમાવવા, ઔષધ

આપનારાઓને લાભ કેમ થાય? ઉપરથી દેડકા, સર્પો, અળસીયાં, વાંદા અને અખતરાઓમાં ઉપયોગમાં લેવાયેલા જીવોની કારમી હિંસાનાં કટુ ફલ ભોગવવાં પડશે. એમ સમજવા જેવું છે. બદલો લેવાની ઇચ્છા ન હોય તે જ ઉપકાર કહેવાય.

માટે જ જ્ઞાન ધર્મ એટલે વીતરાગની વાણીનું જ્ઞાન, જીવ-અજીવ-પાપ-પુણ્ય, આશ્રવ, સંવર-નિર્જરા, બંધ અને મોક્ષ નવતત્વોનું સ્વરૂપ, જિજ્ઞાસુ વૃત્તિથી સમજાય. ત્યાગવા યોગ્ય અને આદરવા યોગ્ય બરાબર નક્કી થઈ જાય તે જ સમ્યગ્જ્ઞાન કહેવાય છે.

અને આવા સમ્યગ્જ્ઞાનની મુખ્યતાએ આચરવામાં આવતા, દાન, શીલ, તપ, સેવા, ભક્તિ, વાત્સલ્ય-યાત્રા, જાપ, ધ્યાન વિગેરે બધાં અનુષ્ઠાન આત્માના એકાન્ત કલ્યાણનો માર્ગ છે.

માટે જ સમ્યગ્જ્ઞાનના ગ્રન્થો બનાવવા. અથવા જુદા જુદા ગ્રન્થોમાંથી પ્રસ્તુત પ્રકરણને અનુકુલ બાબતોનો સંગ્રહ કરવો. આવી રચનાનું પ્રયોજન ઘણા એટલે હજારો કે લાખો આત્માઓ, આવા ગ્રન્થો વાંચશે, એવી સંભાવના ગણાય. વળી આવા વીતરાગ વાણીના ગ્રન્થો હજારો વર્ષ રહેવાના અથવા તેની પરંપરા ચાલવાની પણ સંભાવના ગણાય, માટે સમ્યગ્જ્ઞાનના પુસ્તકો અજ્ઞાનરુપ અંધકારમાં અથડાતા જીવોને દીવાની ગરજ સારે છે, સંસાર સમુદ્રમાં બુડતા જીવને નૌકા સમાન છે. સંસારમાં વિષય=કષાયાદિ પાપરુપ રોગોમાં ફસાયેલા જીવોને, રામબાણ ઔષધતુલ્ય છે. આવાં શાસ્ત્રો આંધળાને લાકડી સમાન છે. ધર્મરુપ બાલકને જન્મ આપનારી માતા સમાન છે.

સંસાર મહા અટવીમાં ભૂલા ભટકતા ભવ્ય જીવોને, શાસ્ત્રો ભોમીયા સમાન છે. તથા રોગ-જલ-અગ્નિ-વિષ-સર્પ-ચોર-શત્રુ હાથી-સિંહ આદિ અનેક ઉપદ્રવોથી બચવા અભેદ્ય વજ્રની દીવાલ પણ શાસ્ત્રો કહેવાય છે. સંસારમાં જુદી જુદી મુસીબતો-મુશ્કેલીઓને

મિટાવવા જુદી જુદી સગવડોની સહાય લેવી પડે છે. પરંતુ ઉપરોક્ત બધી મુશ્કેલીઓનું એકદમ નિર્મૂલ નાશ કરવાનું સાધન શ્રીવીતરાગની વાણી જ છે.

શાસ્ત્રોના અજાણ જીવોને અંધ-બધીર અને મૂંગા જેવા ગણાવ્યા છે. જેમ આંધળો પોતાની જાતે સત્યમાર્ગ જોઈ શકતો નથી. બહેરાઓ સત્યમાર્ગ સાંભળી શકતા નથી. અને મૂંગા બીચારા પોતાની શંકાઓનાં સમાધાન પામી શકતા નથી. તેજ પ્રમાણે શાસ્ત્રમાં અજાણ જીવડાઓ પાપપુણ્યને સમજી શકતા નથી.

તેથી કુદેવોને દેવ માને છે. કુગુરૂઓને ગુરૂ તરીકે સ્વીકારે છે. હિંસા જેવા રૌદ્ર અને ભયંકર પાપને ધર્મ માને છે. અધમ કોટિના દેવો અને દેવીઓ માણસોનાં પણ બલિદાન માગે છે. અને અજ્ઞાની અસાત્વિક મૂર્ખ લોકો, માણસોનાં પણ બલિ આપે છે. પાપશાસ્ત્રોને શાસ્ત્રો સમજીને તેનો સ્વીકાર અને પ્રચાર કરે છે.

**પ્રશ્ન**–જ્ઞાન ન હોય માત્ર દેખાદેખી અને ગતાનુગતિક પરમાર્થની સમજણ વિનાના જીવો દાન આપે, શીલ પાલે, તપશ્ચર્યા કરે, સામાયિક–પ્રતિક્રમણ–પૂજા વિગેરે ધર્મનાં અનુષ્ઠાન કરે તો શું તેને કશો લાભ જ નહીં ?

**ઉત્તર**–ક્રિયા એકલી થાય તે તદ્દન નકામી કે નિષ્ફલ છે. એમ બોલનાર પોતે જ અજ્ઞાની બને છે. ઉત્સૂત્ર પ્રરૂપણાનો દોષ લાગે છે. પરંતુ "જ્ઞાન રહિત ક્રિયા કહી, કાસ કુસુમ ઉપમાન"

જ્ઞાન વગરની ક્રિયા કેસુડાના ફુલ જેવી અસાર છે. આવી સમજણ વગર ક્રિયા અનંતીવાર થઈ પણ આત્માની રખડપટ્ટી બંધ થઈ નથી. અને વગર સમજણે કરેલાં અનુષ્ઠાન બહુમૂલ બનતા નથી.

તેટલા માટે આપણે દાનાદિ જે ક્રિયા કરીએ છીએ. તેને

સમજાય તો બહુમાન વધે. વીતરાગ ઓળખાય તો વીતરાગની પૂજાનું ફળ વધારે પમાય. નાગકેતુની પેઠે કેવલજ્ઞાન પણ થાય. પ્રતિક્રમણ સમજીને થાય તો, અઈમત્તાના જેવો પણ લાભ મલે. પૌષધ સમજીને થાય તો ચંદ્રાવતંસક રાજાને અર્ધા પૌષધમાં દેવલોક જેવું અને કેવલજ્ઞાન સુધીનું ફલ મલે છે.

**પ્રશ્ન**–સ્કુલો, બોર્ડિંગો, હાઈસ્કુલો, કોલેજોમાં પૈસા અપાય તે જ્ઞાનદાન કહેવાય ને?

**ઉત્તર**–જેમાં પરલોકની વાત જ ન હોય–જેમાં હજારો હિંસાના પ્રયોગો, મત્સ્ય ઉદ્યોગ, કુકડાંનો ઉછેર, કતલખાનાંઓની યોજનાઓ, આવું બધું ભણનાર–ભણાવનાર કે સંચાલકો કર્તવ્ય માનીને વિકસાવતા હોય. આવી કેળવણી જ્ઞાનદાન કેમ કહેવાય? જ્ઞાન દાન તો તે કહેવાય. सर्वज्ञेन जिनेनाप्ते–नागमो भणितो त्र यः ।

सम्यग्ज्ञानं भवेत् तच्च, परलोकैकसाधनं ॥१॥
तद्ज्ञानमेव नैव स्याद्, येन रागादि पोषणं ।
तिमिरौघं न यो हन्ति, स सूरः कथमुच्यते ॥२॥
मिथ्याज्ञानं समस्तं तद्, इहलोकोपयोगि यत् ।
राग–द्वेषादयो यस्मात्, प्रवर्धन्ते शरीरिणाम् ॥३॥

**અર્થ :– જ્ઞાનદાન અને અજ્ઞાનદાનની સ્પષ્ટતા.** જે સર્વજ્ઞ આપ્ત જિનેશ્વર દેવોએ પ્રકાશેલ આગમો કહેવાય છે. તે બધાં સમ્યગ્જ્ઞાન જાણવાં. કારણ કે જૈનાગમો વડે જીવ–અજીવ, પુણ્ય–પાપ, આશ્રવ–સંવર આદિ સમજાય છે. માટે પાપો ઘટે છે.

સિવાય રાગ–દ્વેષ–ક્રોધ–માન આદિ દૂષણોને પોષણ આપે. હિંસાદિ હજારો પાપોને વધવામાં સહાયકતા મલે, તેને જ્ઞાન કેમ કહેવાય? અંધકારનો નાશ થાય નહીં તો સૂર્યનો પ્રકાશ કેમ કહેવાય? અહીં જ્ઞાન સૂર્ય સમાન છે. જ્ઞાન આવે અને પાપો ઘટવાં

શરૂ થાય "ઉદય થાય સવિતા તણો, અંધકાર ક્ષય થાય. ।
ઘટમાં પ્રકટે જ્ઞાન તો, ન રહે પાપ જરાય" ॥ ૧ ॥ પરલોક સુધારે તે જ સમ્યગ્જ્ઞાન સમજવું.

કેવળ આલોક-વર્તમાનકાળને સુધારવા માટેનાં અપાતાં જ્ઞાનો, વિજ્ઞાનો, તે બધાં જ અજ્ઞાનછે-મિથ્યાજ્ઞાન છે. જેનાથી હિંસા વિગેરે પાપો વધે છે.

**પ્રશ્ન**—આ કાળમાં કે સર્વકાળમાં વ્યવહારિક જ્ઞાન વિના ચાલતું નથી ને?

**ઉત્તર**—વ્યવહારિક જ્ઞાન ભૂતકાળમાં પણ અપાતું હતું. જેને જરૂર પુરતું લોકો ભણી લેતા હતા. જે ભણવામાં એક વિદ્યાર્થીને સાત ચોપડી ભણે તો પણ પચ્ચાસ રૂપિયા ખર્ચ લાગતું નહી. સો બસોની વાર્ષિક આવકમાં કુટુંબો સુખમય નિર્વાહ કરતાં હતાં.

**પ્રશ્ન**—પરંતુ તે કાળમાં વર્તમાન કેળવણી હતી નહી ને? માણસો આટલા હુશિયાર નહોતા, આગળ વધેલા પણ નહોતા, એમ ખરૂં ને?

**ઉત્તર**—વર્તમાત કેળવણીથી કશો લાભ થયો નથી. પણ સમગ્ર દેશમાં બેકારો વધ્યા, નફટાઈ વધી, ખૂન વધ્યાં, આત્મઘાત વધ્યા, અકસ્માતો વધ્યા, લાંચો, રૂશ્વતો, ગુંડાગિરી વધી, નિર્લજ્જતા વધી, અનાચારો-કુછંદો વધ્યા, માતાપિતા, વડીલોની શરમ-આજ્ઞા અદૃશ્ય થયાં, લગભગ ઘરડાં માબાપો નિરાધાર બન્યાં.

**પ્રશ્ન**—પરંતુ સાધનો ખૂબ વધ્યાં. રોગ ચિકિત્સા વધી. કમાણીનાં સાધનો વધ્યાં.

**ઉત્તર**—સાધનો વધ્યાં તેથી લાખો કુટુંબો બેકાર થયાં. વચલા થરના ઉચ્ચ કુટુંબના હજારો કુટુંબો આવકના અભાવે ખર્ચામાં ડૂબીને નીચોવાઈ ગયાં છે.

અમે આ જે લખી રહ્યા છીએ, તે ધર્મનો પક્ષ લેઈને વર્તમાન કેલવણીને ઉતારી પાડવા લખતા નથી. પણ આજના આંકડાશાસ્ત્રીઓ અને વર્તમાન ભારતનો અનુભવ પામેલા તટસ્થ મહાશયોના લેખોના અભિપ્રાયો જ લખીયે છીયે.

ચિકિત્સાઓ વધી નથી પણ ખોવાઈ ગઈ છે. ૫૦–૬૦ વર્ષ પહેલાં ડોકટરો લગભગ હતા નહી. માટે રોગો પણ આટલા હતા નહી, ડોકટરો વધ્યા માટે રોગો વધ્યા છે. ૫૦ વર્ષો પહેલાં ઠીક પ્રમાણમાં વૈદ્યો હતા. નાડી જોઈ મૂત્ર–વિષ્ટા જોઈ લેતા. અને નિદાન કરતા. નાડી જોઈ રોગને ઓળખી લેતા અને રૂપીયા બે રૂપીયાની દવામાં રોગીને નિરામય–રોગમુક્ત બનાવતા હતા. રોતા આવેલા રોગી હસતા ઘેર પહોંચતા હતા.

ભૂતકાલ ૫૦–૬૦ વર્ષ પહેલાં ભારત ભરમાંથી એકઠા કરાય તો પણ બહુ થોડા ડોકટરો ભેગા થાય. આજે ગામડે ગામડે ડોકટરોની દુકાનો ખોલાઈ છે. **સુવાની રાખ** અને **અજમાની ફાકીથી** પેટનો દુઃખાવો મટી જતો હતો. આજે પેટના રોગીઓ ડોકટરો પાસે જાય તો ૧૦૦ ની નોટ તો થાય જ. આજે ભારત ભરમાં લાખો ડોકટરો બીરાજમાન છે. લાખો નવી પરીક્ષાઓ આપી રહ્યા છે. અને લોકોની બેકારીમાં મદદગાર બની રહ્યા છે.

૬૦ વર્ષ પહેલાં ગરીબોને વૈદ્યોની જરૂર પડતી નહી. કારણ કે ઘર દીઠ અને માણસ દીઠ પરિશ્રમ હતો. ઘરનો નારીવર્ગ અનાજ જાતે દળતો, પાણી જાતે ભરતો, ઘેર ઘેર ગાયો–ભેંસો હોય જ. વલોણું જાતે કરવાનું. આવા પરિશ્રમી માનવોને રોગ આવે કેમ? વળી ઘેર ઘોડા, ઊંટ કે બેલગાડી ન હોય તેવા માણસો પગે મુસાફરી કરતા. થોડું વજન પણ એક ગામથી બીજે ગામ ઉપાડી લાવતા હતા.

આજની સાધન સામગ્રીથી સુખ વધ્યું નથી, પણ આરોગ્ય ખોવાઈ ગયું છે, પામરો પણ ચક્કીમાં દળાવીને જમે છે. પાણીના ઘેર ઘેર નળ થઈ ગયા છે. ગામડે ગામડે નળ થવાથી મજુર વર્ગોની મજુરી ઝૂંટવાઈ ગઈ છે. લાખો નહી પણ ક્રોડોની સંખ્યામાં ગાયો ભેસો, બકરી, ઘેટી કપાઈ ગયાં. તેથી મધ્યમ વર્ગના અને શ્રીમંતોનાં ઘરમાંથી વલોણાં ગયાં દુધ-દહી છાશનાં સ્વપ્ન પણ ભુલાઈ ગયાં,

ગરીબોની મજુરી ગઈ. મધ્યમ અને શ્રીમંત કુટુંબોના ઘરમાંથી પરિશ્રમ-કસરત ગઈ. રોજે રોજનો આટો-લોટ ખોવાયો. ચોખ્ખું કુવાઓની સરવણનું પાણી અદશ્ય થયું. દૂધ-દહીં અને ઘી-નવું-તાજું-ભેળસેળ વગરનું-ઘરનું કિંમત વગરનું. અગર અલ્પ કિંમતનું પણ ચોખ્ખું અને પૌષ્ટિક ખાનપાન ગયું.

ઘીની જગ્યા ડાલ્ડાએ લઈ લીધી. દુધ-તદ્દન ખોટું-બે ત્રણ ચાર દિવસનું-પાણી-ચરબી પાવડરના ભેળસેળવાળું. તદ્દન સ્વાદ અને કસ વગરનું મળે છે. જે આદમી ઘરની ભેંસ ગાય-સિવાયનું દુધ-દહી-છાશ-ઘી ચાખતો નહી. તેને આજે બકરીનું-ઘેટીનું-સુંડીનું કે અમેરીકન પાવડરનાં દુધ-દહીં-છાશ ખાવાં પડતાં હશે.

ગામડાઓના વેપાર ધંધા, અને મજુરી ખોવાયાં. તેથી લોકો ઘરબાર ગામડાં અને મધ્યમ વર્ગનાં શહેરો છોડી છોડીને મુંબઈ-કલકત્તા-મદ્રાસ-દિલ્લી અમદાવાદ જેવી મોટી નગરીઓમાં ભરાવા લાગ્યા. ગામડાંઓનાં ઘરો પડી ગયાં. શહેરોમાં રહેવા જગ્યા જ મળતી નથી. ઝુંપડા અને ફુટપાયરી પણ મોંઘાં પડે છે.

દેશી ખાણું-તાજું ખાણું ખુલ્લી હવા-મોકળાશનો વસવાટ-આમજીવન-નિર્ભય વસવાટ-ગરીબોનું બધું જ ઝુંટવાઈ ગયું. અને બીચારા નોકરી મજુરીનાં ફાંફાં મારતા શહેરમાં ફુટપાયરી ઉપર પડ્યા રહી, દિવસો-મહીનાઓ નહી વર્ષો વિતાવી રહ્યા છે. અને કંગાલ દશા ભોગવી રહ્યા છે.

ચાલીશ; પચાશ, સાઈઠ વર્ષ પહેલાં ૧ા રૂપીયે, ૧ાા રૂપીયે એક મણ ઘઉં મળતા હતા. રૂપીયે મણ બાજરો ૦ાા-બાર આને મણ જુવાર, મગ, મઠ, ચોળા ૧ા-૧ાા રૂપીયે એક મણ મળતા હતા. ગવાર-કપાસીયા રૂપીયે-બાર આને એક મણ મળતા હતા.

ઘી એક રૂપીયે ચાર રતલ, તેલ રૂપીયાનું આઠ રતલ, દૂધ શુદ્ધ ભેંસનું ૧ાા રૂપીયે મણ. રાા કાવડીયે શેર-રતલ ગાયનું, બે પૈસે બકરી ગાડરનું દૂધ, એક પૈસે રતલ મળતું હતું. છાશ તો વગર પૈસે. પુષ્કળ મળતી હતી. શ્રીમંતો કે ગરીબો બધાને ઘેર ભેંસ-ગાય છેવટ બકરી પણ રાખવાનો રીવાજ હતો.

ધોતી જોટાનો ૧ાા રૂપીયો, પેરણ ૦ા- અગર ૦ા- માથાના ફેંટા-બે-અઢી-ત્રણ રૂપીયામાં મળતા હતા. ટોપી પહેરનારા અને ખુલ્લા-મસ્તકવાળા તે કાળમાં હતા નહીં. હજામતનો પૈસો-બે પૈસા લાગતા હતા. લીલાં શાક બે પૈસે રતલ: લોટમબધ વેચાતાં હતાં, પણ ગામડામાં ખપે નહી માટે શહેરમાં વેચવા જવું પડતું હતું.

ચાર-પાંચ માણસના મધ્યમ વર્ગના કુટુંબોને વાર્ષિક ૨૦૦) ની આવક સુખમય ગણાતી હતી. સારા-એકદમ હુશીયાર મુનિમોને જ માત્ર ૩૦૦, વાર્ષિક પણ ઘણા લાગતા હતા. મહીને બે રૂપીયાથી નોકરી કરનારા પણ મળી જતા હતા. પોલીસના પગાર રૂા. આઠ-નવ-દશ છેવટ ગણાતી હતી. અમલદારને ૧૨ અને ૧૫ મલતા હતા.

સાચું ગયું અને, બનાવટી કૃત્રિમ આવ્યું. આવી રહેલ છે. કુલપરંપરાનાં રાજ્ય હતાં. પ્રધાનો, સેનાપતિઓ જેવા રાજ્યના મોટા અધિકારી કેળવાયેલા અને પરંપરા એટલે બાપદાદા પાસેથી અનુભવ પામેલા રહેતા હતા. તેમને મારું રાજ્ય, મારો દેશ, મારી પ્રજા આવો પાવર હતો: નીતિ ખૂબ હતી.

આજે બધામાં કૃત્રિમતા આવી ગઈ છે. પ્રધાનો દરસાલ નવા

પાંચ વર્ષે બદલાય છે. એટલે જે આવે તે અજાણ્યા, વગર કેળવાયેલા-સૌ પોતાનાં ખીસાં ભરવા આવેલા. ક્રોડો રૂપીયા ચૂંટણી માટે લાંચો અપાવીને ચૂંટાઈ આવેલા. બીજીવારની ચૂંટણીમાં ચૂંટાવા માટે લૂંટાય તેટલું લૂંટવાના ધ્યેયવાળા હોય છે.

**પ્રશ્ન** :– પહેલાંના કાળમાં પણ દેશમાં વહેવારૂ ભણતર તો હશે જ ને–તે પણ કેળવણી તો ખરીને!

**ઉત્તર** :– પહેલાંના કાળમાં ભણતર હતું. તેમાં ખર્ચો હતો જ નહીં. એક છોકરાનો સંપૂર્ણ ભણે ત્યાં સુધીના ૧૦ રૂપીયા પણ ખર્ચો આવતો નહીં. તે આર્ય ભણતરમાં સદાચાર, શરમ, શાહુકારી, સાદાઈ, સંપ-સ્નેહ–આવા ગુણો જ મેળવવાનું શિક્ષણ મળતું હતું.

આજના ભણતર પછવાડે માતાપિતા ગરીબ હોય તેમની તો મુશ્કેલીઓનો પાર નથી. જેમને બે–ત્રણ-ચાર સંતાનો હોય તેવા પણ બીચારા શાન્તિનો શ્વાસ લઈ શકતા નથી. દાખલ કરવાની મુશ્કેલીઓ, ડોનેસનો, વાર્ષિક ફી, પુસ્તકો, લુગડાં વિગેરેના બોજા ઉપાડીને બીચારા ગરીબો વાંકા વળી ગયા છે, અને ઘેરઘેર ભીખ માગીને બાળકોને ભણાવનારા માબાપો, તે તે પોતાના ભણેલા નમીરાઓ પાસેથી પણ સુખનો સ્વાદ પામ્યા નથી.

આજની કેળવણી બાળકો અને બાળાઓ સાથે બેસી ભણવાના રીવાજો. ભારત જેવા સદાચારી દેશને કલંકરૂપ બન્યા છે, બનવા લાગ્યા છે. વાણીયા, બ્રાહ્મણ જેવા ઉચ્ચ કુટુંબોની પુત્રીઓ, ઢેઢ–ભંગી-મુસલમાનોને પરણી ગઈ છે. આવાં પરિણામ આ ચાલી રહેલી અનાર્ય કેળવણીના પ્રતાપે જ બનવા લાગ્યાં છે.

"મોટા કુલની માનિની, વિણ કારણ ઘરબાર;
કદી જાય નહિ એકલી, એવો હતો વહેવાર."
"તમામ નારી જાતમાં, લજ્જા–શરમ અપાર;

મસ્તક-મુખ-સ્તન ઢાંકીને, નીકળે ઘરની બહાર."
"પતિ-માત ને તાત વિણુ, ન કરે અન્યનો સાથ;
વય પામેલી દીકરી, ગ્રહે ન અન્યનો હાથ."
"પતિ વિણુ સતી રહે નહીં, બીજા નરની સાથ;
ક્ષણુ ભરની એકાન્ત પણુ, શીલ-ગુણુ કરે વિનાશ."

આ છે આપણી જુની આર્યસંસ્કૃતિ. ભૂતકાલના પાઠકો, અધ્યાપકો પણુ આર્યસંસ્કૃતિને લક્ષમાં રાખીને જ કેળવણી આપતા હતા. જેમાં માતા-પિતા, વિદ્યાગુરૂ, વડીલો અને ધર્માચાર્યોના વિનયો સચવાતા હતા. કુટુંબ, જ્ઞાતિ, પાડોશી કે ગ્રામવાસી સાથે સ્નેહ અને સંપથી રહેવાનું સુખમય હતું. વિનય-વિવેકની મુખ્યતા ખૂબ હતી.

આજે હજારો સંસ્થાઓ-હજારોવાદો-હંમેશ ઝગડા-આંદોલનો-સરઘસો, તોફાનો, લૂંટો ચાલુ જ રહે છે. હમ્મેશ છાપાઓમાં પાંચ-દશ-પચીસ ઠેકાણે આગો, લૂંટફાટો, ગોળીમારો, કરફયુ. આવી વાતો આ કેળવણીના પ્રતાપે હમ્મેશ સાંભળવા મળે છે. કેટલીયે શાળાઓ બાળી નાખી. કેટલાય અધ્યાપકોના અપમાન થયાં. માર પડી સળગાવી નાખ્યા.

એટલે આઝાદી આવ્યાનું બોલનારા ભાઈઓ. પોતે ધ્યાન પૂર્વક વિચારશે તો સમજાશે કે, ધનવાનો વધારે ધનવાન બન્યા છે. સિવાય તો પોલીસથી માંડીને પ્રધાનો સુધી જેમને કમાતાં આવડયું તે ધનવાન થયા છે અને મોટા ભાગના ડૉકટરો માલદાર બન્યા છે, બની રહ્યા છે. બાકી સમાજ તો ખૂબ ઘસાયો છે. ઘસાઈ રહ્યો છે.

તેમાં પણુ સંતાનો વગરના, મધ્યમ કક્ષાના, નવી કમાણી વગરના. હજારો નહી લાખો ડોસા-ડોસીઓ બીચારાં અનાજ અને વસ્ત્રો માટે પૂરી લાચારી ભોગવી રહ્યાં છે.

આજથી ૫૦।૬૦ વર્ષ પહેલાં આર્યદેશના રૂઢ રીવાજો જ હતા કે–નારીજાતિ ભલે પછી તે પુત્રી હોય કે વધૂ હોય, ભગિની હોય કે માતા હોય પણ ઘરબાર નીકળે તો માથે ઓઢવાનું. વહુઓ–ને અવશ્ય લાજ કાઢવાની. મુખ, મસ્તક ને સ્તન ત્રણે નારીજાતિના મોહક અંગો છે. માટે ઢાંકીને બહાર જવાય.

આજે લગભગ નારીવર્ગ ઉઘાડા મસ્તકે ફરવામાં પોતાને ભાગ્યશાળી માને છે. માથું ખુલ્લું, મુખ ખુલ્લું, પાછળનો કેટલોક ભાગ ઉઘાડો, છાતિ, પેટ પણ લગભગ ઉઘાડાં રાખીને ચાલવામાં સારા–કુલ ખાનદાન કુટુંબોની બહેનોને પણ શરમ લાગતી નથી. આ ખરેખર આ કાળની કેળવણીનો જ પ્રતાપ સમજાય છે.

એટલે જે આર્યદેશની ભૂતકાળની કેળવણી, ભણતર હતું. તે મોટા ભાગે ધર્મના અને નીતિના સિદ્ધાંતોની પૂરવણી રુપે હતું. અને આ કાળની કેળવણીએ તો ધર્મને–નીતિને અને સમાજોના બંધારણોને પણ મોટું નુકશાન પહોંચાડયું છે. આર્યદેશને અને આર્યકુલોને, ન શોભે તેવી, હજારો ગેરરીતિઓ શરૂ થઈ ગઈ છે.

જ્ઞાનદાનના વર્ણનમાં જ્ઞાન કોને કહેવાય–તે સમજવા માટે આટલી વાતો કહેવી પડી છે. શાસ્ત્રકારોના શબ્દથી પણ જ્ઞાન–અજ્ઞાનના ભેદ સમજી શકાશે.

**तज्ज्ञानं द्विविधं–मिथ्यासम्यग् भेदद्वयेन च ।**
**रागद्वेषकरं यच्च, मिथ्याज्ञानं तदुच्यते ॥१॥**

**અર્થ** :– તે જ્ઞાન બે પ્રકારે છે. મિથ્યાજ્ઞાન અને સમ્યગ્જ્ઞાન. જે જ્ઞાનથી રાગ–દ્વેષો વધે. હિંસા, અસત્ય વધે, ચોરી, લુચ્ચાઈ શિખવાડે, કામશાસ્ત્ર સમજાવે. આવાં બધાં જ્ઞાન આભવ, અથવા અલ્પકાળ માટે સારાં લાગે પણ, દુર્ગતિની સગવડ પૂરી પાડનારાં છે.

**પ્રશ્ન :–** જ્ઞાનને તો ચક્ષુ કહ્યું છે તે દુર્ગતિ કેમ લઈ જાય?

**ઉત્તર :–** જે જ્ઞાનથી આજે એટમ બોમ્બ, હાઇડ્રોજન બોમ્બ બન્યા છે. તેણે લાખો માનવીઓ અને પશુઓના પ્રાણ લીધા છે. આવાં ભયંકર શસ્ત્રો બનાવનારને કેટલું પાપ લાગ્યું? આવાં જ કતલ કરવાનાં હથિયારો, માછલાં પકડવાનાં–સાધનો, કૂતરાંને, માંકડ, મચ્છરને મારવાની દવાઓ, ઉંદરને મારવાની દવા, પકડવાનાં પાંજરાં, આવું શિખવનારને–તે તે પ્રાણીઓના નાશનું પાપ લાગે છે. ભયંકર શ્રાપો લાગે છે.

**પ્રશ્ન :–** ઉંદરડા ઘરની વસ્તુ ખાઈ જાય, તેમને પકડી બહાર મૂકવામાં પાપ શું?

**ઉત્તર :–** ઉંદરડી વીયાણી છે. તેને ખૂબ ક્ષુધા લાગી છે. તે ભક્ષ્ય શોધવા નીકળી છે. તમે તેને પકડી બહાર મૂકી આવ્યા તેનાં બચ્ચાં ભુખે મરી જશે. ઉંદરડા બહાર મૂકાય ત્યાં સમળી, કાગડા, બગલાં, ગીધડાં તુરત ઉપાડી લઈ જઈ તેઓને ખાઈ જાય છે. માટે આવાં પાંજરાં, જાળો, હથિયારો, તલવારો, બંદુકો, ભાલા વિગેરે પ્રાણીઓના નાશક પદાર્થો બનાવનારાઓને મહાપાપ લાગે છે. જૈનાગમો આવાં હિંસક સાધનોને કર્માદાન ગણાવે છે.

નવી કેળવણી આવી–તેમાં લગભગ ક્રિશ્ચિયન વહેવારો વધી રહ્યા છે. નારીજાતિના પહેરવેશ મોટી મોટી બાળાઓ સાથળ દેખાય તેવાં વસ્ત્રો પહેરે છે. યુવતી બહેનો મોટા ભાગે ઉઘાડાં અંગો, ખુલ્લાં મસ્તક રાખીને ચાલે છે. હિંદુ સમાજની લજ્જા, શરમ ખોવાઈ ગઈ છે. સાસરા, સાસુ, જેઠ, દિયર અને પતિની હાજરીમાં લજ્જાનો અભાવ દેખાય છે. આ બધું નવા જમાનાને આભારી છે.

પુરુષોની મૂછો ખોવાઈ ગઈ. ૫૦ વર્ષના સજ્જન ગૃહસ્થો સેંથા, પાટલુન, સૂટ પહેરતા થઈ ગયા છે. માતા–પિતા, બા–બાપુજી–

આઈ-પિતાજી શબ્દો સાવ અદૃશ્ય થયા છે. માતાને મમ્મી, પિતાને પપ્પા લગભગ શબ્દો રૂઢ થયા છે.

વીર નિર્વાણ સંવત્સર અને વિક્રમ સંવત્સર જેવા આપણા સંવત્સરોને લોકો ભુલવા લાગ્યા છે. ૨૦૨૮ ની સાલના જાણકાર ૧૦ । ૨૦ ટકા દેખાતા નથી. ત્યારે ૧૯૭૨ અને ઓગષ્ટની તારીખો ૮૦ । ૯૦ ટકા બોલતા સંભળાય છે. ચોપડાઓ અને પત્ર વહેવારમાં ઈશુનો સન વ્યાપક બની રહ્યો છે. બની ગયો છે.

દુકાનો ઉપરના પાટીયાં પણ ઇંગ્લીશ જ મૂકાય છે. દવાઓનાં નામ પણ ઈંગ્લીશ વપરાય છે. રોગ મટાડનારા અને ઔષધ આપનારા વૈદ્યો હતા. તેમનાં પણ નામો બદલાયાં, ડોક્ટરો કહેવાય છે. આપણા દેશમાં બનતી ઔષધિઓ પણ ઈંગ્લીશ પદ્ધતિએ બનાવાય છે અને અંગ્રેજીમાં જ ઓળખાય છે.

મણ-શેર-તોલા શબ્દો ખોવાઈ ગયા. તેનું સ્થાન કીલો-લીટર વિગેરેમાં ફેરવાઈ ગયું. વાર અને ગજ, હાથનું કાપડનું માપ ગયું. હવે મીટર ચાલે છે. ગાઉ, માઈલ, યોજન ગયાં. કીલોમીટર થયાં. ઔષધોમાં જૈનોને હિંદુઓને અને આર્યોને અડવામાં પાપ લાગે તેવી દવાઓ લગભગ ઘેર ઘેર પેઠી છે.

૫૦ વર્ષ પહેલાં માંસભટન-કસાઈને ઘેર મલતું હતું મદિરા-કલાલની દુકાને વેચાતી હતી. આવા રસ્તે ચાલનારા પણ શરમ અનુભવતા હતા. આજે જીવતા જીવોની કતલ થયા પછી, નીકળેલી ચરબી ઉત્તમ કુલના ખાનદાન મહાશયોની દુકાનોમાં આવવા લાગી છે.

માંસ-મચ્છી વિગેરેની હિંસાથી-પ્રાણીઓના નાશથી ઉત્પન્ન થયેલી વસ્તુઓ જોઈને, જેમને સૂગ થતી હતી, ધૃણા આવતી હતી, આઘાત થતો હતો. આ કાળમાં આવી બનાવટોનાં પેકીંગો દવા વેચનારા નિઃશંકપણે ખરીદે છે, વેચે છે.

જરથાબંધ ચરબીના ડબ્બાઓ મંગાવે છે. સાબુ બનાવાય છે. અને જીવદયાના હિમાયતી મહાશયો રોક–ટોક કે શરમ–ત્રાસ વગર પરખે છે, ખરીદે છે અને અનેક બનાવટોમાં ભેળવીને વ્યાપાર કરે છે.

વર્તમાનકાળમાં ઘણા આર્ય કુટુંબના ભાગ્યશાળી મહાશયોને હિંદુસ્તાનના રીત રીવાજોની ખબર પણ નથી. પરંતુ ક્રિશ્ચિયન રીત રીવાજોની અસર વધતી જાય છે. દવાખાનાઓમાં ડોકટરો–નરસો–(ખ્રિષ્ટરો) ના પહેરવેશ અને વર્તન લગભગ હિંદુસ્તાનનું ગયું અને પરદેશનું આવ્યું છે, ફાલ્યું ફુલ્યું ઝળકે છે.

ટ્રેઇનોની મુસાફરી કરનારાઓ પાસે મચ્છીના ટોપલાવાળાને કે મટનના વાપરનારાને લગોલગ બેસવા નિષેધ કરી શકાતો નથી. ઢેઢ–ભંગી જ પાણી પાનારા હોવા જોઈએનાં સમર્થન વધ્યા છે. જ્ઞાતિ ભેદ બતાવનારા સરકારના ગુનેગાર લેખાય છે. પ્રાણિ માત્રની દયાના ઉપાસકો આપણે ભૂલા પડ્યા છીએ.

સરકારી ન્યાય–નીતિઓ અને કાયદાઓ ભૂતકાળમાં ધર્મની મુખ્યતાવાળા હતા. આજકાલના કાયદાઓએ પણ પરદેશનું વલણ પકડવા માંડયું છે. કલ્યાણકો અને સ્વર્ગવાસની ઉજવણીની જગ્યાએ જયંતીઓ ઉજવાવા લાગી છે. પોતાની પરંપરાના અનુષ્ઠાનો છોડીને પ્રાર્થનાઓ પ્રારંભાઈ છે.

હિંદુધર્મ અને જૈનધર્મના રીત રીવાજોમાં પણ ક્રિશ્ચિયન રીવાજો પેસવા લાગ્યા છે. માનવ સેવા તે જ પ્રભુસેવાના ક્રિશ્ચિયન સૂત્રનો પ્રચાર વધ્યો છે.

**પ્રશ્ન** :– પ્રભુસેવા કરતાં મનુષ્ય સેવાનું ફળ મોટું છે. એમ નહીં ? જેને સેવાની જરૂર નથી તેની સેવા કરવાની શી જરૂર ? જે

દુઃખિયા હોય તેનું દુઃખ મટાડવું એ વધારે લાભ ન કહેવાય? પ્રભુની અર્ચના અને ગરીબોની સેવા, આ જ સાચો ધર્મ શું ન કહેવાય?

ઉત્તર :– સેવા અને સહાય એ વસ્તુ તદ્દન જુદા છે, નિરાળાં છે. જૈન ધર્મમાં એકે વહેવારનો અનાદર નથી. માટે જ અભયદાન, સુપાત્રદાન, અનુકંપાદાન, ઉચિતદાન, કીર્તિદાન, જ્ઞાનદાન, અન્નદાન, ઔષધદાન, ગુણાનુરાગ, વૈયાવચ્ચ–આવા બધા જ માર્ગો બતાવ્યા છે. એકને પણ અનાદર નથી બધાને આદર મળ્યો છે.

ભૂત અને વર્તમાનકાળના જૈનોએ એક પણ ધર્મના (ઉપર બતાવેલા) અંગનું અપમાન કર્યું નથી. પરંતુ વખતો–વખત ઈન્સાફ આપ્યો છે. અહીં કુમારપાલ, વસ્તુપાલ–તેજપાલ, પેથડશાહ, જગડુશાહ, ભામાશાહ, રાજીયા–વજીયા પારેખ બાંધવ–બેલડી વિગેરે મહાશયો દ્વારા દુષ્કાળો ઉતરાવ્યાના રાજા અને રંકને યથાયોગ્ય ન્યાય આપ્યાના દાખલા આપણા ઇતિહાસોમાં ભર્યા પડ્યા છે.

મનુષ્ય સેવામાં પણ સાથે જમવા બેઠેલા શેઠ–નોકરને, ખાન–પાન સમાન અપાય પણ માનનો ભેદ અવશ્ય હોવો જોઈએ. તેમ ગુણ અને ગુણી આત્માઓ અને બીચારા ગરીબોના આદરમાં ભેદ હોય જ. કોઈની સેવા થાય, કોઈને સહાય અપાય. શેરડી અને એરંડા બંનેને ઓળખવા તો જોઈએ જ. આંબાનો બગીચો અને ગવારનું ક્ષેત્ર બન્નેને પોષણ આપવાની ના ન હોય પણ પાત્રતા બન્નેની જુદી છે જ.

પરંતુ વર્તમાન કેળવણીમાં ગુણદોષની ઓળખાણ તજાવી છે. સુપાત્રો ભુલાણા માટે સુપાત્રદાન કરતાં માણસ સેવા આગળ આવી છે. આવા આર્યોના રીવાજો હતા નહી. પરંતુ ક્રિશ્ચિયન કેળવણીનો પ્રતાપ છે. અહિંસાને બોલવામાં વપરાય છે, પણ મુંગા જીવોના પોકાર સાંભળવા લક્ષ ખોવાયું છે.

અમેરિકા, ઇંગ્લેંડ, જર્મન, રશિયા, વિગેરે યુરોપીયન દેશો, ચીન, જાપાન, બર્મા વિગેરે. બૌદ્ધ દેશો અને તુર્કસ્તાન, અરબસ્તાન, ઇરાક, ઇરાન વિગેરે. મોમેડન દેશો આવા બધા દેશો લગભગ હિંસા મુક્ત નથી. મટન-મચ્છીના ખોરાકમાં સૂગ નથી. નજરે દેખાતા પ્રાણીઓના વધને જોઈને ત્રાસ નથી, દયા નથી.

વર્તમાન કેળવણીએ આવા દેશોનો સહકાર વધાર્યો છે. ભારતના હજારો યુવાનો-યુવતીઓ અને ઘરડાઓ ઉપરના દેશો જોવા જાય છે, શિખવા જાય છે. પોતાના દેશના જ્ઞાતિના કુટુંબના અને ધર્મના સંસ્કારો મૂકી આવે છે અને તે તે દેશોના સંસ્કારો લેતા આવે છે.

માટે જ હિંસા, અસત્ય, ચોરી, લુચ્ચાઈ, નફટાઈ વેગ પકડી રહ્યાં છે. શીલવ્રત, સદાચાર, બ્રહ્મચર્ય, પતિવ્રતાધર્મ, શરમ-લજ્જા લગભગ નાશ પામ્યાં છે: આવું બોલનારા કે આચરનારા જુનવાણી કે વેદિયા લેખાય છે. ભક્ષ્યાભક્ષ્યના વહેવારો ગયા. માંસ-મદિરા આર્યોને ખપે નહી. તે હવે પુસ્તકોમાં જ રહ્યું છે.

જૈનો પન્નર કર્માદાનો છોડનારા હતા, હોય છે. પરંતુ પરદેશી રાજ્યો આવ્યાં અને ભારતમાં યંત્રવાદ આવ્યો. જિનો, પ્રેસો, મીલો-નાનામોટા અનેક જાતનાં કારખાનાં થવા લાગ્યાં, ત્યારથી કર્માદાનની હિંસા લોકો જાણતા જ નથી. માટે જ વસ્ત્રોની મીલોમાં સાબુ વિગેરેના ઉત્પાદનો પાછળ લાખો ટન જીવતા જીવોની ચરબી રોક-ટોક અને સંકોચ વિના વપરાય છે.

વર્તમાન કેળવણી નથી પણ કૃશ્ચિયનવાદ છે. અંગ્રેજોએ કૃશ્ચિયન વાદનાં બીજ વાવ્યાં અને હિંદુસ્તાનની સરકારે તેમાં ખૂબ પાણી છાંટયું. અંગ્રેજોની સત્તા ગઈ પરંતુ અંગ્રેજોના સંસ્કાર ખૂબ વધ્યા. અંગ્રેજો પોતે ગયા પણ તેમની ભાષા, તેમનો પહેરવેશ-તેમની રેણીકેણી ખૂબ ફાલ્યા છે.

હિંદુસ્તાનની અસલ ધાતુઓ, સોનું, ચાંદી, કાંસું, તાંબું, પિત્તળ, તરવું જસત હિંદુસ્તાનમાં લાખો ટન હતી. બધી અદૃશ્ય થઈ. કાંસું અને તાંબા પિત્તળનાં વાસણો વેચીને લોકોએ લોઢાની બનાવટ સ્ટીલને અગ્રસ્થાન આપ્યું છે.

હિંદુસ્તાનની ધાતુઓના ફુટયા પછી ટુકડાઓના પૈસા ઉપજતા હતા. પરદેશથી આવેલી સ્ટીલ અને એલ્યુમેન નકામાં બને છે. પાઈ ઉપજતી નથી. આ બધા કેળવણીના સંસ્કારો જાણવા.

અન્નદાન પણ દિવસે અપાય, એઠવાડ વિનાનું, સડેલું, બગડેલું ન હોય અને આદર બહુમાનથી અપાય તો સુપાત્રદાન અથવા અનુકંપાદાનનો લાભ થાય.

**પ્રશ્નઃ**— અન્નદાન ગમે ત્યારે ગમે તેને અપાય તો લાભ થાયને?

**ઉત્તરઃ**— સુપાત્રને અનુકંપા બુદ્ધિથી અપાય તો દોષ લાગે. અને અનુકંપ્યને સુપાત્ર બુદ્ધિએ અપાય તે પણ મહાદોષ લાગે છે. જેઓને રહેવા ઘર નથી, પહેરવા વસ્ત્ર નથી, ખાવા અનાજ નથી. એવા નિરાધાર, રોગી, અપંગ, આંધા, મૂંગા, પાંગળા, ઘરડાં જેમને જોઈ દયા, કરુણા, અનુકંપા જ થાય, તેવાઓને આપવું. આદર પૂર્વક આપવું, તે અનુકંપાદાન સમજવું.

અને ગુણના દરિયા હોય, ત્યાગી હોય, તપસ્વી હોય, નિષ્પૃહી હોય, રાગદ્વેષ રહિત હોય, બ્રહ્મચારી હોય, એવા તીર્થંકરદેવ, ગણધરદેવ યુગપ્રધાન, સૂરિભગવંત, સ્થવિર, વાચક, બહુશ્રુતને જે આપવું તે સુપાત્રદાન સમજવું. આવા સુપાત્રને પૂજ્ય બુદ્ધિથી જ અપાવું જોઈએ. તેને બીચારા, બાપડાની વિચારણા થાય નહી.

**પ્રશ્ન**:— સુપાત્રમાં અનુકંપા થઈ જાય તો દોષ કેમ લાગે?

**ઉત્તર**:— જેને જોઈને સ્વભાવથી જ બાપડા, બીચારા, રાંક, નિરાધારપણાની વિચારણા–ભાવના આવી જાય તે અનુકંપ્ય કહેવાય.

પણ ગુણી ઉપકારી પુરુષો માટે બાપડા, બીચારા એવો વિચાર લવાય જ નહી. માતાપિતા, વિદ્યાગુરુ, મોટાભાઈને પણ બાપડા, બીચારા કહેનાર કૃતઘ્ન ગણાય–તો પછી ગુણના દરિયા ધર્મગુરુઓ, મહાપુરુષો–ને બાપડા, બીચારા કેમ કલ્પી શકાય?

વાચકો સમજી શકે કે **शास्त्रं तदुच्यते शास्ति त्रायते च यदंहत** । શાસ્ત્ર શબ્દની વ્યુત્પત્તિ–અર્થ–શાસ્ અને ત્ર એ ધાતુ–ક્રિયાપદોથી શાસ્ત્ર શબ્દ બન્યો છે. એનો એવો અર્થ થાય છે કે અવળા માર્ગથી બચવાની શિખામણ આપે અને પાપમાર્ગથી પાછા હટવા, પાપોને ઓળખાવે, પાપોથી બચાવે, રક્ષણ આપે તે શાસ્ત્ર કહેવાય.

**પ્રશ્નઃ**– મોટા ભાગના લોકો તપને માને છે, તપ કરે છે, વર્ષીતપો કરે છે. છઠ્ઠ, અઠ્ઠમ, અઠ્ઠાઈ માસક્ષમણ મોટા મોટા તપ કરે છે. જ્ઞાનમાં એટલો આદર નથી એમ કેમ?

ઉત્તર :– **"જયણા જીવદયા અને, જિન આજ્ઞા અનુસાર;**
**તપસા સર્વ પ્રકારની, ઉતારે ભવપાર."**

જયણા, જીવદયા અને જિનઆજ્ઞા, જ્ઞાનવાન હોય તે જ સમજી શકે. અજ્ઞાની તપ કરે પણ આ ત્રણ વસ્તુને સાથે રાખે જ નહી તો, અજ્ઞાન કષ્ટ ગણાય છે.

આવાં અજ્ઞાનકષ્ટ, કમઠ, તામલિ, અગ્નિશર્મા વિગેરેનાં અલ્પ લાભ અથવા તો અલાભ અગર સંસાર વધારનાર પણ થઈ જાય છે. કહ્યું છે કે—

**बारसविहम्मि वि, तवे, सब्भिंतर–बाहिरे कुसलदिट्ठे ।**
**नवि अत्थिय नवि होइ, सज्झायसमं तवो कम्मं ॥ १ ॥**

**અર્થ** :– ૭ બાહ્ય અને ૭ અભ્યંતર. બાર પ્રકારના તપમાં પણ સ્વાધ્યાય મોટો તપ ગણાવ્યો છે. વાસ્તવમાં જ્ઞાન એ સર્વ ધર્મનો

પિતા છે. બધા ધર્મની ઓળખાણ જ્ઞાનથી જ થાય છે જ્ઞાન એ જ ધર્મ છે. અજ્ઞાન એ જ પાપ છે. જ્ઞાનથી જીવ-અજીવ પુણ્ય-પાપના ભેદો સમજાય છે. ધર્મની અતિ બારિકતા જ્ઞાનથી જ જણાય છે.

"સૂર્ય, ચંદ્ર, દીપક અને, પ્રકાશના સમુદાય;
જ્ઞાન પ્રકાશ વિણ એ બધા, ફલદાયક નવ થાય."
"સમ્યગ્જ્ઞાન આવ્યા પછી, વિવેકના સમુદાય;
આતમના મિત્રો બને, કર્મબંધ રોકાય."

માટે વાચના, પૃચ્છના, પરાવર્તના, અનુપ્રેક્ષા અને ધર્મકથા રૂપ, સ્વાધ્યાય આત્માનું અસાધારણ અવલંબન છે. મોક્ષ મહેલની નિસરણી છે. લડથડતા માણસને દોરડાની માફક ધારી રાખનાર, અવલંબન પણ વીતરાગની વાણી જ છે.

"દેશ આરાધક ક્રિયા કહી, સર્વ આરાધક જ્ઞાન."
ક્રિયાઓને સમજાવનાર પણ જ્ઞાન છે. ક્રિયાઓમાં રસ ઉત્પન્ન પણ જ્ઞાનથી થાય છે. ક્રોડ પૂર્વ સુધી ચારિત્ર પાલનારને, અતિચાર પણ લાગે નહિ, ત્યાં પ્રભાવ જ્ઞાનનો જાણવો.

ગર્વ લાવ્યા સિવાય બદલો લેવાની ઈચ્છા વગર હજારો વર્ષ ૫૦૦ મુનિરાજોની વૈયાવચ્ચ કરવા છતાં શ્રમ કે કંટાળો આવ્યો નહી. તે પ્રભાવ જ્ઞાનનો જાણવો. ધન્નાકાકંદી છઠ્ઠ-છઠ્ઠ તપના પારણે નિરસ વસ્તુઓથી પારણું કરતા હતા. પણ થાક્યા કે કંટાળ્યા નહીં. તે પ્રભાવ જ્ઞાનનો જ સમજાય છે.

નંદન મુનિરાજે એક લાખ વર્ષ માસક્ષમણો અને એક પારણું કર્યું. આવાં ૧૧-૮૦-૬૪૫ માસક્ષમણો કર્યાં. થાક્યા નહી, કંટાળ્યા નહી. ક્રોધ-માન-માયા-લોભ-ઈર્ષા કોઈ દોષ આવ્યા નહી. દુષ્ટ કર્મો ખપાવ્યાં અને તીર્થંકર નામકર્મ નિકાચિત થયું. આ પ્રભાવ સમ્યગ્જ્ઞાનનો જાણવો.

વલી પણ "नाणाओ दंसणं दंसणाओ चरणं" એટલે જ્ઞાનથી જ દર્શન–સમ્યક્ત્વ પમાય છે. અજ્ઞાની સમ્યકત્વ પામી શકે નહી. અને જ્ઞાનવાન આત્મા જ અતિચાર લગાડ્યા વિના ચારિત્ર આરાધી શકે છે.

**પ્રશ્ન**:– તો પછી આજકાલ ઢગલાબંધ અતિચારો લગાતાર લાગ્યા જ કરતા હોય તેવા બધા અજ્ઞાની જ કહેવાય કે?

**ઉત્તર** – વિના કારણ નિઃશંકપણે વર્તન થાય તો અતિચાર જ નહી પણ અનાચાર પણ કહેવાય. આવાં વર્તન માટે બળાપો–પશ્ચાત્તાપ પણ ન જ થાય તો અજ્ઞાની કહેવામાં કાંઈ વાંધો નથી. જ્ઞાની ભગવંતો ફરમાવે છે કે–

**सुहसीलाओ सच्छंदचारिणो वेरिणो सिवपहस्स ।**
**आणा भट्ठाओ वहु जणाओ मा भणइ संघुत्ति ॥१॥**

**અર્થ** :– સુખશીલીયા, સ્વચ્છંદાચારી, મોક્ષમાર્ગથી વિપરીત વર્તનવાળા, લગભગ આજ્ઞા વિરુદ્ધ વર્તનારા, ભલે મોટા પક્ષ તરીકે દેખાતા હોય તો પણ તેવાઓ સંઘ તરીકે પણ રહેવા યોગ્ય નથી. તો પછી જ્ઞાની તો કહેવાય જ કેમ?

**પ્રશ્ન** :– જૈન મુનિરાજો બધા જ આવા હોય એ કેમ બની શકે? કેમ માની શકાય?

**ઉત્તર** :– બધા જ મુનિરાજો પડવાઈ છે કે ગોરજી જેવા છે. અથવા આણાભ્રષ્ટ છે. એવું અમે કહેતા નથી. કેમ બોલી શકાય? આવું બોલનાર પણ મહાન ઉત્સૂત્રભાષી જ ગણાય. આજે પણ ખૂબ સારી આરાધના કરનારા સાધુ મુનિરાજો અને સાધ્વીજી મહારાજાઓ મોટી સંખ્યામાં વિચરી રહ્યા છે. જેમનાં દર્શન કરીયે તો આપણાં પાપો ધોવાય.

**પ્રશ્ન :–** તો પછી ઉપરની ગાથાનો અર્થ લાગુ પડે એવા પણ સાધ્વાભાસો હશે ખરાને?

**ઉત્તર :–** ઓછામાં ઓછા કંચન કામિનીના ત્યાગી અને શુદ્ધ પ્રરુપક હોય તેવા પણ આવા કાળમાં આરાધક આત્મા ગણાય. પણ જેઓ લાખો ધનની માલિકી ધરાવતા હોય. રેલ્વે, મોટર, પ્લેનમાં બેસતા હોય, ન બેસે પણ તેવાઓનું સમર્થન કરતા હોય, સાધ્વીઓને વિહારોમાં અને ચોમાસાઓમાં કાયમ સાથે રાખતા હોય. પોતાની માલિકીનાં મુકામો રાખતા હોય, દીવાના પ્રકાશમાં બેસતા હોય,

કાચા પાણી વાપરે, કાચાંપાકાં પાણીથી દરરોજ અગર વારંવાર સ્નાન કરે. નોકરો રાખે, નોકરો પાસે પાણી મંગાવે, કાપ કઢાવે, બેટરીઓ રાખે. બટન જાતે દબાવી દીવા કરે, દીવામાં નિઃસંકોચ બેસે, ઉભા રહે, ફરે, કાળ વખતે કામળી ન ઓઢે, નોકરો દ્વારા બજારનાં ખાનપાન મંગાવી જમતા હોય, જ્યોતિષ જોઈ આપે, સ્રીઓ અને પુરુષોના હાથ જોઈ ભવિષ્ય કહે, મોટા જોષીઓની મહાન પદવી ધરાવતા હોય.

ગુરૂપૂજન કરાવી (દેવ દ્રવ્યમાં જ લઈ જવાતું ગુરુપૂજન દ્રવ્ય) પોતે લેઈ પોતાની પાસે રાખે. અને પોતાની મનપસંદ ઈચ્છાઓ પૂરી કરવામાં વાપરે. નારી વર્ગ સાથે વારંવાર નિઃસંકોચ એકાન્ત સેવે. ચારિત્રની ઉપધિ પણ હજારોની કિંમતની ભેગી કરે. સમુદાયના મુનિઓથી અનેક ગુણી ઉપધિ નિઃસંકોચ એકઠી કરે.

આવા વેશધારીઓ વધી રહ્યા છે. સમાજની બેદરકારીનો દુરુપયોગ વધી રહ્યો છે. આવા જે કોઈ હોય, ભલે પછી તેવાઓ ખૂબ વક્તાઓ હોય, લગાતાર મોટી તપસ્યાઓ પણ કરતા હોય. શાસ્ત્રોનું સંશોધન–સંપાદન કરતા હોય. પણ વીતરાગદેવોની આજ્ઞા અને પાંચ મહાવ્રતો ધવાતાં હોવા છતાં છાતી કાઢીને ચાલનારા અજ્ઞાની કહેવાય તો. કશું ખોટું નથી. કહ્યું છે કે :–

**जिणाणाए कुणंताणं, सव्वं निव्वाण कारणं ।**
**सुंदरंपि सबुद्धिए, सव्वं भवनिबंधणं ॥१॥**

**અર્થ** :– બહુ સંભાળ પૂર્વક જેટલું જિનાજ્ઞા ધ્યાનમાં રાખીને વર્તન થાય. તેટલું મોક્ષનું કારણ છે. પરંતુ ભલે પોતાને અગર જમાનાવાદીઓને સારું લાગતું હોય, તો પણ સ્વેચ્છાચાર સંસાર વધવામાં કારણભૂત સમજવો.

**પ્રશ્ન** :– તોપછી દિગંબરો–સ્થાનકવાસીઓ–તેરાપંથીઓ. આવા બધા પણ–અજ્ઞાનીઓ ગણાય ખરા ?

**ઉત્તર** :–આપણે પોતે અજ્ઞાની છીએ–તેથી વ્યક્તિગત કોઈને અજ્ઞાની કહી શકીયે નહીં. તે તે પંથોમાં પણ; કોઈ વિચારક હોય: સમાજના બંધનોથી ખુલ્લા પડી શકતા ન હોય. તેથી "સાચું તે મારૂં." મારૂં તે સાચું નહી" આવી માન્યતા અને શ્રદ્ધાવાલા હોય, જિનપ્રતિમા, જિન ચૈત્યો, જૈનાગમોનું ખંડન કરતા ન હોય.

આવા મહાશયો કોઈ કોઈ સાધુ હોય, સાધ્વી હોય, અથવા ઉપાસક ઉપાસિકાઓ હોય, તેવા મહાશયો વખતે સમકિત પામ્યા પણ હોય, માટે અજ્ઞાની કહેવાય નહિ. પરંતુ જેઓ. ૪૫ આગમોને ખોટાં ઠરાવનારા અથવા ૧૩ આગમો અને નિર્યુક્તિ–ચૂર્ણિ, ભાષ્ય, ટિકાઓને ખોટાં કહેનારા; જિનચૈત્ય–જિનપ્રતિમાજી ભગવંતોને પથ્થર કહેનારા જે કોઈ હોય, તેવા અરિહંતોની, ગણધરોની અને સૂરિવરોની, મહાન આશાતના કરનારા હોવાથી, અજ્ઞાની જ ગણાય એમાં કશી નિંદા કે અતિશયોક્તિ લાગતી નથી.

અમારી શ્રદ્ધા તો એવી છે કે, અત્યાર અગાઉના, પૂર્વસૂરિ ભગવંતો, વાચક પુંગવો અને મહામુનિરાજોએ, અપનાવેલા દેવદ્રવ્યની વૃદ્ધિના માર્ગોને પણ આજકાલ જેઓ ખંડન કરનારા હોય, ફેરવનારા

હોય; તે નિમિત્તે સમાજના ભાગલા પડાવનારા બન્યા હોય, જમાના વાદને આગળ ધરીને, આણા ઉત્થાપક તત્ત્વોને, પોષણુ આપનારાં હોય, તેવાઓને માર્ગ ભૂલેલા કહેવાય તે, વાંધા ભરેલું જણાતું નથી.

આવી બધી વાતો આપણને બરાબર ક્યારે સમજાય, કે જેમ બને તેમ, વીતરાગનાં વચનો ખૂબ વાંચવા-સમજવાનો અવકાશ મલે. આજે પણ હજારો ગ્રન્થરત્નો મોજુદ-હયાત છે. ઘણા અમુદ્રિત હોવા છતાં છપાયેલા પણ સેંકડો ગ્રન્થો હયાત છે. એકેક આગમ ઉપર ઘણી ટીકાઓ પણ લખાણી છે. છપાઈ પણ છે.

તત્ત્વાર્થ, આવશ્યક, વિશેષાવશ્યક પ્રવચનસારોદ્ધાર, લોકપ્રકાશ જેવા નાના મોટા અનેક આગમાનુસારી ગ્રન્થો પણ છપાયા છે. કર્મ ગ્રંથો ઉપર ઘણું સાહિત્ય લખાણું છપાયેલું મલે છે. ગુર્જર ભાષામાં અનુવાદો થયેલા પણ સુવિહિત પુરૂષોથી પ્રણીત ગ્રંથો ઘણા પ્રકાશિત થયા છે. આવું બધું વાંચનારને છાશ માખણનો ભેદ જરૂર તારવી શકાશે, શ્રીવીતરાગ શાસનનું રહસ્ય સમજવા ભાગ્યશાળી થવાશે.

આવા બધાં વર્ણનો લખીને, અમારે કોઈને ઉતારી પાડવાનો આશય નથી. તેમજ અમે પોતે ખૂબ સારા છીએ, અને બીજા બધા જ ખોટા છે, આવું પણ માનવા જરૂર નથી. પરંતુ અહિં જે જે વાતો લખવી પડી છે. તે તે ભાગ્યશાળી આત્માઓ, વસ્તુ સ્થિતિને બરાબર વાંચે અને વિચારે અને સાચી વસ્તુ સમજે, એટલા માટે જ જણાવી છે.

અને બીજા પણ ભાગ્યશાળી આત્માઓ, લખાણનું રહસ્ય વિચારી, માર્ગ ભૂલેલાઓની પાછલ ચાલવાનું બંધ રાખી. વસ્તુતત્ત્વ સમજી લેવાની ગમેતેવાની અને પછવાડે ચાલવાથી, લાગતા નુકશાનનો ખ્યાલ કરે અને પોતાની જાતને બચાવે.

પ્રશ્નઃ- આ જગતમાં હજારો માર્ગો-પંથો ચાલ્યા છે. ચાલી રહ્યા છે. સૌ સૌનું જાણે આપણે શું?

**ઉત્તર**:- આપણા પૂજ્ય પુરૂષો જિનેશ્વરદેવો, ગણધરદેવો **અને** પછીના સુવિહિત ગીતાર્થ સૂરિભગવંતોએ, **સુદેવ-સુગુરૂ-સુધર્મ** આદરું. અને કુદેવ-કુગુરુ-કુધર્મને પરિહરું. આ બન્ને વાક્યોનું વિસ્તૃત વર્ણન કરીને સુદેવાદિ ત્રણને ભજવા. અને કુદેવાદિ **ત્રણને** ત્યજવા ખૂબ સમર્થન કર્યું છે.

અને આપણા જેવા બાલજીવોને પણ પ્રેરણા આપી છે કે

**धर्मध्वंसे क्रियालोपे स्वसिद्धान्तार्थविप्लवे ।**
**अपृष्टेनापि शक्तेन वक्तव्यं तन्निषेधितुं ॥१॥**

**અર્થ** – ધર્મનો નાશ-ક્રિયાનો લોપ અને સિદ્ધાન્તોના **અર્થોનો** વિપર્યાસ એટલે અવળા અર્થ થતા હોય તો, વગર પુછે પણ તે તે વસ્તુની સત્ય હકીકત બોલવી જ જોઈએ.

**પ્રશ્ન**:- પરંતુ દુનિયામાં કોઈને પણ, કડવું લાગે એવું, આપણે લખવું કે બોલવું વ્યાજબી કેમ ગણાય?

**ઉત્તર**:- ભૂતકાળ અને વર્તમાનકાળમાં, કાયદાના નિષ્ણાત ન્યાયાધીશો, ન્યાયાસન ઉપર બેસીને, તટસ્થ ન્યાય આપે છે. તે પણ બે પક્ષો વાદી અને પ્રતિવાદી બન્નેને તો રાજી રાખનારા થતા જ નથી. ન્યાય એક પક્ષને અવશ્ય અણગમો ઉપજાવે છે જ. તો પછી આંહી તો દેવ-ગુરૂ-ધર્મની કસોટીનો સવાલ છે. આવા વિષયમાં બધા ચાલે, તેમ ચલાવી લેવાયતો, મહામૂલ્ય માનવજન્મ **હારી** જવાય.

તેજ મહાપુરૂષો વળી પણ ફરમાવે છે.

**परो रूष्यतु वा मा वा, विषवत् प्रतिभातु वा ।**
**भाषितव्या हिता भाषा, स्वपक्षगुणकारिणी ॥१॥**

**અર્થ**:- બીજા માણસો ખુશી થાય કે નારાજ થાય. **એમને**

વિષ જેવું લાગે, કે અમૃતજેવું લાગે. એ જોવાનું પછી. પરંતુ આપણા આત્માને દુર્ગતિ ન થાય આ વાત પહેલી વિચારવી; અને આપણા આત્માને નુકસાન ન થાય તેવું સમજી વિચારીને જરૂર બોલવું.

**પ્રશ્ન**:- આપણે મૌન જ રહીએ તો આપણને કર્મ કેમ બંધાય?

**ઉત્તર**:- આપણે માર્ગે ચાલ્યા જતા હોઈએ. કોઈ શક્ત માણસ સકારણ કે અકારણ કોઈ ને માર મારતો હોય, કોઈ અબળા યુવતીને સતાવતો હોય. બાળાનું શીલ કે શરીર ભયમાં મુકાયું હોય, તેવે ટાણે શક્તિસંપન્ન મનુષ્યે શક્તિનો-અધિકારનો કે ધનનો સદુપયોગ કરીને બીજાના પ્રાણનું કે શીલનું અવશ્ય રક્ષણ કરવું તે શક્તિસંપન્ન મનુષ્યની ફરજ છે.

**પ્રશ્ન**:- બીજાઓ ગમે તે ધર્મ કરે એમાં આપણે શું? કોઈ પ્રતિમા ન માને. કોઈ નગ્ન રહે, એમાં આપણે ઝગડા વધારવાની શી જરૂર!

**ઉત્તર**:- પ્રતિમાની પૂજા ન કરે એનો વાંધો નથી. પણ પ્રતિમાની પૂજાને પાપ મનાવે-એ હળહળતું જુઠ કેમ સાંભળી લેવાય? ઘણા પામરો લુગડા ન મળે તેવા નગ્ન રહે છે. એની સામે અમારો વિરોધ હતો નહી અને છે પણ નહી. પરંતુ નાગા રહે તોજ મુનિ ગણાય. આવાં વચન અને વર્તન સામે અમારો વિરોધ હોવો જ જોઈએ.

**કારણ કે "પાપ નહી કોઈ ઉત્સૂત્ર ભાષણ જીસ્યો, ધર્મ નહિ કોઈ જગ સૂત્ર સરિખો."**

હિંસાદિ પાપો કરતાં પણ ઉત્સૂત્ર વચનનું પાપ વધારે મોટું છે.

**પ્રશ્ન:–** જો આજે દિગંબર–શ્વેતામ્બર સ્થાનકો–તેરાપંથ વિગેરે પંથો ન પડ્યા હોત તો, આપણે બધા લગભગ એક ક્રોડ જેટલા હોત. અને તેથી આપણો પક્ષ કેટલું સારું અહિંસાદિનું વર્ચસ્વ જમાવી શક્યો હોત. આવા પક્ષો પડવાથી આપણે અંદરો અંદર ઝગડીને કેટલા નબળા પડ્યા છીએ ?

**ઉત્તર:–** ભગવાન મહાવીર સ્વામીની હાજરીમાં પણ ગોશાળાએ અને જમાલી જેવાઓએ શાસનને ઘણું નુકસાન કર્યું છે. જેઓ સર્વજ્ઞ હતા હજારો રાજાઓ અને ક્રોડપતિ ધનવાનો જેમનો પડ્યો બોલ ઉપાડી લેતા હતા. વળી ચાર નિકાયના દેવો વગર બોલાવ્યે લાખો કે ક્રોડો આવતા હતા. એવા, પણ નિન્હવોને અટકાવી શક્યા નહી તો આપણું શું ગજું ?

**પ્રશ્ન:–** દિગંબરો કહે છે તે બધી વાત ખોટી છે ? અને આપણે માનીએ છીએ તેજ સાચું છે ?

**ઉત્તર:–** દિગંબરોના બધા વિચારો આપણે ખોટા માન્યા નથી. પરંતુ દિગંબરો કહે છે કે નગ્ન જ રહેવું. પાત્રાં આદિ રખાય જ નહી. સ્ત્રીઓ મોક્ષની અધિકારી નથી. માટે તેમને દીક્ષા નથી. કેવલજ્ઞાન પામેલા લાખો વર્ષ જીવે, પણ આહાર–ભોજન કરતા નથી.

આવાં વદતો વ્યાઘાત જેવાં, તેમનાં પ્રરૂપણો, શાસ્ત્રો અને વ્યવહાર બન્નેથી વિરૂદ્ધ હોવાથી, ચલાવી કેમ લેવાય ? અને ખંડન ન કરાય તો આ પંચમ કાલમાં પણ થોડા ઘણા પણ આરાધના કરી રહ્યા છે, તે પણ હોત નહી.

દિગંબરોએ વર્તમાન ૪૫ આગમો અને આગમો ઉપર લખાયેલી નિર્યુક્તિ, ભાષ્ય, ચૂર્ણિ, ટીકાઓ, દીપિકાઓ, સંગ્રહણીઓ, પ્રકરણો, શતકો, બધાં ખોટાં ઠરાવી નવાં બનાવ્યાં. તેથી શય્યંભવ સૂરિ મ. ભદ્રબાહુસ્વામી મ. વિગેરે પૂર્વધરોને ખોટા ઠરાવ્યાનું મહા

પાપ લાગ્યું છે. લાખો સાધ્વીઓ થઈ હોત ? અને તેના સમાગમથી લાખો કે ક્રોડો શ્રાવક ધર્મપામનારી સ્ત્રીઓને, મહાન અંતરાય ખડો થયો છે.

દિગંબર પંથ ભગવાન મહાવીર સ્વામીના નિર્વાણથી ૬૦૯ વર્ષે નીકળ્યો છે. તેમના આદ્ય પ્રણેતા મહાશય સહસ્રમલજી ઉર્ફે શિવભૂતિજી છે. તે કાળમાં આપણા પક્ષના શ્રુતધર જૈનાચાર્યો હતા. વીર નિર્વાણ ૫૮૪ વર્ષે વજ્રસ્વામી સ્વર્ગવાસ પામ્યા. ત્યારપછી ૨૫ વર્ષે દિગંબર પંથ શરૂ થયો. જ્યારે વજ્રસ્વામી સૂરિના પટ્ટશિષ્ય અને વિદ્યાશિષ્યો આર્ય વજ્રસેનસૂરિ આર્યરક્ષિતસૂરિ, દુર્બલિકાપુષ્પમિત્ર પ્રમુખ અનેક શ્રુતધરો હતા. તેમની સામે સમજાવવાના ઘણા પ્રયાસો થયા નકામા ગયા છે. તો પછી–પછીના આચાર્યો તેમને કેમ સમજાવી શકે ?

**પ્રશ્ન**:– સ્ત્રીઓને મોક્ષ થવાની અને ચારિત્ર ગ્રહણકરવાની, વાતો સપ્રમાણ જાણવા મલે છે ?

**ઉત્તર** :– "**थोवा नपुंस सिद्धा थीनर सिद्धा कमेण संखगुणा**" નવતત્ત્વ ગા–૫૦

**અર્થ**:– નર–નારી–નપુંસકનું મોક્ષગમન માટે અલ્પબહુત્વ વિચારતાં જણાવે છે કે, સર્વથી થોડા નપુંસકો સિદ્ધ થયા છે. તેનાથી સ્ત્રીઓ સંખ્યાતગુણી, અને પુરૂષો તેનાથી પણ સંખ્યાત ગુણા, અનંતાનંત મોક્ષમાં ગયા છે.

એટલે અત્યાર સુધીમાં અનંતી સ્ત્રનારીઓ મોક્ષમાં ગયાના આગમમાં પાઠો તૈયાર છે વલી ૨૪ જિનેશ્વરદેવોની હાથદીક્ષિત શિષ્યાઓ ૪૪. ૪૬–૪૦૬ થઈ છે. અને ઘણી તેજ ભવે મોક્ષ ગઈ છે. કોઈ થોડાભવો કરીને મોક્ષ ગયા હશે.

ઋષભદેવ સ્વામીનાં બે પુત્રીઓ અને મહાવીર સ્વામીનાં એક પુત્રી બ્રાહ્મી–સુંદરી અને પ્રિયદર્શના હજારો સાધ્વી સાથે મોક્ષ ગયાં

છે. વસુદેવરાયની બેન્યૂન બહોત્તેર હજાર રાણીઓ સાધ્વી થઈ મોક્ષ ગયાં છે. " વસુદેવની નારી પ્રસિદ્ધિરે પાંત્રીશ હજાર તે સિદ્ધિરે " વસુદેવ રાજાની ફક્ત પાંત્રીશ હજાર રાણીઓ, ગિરિરાજ ઉપર મોક્ષ ગયાં છે.

દમયંતી દીક્ષા લઈ સ્વર્ગે–ત્યાંથી ચ્યવી ગૃહસ્થ પણે કેવલી થઈ મોક્ષ. મદનરેખાની દીક્ષા અને મોક્ષ. ચંદનબાલા–મૃગાવતી–રાજીમતી–સુજ્યેષ્ઠા–કૃષ્ણમહારાજની આઠ પટરાણીઓ–પ્રદ્યુમ્નની વૈદર્ભિપ્રમુખ રાણીઓ–આવી ચોવીશ જિનવરોના તીર્થોમાં ક્રોડો શ્રમણીભગવતીઓ દીક્ષિત થઈ અને મોક્ષ પધાર્યાં છે.

દિગંબરોનો અભિપ્રાય સાચો માનવામાં આવે તો, આગમોના રચયિતા ગણધર ભગવંતો અને સ્થવિરસૂરિવરોના રચેલાં બધાં આગમો પણ ખોટાં ઠરે છે. અને પછી તો "પુરુષ–વિશ્વાસે વચનવિશ્વાસ" આવી કહેવતો પણ, ખોટી ઠરવાથી, જગતના બધા વહેવારોમાં પણ અવિશ્વાસ આવી ઉભો રહેશે.

પાત્રાં રાખે જ નહી તો. ગૌતમાદિક મહાપુરૂષોની એક સાથે ૪૪૦૦ ની દીક્ષા થઈ, બધા વહોરવા કેમ જઈ શકે ? બાહુમુનિ ૫૦૦ મુનિની ગૌચરી લાવતા હતા, એ ખોટું ઠરે. ઘરડા, માંદા, નવીન, બાલક–આવા બધા ભિક્ષા સ્વયં લેવા જાય ? ગૃહસ્થના ઘેર જમે ? હાથમાં જમે ? હાથ, પગ, શરીર બગડે, વહેવારથી આ બધું અસમંજસ લાગે છે.

સારા કે નબળા, બધા વહેવારો પ્રારંભમાં નાના સાંકડા પણ–વનસ્પતિના વેલાની પેઠે, પાછલથી ફેલાઈ જાય છે. અને વેલાઓને વૃક્ષોના અવલંબનની પેઠે ખોટા માર્ગોને પણ પાછલથી જોરદાર સહાયકો મલી જાય છે. લોકો ગતાનુગતિક છે. પરમાર્થ વિચારતા નથી. માટે આવા પંથો માતબર થયા છે. સાચા નથી.

સ્થાનકવાસી મહાશયોએ–નારીને ઋતુધર્મ પાળવો નહી.

રાતમાં ચુનો નાખી પાણી રાખવું નહીં. વિગેરે સિદ્ધાન્તો જાહેર કર્યા. શરૂઆતમાં વિરોધો થયા. આજે એવા બધા બેહુદા રિવાજો કાઢ્યા કુટ્યા અને ફ્ળ્યા છે. આજે સ્થાનકવાસી મહાસતીજીઓ ઋતુધર્મના ત્રણ દિવસ પાળતાં નથી. એટલું જ નહી આગમો પણ વાંચે છે.

એટલે ઉપરના પંથો આપણે કાઢ્યા નથી. પણ તેમણે પોતે આપમતિથી પંથો કાઢયા છે. આજે એક માતાપિતાને ચાર-પાંચ-છ દિકરા પણ હોય છે. બધા જુદા થઈ જાય છે. માતા બિચારી ઘરડી પણ, હાથે રસોઈ બનાવે છે. ગરીબ હોયતો ઘરનું તમામ કામ હાથે કરીને, દિવસભર લોથ-પોથ થઈ જાય છે.

શું આવા માતા પિતાને એકલા અટુલા રહેવું સારું લાગતું હશે ? પણ સ્વચ્છંદી અને પત્નીઓના નચાવ્યા નાચનારા છોકરાઓથી શું કરી શકાય ? પુત્રો સાથે રહે તો ખર્ચ ઓછો આવે. એકબીજાના સુખદુ:ખમાં મદદ મલે. ધર્મ વધારે થાય .યાત્રાઓ થાય. પૈસાનું બળ વધે. કમાણી પણ વધે, સમાજમાં આબરૂ પણ વધે.

અમે આપણે પણ બધા એક થઈ જઈ યે. એક અવાજ થઈ જાય. એકજ ક્રિયા કરનારા બધા થઈ જઈ યે. તો આપણું બળ-શક્તિ-આબરૂ-વર્ચસ્વ-પ્રભુતા ખૂબ વધી જાય. પરંતુ આ પાંચમો આરો આવું થવા જ કેમ આપે ? પરસ્પરના ઝગડાથી નુકસાન જ છે.

પ્રતિમાજી તથા ચૈત્યોના સેંકડો પાઠો આગમો અને ગ્રંથોમાં ઠામ ઠામ જોવા મલે છે. પરંતુ વાત સાંભળવાનો મોખ કોને છે. તેજ પ્રમાણે દિગંબરોના સિદ્ધાન્તથી વિપરીત વર્ણનો પણ આપણા આગમો, ટીકાઓ અને ગ્રંથોમાં મોજુદ છે. બધા પક્ષવાળાઓ પોતાની વિરુદ્ધ દલિલોને સમજે પણ છે. પરંતુ આભિનિવેશિક દશાનો પડદો નડે છે.

ફક્ત આપણી પ્રતિમાનું પ્રાચીનપણું વિચારાય? લાખો વર્ષજુની પ્રતિમાઓની સત્યતા સમજાયતો પણ સ્થાનક-વાસીઓ અને દિગંબરોને સાચો રાહ સ્વીકારવો પડે તેવું છે. જમીનમાંથી નીકળતી પ્રતિમાઓ. શ્વેતામ્બર મૂર્તિપૂજક સમાજને સાચા ઠરાવે છે. અને પ્રાચીનતા પુરવાર થાય છે.

દિગંબર મહાશયોનો પંથ નીકળ્યાને હમણા ૧૮૯૦ વર્ષ થયા. તે દરમ્યાન તેમણે, સ્ત્રી જાતિની દીક્ષા ન અટકાવી હોત તો, આપણા શ્વેતાંબર સમાજની પેઠે. કુમારિકાઓ, યુવતીઓ કે વૃદ્ધાઓ, લાખોની સંખ્યામાં ચારિત્ર ધારિણી બની હોત. અને તે મહાસતીઓના સમાગમ પામી, લાખોસંખ્યામાં શ્રાવિકા ભગિનીઓ પણ વધુ પ્રમાણમાં ધર્મ સમજ્યા હોત, અને આરાધના પામ્યા હોત.

નારી જાતને દીક્ષા બંધકરનારને રત્નત્રયી વિરાધનાનો કેટલો મોટો દોષ લાગ્યો હશે? તે તો કેવલી ભગવાન જાણે, આવાઓની સોબત કરનારાઓને પણ, ભયંકર વિરાધનાના ખાડામાં પડવું પડે. એ ચોખ્ખું સમજાય તેવું હોવા છતાં. આપણા પૂર્વપુરૂષોએ તેમનો સંબંધ તોડયો. તે ગુનો કહેવાય કે આપણો ઉપકાર કર્યો કહેવાય? કેમ સમજાતું નથી?

તેજ પ્રમાણે વસ્ત્રો ન પહેરાય, પાત્રો ન રખાય, આવો ધર્મ અને વહેવાર વિરુદ્ધ આચાર, પુરૂષવર્ગને પણ ઘણા અંતરાયો ઉભા કરનાર બન્યો છે. તદ્દન નગ્ન રહેવાની શક્તિ વગરના, ક્ષુધા સહવાની તાકાતવગરના, ચારિત્ર ધર્મ પામી શકે નહી. તેથી દિગંબર સમાજના પુરૂષ વર્ગને પણ ખૂબ અન્યાય થયો છે.

વળી વસ્ત્રોના ત્યાગના કારણે, બીજા ઘણાં દુષણો સેવવાં પડે છે. તથા પાત્રો ન રાખવાના કારણે ગોચરીના દોષો ખૂબ લાગે છે. એકજ જગ્યાએ જમવું પડે છે. કાચું સચિત્ત પાણી વાપરવું પડે

છે. ભગિની સમાજને રોકટોક વિના અટકવું પડે છે. તથા હાથમાં લઈને જમતી વખતે, પેટ અને પગ વિગેરે ઉપર સંખ્યાબંધ એઠવાડ પડે છે.

તથા પાત્ર ન રાખવાના કારણે નવીન દીક્ષિતો, વડીલો, ગુરુપુરુષો, ગ્લાનસાધુઓ અને વૃદ્ધસાધુઓની વૈયાવચ્ચ થાય જ નહી. આ અપૂર્વ અને અમૂલ્ય નિર્જરા અદ્રશ્ય થઈ છે. વૈયાવચ્ચ એ અભ્યંતર તપ છે. તે બાજુના દરવાજાને તાલાં જ વસાણાં છે. સાથો સાથ જૈન મુનિઓનું ખાન-પાન ગૃહસ્થને બતાવાય જ નહીં. તેવી મર્યાદાને તદ્દન તિલાંજલિ અપાઈ છે.

**પ્રશ્નઃ**– શ્વેતામ્બર સાધુઓને આવા આહારના, પાણીના, વસ્ત્રોના દોષો લાગતા નથી?

**ઉત્તરઃ**– જેમને ચારિત્ર વહાલું છે. જેઓ શરીરના મમત્વથી પર છે. જેઓ સંસારની ભયંકરતા સમજ્યા છે. તેવા મુનિરાજો આહારાદિકના દોષોથી બચાય તેટલું બચવા જરૂર જાગતા છે જ. છતાં પણ દિગંબરો જેવી ગૌચરીની મર્યાદાઓ શ્વેતાંબર પક્ષમાં સાવ અદ્રશ્ય થઈ નથી. આ વિષય તટસ્થ આત્મા જરૂર સમજી શકે તેવો છે જ.

**પ્રશ્નઃ**– સ્થાનકવાસીઓ કરતાં મૂર્તિપૂજકોમાં આરંભસમારંભો વધુ પ્રમાણમાં થાય છે, આ વાત સાચીને?

**ઉત્તરઃ**– દર્શન, વંદન, પૂજન વિગેરે આરાધનાના માર્ગો છે. તેમાં સંપૂર્ણ વિવેક જાળવીને, કરવા પડતા આરંભો, સમ્યક્ત્વાદિની પ્રાપ્તિના લાભપાસે અતિઅલ્પ છે. લાખોની કમાણીવાળાને હજારોના ખર્ચા અનિવાર્ય બનેછે. તેમ વાચક મહાશયો અહિંપણ વિચાર કરેતો સમજાય તેવું છેજ. સ્થાનકવાસીઓ આલીશાન ઉપાશ્રયો–સ્થાનકો બનાવેછે. તેમાં પણ જરૂર આરંભો થાયછે. મુનિરાજ કે મહાસતીજી અવસાન પામે, તેમને

જાહેર કરાય છે. એ ત્રણ દિવસ થઈને રાખવામાં આવે છે. હજારો ભકતો વંદન કરવા આવે છે.

અહીં પણ ટ્રેઈનો, મોટરો, પગપાળા જનારને દોષો લાગે છે. દીક્ષા લેનારના વરઘોડા, જુલુસો નીકળે છે. સાધુજી કે મહાસતીઓનાં સામૈયાં થાય છે. અહિં પણ આરંભો જરૂર થાય છે જ. નાની મોટી ધર્મ આરાધનાઓમાં, વિવેકીઓને પણ આરંભ દોષ લાગી જાય છેજ.

સમજવાનું એ જ કે ઘણી દુકાનો કે મોટી આવકવાળાને ખર્ચો પણ ઘણા લાગે જ. બે–ત્રણ કે ચાર–પાંચ દુકાનોવાળાને ખર્ચો થોડા. માટે આવક પણ થોડી થાય છે. ધર્મમાં પણ સો માણસના કુટુંબવાળાના ઘેર ૧૦ સાધુજીને નિર્દોષ આહાર મલે, ખર્ચો ઘણો, તોસુપાત્ર–દાનનો લાભ તેનાથી હજારો ગુણો–લાખો ગુણો પણ થાય.

એકલી ડોસી કે વાંઢાને ખર્ચો તદ્દન થોડો, તો સુપાત્રનો લાભ થાય અગર ન પણ થાય. અતિ અલ્પ પણ થાય. વસ્તુપાલ–તેજપાલના રસોડે ૫૦૦ મુનિરાજો આવે તો પણ, તદ્દન નિર્દોષ ગોચરી લભ્ય હતી. સમજો કે ત્યાં મેમાન પરોણા કુટુંબ અને નોકર–ચાકર ઘણા જમતા હશે.

મૂર્તિપૂજકોનું આરાધના ક્ષેત્ર અતિ વિશાળ છે. માટે તેના પ્રમાણમાં દોષો પણ લાગી જવાનો સંભવ રહે જ. સ્થાનકવાસી મહાશયોને તીર્થો નથી, જિનાલયો નથી, માટે યાત્રાઓ નથી, સંઘો નથી, જિનચૈત્યો નથી, અંજન શલાકા–પ્રતિષ્ઠા–શાન્તિસ્નાત્ર–બીજા પણ નાના મોટાં પૂજનો નથી. માટે લાખોના દ્રવ્યનો સદ્‌વ્યય પણ નથી.

પણ સમજુ વાચકો સમજી શકે છે કે, કૃપણો, વાંઝીયાઓ અને વાંઢા કે રાંડેલીઓને ભલે ખર્ચ ઓછો થતો હશે. પરંતુ તેઓ કમાણા શું ? તેમને ખર્ચો નથી તો આવકે નથી. સગા વહાલા કે

મિત્રો પણ ભરચક કુટુંબવાળાના ઘેર જાય છે. પણ ઉપર જણાવેલા નખચી મહાશયોના ઘેર કોઈ જતું નથી.

સ્થાનકવાસીઓને માત્ર ઉપાશ્રયમાં જ ધર્મ, અને મુનિરાજો આવે તોજ આરાધના થાય. જ્યારે મૂર્તિપૂજકોને હજારો તીર્થો, સગવડવાળાઓને બારેમાસ યાત્રાઓ, સમ્મેતશિખર, ગિરનાર, શત્રુંજય, આબુ, શંખેશ્વર આદિ નાના મોટા હજારો તીર્થોની યાત્રાઓ, સ્વામી ભાઈઓની ભક્તિ, ઉત્તમ આત્માઓના નવા નવા સમાગમો મળ્યાજ કરે છે.

સ્થાનકવાસી ભાઈઓને, ધર્મની આરાધનાનું ક્ષેત્ર સાંકડું. માટે ખર્ચો અને તેના કારણે આરંભો થોડા હોય; જ્યાં આરાધના ત્યાં આરંભનું કારણ પણ હોય જ.

શ્રી જૈન શાસનનું એક સૂત્ર-મહાવાક્ય છે– **"जे आसव्वा ते परिसव्वा जे परिसव्वा ते आसव्वा" અર્થ**:- જે આશ્રવો તે સંવર થઈ જાય છે. અને જે સંવર હોય તે આશ્રવ બની જાય છે.

**ભાવાર્થ એવો છે કે** આત્મા અજ્ઞાની મટીને જ્ઞાની બની જાય છે, ત્યારે સંસાર વધારનારાં સાધનો મોક્ષનાં કારણો બને છે. જેમ કે ચિલાતીપુત્રે મુનિને તલવાર બતાવી ધર્મપુછ્યો. પણ મુનિરાજે તેને યોગ્ય વાક્યો સંભળાવ્યાં. **ઉપશમ, વિવેક, સંવર**–આ ત્રણ પદોનો વિચાર કરતાં ભાવના બદલાણી.

સુષમા કુંવારીબાળાનો ઘાત કરનાર, બાળાનું ચોટલાસહિત મસ્તક હાથમાં હતું. આખું શરીર લોહીથી લીંપાયેલું-ખરડાએલું હતું. આવા પરિણામે મરીને પ્રાય : નરક અથવા તિર્યંચમાં જ પતન થવાનું હતું. પરંતુ મુનિરાજ મળ્યા. તરવાર બતાવી. ધર્મ પુછ્યો. અને ત્રણ પદના વિચારમાં, મરી આઠમે સ્વર્ગ ગયા.

ચંડકૌશિક સર્પ આખી જીંદગી દેડકાં વિગેરે જલ-સ્થલના જીવોનું ભક્ષણ કરનાર હતો. તેની ચક્ષુમાં ઝેર હતું. તેથી ઘણા માણસો

અને પશુઓને પોતાના વિષની જ્વાળાથી બાળીને મારી નાખનારો સર્વજ્ઞ પ્રભુ મહાવીરસ્વામી ભગવાનને પણ કરડ્યો, ડંસ દીધો. પરંતુ પ્રભુના વચનો **बुज्झ बुज्झ चंडकोसिआ ?**

આટલું સાંભળ્યું અને વિચારમાં તરબોળ બન્યો. અનશન કર્યું. ક્રોધનો અગ્નિ બુઝાઈ ગયો. અને સમતાનો સમુદ્ર ઉભરાયો. હજારો ભવ પશુ અને નરકમાં ભટકવાની લાયકાતવાળો મહાક્રોધી સર્પ મરીને આઠમે સ્વર્ગ ગયો.

આંહી બીજા પણ પ્રસન્નચંદ્ર રાજર્ષિ, પૃથ્વીચંદ્ર ગુણસાગર વિગેરે મહાપુરૂષોને આશ્રવો હતા તે જ બદલાઈને સંવરબની ગયા. અને આત્મામાંથી સમ્યગ્જ્ઞાન હોય અને ચાલ્યું જાય ત્યારે, સંવરનાં સાધનો પણ આશ્રવમાં ફેરવાઈ જાય છે.

જેમ ચિત્ર અને સંભૂતિ બે સગા ભાઈ મહામુનિરાજ હતા. એક માસના, બે માસના, ત્રણ માસના એમ મોટા તપ કરતા હતા. જ્ઞાની પણ હતા, સંયમી પણ હતા. પરંતુ સનત્કુમાર ચક્રવર્તીની રાણી વાંદવા આવ્યાં. તેમનું રુપ જોઈ ઘોર તપસ્વી મુનિરાજ બદલાઈ ગયા. ચક્રી થવાનું નિયાણું કર્યું.

પોતાના સગા ભાઈ ચિત્રમુનિ સાથે જ હતા. તેમણે સંભૂતને ઘણા સમજાવ્યા પણ સમજ્યા નહી. તપ, સંયમ અને સમજણ મોક્ષમાં લઈ જનાર હતાં. પણ નિયાણું થવાથી, બ્રહ્મદત્ત ચક્રી થઈ સાતમી નરકે ગયા અને મોટાભાઈ ચિત્ર-વણિક-પુત્ર થઈ દીક્ષા લઈ નિરતિચાર પાળી મોક્ષ ગયા.

બંનેને સરખું ચારિત્ર, સરખું જ્ઞાન, સમાન તપ, એકને સંસાર વધારનારું થયું માટે આશ્રવ થયો. એકને મોક્ષ દેનાર થયું માટે સંવર થયો.

અમારા આ સુભાષિત સૂક્ત રત્નમાલા નામના ગ્રન્થમાં લગભગ ૧૯૫ જેટલા વિષયો છે. અરિહંતદેવોની ઓળખાણ આપી છે. સામાન્ય ધર્મ, દાનધર્મ, શીલ, તપ, ભાવના, રત્નત્રયી, વૈરાગ્ય, સામાયિક, પ્રતિક્રમણ, જિનપ્રતિમા, જૈનાગમ, જિનાજ્ઞા, જૈનસિદ્ધાંત, કષાય, લેશ્યા, પુણ્ય–પાપ, નસીબ આવા અનેક વિષયોનો આ પુસ્તકમાં સંગ્રહ કરવામાં આવ્યો છે.

આવાં પુસ્તક વાંચનારને, એક જ પુસ્તકમાંથી અનેક વિષયોનું જ્ઞાન પ્રાપ્ત થાય છે. નવા કે અનુભવી વિદ્વાનોને, જ્યારે જે જોઈએ તે વિષયો આમાંથી લભ્ય થઈ શકે છે. વ્યાખ્યાનકાર, ભાષણ કરનાર, પુસ્તકની રચના કરનારને, તે તે વિષયો આ પુસ્તકમાંથી થોડા પ્રયાસે મળી શકશે.

આ પુસ્તકમાં વિષયાનુક્રમ મુકવામાં આવ્યો છે. તેથી વિષયાનુક્રમ જોવાથી, તે તે જરૂરી વિષયો મેળવી શકાય છે. ઉપર ઘણું કહેવાઈ ગયું છે. તો પણ જણાવવાની ઈચ્છા થાય છે કે જો વાચક વર્ગને હવે પછી, ભવોભવ સુખ જ જોઈતું હોય તો, આત્માને સારો બનાવો.

આત્મા સારો ત્યારે જ બનશે કે જ્યારે આત્માને સમ્યગ્‌દર્શન જ્ઞાન–ચારિત્રની સમજણ મલશે. સમ્યગ્‌દર્શન આવ્યા સિવાય આત્માનું પરિભ્રમણ ઓછું થશે નહીં. સમ્યગ્‌દર્શન લાવવા માટે અસાધારણ કારણ વીતરાગની વાણી છે, અને આપણા જેવા અલ્પ બુદ્ધિવાળા થોડો પરિશ્રમ કરી શકે તેવા આત્માઓને, આવા પુસ્તકોમાં પ્રવેશ થાય તો આગળ વધવા ચાન્સ મળે.

સમ્યગ્‌દર્શન આવ્યા પછી જ અજ્ઞાન પણ જ્ઞાન બની જાય છે. અજ્ઞાન હોય ત્યાં સુધી રક્ષકો પણ નાશ કરનાર બને છે અને સમ્યગ્‌જ્ઞાન આવ્યા પછી શત્રુ પણ મિત્ર થઈ જાય છે. મારવા

તૈયાર થયેલા મિત્ર બની ગયા છે. માટે વાચક મહાશયો આવાં વીતરાગ વાણીનાં પુસ્તકો વાંચો.

સંપૂર્ણ વાંચો, વિચાર પૂર્વક વાંચો, વારંવાર વાંચો. લાંબા અનુભવે આપને પોતાને સમજાશે કે મારો આ પ્રયાસ સફલ થયો છે. શ્રી વીતરાગ દેવની વાણી જેવું કોઈ અમૃત નથી, એવું કોઈ સ્વાદિષ્ટ ભોજન નથી. જીંદગીના તમામ આનંદોને વટાવી જાય તેવો વીતરાગ વાણીમાં આનંદ ભર્યો છે.

આ જગતના બધા માતાપિતા, ભાઈઓ, ભગિની ભાર્યા અને મિત્રોના વિશ્વાસો દગારા નિવડ્યાના શાસ્ત્રો, ઈતિહાસ અને વર્તમાનમાં દાખલા મોજુદ છે. પણ વીતરાગવાણી. જગતના સર્વ સગા-સંબંધિ અને મિત્રોથી પર છે. વીતરાગનીવાણીનો મહિમા વચન અગોચર છે. શ્રી વીતરાગદેવની વાણીનું પાન કરવાથી ક્ષુધાતૃષા નાશ પામે છે. બધી તૃષ્ણાઓ શમી જાય છે વીતરાગ વાણીનું પાન કરનાર પરમાત્મા બન્યાના હજારો દાખલા બન્યા છે.

**જ્ઞાની પુરૂષો તો ફરમાવે છે કે कलंकनिर्मुक्त-ममुक्त पूर्णतं कुतर्कराहुग्रसनं सदोदयं ॥ अपूर्वचन्द्रं जिनचन्द्र भाषितं दिनागमे नौमि बुधै र्नमस्कृतं ॥१॥**

**અર્થઃ**– ભગવાન વીતરાગની વાણી કલંક વગરની છે. અધુરી નથી, પણ સંપૂર્ણ છે. સંસારની હજારો શંકાઓના સમાધાનો વીતરાગદેવની વાણીમાં ભરચક છે. વીતરાગદેવની વાણી નાશ નથી પામતી માટે ઉદયવતી છે. નિત્યોદયી છે ચંદ્ર જેવી શીતળ, ઉજ્વળ અને નિર્મલ છે. અને જગતના તમામ સુજ્ઞપુરૂષોએ નમસ્કાર કરાયેલી, સત્કારેલી, સન્માનેલી વીતરાગદેવોની વાણીને હું પણ ઘણા ઉદારભાવે પ્રભાત કાળે નમસ્કાર કરૂં છું.

વળી ફરમાવે છે કે जइ इच्छह परमपयं, अहवा किर्त्ति सुवित्थडं भुवणे। ता तेलुक्कुद्धरणे, जिणवयणे आयरं कुणह ॥१॥

**અર્થ**:- જો આપ ભાગ્યશાળી આત્માઓને, મોક્ષ મેલવવા ઇચ્છા હોય. અથવા ત્રણે લોકના જીવોને વહાલા બનવું હોય, યાને પ્રાણી માત્રના પ્રેમની ચાહના હોય. અર્થાત્ છયેકાયના જીવોની દ્રવ્ય-ભાવ દયા પામવા ભાવના થતી હોયતો ત્રણે જગતના સર્વ જીવોના ઉદ્ધારક-રક્ષક-સહાયક શ્રી જિનેશ્વરદેવનાં વચનોમાં આદરવાળા બનો.

તથા વલી चिरसंचिय-पावपणासणीइ भवसयसहस्स महणीए। चउव्वीसजिणविणिग्गयकहाइ बोलंतु मे दिअहा ॥१॥

**અર્થ**:- લાંબા કાળથી એકઠાં કરેલાં પાપોને નાશ કરનારી તથા લાખો ભવ ભટકવું પડે તેવા પણ કર્મોનો નાશ કરનારી, ચોવીશ જિનેશ્વરદેવોએ ફરમાવેલી એવી કથાઓને વાંચવા વડે મારા દિવસો વ્યતીત થાય.

આ બધા વર્ણનોનો સાર એ છે કે હે ભાગ્યવાન આત્માઓ! આપ હમ્મેશ વીતરાગવાણીનાં પુસ્તકોનો સ્વાધ્યાય=વાંચન કરો. અને અમારું આ **સુભાષિતસૂક્તરત્નમાલા** નામનું સંસ્કૃત કાવ્યો (ગ્રન્થાગ્ર પાંચ હજાર આશરે અવશ્ય વાંચો.) મય પુસ્તક જરૂર વાંચો. આ પુસ્તકમાં આગમો અને પૂર્વાચાર્ય ભગવંતોનાં બનાવેલા સૂક્તો-પ્રાકૃતગાથાઓ અને શ્લોકોનો સંગ્રહ થયો છે.

આંહી જ્ઞાનનું સમર્થન કરતાં જુદા જુદા મતાંતરોના મંતવ્યોનું ખંડન કરાયું છે. આ વર્ણન વાંચી કોઈ મહાશયને ખોટું લાગી જાય તેમની સાથે હું મિચ્છામિદુક્કડં માગું છું. અમારે અંગત

કોઈ પ્રત્યે દ્વેષ નથી. શા માટે હોય ? પરંતુ વસ્તુ સમજાવવી પડે ત્યારે, તટસ્થ ભાવે સારૂં–ખોટું બધું કહેવું પડે છે. કહેવાઈ જાય છે અને જ્યાં સુધી આપણું અજ્ઞાન નાશ પામશે નહી ત્યાં સુધી મતાંતરો રહેવાનાં છે.

હવે પ્રસ્તુત **સંસ્કૃતસુભાષિતસૂકતરત્નમાલા** ગ્રન્થ મેં પોતે બનાવ્યો નથી. તેમ કોઇ પ્રાચીન કવિની કૃતિ કે સંગ્રહ પણ નથી. પરંતુ (આલેખક પોતે) મેં પોતે મારા અભ્યાસ માટે ગ્રન્થો વાંચતાં જે જે સૂક્ત રત્નો મળ્યાં, તે તે વીણી વીણીને મારી શક્તિ અનુસાર મારા પુસ્તકમાં, મેં પોતે લખી રાખેલાં, ભેગાં થયેલાં, વિષય વિભાગે ગોઠવીને, ગ્રન્થરૂપે તૈયાર કરી, વાચક મહાશયના કર કમલમાં મૂકું છું.

આ ગ્રન્થનો કેટલોક ભાગ અમે ૨૦૦૭ માં **સુભાષિત સૂક્ત સંગ્રહ** નામ આપી સંપાદિત કર્યો હતો. ત્યારપછી આ ૨૧ વર્ષના ગાળામાં અમારી પાસે નવા નવા વિષયોનો સારો એવો સંગ્રહ થયો. તેને પણ ઉપરના ગ્રંથમાં મેળવીને, નાના વિષયોને સાથે કરીને, અને મોટા વિષયોને, તેમના તેમ જુદા પ્રકરણ નંબરો આપી છપાવ્યા છે. તેથી કોઈ કોઈ વિષયો, એકના બે વિભાગે રાખવા પડ્યા છે.

આ પુસ્તકના પહેલા મુદ્રણમાં અમે કઠીન શબ્દોનો કોપ પણ મુકયો હતો. જેથી મારા જેવા થોડું ભણેલાઓને કે, સાધ્વીજી મહારાજાઓને, ભણવા–સમજવા સુગમતા રહે. આ વખતે પણ કોષ મુકવા ઇચ્છા હોવા છતાં, બની શકયું નથી. હું કામ કરનાર એકલો છું. શરીરની પણ ખાસ મહેરબાની ન ગણાય. વલી આ ચાલુ કામમાં, ઓપરેશન પણ કરાવવું પડયું છે. તેથી શબ્દકોષ, વિષય દર્શન, શુદ્ધિપત્રકની પણ ઝીણવટ બની શક્યા નથી.

કામને પહોંચી વળવા પૈસા આપી કામ કરનારા રાખ્યા. પૈસા ઘણા લાગવા છતાં પણ, ધારેલી ઈચ્છા (પુસ્તક અંગે) અધુરી રહી છે. આ પુસ્તકના ફર્મો તપાસવામાં પંન્યાસજી મહારાજ ભદ્રંકરવિજયજી ગણિવર તથા ઉપાધ્યાયજી મ. માનવિજયજી ગણિવર ચોત્રીશ ફર્મો સુધી તપાસવામાં મદદગાર બન્યા છે.

આ પુસ્તકમાં છેલ્લા છાપ કામમાં વિષયોના નંબરોમાં ઘણી મોટી ભૂલ થઈ છે, ને છાપેલું તપાસનારની અજાણતા અને મારા ઓપરેશનના કારણે બીજી પણ આવી ભૂલો રહી જવા સંભવ રહે છે. જે વાચકવર્ગ ક્ષમા આપવાપૂર્વક સુધારી વાંચે તે પ્રાર્થના.

આ પુસ્તક બનાવેલું નથી પણ મહાપુરૂષો-પૂર્વાચાર્યોના ગ્રંથોમાંથી વિણેલો સંગ્રહ છે. તેથી તમામ ઉપકારનો લાભ તેને-મહાપુરૂષોના ફાળે જાય છે. છતાં પ્રસ્તુત પુસ્તકને સમજવા માટે લખેલી પ્રસ્તાવના અંગે કાંઈપણ જિનાજ્ઞા વિરૂદ્ધ લખાયું હોય, અથવા કોઈ વાચક મહાશયને બંધ બેસતું માનીને દુઃખ લાગી જતું હોય, તે સર્વ મહાશયો પાસે પણ હું ત્રિવિધ મિચ્છામિ દુક્કડં માગું છુ. ઈતિ.

વિક્રમ સં. ૨૦૨૮ તથા વીર
નિર્વાણ ૨૪૯૮ ભાદરવા સુદી ૬
બુધાનુરાધા

લે. આચાર્યદેવ વિજયભદ્રસૂરી-
શ્વરજી મહારાજ પ્રશિષ્ય પં.
ચરણવિજય ગણી
વાસુપૂજ્ય સ્વામી જૈન દેરાસર
જૈન નવો ઉપાશ્રય.
પુના લશ્કર (મહારાષ્ટ્ર)

# સંસ્કૃત સુભાષિત સૂક્ત રત્નમાલાનો વિષયાનુક્રમ



| વિષયનું નામ | પ્રકરણ | પૃષ્ટ | શ્લોક સંખ્યા |
|---|---|---|---|
| જિનેશ્વરદેવોની સ્તુતિઓ | ૧ | ૧/૧૧ | ૭૦ |
| સરસ્વતી સ્તુતિ | ૨ | ૧૧ | ૪ |
| સામાન્ય ધર્મ | ૩ | ૧૨ | ૩૪ |
| શ્રી સંઘનું સ્વરુપ | ૪ | ૧૬ | ૧૨ |
| દાન ધર્મનું સ્વરુપ | ૫ | ૧૮ | ૩૪ |
| પાત્ર અપાત્રની સમજણ | ૬ | ૨૨ | ૨૧ |
| કુપાત્રની સમજણ | ૭ | ૨૪ | ૫ |
| કૃપણની ઓલખાણ | ૮ | ૨૫ | ૧૨ |
| શીલ ધર્મ માહાત્મ્ય | ૯ | ૨૭ | ૨૦ |
| તપધર્મનું સ્વરુપ | ૧૦ | ૩૦ | ૨૩ |
| ભાવનાઓનું સ્વરુપ | ૧૧ | ૩૩ | ૩૨ |
| રત્નત્રય માહાત્મ્ય | ૧૨ | ૩૭ | ૪૩ |
| વીતરાગના મુનિવરોની ગૌચરીનું સ્વરુપ | ૧૩ | ૪૨ | ૯ |
| વૈરાગ્યનું વર્ણન | ૧૪ | ૪૩ | ૫૨ |
| સમકિતનું સ્વરુપ | ૧૫ | ૫૧ | ૬૦ |
| મિથ્યાત્વનું સ્વરુપ | ૧૬ | ૫૯ | ૨૩ |
| સમ્યગ્જ્ઞાન ,, | ૧૭ | ૬૨ | ૧૯ |
| અજ્ઞાનવર્ણન | ૧૮ | ૬૪ | ૧૯ |
| જિનાજ્ઞાનું સ્વરુપ | ૧૯ | ૬૭ | ૨૮ |
| વીતરાગ શાસનની આરાધનાનું સ્વરુપ | ૨૦ | ૭૦ | ૫૪ |
| આત્માની જાગૃતિ | ૨૧ | ૭૬ | ૪૦ |
| આત્મનિન્દાનો વિચાર | ૨૨ | ૮૦ | ૨૦ |

| | | | |
|---|---|---|---|
| શ્રાવક ધર્મ સ્વરુપ | ૨૩ | ૮૪ | ૨૨ |
| મનુષ્ય જન્મની શ્રેષ્ટતા અને દુર્લભતા | ૨૪ | ૮૭ | ૨૫ |
| સ્વાધ્યાયના લાભો | ૨૫ | ૯૧ | ૧૬ |
| જૈન ધર્મના સિદ્ધાન્તો અને તેની ઉપાદેયતા | ૨૬ | ૯૩ | ૪૩ |
| જિન પ્રતિમા અને ચૈત્યોના દર્શન આદિ વિધાનો | ૨૭ | ૯૭ | ૩૬ |
| જિર્ણોદ્ધારના લાભો | ૨૮ | ૧૦૨ | ૬ |
| જિન પ્રતિમા પૂજન લાભ | ૨૯ | ૧૦૩ | ૩૬ |
| સામાયિકનું સ્વરુપ | ૩૦ | ૧૦૮ | ૨૧ |
| પ્રતિક્રમણનું સ્વરુપ | ૩૧ | ૧૧૧ | ૧૫ |
| જ્ઞાન અને ક્રિયા સમજણ | ૩૨ | ૧૧૨ | ૨૭ |
| વીતરાગનો યથાર્થવાદ | ૩૩ | ૧૧૫ | ૧૮ |
| અનિત્ય ભાવના | ૩૪ | ૧૧૮ | ૪૦ |
| અશરણ ભાવના | ૩૫ | ૧૨૩ | ૧૨ |
| સંસાર ભાવના | ૩૬ | ૧૨૪ | ૨૬ |
| સંસારના દુઃખોનું વર્ણન | ૩૭ | ૧૨૮ | ૧૩ |
| એકત્વ ભાવના | ૩૮ | ૧૩૦ | ૧૦ |
| અન્યત્વ ભાવના | ૩૯/૧ | ૧૩૧ | ૮ |
| અશુચિ ભાવના | ૩૯/૨ | ૧૩૪ | ૧૭ |
| આશ્રવ ભાવના | ૪૦ | ૧૩૪ | ૪ |
| સંવર ભાવના | ૪૧/૧ | ૧૩૫ | ૨॥ |
| નિર્જરા ભાવના | ૪૧/૨ | ૧૩૫ | ૧ |
| લોક સ્વરુપ નિગોદનું સ્વરુપ | ૪૨ | ૧૩૬ | ૯ |
| ધર્મના દાતારની દુર્લભતા | ૪૩ | ૧૩૭ | ૩ |
| મૈત્ર્યાદિ ચાર ભાવના | ૪૪ | ૧૩૭ | ૯ |

| | | | |
|---|---|---|---|
| ધ્યાનનું સ્વરુપ | ૪૫ | ૧૩૮ | ૨૯ |
| પાંચ મહાવ્રતોની ભાવના | ૪૬ | ૧૪૩ | ૯ |
| ૭ લેશ્યાનું સ્વરુપ | ૪૭ | ૧૪૪ | ૧૨ |
| કર્મની શક્તિ—કારણ અને કાર્ય | ૪૮ | ૧૪૫ | ૩૭ |
| કર્મનો બંધ અને વિપાક | ૪૯ | ૧૫૦ | ૨૪ |
| પુણ્યનો પ્રભાવ | ૫૦ | ૧૫૩ | ૨૩ |
| પાપનો સ્વભાવ | ૫૧ | ૧૫૬ | ૮ |
| ભાગ્યના પર્યાય નામો અને ફલ | ૫૨ | ૧૫૭ | ૨૫ |
| ભવિતવ્યતાનું સ્વરુપ | ૫૩ | ૧૬૦ | ૫ |
| સાતનયો | ૫૪ | ૧૬૧ | ૪ |
| વિવેકનું સ્વરુપ | ૫૫ | ૧૬૧ | ૨૦ |
| વૈયાવચ્ચયાને ગુણીની સેવા | ૫૭ | ૧૬૫ | ૧૪ |
| વિનય ધર્મનું મૂલ છે | ૫૬ | ૧૬૪ | ૧૨ |
| પરોપકાર પણ ધર્મ છે | ૫૮/૧ | ૧૬૭ | ૨૪ |
| ક્રોધ આદિ કષાયોનું સ્વરુપ | ૫૮/૨ | ૧૭૧ | ૧૫ |
| ક્રોધની અધમતા | ૬૦ | ૧૭૨ | ૨૨ |
| માનની દુષ્ટતા | ૬૧ | ૧૭૫ | ૧૧ |
| માયાની દુષ્ટતા | ૬૨ | ૧૭૬ | ૯ |
| લોભની દુષ્ટતા | ૬૩ | ૧૭૭ | ૭ |
| પ્રમાદની દુષ્ટતા | ૬૪ | ૧૭૮ | ૫૫ |
| પ્રમાદ આત્માનો શત્રુ | ૬૫ | ૧૮૪ | ૫ |
| વિષયની વિટંબના | ૬૬ | ૧૮૫ | ૩૧ |
| સ્ત્રી—સંસર્ગની દુષ્ટતા | ૬૭ | ૧૯૦ | ૨૦ |
| વિષયોનો પ્રતિકાર | ૬૮ | ૧૯૨ | ૫ |
| હિંસાનો પ્રતિકાર | ૬૯ | ૧૯૩ | ૨૪ |
| અહિંસા—સાચી પ્રાણિદયાની સમજણ | ૭૦ | ૧૯૬ | ૧૧ |

| | | | |
|---|---|---|---|
| સત્ય વચનનું સ્વરુપ | ૭૧ | ૧૯૭ | ૧૬ |
| પરિગ્રહની સમજણ અને ત્યાગનું ફલ | ૭૨ | ૧૯૯ | ૧ |
| લક્ષ્મીની ચપલતા | ૭૩ | ૨૦૦ | ૯ |
| લક્ષ્મીનો પ્રભાવ | ૭૪ | ૨૦૨ | ૧૬ |
| મન-વચન-કાયાની એકાગ્રતાના પરિણામ | ૭૫ | ૨૦૪ | ૧૫ |
| મન-વચન-કાયાની દુષ્ટતા | ૭૬ | ૨૦૬ | ૨ |
| ક્ષમાનું સ્વરુપ | ૭૭ | ૨૦૬ | ૪ |
| તૃષ્ણાનું સ્વરુપ | ૭૮ | ૨૦૬ | ૧૨ |
| સંતોષનું સ્વરુપ | ૭૯ | ૨૦૮ | ૯ |
| સજ્જનોના ગુણો | ૮૦ | ૨૦૯ | ૧૨ |
| દુર્જનોના દોષોની સમજણ | ૮૧ | ૨૧૧ | ૨૭ |
| સોબતનું પરિણામ | ૮૨ | ૨૧૪ | ૬ |
| સાત્વિકભાવ અથવા આત્માની વીરતા | ૮૩ | ૨૧૪ | ૫૪ |
| નીતિ યાને લોકવહેવાર | ૮૪ | ૨૨૧ | ૨૮ |
| સામાન્ય ઉપદેશ | ૮૫ | ૨૨૪ | ૩૮ |
| સંપ અને કુસંપનું ફળ | ૮૬ | ૨૨૮ | ૪ |
| શાસન પ્રભાવકોનું સ્વરુપ | ૮૭ | ૨૨૯ | ૩૬ |
| મૂર્ખાઓને ઉપદેશ લાગતો નથી | ૮૮ | ૨૩૪ | ૮ |
| આદર અને બહુમાન | ૮૯ | ૨૩૫ | ૧૦ |
| વિશ્વાસ કરવો નહી | ૯૦ | ૨૩૬ | ૭ |
| મૂર્ખાઓનું સ્વરુપ | ૯૧ | ૨૩૭ | ૧૪ |
| કન્યાદાન વિચાર | ૯૨ | ૨૪૯ | ૧૧ |
| બુદ્ધિના પર્યાયો | ૯૩ | ૨૪૧ | ૭ |
| ઈન્દ્રિયોની દુષ્ટતાનું સ્વરૂપ | ૯૪ | ૨૪૧ | ૫ |

| | | | |
|---|---|---|---|
| કલિયુગનો સ્વભાવ - | ૯૫ | ૨૪૨ | ૩ |
| લૌકિક-ધર્મના અભિપ્રાયો | ૯૬ | ૨૪૩ | ૧૯ |
| શકુન અંગે વિચારો | ૯૭ | ૨૪૫ | ૧૩ |
| ઉપદેશ સપ્તતિ પ્રકરણ | ૯૮ | ૨૪૭ | ૭૩ |
| છુટા છવાયા વિષયો | ૯૯ | ૨૫૪ | ૧૧ |
| છંદોનાં થોડાં લક્ષણો | ૧૦૦ | ૨૫૬ | ૧૯ |
| મહા-કવિઓની સમસ્યાઓ દ્વારા ચાતુર્ય | ૧૦૧ | ૨૫૯ | ૪૧ |
| સાસરામાં રહેનારની મૂર્ખાઈ | ૧૦૨ | ૨૬૪ | ૬ |
| ગુણ અને ગુણીની સમજણ | ૧૦૩ | ૨૬૪ | ૫૨ |
| માતાના ગુણો અને ઉપકાર | ૧૦૪ | ૨૭૧ | ૪ |
| વાણીયાનો સ્વભાવ-પરંતુ વાણિયા એટલે જૈનો-એમ સમજવું નહી | ૧૦૫ | ૨૭૧ | ૫ |
| સ્વધર્મથી વિપરિત વસ્તુની નિષ્ફલતા | ૧૦૬ | ૨૭૨ | ૯ |
| ક્ષુધાનો ત્રાસ | ૧૦૭ | ૨૭૪ | ૧ |
| મરણ કોઈને છોડવાનું નથી | ૧૦૮ | ૨૭૪ | ૨૦ |
| ધર્મદત્તા અને ધનપાલ | ૧૦૯ | ૨૭૭ | ૯ |
| ઉત્તમ દીકરાઓનો આચાર | ૧૧૦ | ૨૭૯ | ૧૧ |
| છુટા છવાયા ઘણા વિષયો | ૧૧૧ | ૨૮૦ | ૩૭ |
| ઉત્સુત્ર ભાષણની સમજ | ૧૧૨ | ૨૮૪ | ૩ |
| ચતુરાઈનાં કારણો | ૧૧૩ | ૨૮૫ | ૨ |
| અનર્થદંડના ચાર પ્રકાર | ૧૧૪ | ૨૮૫ | ૧ |
| આરોગ્યની સમજણ | ૧૧૫ | ૨૮૫ | ૧૩ |
| સાત વ્યસનોની દુષ્ટતા | ૧૧૬ | ૨૮૭ | ૯ |
| ઉત્તમ સ્થાનોમાં પુનરુક્ત- | | | |

| | | | |
|---|---|---|---|
| દોષ ગણાતો નથી | ૧૧૭ | ૨૮૮ | ૭ |
| જુદા-જુદા જાતિ સ્વભાવ | ૧૧૮ | ૨૮૮ | ૫ |
| પ્રેમ અને અપ્રેમની સમજણ | ૧૧૯ | ૨૮૯ | ૨ |
| ઋષભદેવ સ્વામીનો વંશ | ૧૨૦ | ૨૮૯ | ૪ |
| પ્રમાણો માનનારા દાર્શનિકો | ૧૨૧ | ૨૮૯ | ૧ |
| ગીતાર્થ જૈનાચાર્ય કેવા હોય? | ૧૨૨ | ૨૯૦ | ૨૬ |
| શિષ્યોના ધર્મ અને કુશિષ્યો | ૧૨૩ | ૨૯૩ | ૧૩ |
| દેવદ્રવ્ય રક્ષણ-ભક્ષણનું ફલ | ૧૨૪ | ૨૯૪ | ૧૭ |
| ઉપધાનનો મહિમા | ૧૨૫ | ૨૯૬ | ૨ |
| ઉદ્યાપનનો મહિમા | ૧૨૬ | ૨૯૬ | ૨ |
| નમસ્કાર માહાત્મ્ય પચ્ચીશી | ૧૨૭ | ૨૯૭ | ૨૫ |
| નવરાજર્ષિના ત્રણ શ્લોકો | ૧૨૮ | ૩૦૦ | ૩ |
| કયા કર્મોદયે ૨૨ પરિષહો | ૧૨૯ | ૩૦૦ | ૩ |
| કેવલિ સમુદ્ઘાત | ૧૩૦ | ૩૦૦ | ૪ |
| સિદ્ધોની ઉર્ધ્વગતિનાં કારણો | ૧૩૧ | ૩૦૧ | ૫ |
| દેવોને ઓળખવાની સમજણ | ૧૩૨ | ૩૦૧ | ૨ |
| નરકગતિનાં નામ-ગોત્ર અને લેશ્યા | ૧૩૩ | ૩૦૨ | ૪ |
| બાર સ્વર્ગનાં નામ અને લોકાન્તિક | ૧૩૪ | ૩૦૨ | ૩ |
| માર્ગાનુસારીના ૩૫ ગુણો | ૧૩૫ | ૩૦૨ | ૧૦ |
| વસ્તુની પરીક્ષા | ૧૩૬ | ૩૦૩ | ૪ |
| બપ્પભટ્ટીસૂરિમ.ની સમસ્યાઓ | ૧૩૭ | ૩૦૪ | ૬ |
| બ્રાહ્મણ શબ્દના અર્થ અને કર્તવ્ય | ૧૩૮ | ૩૦૫ | ૩ |
| મહાસતી અથવા કુલવતી | | | |

| | | | |
|---|---|---|---|
| નારીના ધર્મ અથવા ફરજ | ૧૩૯ | ૩૦૫ | ૩૭ |
| વિષની પરીક્ષા કરનારા પશુઓ | ૧૪૦ | ૩૧૦ | ૧ |
| ઈરિયાવહીનો અર્થ અને ઉપયોગ | ૧૪૧ | ૩૧૦ | ૧૦ |
| અનશનના પ્રકાર અને તેના સ્વામી | ૧૪૨ | ૩૧૧ | ૫ |
| એકેન્દ્રિયાદિ જીવોની ઉત્પત્તિનો વિચાર | ૧૪૩ | ૩૧૨ | ૧૦ |
| અપર્યાપ્ત પંચેન્દ્રિય મનુષ્યોના ૧૪ ઉત્પત્તિ સ્થાનકો | ૧૪૪ | ૩૧૪ | ૫ |
| જૈન મુનિના એકાકિત્વ વિહારનાં દૂષણો | ૧૪૫ | ૩૧૪ | ૯ |


## પહેલો ભાગ સમાપ્ત

# અથ પૂર્તિ વિભાગ પ્રારંભ.

અહિં પ્રકરણના નંબરોમાં ખૂબ ભૂલો હોવાથી પૃષ્ઠ અને શ્લોકની સંખ્યા જ જણાવાય છે.


| વિષયનું નામ | પૃષ્ઠ | શ્લોકો |
|---|---|---|
| વીતરાગ સ્તુતિ મંગલાષ્ટક | ૩૧૬ | ૯ |
| વીતરાગ સન્મુખ બોલવાના શ્લોકો | ૩૧૭ | ૫૬ |
| સામાન્ય ધર્મનું વર્ણન | ૩૨૩ | ૩૮ |
| દાનધર્મના પ્રકારો | ૩૨૯ | ૪૬ |
| સુપાત્ર દાનનો મહિમા | ૩૩૫ | ૩૭ |
| શીલ ધર્મની મહત્તા | ૩૪૦ | ૨૧ |
| ભાવધર્મ સંવેગ ઉપજાવે છે | ૩૪૩ | ૪૩ |
| વીતરાગના મુનિરાજોના આચારો | ૩૪૯ થી ૩૬૫ | ૧૧૫ |
| સમ્યગ્દર્શનનું સ્વરૂપ | ૩૬૬ થી ૭૦ | ૨૯ |
| મિથ્યાદર્શનના વિચારો | ૩૭૦ | ૧૮ |
| સમ્યગ્જ્ઞાનની ઓળખાણ અને મિથ્યાજ્ઞાનની સમજણ | ૩૭૨ | ૩૬ |
| વીતરાગની આજ્ઞાનો વિચાર | ૩૭૭ | ૧૧ |
| જૈનધર્મના સિદ્ધાન્તોનો સંક્ષેપ | ૩૭૯ પદ્ય-ગદ્ય | ૧૦૦ |
| જૈન જ્ઞાન-ક્રિયાનું મહત્વ-જ્ઞાન વિનાની ક્રિયા અને ક્રિયા વિનાનું જ્ઞાનં સફલ નથી | ૩૯૫ | ૩૦ |
| સમજણ પૂર્વકનો વિનય ધર્મનું મૂલ છે | ૩૯૯ | ૨૧ |
| વિષયોની વિટંબના | ૪૦૧ | ૧૧ |
| હિંસાની દુષ્ટતા અને તેના પ્રતિકાર | ૪૦૩ | ૨૦ |
| અહિંસાની શ્રેષ્ઠતા અને તેનુ સમર્થન | ૪૦૫ ગદ્ય-પદ્ય | ૧૮ |
| સાત્વિક ભાવ યાને વીરતા | ૪૦૭ ગદ્ય-પદ્ય | ૮ |

| | | |
|---|---|---|
| સામાન્ય વિષયો | ૪૦૮/૧૩ | ૩૦ |
| શકુનોનો વિચાર=સારા અને દુષ્ટ શકુનો | ૪૧૩ | ૨૬ |
| કવિરાજોની ચતુરાઈના નમુના | ૪૧૬ થી ૨૧ | ૨૭ |
| ગુણી ગુણીને સમજે છે | ૪૨૧ | ૬ |
| ગીતાર્થ જૈનાચાર્યની ઓળખાણ | ૪૨૨ | ૬ |
| નમસ્કાર મહામંત્રનું માહાત્મ્ય | ૪૨૩ | ૩૪ |
| વીતરાગ શાસનના તીર્થો | ૪૨૮ | ૨૩ |
| જૈન શાસનનો પ્રભાવ | ૪૩૧ | ૧૪ |
| જૈનેતર ગ્રન્થોમાં પણ જિનેશ્વર દેવોનાં માહાત્મ્યદર્શક સૂક્તો | ૪૩૫ | ૧૮ |
| ધર્મદાતાર ધર્મગુરુનો ઉપકાર—સ્વોપજ્ઞ ગુરૂદેવોની સ્તવના | ૪૩૮ | ૪ |
| મહા મુનિરાજોની નિંદાનાં કડવાં ફલ | ૪૩૮ | ૫ |
| દીપ્રાદષ્ટિનું સ્વરુપ | ૪૩૯ | ૭ |
| પરાપશ્યંતી વિગેરે વાણીના નામો અને સ્થાનો | ૪૪૦ | ૧ |
| પર્યુષણ મહાપર્વ માહાત્મ્ય | ૪૪૦ | ૧ |
| જીવને નિકળવાનાં સ્થાનો અને તેનું ફળ | ૪૪૦ ગદ્ય | ૨ |
| ચાર ગતિમાં જનારે જીવોના સ્વભાવ | ૪૪૧ | ૧૧ |
| જીવોની જયણાનું ફલ | ૪૪૨ | ૪ |
| રાત્રિ ભોજનનાં દૂષણો | ૪૪૩ | ૪ |
| જૈન ઐતિહાસિક યાદિઓ | ૪૪૪ | ૪૨ |
| તિથિચર્ચા વિચાર | ૪૫૧ | ૭ |
| સંધ્યા નિષેધ કાર્યો | ૪૫૩ | ૩ |
| વૈદ્યરાજ કેવા હોય—સારા અને ખરાબ | ૪૫૩ | ૩ |
| જ્યોતિષના થોડા કાવ્યો | ૪૫૪ | ૩ |
| થોડાં સ્વપ્ન વર્ણન | ૪૫૫ | ૫ |
| બહુ અર્થવાલા શબ્દો—એક શબ્દના ઘણા પર્યાયો | ૪૫૬ | ૧૫ |

| | | |
|---|---|---|
| લોકોક્તિ અર્થાત્ કહેવતો | ૪૫૮ | ૧૦ |
| પૌરાણિકોએ કલ્પેલા કેટલાંક વિધાનો—બ્રહ્મા–વિષ્ણુ–મહેશના ઉત્પત્તિ વિગેરે | ૪૫૯ | ૨૦ |
| ઉત્તમ–મધ્યમ–અધમ નરોને ઓલખવાની રીત | ૪૬૨ | ૧૩ |
| ધર્માદિ ચાર અર્થો | ૪૬૩ | ૮ |
| જુદા જુદા વિષયો | ૪૬૪ થી ૪૮૨ | ૧૨૦ |
| શ્રી ઋષભદેવ સ્વામી ચૈત્યવંદનં | ૪૮૩ | ૫ |
| ગિરિરાજ ચૈત્યવંદન | ૪/૩ | ૩ |
| શાન્તિનાથ સ્વામી ચૈત્યવંદન | ૪૮૪ | ૭ |
| શ્રી વીતરાગદેવ ચૈત્યવંદન | ૪૮૫ | ૭ |
| ,, બીજુ ,, | ૪૮૫ | ૭ |
| ચઉવ્વીશ જિન ચૈત્યવંદન | ૪૮૬ | ૭ |
| પાંસઠીયો યંત્ર ,, | ૪૮૭ | ૮ |
| શ્રી વીતરાગ દેવ ,, | ૪૮૮ | ૬ |
| શ્રી વીતરાગ દેવ ,, | ૪૮૯ | ૧૦ |
| શ્રી વીતરાગ દેવ ,, | ૪૯૦ | ૫ |
| શ્રી વીતરાગ આજ્ઞા ચૈત્યવંદન | ૪૯૧ | ૬ |
| શત્રુંજય મહાત્મ્ય ,, | ૪૯૧ | ૮ |
| શ્રી વીતરાગ દેવ ,, | ૪૯૨ | ૭ |
| શ્રી વીતરાગ દેવ ,, | ૪૯૩ | ૭ |
| શ્રી વીતરાગ દેવ ,, | ૪૯૪ | ૮ |
| શ્રી નેમિનાથ સ્વામી ,, | ૪૯૪ | ૭ |
| શ્રી શત્રુંજય મહાત્મ્ય ,, | ૪૯૫/૯૬ | ૮ |
| શ્રી વીતરાગ સ્તોત્ર અંતર્ગતં ચૈત્યવંદનં | ૪૯૭ | ૧૦ |
| અનેક વિષયના શ્લોકો | ૪૯૮/૫૦૯ | ૮૧ |
| શુદ્ધિપત્રક | ૫૦૯/૫૧૨ | |


**સમાપ્ત**

ॐ अर्हं श्रीपार्श्वनाथस्वामिने नमः

# सुभाषितसूक्तरत्नमाला

## १ श्रीवीतरागस्तुतिः

नानन्दोदकलोचनद्वयपुटं भिन्नेऽपि बन्धौ जने,
न क्रोधारुणिमास्पदं कृतबहुक्लेशेऽपि शत्रौ क्वचित् ।
ध्यानावेश-विलोकिताखिलजगल्लक्ष्मीं क्रियाद्वः चिरं,
चक्षुर्युग्ममुखासनाञ्चितमिदं श्रीवर्धमानप्रभोः ॥१॥

कृत्वा हाटककोटिभिर्जगदसद्दारिद्र्यमुद्राकथं,
हत्वा गर्भशयानपि स्फुटमरीन् मोहादिवंशोद्भवान् ।
तप्त्वा दुष्करमस्पृहेण मनसा कैवल्यहेतु तपः,
त्रेधा वीरयशो दधद् विजयतां वीरस्त्रिलोकीगुरुः ॥२॥

श्रेयः सङ्कलशाला सुगुणपरिमलैर्जैयमन्दारमाला,
छिन्नव्यामोहजाला प्रसद्भरसरः पूरणे मेघमाला ।
नम्रश्रीमन्मराला वितरणकलया निर्जितस्वर्गिशाला,
त्वन्मूर्तिः श्रीविशाला विदलतु दुरितं संहितक्षोणिपालो ॥३॥

---

१ नामितक्षोणिपाला

दिट्ठे तुह मुहकमले, तिन्नि वि नट्ठाइं निरवसेसाइं ।
दालिद्दं दोहग्गं, अणेगभवसंचिअं पावं ।।४।।

त्रैलोक्यं सकलं त्रिकालविषयं सालोकमालोकितं,
साक्षाद्येन यथा स्वयं करतलं रेखात्रयं साङ्गुलिम् ।
राग–द्वेष–भयामयान्तक–जरा–लोलत्व–लोभादयो,
नालं यत्पदलङ्घनाय स महादेवो मया वन्द्यते ।।५।।

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे,
सुरतरुवरशाखा लेखिनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं,
तदपि तव गुणानामीश ! पारं न याति ।।६।।

यस्योपसर्गाः स्मरणेन यान्ति, विश्वे यदीयाश्च गुणा न मान्ति।
मृगाङ्कलक्ष्मा कनकस्य कान्तिः, सङ्घस्य शान्ति स करोतु शान्तिः।
हरत्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः ।
शरीरभाजां भवदीयदर्शनं, व्यनक्ति कालत्रितयेऽपि योग्यताम्
बलं जगद्ध्वंसन–रक्षणक्षमं, कृपा च सा सङ्गमके कृतागसि।
इतीव संचिन्त्य विमुच्य मानसं, रुषेव रोषस्तव नाथ ! निर्ययौ ।।
त्रैलोक्यं युगपत्करामबुजलुठन् मुक्तावदालोकते,
जन्तूनां निजया गिरा परिणमद्यः सूक्तामाभाषते, ।
स श्रीमान्भगवान्विचित्रविधिभिर्देवासुरैरर्चितो,
वीतत्रासविलासहासरभसः पायाज्जिनानां पतिः ।।१०।।

अशोकवृक्षः सुरपुष्पवृष्टि—र्दिव्यध्वनिश्चामरमासनं च ।
भामण्डलं दुन्दुभिरातपत्रं, सत्प्रातिहार्याणि जिनेश्वराणाम् ॥११॥

किं ! कर्पूरमयं सुधारसमयं किं ! चन्द्ररोचिर्मयं,
किं ! लावण्यमयं महामणिमयं कारुण्यकेलिमयम् ।
विश्वानन्दमयं महोदयमयं शोभामयं चिन्मयं,
शुक्लध्यानमयं वपुर्जिनपतेर्भूयाद्भवालम्बनम् ॥१२॥

पातालं कलयन् धरां धवलयन् नाकाशमापूरयन् ,
दिक्चक्रं क्रमयन् सुरासुरनरश्रेणीश्च विस्मापयन् ।
ब्रह्माण्डं सुखयन् जलानि जलधेः फेनच्छलाल्लोलयन् ,
श्रीचिन्तामणिपार्श्वसंभवयशोहंसश्चिरं राजते ॥१३॥

जिनवर ! तव मूर्त्तिं ये न पश्यन्ति मूढाः,
कुमतिकुमतभूतैः पीडिताः पुण्यहीनाः ।
सकलसुकृतकृत्यं नैव मोक्षाय तेषां,
मुनिविदतृणराशिश्चाग्निसङ्गाग्रथैव ॥१४॥

द्विजराजमुखो गजराजगतिः, अरुणोष्ठपुटः सितदन्ततति: ।
शितिकेशभरोम्बुजमञ्जुकरः,सुरभिश्वसितः प्रभयोल्लसितः॥१५

मतिमान् श्रुतवान् प्रथितावधियुक्, पृथुपूर्वभवस्मरणो गतरुक्।
मति-कान्ति-धृतिप्रभृतैः स्वगुणैर्जगतोऽप्यधिको जगतीतिलकः

अहो मे सफलं जन्म, पूर्णाः सर्वे मनोरथाः ।
लब्धा सर्वार्थसंपत्तिर्दृष्टो यत्त्रिजगद्विभुः ॥१७॥

धन्यः स मासो दिवसोऽपि धन्यः, स एव साऽपि घटिकाऽपि धन्या।
यत्र प्रभुर्भाग्यवता जनेन, दृष्टो जगत्स्वामी कृपानिवासः॥१८॥

नमस्तुभ्यं जगन्नाथ ! त्रैलोक्याम्भोजभास्कर !
संसारमरुकल्पद्रो ! विश्वोद्धारणबान्धव ! ॥१९॥

देव ! त्वं दुःखदावाग्नि–संतप्तानामेकवारिदः ।
मोहान्धकारमूढानां, एकदीपस्त्वमेव हि ॥२०॥

त्वां ध्यायन्तः स्तुवन्तश्च, पूजयन्तश्च देहिनः ।
धन्यास्ते जगृहुर्देहान्मनोवाग्वपुषां फलम् ॥२१॥

महिमानं यदुत्कीर्त्य, तव संह्रीयते वचः ।
श्रमेण तदशक्त्या वा, न गुणानामियत्तया ॥२२॥

जिनधर्मविनिर्मुक्तो, माऽभूवं चक्रवर्त्यपि ।
स्यां चेटोपि दरिद्रोपि, जिनधर्माधिवासितः ॥२३॥

जिनेन्द्रचन्द्रप्रणिपातलालसं, मयाशिरोऽन्यस्य न नाम नाम्यते ।
गजेन्द्रगण्डस्थलदानलम्पटं, शुनीमुखे नालिकुलं निलीयते ॥२४॥

ऐन्द्रश्रेणिनताप्रतापभवनं भव्याङ्गिनेत्रामृतं,
सिद्धान्तोपनिषद्विचारचतुरैः प्रीत्या प्रमाणीकृता ।
मूर्तिः स्फूर्तिमती सदा विजयते जैनेश्वरी विस्फुरन्–
मोहोन्मादघनप्रमादमदिरामत्तैरनालोकिता ॥२५॥

मूर्तिस्ते जगतां महार्तिशमनी मूर्तिर्जनानन्दिनी,
मूर्तिर्वाञ्छितदानकल्पलतिका मूर्तिः सुधास्यन्दिनी ।

संसाराम्बुनिधिं तरितुमनिशं मूर्तिर्दृढा नौरियं,
मूर्तिर्नेत्रपथं गता जिनपतेः किं किं न कर्तुं क्षमा ॥२६॥
धन्या दृष्टिरियं यया विमलया दृष्टो भवान् प्रत्यहं,
धन्यासौ रसना यया स्तुतिपथं नीतो जगद्वत्सलः ।
धन्यं कर्णयुगं वचोमृतरसः पीतो मुदा येन ते,
धन्यं हृन् सततं च येन विशदस्त्वन्नाममन्त्रो धृतः ॥२७॥
नेत्रे साम्यसुधारसैकसुभगे आस्यं प्रसन्नं सदा,
यत्ते चाहितहेतिसंहतिलसत्संसर्गशून्यौ करौ ।
अङ्कश्च प्रतिबन्धबन्धुरवधूसम्बन्धबन्ध्योधिकं,
तद्देवो भुवने त्वमेव भवसि श्रीवीतरागो ध्रुवम् ॥२८॥
नेत्रानन्दकरी भवोदधितरी श्रेयस्तरोर्मञ्जरी,
श्रीमद्धर्ममहानरेन्द्रनगरी व्यापल्लताधूमरी ।
हर्षोत्कर्षशुभप्रभावलहरी रागद्विषां जित्वरी,
मूर्तिः श्रीजिनपुङ्गवस्य भवतु श्रेयस्करी देहिनाम् ॥२९॥

अद्याऽभवत् सफलता नयनद्वयस्य,
देव ! त्वदीयचरणाम्बुजवीक्षणेन ।
अद्य त्रिलोकतिलक ! प्रतिभासते मे,
संसारवारिधिरयं चुलुकप्रमाणः ॥३०॥

न चक्रिशक्रादिपदं समीहे, त्वदाज्ञया हीनमहं निरीह ! ।
रङ्कत्वमप्यस्तु भवान्तरेपि, स्वामिस्त्वदाज्ञावशवर्तिनो मे ॥३१॥

सर्वज्ञमीश्वरमनन्तमसङ्गमग्र्यं,
सार्वीयमस्मरमनीशमनीहमीद्धम् ।
सिद्धं शिवं शिवकरं करणव्यपेतं,
श्रीमज्जिनं जितरिपुं प्रयतः प्रणौमि ॥३२॥

श्रीमद्भिः स्वैर्महोभिर्भुवनमविभुवत्तापयत्येष शश्वत्,
सत्स्वप्यस्मादृशेषु प्रभुषु किमिति सन्मन्युनेवोपरक्ताः ।
सूर्यं वीर्यादहार्यादभिभवितुमिवाभिषवो यस्य दीप्राः,
प्रोत्सर्पन्त्यङ्घ्रियुग्ममभवनखभुवः स श्रिये स्ताद् जिनो वः ॥३३

संसारापारनीरेश्वरगुरुनिरयाशर्मपङ्कौघमग्ना–
नुद्धर्तुं सत्त्वसार्थानिव नखजमृजाजीर्णरज्जूर्यदीयाः ।
पादाः प्रासीसरन्तः प्रकटितकरुणाः प्रार्थितार्थान्समर्थाः,
भर्तुं तीर्थाधिपोऽसौ पृथुदवथुपथप्रस्थितिं वो रुणद्धु ॥३४॥

नित्यानन्दपदप्रयाणसरणी श्रेयोवनीसारणी,
संसारार्णवतारणैकतरणी विश्वर्द्धिविस्तारिणी ।
पुण्याङ्कुरभरप्ररोहधरणी व्यामोहसंहारिणी,
प्रीत्यै कस्य न तेऽखिलार्त्तिहरणी मूर्त्तिर्मनोहारिणी ॥३५॥

समस्तजीवे करुणाशरीरः, संप्राप्तसंसारपयोधितीरः ।
देवाधिदेवः कृतशक्रसेवः, सर्वावभासी शिवसद्मवासी ॥३६॥

यः सर्वैरपि सेव्यते सुकृतिभिः ध्यायन्ति यं योगिनो,
येनाऽतारि भवोदधिर्बुधजना यस्मै नमस्कुर्वते ।
यस्माद् ज्ञानघनागमस्त्रिभुवने यस्यास्त्यनन्तं सुखं,
लीनं यत्र सतां मनः स दिशताद् वः पुण्यभावं जिनः ॥३७॥

ये मूर्तिं तव पश्यतः शुभमयीं ते लोचने लोचने,
या ते वक्ति गुणावलिं निरुपमां सा भारती भारती।
या ते न्यञ्चति पादयोर्वरदयोः सा कन्धरा कन्धरा,
यत्ते ध्यायति नाथ ! वृत्तमनघं तं मानसं मानसम् ॥३८॥

स्वामिनामपि यः स्वामी, गुरूणामपि यो गुरुः।
देवानामपि यो देवः, तस्मै तुभ्यं नमो नमः ॥३९॥

अन्यथा शरणं नास्ति, त्वमेव शरणं मम।
तस्मात् कारुण्यभावेन, रक्ष रक्ष जिनेश्वर ! ॥४०॥

अद्य मे सफलं जन्म, अद्य मे सफला क्रिया।
अद्य मे सफलं गात्रं, जिनेन्द्र ! तव दर्शनात् ॥४१॥

दर्शनाद् दुरितध्वंसी, वन्दनाद् वाञ्छितप्रदः।
पूजनात् पूरकः श्रीणां, जिनः साक्षात्सुरद्रुमः ॥४२॥

नाभ्यर्थये स्वर्गसुखं, न मोक्षं न नरश्रियम्।
सदा त्वत्पादपद्मानि, वसन्तु मम मानसे ॥४३॥

पाताले यानि बिम्बानि, यानि बिम्बानि भूतले।
स्वर्गेऽपि यानि बिम्बानि, तानि वन्दे निरन्तरम् ॥४४॥

जिने भक्तिर्जिने भक्तिर्जिने भक्तिर्दिने दिने।
सदा मेऽस्तु सदा मेऽस्तु, सदा मेऽस्तु भवे भवे ॥४५॥

चिन्तामणिः सुरतरुः सुरधेनुकाम–
कुम्भौ सुराश्च निखिला मयि सुप्रसन्नाः।

जाताः स्वयं प्रबलसाधनयन्त्रिता वा,
त्वद्दर्शनेन भवसन्ततिदुर्लभेन ॥४६॥

अस्मिन् भवे परभवे निखिलेऽपि देव !,
पापानि यानि विहितान्यहितप्रदानि ।
वाक्कायमानसभवानि मयाऽतिमौढ्यात्,
त्वद्दर्शनेन विफलानि भवन्तु तानि ॥४७॥

नमो दुर्वाररागादिवैरिवारनिवारिणे ।
अर्हते योगिनाथाय, महावीराय तायिने ॥४८॥

लावण्यपुण्यवपुषि, त्वयि नेत्रामृताञ्जने ।
माध्यस्थ्यमपि दौःस्थ्याय, किं पुनर्द्वेषविप्लवः ॥४९॥

त्वां त्वत्फलभूतान् सिद्धांस्त्वच्छासनरतान् मुनीन् ।
त्वच्छासनं च शरणं, प्रतिपन्नोऽस्मि भावतः ॥५०॥

तव प्रेष्योऽस्मि दासोऽस्मि, सेवकोऽस्म्यस्मि किङ्करः ।
ओमिति प्रतिपद्यस्व, नाथ ! नातः परं ब्रुवे ॥५१॥

ध्मातं सितं येन पुराणकर्म, यो वा गतो निर्वृति–सौधमूर्ध्नि ।
ख्यातोऽनुशास्ता परिनिष्ठितार्थो, यः सोस्तुसिद्धो कृतमङ्गलो मे॥

तथा प्रसीद विश्वेश !, त्वदेकशरणे मयि ।
यथा त्वद्ध्यानयोगेन, मन्मनः त्वन्मयं भवेत् ॥५३॥

यद्दाये द्यूतकारस्य, यत्प्रियायां वियोगिनः ।
यद्राधावेधिनो लक्ष्ये, तद्ध्यानं मेऽस्तु त्वन्मते ॥५४॥

अप्रसन्नात् कथं प्राप्यं, फलमेतदसङ्गतम् ।
चिन्तामण्यादयः किं न, फलन्त्यपि विचेतनाः ॥५५॥

नारका अपि मोदन्ते, यस्य कल्याणपर्वसु ।
पवित्रं तस्य चारित्रं, को वा वर्णयितुं क्षमः ? ॥५६॥

संसारमारवपथे पतितेन नाथ !,
सीमन्तिनीमरुमरीचिविमोहितेन ।
दृष्टः कृपारसनिधिस्त्वमतः कुरुष्व,
तृष्णापनोदवशतो जिन ! निर्वृतिं मे ॥५७॥

रागाद् द्वेषात् तथा मोहाद् , भवेद्वितथवादिता ।
तदभावे कथं नामार्हतां वितथवादिता ॥५८॥

तीर्थेशं प्रणमोत्तमाङ्ग ! रसने ! त्वं घोषयाहर्निशं,
पाणी ! पूजयतं मनः ! स्मर पदे ! तस्याऽऽलयं गच्छतम् ।
एवं चेत् कुरुताऽखिलं मम हितं शिरसादयस्तद् ध्रुवं,
नोपेक्षे भवतां कृते भव मडाशार्दूलविक्रीडितम् ॥५९॥

श्रीपार्श्वो धरणेन्द्रसेवितपदः पार्श्वं स्तुवे भक्तितः,
पार्श्वेन प्रतिबोधितश्च कमठः पार्श्वाय कुर्वेऽर्चनम् ।
पार्श्वाच्चिन्तितकार्यसिद्धिरखिला पार्श्वस्य तेजो महत्,
श्रीपार्श्वे प्रकटप्रभाव इह नः श्रीपार्श्व ! सौख्यं कुरु ॥६०॥

त्वन्मूर्त्तिर्हृदि जागर्ति रागार्तिहरणक्षमा ।
मम चित्ते जगन्नाथ ! प्रार्थये किमतः परम् ॥६१॥

श्रीशत्रुञ्जयभूषणं जिनवरं श्रीनाभिभूपात्मजं,
सेन्द्रैर्नाकिवरैर्नरेन्द्रनिकरैर्भक्त्याप्रणुन्नैर्नतम् ।
ज्ञानं यस्य त्रिकालवस्तुविषयं लोकेतराभासकं,
सर्वेषां हितदं कृपारसमयं वन्दे तमादीश्वरम् ॥६२॥
श्रीपार्श्वं तीर्थनाथं प्रशमरसमयं केवलानन्दयुक्तं.
वामेयं पार्श्वयक्षैः सुरवरसहितैः सेवितं भूरिभक्त्या ।
यस्य स्नात्राभिषेकपृथुतरकमलैर्निर्जरा यादवाः स्युः,
ख्यातं शङ्खेश्वरं तं त्रिभुवनविहितख्यातकीर्तिं नमामि ॥
भुवनभावविभावनभास्करं, विकटदुर्घटसङ्कटजित्वरम् ।
विमलनाथमनन्तगुणास्पदं, जिनवरं जितमोहमहं स्तुवे ॥६४॥
इन्दियविसयकसाए, परीसहे वेयणा य उवसग्गे ।
रागदोसे कम्मे, अरी हणंतीति अरिहंता ॥६५॥
सङ्कल्पोऽपि न कल्पतल्पजतरौ चिन्ता न चिन्तामणौ,
कामः कोपि न कामकुम्भविषयो नो चित्रकृच्चित्रकः ।
मन्ये काञ्चनपुरुषोऽपि पुरुषो नो कामधेनौ मनो,
यत्ते श्रीमुनिराजपादकमलद्वन्द्वं मया वन्दितम् ॥६६॥
अंहःसंहतिमाशु लुम्पति धृतिं धत्ते विधत्ते शिवं,
चारित्रं चिनुते निहन्ति कुमतिं भिन्ते भृशं दुर्गतिम् ।
पुष्णात्यद्भुतशुद्धबुद्धिमहिमाः श्रीधर्मकीर्तिप्रभाः,
श्रीवाचंयमराज ! भव्यभविनां पादप्रसादस्तव ॥६७॥
कल्पद्रुकामधुक्चिन्तामणिभ्योप्यतिदुर्लभम् ।
त्वत्पादसेवामेवाहमर्थये सर्वथा प्रभो ! ॥६८॥

चित्तं तुम्ह विलग्गं, तुह गुणसवणेण सवणपरितोसो ।
जीहा नामग्गहणे,एक्का दिट्ठी तप्फडइ ॥६९॥
स्वयम्भुवं भूतसहस्रनेत्र–मनेकमेकाक्षरभावलिङ्गम् ।
अव्यक्तमव्याहतमस्तदोष–मनादिमध्यान्तमपुण्यपापम् ॥७०॥

## २ सरस्वतीस्तुतिः

शारदा शारदाम्भोज–वदना वदनाम्बुजे ।
सर्वदा सर्वदास्माकं, सन्निधिं सन्निधिं क्रियात् ॥१॥

शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं,
वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम् ।
हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां,
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥२॥

यस्याः प्रसादपरिवर्द्धितशुद्धबोधाः,
पारं व्रजन्ति सुधियः श्रुततोयराशेः ।
सानुग्रहा मयि समीहितसिद्धयेऽस्तु,
सर्वज्ञशासनरता श्रुतदेवताऽसौ ॥३॥

विकोसे जिणिंदाणणंभोजलीणा,
कलारूवलावण्णसोहग्गपीणा ।
वहंतस्स चित्तंमि निच्चं पि झाणं,
सुरी भारही ! देउ मे सुद्धनाणं ॥४॥

## ३ सामान्यधर्मसूक्तानि

धर्माज्जन्म कुले शरीरपटुता सौभाग्यमायुर्बलं,
धर्मेणैव भवन्ति निर्मलयशोविद्यार्थसंपत्तयः।
कान्ताराच्च महाभयाच्च सततं धर्मः परित्रायते,
धर्मः सम्यगुपासितो भवति हि स्वर्गापवर्गप्रदः ॥१॥

धर्मोऽयं धनवल्लभेषु धनदः कामार्थिनां कामदः,
सौभाग्यार्थिषु तत्प्रदः किमपरं पुत्रार्थिनां पुत्रदः।
राज्यार्थिष्वपि राज्यदः किमथवा नानाविकल्पैः कृतैः,
तत् किं यन्न करोति किन्तु कुरुते स्वर्गापवर्गावपि ॥२॥

सन्न्यायोपात्तवित्तप्रचयसफलताहेतुदानं सुपात्रे,
देयं शुद्धं च शीलं सकलभयहरं पालनीयं भवद्भिः,
वज्रं दुष्कर्मशैलप्रचयविदलने सत्तपः कर्म कार्यं,
सर्वानुष्ठानसारं भवभयमथना भावना भावनीया ॥३॥

धर्मसिद्धौ ध्रुवा सिद्धिर्द्युम्नप्रद्युम्नयोरपि।
दुग्धोपलम्भे सुलभा, सम्पत्तिर्दधिसर्पिषोः ॥४॥

धर्मेणाधिगतैश्वर्यो, धर्ममेव निहन्ति यः
कथं शुभायतिर्भावी, स स्वामिद्रोहपातकी ॥५॥

दुर्गतिप्रपतत्प्राणि—धारणाद्धर्म उच्यते।
संयमादिर्दशविधः, सर्वज्ञोक्तो विमुक्तये ॥६॥

श्रीधर्मो दययैकधा निजगदे ज्ञानक्रियाभ्यां द्विधा,
ज्ञानाद्यैस्त्रिविधश्चतुर्विधतया ख्यातो व्रतैः पञ्चधा ।
षोढावश्यकपालनेन नयतः सप्ताष्टधा मातृभिः,
सत्तत्त्वैर्नवधा तथा दशविधः क्षान्त्यादिभिर्निर्मलः ॥७॥

धर्मेऽतिरम्ये क्रियतां नृजन्म, रमाः समासाद्य किमु प्रमादः ? ।
लब्ध्वा मुधा साधु बुधा ! मुधा मा,त्याक्षुः क्रमक्षालनहेतवे यत्

संसारकान्तारविहारपार–प्रकारको नास्त्यपरोऽत्र धर्मात् ।
अपारदुर्वारतरान्धकार–प्रचारहारीतरगेर्हि कोऽन्यः ॥९॥

यस्मात् समासाद्य रमां सुरम्यां, धर्मात्ततो ये विमुखीभवन्ति ।
स्वामिद्रुहां धर्ममहामहीन्द्रः, पुनः प्रसन्नः कथमेष तेषाम् ॥१०॥

पात्रे दानं गुरुषु विनयः सर्वसत्त्वानुकम्पा,
न्याय्या वृत्तिः परहितविधावादरः सर्वकालम् ।
कार्यो न श्रीमदपरिचयः सङ्गतिः सत्सु सम्यग्,
राजन ! सेव्यो विशदमतिना सैष सामान्यधर्मः ॥११॥

बावत्तरिकलाकुसला, पंडिअपुरिसा अपंडिआ चेव ।
सव्वकल्लाण पवरां, धम्मकलां जे न जाणंति ॥१२॥

दुःखं तु दुष्कृताज्जातं, तस्यैव क्षयतः क्षयेत् ।
सुकृतात् तत् क्षयश्च स्यात् , तत् तस्मिन् सुदृढो न कः? ॥१३॥

असावनक्षरो लेखो, निर्देवं देवमन्दिरम् ।
निर्जलं च सरो धर्मं, विना यन्मानुषो भवः ॥१४॥

छिन्नमूलो यथा वृक्षो, गतशीर्षो यथा भटः ।
धर्महीनो धनी तद्वत्, कियत्कालं ललिष्यति ? ॥१५॥

धरान्तस्थं तरोर्मूलं, उच्छ्रयेणाऽनुमीयते ।
अदृष्टोपि तथा प्राच्य–धर्मो लक्ष्येत संपदा ॥१६॥

निपानमिव मण्डूकाः, सरः पूर्णमिवाण्डजाः ।
शुभकर्माणमायान्ति, विवशाः सर्वसंपदः ॥१७॥

कल्पद्रुमः कल्पितमात्रदायी, चिन्तामणिश्चिन्तितमेव दत्ते ।
जिनेन्द्रधर्मातिशयं विचिन्त्य, द्वयेऽपि लोको लघुतामवैति॥१८॥

दृष्ट्वा धर्मस्य माहात्म्यं, यः फलेन विशेषितम् ।
न प्रशान्तमनाः सम्यक्, स तु कृत्रिमधर्मवित् ॥१९॥

प्रशान्तं मानसं यस्य, सर्वाङ्गिषु कृपाऽद्भुता ।
राजन् ! धर्मस्य सर्वस्वं, तेन ज्ञातं यथास्थितम् ॥२०॥

धर्मजीवितयोर्मध्ये, धर्ममेव वरं नृणाम्,
जीवितं सुलभं लोके, विना यत्नं भवे भवे ॥२१॥

यत्कल्याणकरोऽवतारसमयः स्वप्नानि जन्मोत्सवो,
यद्रत्नादिकवृष्टिरिन्द्ररचिता यद् रूपराज्यश्रियः ।
यद्दानं व्रतसंपदुज्ज्वलतरा यत्केवलश्रीर्जिने,
यद्रम्यातिशयाः तदेतदखिलं धर्मस्य विस्फूर्जितम् ॥२२॥

एक एव सुहृद्धर्मो, मृतमप्यनुयाति यः ।
शरीरेण समं नाशं, सर्वमन्यत् तु गच्छति ॥२३॥

अपवर्गः फलं यस्य, जन्ममृत्य्वादिवर्जितः ।
परमानन्दरूपश्च, दुष्करं तन्न चाद्भुतम् ॥२४॥

सुखाय सर्वजन्तूनां, प्रायः सर्वाः प्रवृत्तयः ।
न धर्मेण विना सौख्यं, धर्मश्चारम्भवर्जनात् ॥२५॥

जहा सागडिओ जाणं, समं हेच्चा महापहं ।
विसमं मग्गमोइण्णो, अक्खे भंगंमि सोयइ ॥२६॥

एवं धम्मं विउक्कम्म, अहम्मं पडिवज्जिया ।
बाले मच्चुमुहं पत्ते, अक्खे भंगेव सोयई ॥२७॥

बालस्स पस्स बालत्तं, अहम्मं पडिवज्जिआ ।
चिच्चा धम्मं अहम्मिट्ठे, नरएसु उववज्जइ ॥२८॥

धीरस्स पस्स धीरत्तं, सव्वधम्माणुवत्तिणो ।
चिच्चा अहम्मं धम्मिट्ठे, देवेसु उववज्जइ ॥२९॥

नयेन नेता विनयेन शिष्यः, शीलेन नारी प्रशमेन लिङ्गी ।
प्रेहावदानेन भटः प्रचण्डो, धर्मेण जन्तुश्च सदा विभाति ॥३०॥

राजदण्डभयात्पापं, नाचरत्यधमो जनः ।
परलोकभयान्मध्यः, स्वभावादेव चोत्तमः ॥३१॥

जयसिरिविंछियसुहये, अणिट्ठहरणे तिवग्गसारंमि ।
इहपरलोअहियत्थं, सम्मं धम्मंमि उज्जमह ॥३२॥

अर्हद्धर्मतरोः फलानि सुकुले जन्माऽनघं जीवितं,
सच्छ्रीर्बुद्धिबले प्रतापयशसी सौभाग्यमारोग्यता ।

क्ष्माभृत्केशवचक्रिशक्रशशभृत्प्रद्योतनानां पदं,
सार्वश्रीगणभृत्पदं शिवरमा सल्लभ्धयो देहिनाम् ॥३३॥

दुःखात् कौतुकविस्मयव्यवहृतेर्भावात् कुलाचारतो ।
वैराग्यच्च भजन्ति धर्ममलं तेषाममेयं फलम् । श्लोकार्धः

दानं दारिद्र्यनाशाय. शीलं दुर्गतिवारणम् ।
तपः कर्मविनाशाय. भावना भवनाशिनी ॥३४॥

## ४ संघसूक्तानि

संघोऽयं गुणरत्नरोहणगिरिः संघः सतां मण्डनं,
संघोऽयं प्रबलप्रतापतरणिः संघो महामङ्गलम् ।
संघोऽभीप्सितदानकल्पविटपी संघो गुरूणां गुरुः,
संघः सर्वजिनाधिनाथमहितः संघश्चिरं नन्दतात् ॥१॥

रत्नेषु चिन्तामणिरत्नं यद्वत्र सारस्तरूणामिव कल्पवृक्षः ।
देवेषु सर्वेष्वपि वीतरागस्तद्वत्सुपात्रेषु सुसाधुसङ्घः॥२॥

ज्ञानादिनिश्शेषगुणौघरत्नाकरे बिन्दुरिवाम्भसोऽन्तः ।
सङ्घे नियुक्तो निजवित्तलेशः, स्यादक्षयः क्षीणपरिक्षयेत्र ॥३॥

लोकेभ्योपि नृपतिस्ततोपि हि वरश्चक्री ततो वासवः,
सर्वेभ्योपि जिनेश्वरः समधिको विश्वत्रयीनायकः ।
सोपि ज्ञानमहोदधिः प्रतिदिनं सङ्घं नमस्यत्यहो,
वज्रस्वामिवदुन्नतिं नयति तं यः स प्रशस्यः क्षितौ ॥४॥

कदा किल भविष्यन्ति, मद्गृहाङ्गणभूमयः।
श्रीसङ्घचरणाम्भोजरजोराजिपवित्रिताः ॥५॥

अर्हतामपि मान्योऽयं, पूज्यः पुण्यवतामपि।
सेव्यः सुरासुरेशानां, सङ्घः पूज्यतमो बुधैः ॥६॥

सङ्घः सद्गुणसंघसंततिकरः सङ्घो जिनैर्वन्दितः,
सङ्घः शासनवृद्धिहेतुरसकृत्सङ्घः सतां मुक्तिदः।
सद्भक्त्या विधिना स्वार्जितधनैः सङ्घस्य यैः पूजनं,
किं तैर्नाम न पूजितं शुक्रादिभिः किं वा न लब्धं फलम् ॥७॥

कल्पोर्वीरुहमङ्कुरितं तदजिरे चिन्तामणिस्तत्करे,
श्लाघ्या कामदुधाऽनघा च सुरभिः तस्यावतीर्णा गृहे।
त्रैलोक्याधिपतित्वसाधनसहा श्रीस्तन्मुखं वीक्षते,
सङ्घो यस्य गृहाङ्गणं गुणनिधिः पादैः समाक्रामति ॥८॥

पंचपरमिट्ठिरयणाइं, बहुमुल्लाइं जस्स मज्झम्मि।
उप्पज्जंति सयावि हु, स सङ्घरयणायरो जयउ ॥९॥

चक्रे तेन जिनार्चनं सविदधे सम्यग्गुरूपासनं,
तत्त्वं तेन जिनागमस्य कलितं सङ्घोन्नतिं स व्यधात्।
सत्यंकारितमेव तेन सुधिया निर्वाणस्वर्गाऽद्भुतं,
यः साधर्मिकगौरवं वितनुते हृष्टो गुरूणामिव ॥१०॥

साहम्मि वच्छलं जेण, जिणिंदेहिं भुवणपणएहिं ।
सम्मत्तसुद्धिहेउं, निदिट्ठं धम्मियजणस्स ॥११॥
साहम्मि य थिरकरणे, वच्छलं सासणस्स सारोत्ति ।
मग्गसहायत्तणओ, तहा अनासो अधम्मा उ ॥१२॥

## ५ दानसूक्तानि

पात्रे धर्मनिबन्धनं तदितरे प्रोद्यद्दयाख्यापकं,
मित्रे प्रीतिविवर्धनं रिपुजने वैरापहारक्षमम् ।
भृत्ये भक्तिभरावहं नरपतौ सन्मानसंपादकं,
भट्टादौ च यशस्करं वितरणं न क्वाऽप्यहो निष्फलम् ॥१॥
देयं भोज ! घनं धनं सुकृतिना नो संचितव्यं कदा.
श्रीकर्णस्य बलेश्च विक्रमपतेरद्यापि कीर्तिः स्थिरा ।
अस्माकं मधु दानभोगरहितं नष्टं चिरात् सञ्चितं.
निर्वेदादिति पाणिपद्मयुगलं घर्षत्यसौ मक्षिका ॥२॥
ज्ञानवान् ज्ञानदानेन, निर्भयोऽभयदानतः ।
अन्नदानात् सुखी नित्यं, निर्व्याधिरौषधाद् भवेत् ॥३॥
गोदुग्धं वाटिकापुष्पं, विद्या कूपोदकं धनम् ।
दानेन वर्धते नित्यं, विना दानं विनश्यति ॥४॥
प्रदत्तस्य प्रभुक्तस्य, दृश्यते महदन्तरम् ।
दत्तं श्रेयांसि संसूते, विष्टा भवति भक्षितम् ॥५॥

कुक्षिम्भरी न कः कोऽत्र, बह्वाधारः पुमान् पुमान् ।
ततस्तत्कालमायातान्, भोजयेद् बान्धवादिकान् ॥६॥

वर्षन् क्षारार्णवेऽप्यब्दो, मुक्तात्मा क्वापि जायते ।
सततं ददतो दातुः, पात्रयोगोऽपि संभवेत् ॥७॥

अभयं सुपत्तदाणं, अणुकम्पा उचियकीत्तिदाणं च ।
दोहिं वि मुक्खो भणिओ, तिण्णि वि भोगाइयं दिन्ति ॥८॥

ददीत विद्वाननुकूलतान्विते, विधौ यतः पूरयिता स सर्वतः ।
विशेषतस्तु प्रतिकूलतां गते, यतो गृहीताखिलमन्यथाऽपि सः॥

देयं स्तोकादपि स्तोकं, न व्यपेक्ष्यो महोदयः ।
इच्छानुसारिणी लक्ष्मीः, कदा कस्य भविष्यति ॥१०॥

परपत्थणापवन्नं, मा जणणि ! जणेसु एरिसं पुत्तं ।
मा उअरे वि धरिज्जसु, पत्थिअभंगो कओ जेण ॥११॥

पहसंतगिल्लाणेसु, आगमगाहीसु तह य कयलोए ।
उत्तरपारणगंमि अ, दिन्नं सुबहुप्फलं होइ ॥१२॥

पादाम्भोजरजःप्रमार्जनमपि क्ष्मापाललीलावती–
दृष्यापादभुतरत्नकम्बलदलैर्यद्वल्लभानामभूत् ।
निर्माल्यं नवहेममण्डनमपि क्लेशाय यस्यावनी–
पालालिङ्गनमप्यसौ विजयते दानात् सुभद्राङ्गजः ॥१३॥

क्षिप्त्वा तोयनिधिस्तले मणिगणं रत्नोत्करं रोहणो,
रेणावाऽऽवृत्य सुवर्णमात्मनि दृढं बद्ध्वा सुवर्णाचलः ।

क्ष्मामध्ये च धनं निधाय धनदो बिभ्यत्परेभ्यः स्थितः,
किं स्यात्तैः कृपणैः समोऽयमखिलार्थिभ्यः स्वमर्थं ददत् ॥१४॥

नेव दारं पिहावेइ, भुंजमाणो सुसावओ ।
अणुकंपा जिणिंदेहिं, सड्ढाणं न निवारिया ॥१५॥

निअउयरपूरणे वि हु, असमत्था किमिह तेहिं जाएहिं ।
(इत्युक्ते रोरः) सुमहत्था वि हु न परोवयारिण तेहिं न किंपि

यो दुर्लभां कृष्णकचित्रवल्लीं, ददौ दरिद्राय दयार्द्रचित्तः ।
कस्तेन तुल्यो भुवि विक्रमार्क ! त्वयाऽपरःस्यात्तु परोपकारे॥१७॥

केसिं पि होइ चित्तं, वित्तं अन्नेसिमुभयमन्नेसिं ।
चित्तं वित्तं पत्तं, तिन्नि वि केसिंचि धन्नाणं ॥१८॥

वरं करीरो मरुमार्गवर्ती, यः पान्थसार्थं कुरुते कृतार्थम् ।
कल्पद्रुमैः किं कनकाचलस्थैः, परोपकारप्रतिलम्भदुःस्थैः॥१९॥

आद्यं च चेष्टितश्रीदं, द्वितीयं भोज्यदं वसु ।
तृतीयं सैन्यदं तुर्यं, सर्वभूषणदायकम् ॥२०॥

आनन्दाश्रूणि रोमाञ्चो, बहुमानं प्रियं वचः ।
किञ्चानुमोदना पात्र–दान भूषणपञ्चकम् ॥२१॥

अनादरो विलम्बश्च, वैमुख्यं विप्रियं वचः ।
पश्चात्तापश्च पञ्चाऽमी, सद्दानं दूषयन्त्यहो ! ॥२२॥

तं अत्थं तं च सामत्थं, तं विन्नाणं च सुउत्तमं ।
साहम्मियाण कज्जंमि, जं वप्पंति सुसावया ॥२३॥

अभिगम्योत्तमं दानं, आहूतं चैव मध्यमम् ।
अधमं याचितं दानं, सेवादानं तु निष्फलम् ॥२४॥
गौरवं प्राप्यते दानात्, न तु द्रव्यस्य संग्रहात् ।
स्थितिरुच्चैः पयोदानां, पयोधीनामधः पुनः ॥२५॥
प्रतिकूलो विधिस्तेषां, निर्धना ये विनिर्मिताः ।
प्रतिकूलतरस्तेषां, सतोऽर्थान् ददते न ये ॥२६॥
देवे गुरौ च धर्मे च, स्वजने स्वसुतादिषु ।
यद्दत्तं सफलं न स्यात्, तेन किं दुःखहेतुना? ॥२७॥
चित्तं वित्तं च पात्रं च, त्रयमेकत्र संगतम् ।
दुर्लभं लभ्यते येन, जन्म तस्य फलेग्रहि ॥२८॥
असणुल्लसभत्तीए, दत्ते दाणं भवे अणत्थाय ।
जह दीहो संसारो, नागसिरीए तया जाओ ॥२९॥

उक्तश्चायमर्थः श्रीभगवत्यां तथाहि—तिहिं ठाणेहिं जीवा असुभदीहाउयत्ताए कम्मं पकरेंति पाणे अइवाइत्ता भवइ १ मुसं वइत्ता भवइ २ तहारूवं समणं वा माहणं वा हीलित्ता निंदित्ता खिंसित्ता गरहित्ता अवमन्नित्ता अमणुन्ने अपीइकारगेणं असणपाणखाइमसाइमेणं पडिलाभित्ता भवइ ३ एएहिं तिहिं ठाणेहिं जीवा असुहदीहाउयत्ताए कम्मं पकरंति इत्थ ।

साहम्मियाण वच्छल्लं, कायव्वं भत्तिनिब्भरं ।
देसियं सव्वदंसीहिं, सासणस्स पभावगं ॥३०॥

धम्मियजणेहिं विणा न तित्थं, तित्थं विणा न धम्मो ।
ता साहम्मियवच्छल्लेण, तित्थसंघाणणा नूणं ॥३१॥

साहम्मियम्मि पत्ते, नियगेहे जस्स होइ न हु नेहो ।
जिणसासणभणियमिणं, सम्मत्ते तस्स संदेहो ॥३२॥

तम्हा सव्वपयत्तेणं, जो नमुक्कारधारओ ।
सावओ सो वि दट्ठव्वो, जहा परमबंधवो ॥३३॥

प्रसन्ना दृग् मनः शुद्धं, ललिता वाग् नतं शिरः ।
सहजार्थिष्वियं पूजा, विनापि विभवं सताम् ॥३४॥

## ६ पात्रसूक्तानि

खलोऽपि गवि दुग्धं स्याद्, दुग्धमप्युरगे विषम् ।
पात्रापात्रविशेषेण, तत्पात्रे दानमुत्तमम् ॥१॥

पाकारेणोच्यते पापं, त्रकारस्त्राणवाचकः ।
अक्षरद्वयसंयोगे, पात्रमाहुर्मनीषिणः (मनस्विनः) ॥२॥

यानपात्रे भवाम्भोधौ, या न पात्रेऽर्हदादिके ।
कृतार्थीक्रियते लक्ष्मी-रलक्ष्मीः सा न संशयः ॥३॥

मूर्खतपस्वी राजेन्द्र !, विद्वांश्च वृषलीपतिः ।
उभौ तौ तिष्ठतो द्वारे, कस्य दानं प्रदीयते ॥४॥

सुखासेव्यं तपो भीम !, विद्या कष्टदुराचरी ।
विद्वांसं पूजयिष्यामि, तपोभिः किं प्रयोजनम् ? ॥५॥

न विद्यया केवलया, तपसा चाऽपि पात्रता।
यत्र वृत्तमुभे चेमे, तद्धि पात्रं प्रचक्षते ॥६॥

श्वानचर्मगता गङ्गा, क्षीरं मद्यघटस्थितम्।
अपात्रे पतिता विद्या, किं करोति युधिष्ठिर! ॥७॥

तिथिपर्वोत्सवाः सर्वे, त्यक्ता येन महात्मना।
अतिथिं तं विजानीयाच्छेषमभ्यागतं विदुः ॥८॥

कृपणोऽपि भवेद् दाता, याचको भाग्यवान् यदि।
दाताऽपि भवेत् कृपणो, याचकोऽभाग्यवान् यदि ॥९॥

नोदन्वानर्थितामेति, न चाऽम्भोभिर्न पूर्यते।
आत्मा तु पात्रतां नेयः, पात्रतां यान्ति संपदः ॥१०॥

क्षीणमोह–यथाख्यात–चारित्रगुणभूषितम्।
रत्नपात्रोपमं पात्रं, प्राहुः सर्वोत्तमं बुधाः ॥११॥

सम्यग्ज्ञानक्रियोपेतं, प्रशान्तमनगारिणम्।
लाभालाभसमस्वान्तं, स्वर्णपात्रोपमं जगुः ॥१२॥

सम्यग्दर्शनसंशुद्ध–द्वादशव्रतभूषिताः।
रूप्यपात्रोपमां भेजुः, सर्वेऽपि गृहमेधिनः ॥१३॥

चतुर्थे ये गुणस्थाने, विशुद्धे सर्वदा स्थिताः।
ते श्रेणिक इवाख्याता–स्ताम्रपात्रोपमाः सताम् ॥१४॥

मृदादिपात्रतुल्यश्च, मिथ्यादृष्टिजनोऽखिलः।
गुणेन केनचिद्युक्तो, धर्ममार्गानुसारिणा ॥१५॥

सदा पञ्चाश्रवासक्ता, अजिताक्षा मदोद्धताः ।
अपात्राणि भवन्त्यत्र, तत्त्वमार्गपराङ्मुखाः ॥१६॥

मिथ्यादृष्टिसहस्रेषु, वरमेको ह्यणुव्रती ।
अणुव्रतिसहस्रेषु, वरमेको महाव्रती ॥१७॥

महाव्रतिसहस्रेषु, वरमेको जिनाधिपः ।
जिनाधिपसमं पात्रं, न भूतं न भविष्यति ॥१८॥

उत्तमं पत्तं साहू, मज्झिमं पत्तं तु सावया भणिया ।
अविरयसम्मद्दिट्ठी, जहन्नं पत्तं मुणेयव्वं ॥१९॥

आम्रे निम्बे सुतीर्थे कचवरनिचये शुक्तिमध्येऽहिवक्त्रे,
औषध्यद्रौ विषद्रौ गुरुशिरसि गिरौ पाण्डुभूकृष्णभूम्योः ।
इक्षुक्षेत्रे कषायद्रुमवनगहने मेघमुक्तं यथाऽम्भः,
तद्वत्पात्रेषु दत्तं गुरुवदनभवं वाक्यमायाति पाकम् ॥२०॥

मध्यस्थो बुद्धिमानर्थी, जात्यादिगुणसंगतः ।
श्रुतवित् च यथाशक्ति, श्रोता पात्रमिति स्मृतः ॥२१॥

## ७ कुपात्रसूक्तानि

पत्ते वसंतमासे, रिद्धिं पावन्ति सयलवणराई ।
जं न करीरे पत्तं, ता किं दोसो वसंतस्स ? ॥१॥

उइअंमि सहस्सकरे, सलोयणो पिच्छई सयललोओ ।
जं न उलूओ पिच्छइ, सहस्सकिरणस्स को दोसो ? ॥२॥

गरुए अणोरपारे, रयणनिहाणे अ सायरे पत्तो ।
छिद्दघडो न भरिज्जइ, ता किं दोसो जलनिहिस्स ? ॥३॥

उत्तुंगो सरलतरू, बहुफलभारेण नमिअसव्वंगो ।
कुज्जो फलं न पावइ, ता किं दोसो तरुवरस्स ? ॥४॥

दत्ते पुनः कुपात्रेभ्यः, श्रद्धाधानं विवेकिभिः ।
तदीय दुश्चरित्राणां, कृतं स्यादुपबृंहणम् ॥५॥

## ८ कार्पण्यसूक्तानि

अस्ति जलं जलराशौ, क्षारं तत् किं विधीयते तेन ? ।
लघुरपि वरं स कूपो, यत्राऽऽकण्ठं जनः पिबति ॥१॥

अनया रत्नसमृद्ध्या, सागर ! किं स्फुरसि बहुललहरीभिः ।
तव वल्लभा वराक्यो, वहन्ति वर्षास्वपि जलानि ॥२॥

वितर वारिद ! वारि तृषातुरे,
त्वरितमुद्यतचातकयाचके ।
मरुति विस्फुरति क्षणमन्यथा,
क्व च भवान् क्व पयः क्व स चातकः ? ॥३॥

कीटिकासंचितं धान्यं, मक्षिकासंचितं मधु ।
कृपणैः संचिता लक्ष्मी-रन्यैरेवोपभुज्यते ॥४॥

कृपणेन समो दाता, न भूतो न भविष्यति ।
अस्पृशन्नेव स्वं वित्तं, परेभ्यः संप्रयच्छति ॥५॥

किं तेन हेमगिरिणा रजताद्रिणा वा,
यत्राश्रितास्तु तरवस्तरवस्त एव ।
मन्यामहे मलयमेव यदाश्रयेण,
कङ्कोलनिम्बकुटजा अपि चन्दनानि ॥६॥

अन्ये ते खलु नीरदा जलधरास्तृष्णां विनिघ्नन्ति ये,
भ्रातश्चातक ! किं वृथाऽत्र रटितैः खिन्नोसि विश्राम्यताम् ।
मेघः शारद एष काशधवलः पानीयरिक्तोदरो,
गर्जत्येव हि केवलं भृशमपां नो बिन्दुमुद्यच्छति ॥७॥

प्रापितेन चटुकाकुविडम्बं, लम्भितेन बहुयाचनलज्जाम् ।
अर्थिना यदघमर्ज्यते दाता, तन्न लुम्पति विलम्ब्य ददानः ॥८॥

याचमानजनमानसवृत्तेः, पूरणाय बत जन्म न यस्य ।
तेन भूमिरिह भारवतीयं, न द्रुमैर्न गिरिभिर्न समुद्रैः ॥९॥

तणलहुओ तूसलहुओ, तहेव लहुआओ मग्गणो लहुओ ।
पत्थगावि हु लहुयरो, पत्थणाभङ्गो कओ जेण ॥१०॥

लघुधूली तृणं तस्या–स्तृणात्तूलं ततोऽनिलः ।
ततोऽपि याचकस्तस्मा–दपि याचकवञ्चकः ॥११॥

हिंसेव सर्वपापानां, मिथ्यात्वमिव कर्मणाम् ।
राजयक्ष्मेव रोगानां, लोभः सर्वांहसां गुरुः ॥१२॥

## ९ शीलधर्ममाहात्म्यसूक्तानि

वेश्या रागवती सदा तदनुगा षड्भिरसैर्भोजनं,
शुभ्रं धाम मनोहरं वपुरहो ! नव्यो वयः संगमः ।

कालोऽयं जलदाविलस्तदपि यः कामं जिगायाऽऽदरात् ,
तं वन्दे युवतिप्रबोधकुशलं श्रीस्थूलभद्रं मुनिम् ।।१।।

गिरौ गुहायां विजने वनान्तरे, वासं श्रयन्तो वशिनः सहस्रशः ।
हर्म्येऽतिरम्ये युवतीजनान्तिके, वशी स एकः शकटालनन्दनः ।।

रेकाम ! वामनयना तव मुख्यमस्त्रं,
वीरा वसन्त-पिक-पञ्चम-चन्द्रमुख्याः ।
त्वत्सेवका हरि-विरञ्चि-महेश्वराद्याः,
हा हा हताश ! मुनिनाऽपि कथं हतस्त्वम् ? ।।३।।

श्रीनन्दिषेण–रथनेमि–मुनीश्वरार्द्र–
बुध्या त्वया मदन ! रे ! मुनिरेष दृष्टः ।
ज्ञातं न नेमि–मुनिजम्बू–सुदर्शनानां,
तुर्यो भविष्यति निहत्य रणाङ्गणे माम् ।।४।।

श्रीनेमितोऽपि शकटालसुतं विचार्य,
मन्यामहे वयममुं भटमेकमेव ।
देवोऽद्रिदुर्गमधिरुह्य जिगाय मोहं,
यन्मोहनालयमयं तु वशी प्रविश्य ।।५।।

कुण्डले नाभिजानामि, नाभिजानामि कङ्कणे ।
नूपुरे त्वभिजानामि, नित्यं पादाब्जवन्दनात् ॥६॥

सौन्दर्यैकनिधेः कलाकुलविधेर्लावण्यपाथोनिधेः,
पीनोत्तुङ्गपयोधरालसगतेः पातालकन्याकृतेः ।
कान्ताया नवयौवनाश्रिततनोर्यैरुज्झितः संगमः,
सम्यग् मानसगोचरे चरति किं तेषां हताशः स्मरः ॥७॥

शृङ्गारामृतसेकशाद्वलरुचिर्वक्रोक्तिपत्रान्विता,
प्रोद्गच्छत्सुमनोभिषङ्गसुभगा स्त्रीणां कथावल्लरी ।
यैर्ब्रह्मव्रतपावकेन परितो भस्मावशेषीकृता,
किं तेषां विषमायुधः प्रकुरुते रोषप्रकर्षोऽपि रे ! ॥८॥

आताम्रायतलोचनाभिरनिशं संतर्ज्य संतर्ज्य च,
क्षिप्तस्तीक्ष्णकटाक्षमार्गणगणो मत्ताङ्गनाभिर्भृशम् ।
तेषां किं नु विधास्यति प्रशमितप्रद्युम्नलीलात्मनां,
येषां शुद्धविवेकवज्रफलकं पार्श्वे परिभ्राम्यति ॥९॥

अग्रे सा गजगामिनी प्रियतमा पृष्ठेऽपि सा दृश्यते,
धात्र्यां सा गगनेऽपि सा किमपरं सर्वत्र सा सर्वदा ।
आसीद्यावदनङ्गसङ्गतिरसस्तावत्तवेयं स्थितिः,
सम्प्रत्यास्यपुरःसरामपि न तां द्रष्टाऽसि कोऽयं लयः ? ॥१०॥

सम्यक् परिहृता येन, कामिनी गजगामिनी ।
किं करिष्यति रुष्टोऽपि, तस्य वीरवरः स्मरः ॥११॥

धन्यास्ते वन्दनीयास्ते, तैस्त्रैलोक्यं पवित्रितम् ।
यैरेष भुवनक्लेशी, काममल्लो विनिर्जितः ॥१२॥

यमश्च नियमश्च द्वौ, विख्यातौ तीव्रदुःखदौ ।
किन्त्वायुः प्रान्त एवैकः, परस्त्वाजन्मतोऽनिशम् ॥१३॥

दानवीरास्तपोवीरा, विद्यावीराः परे पुनः ।
तृणवन्मुत्कराः सन्ति, ब्रह्मचारी सुदुर्लभः ॥१४॥

अक्षाय वह्नौ वराका विशन्ति, शस्त्रैः स्वगात्राणि विदारयन्ति ।
कृच्छ्राणि चित्राणि समाचरन्ति, मारारिवीरं विरला जयन्ति ॥

गतियुगलकबेधोन्मत्तपुष्पोत्कराणां,
हरशिरसि निवासः श्मशाने वा निपातः ।
विमलकुलभवानामङ्गनानां शरीरं,
पतिकरकमलो वा सेवते सप्तजिह्वः ॥१६॥

सयसहस्सनारीणं, पोट्टं फाडेइ णिग्घिणो ।
सत्तट्ठमासिए गब्भे, तप्फडन्ते निकिन्तइ ॥१७॥

ता जस्स जत्तियं सियं, तत्तियं चेव नवगुणं ।
इक्कसित्थीपसङ्गेण, साहू बन्धिज्ज मेहुणे ॥१८॥

साहुणिए सहस्सगुणं मेहुणेक्कसि सेविए ।
कोडीगुणं विइज्जेणं तइए बोहि विणस्सइ ॥१९॥

आजम्मेणं तु जं पावं, बन्धिज्ज मच्छबन्धओ ।
वयभंगं काउमाणस्स, तं चेवट्ठगुणं भवे ॥२०॥

## १० तपःसूक्तानि

न नीचैर्जन्म स्यात् प्रभवति न रोगव्यतिकरो,
न वाध्यज्ञानत्वं विलसति न दारिद्र्यललितम् ।
पराभूतिर्न स्यात् किमपि न दुरापं किल यत-
स्तदेवेष्टप्राप्तौ कुरुत निजशक्त्याऽपि सुतपः ॥१॥

पृथ्वीनाथसुता भुजिष्यचरिता जञ्जीरिता मुण्डिता,
क्षुत्क्षामा रुदती विधाय पदयोरन्तर्गतां देहलीम् ।
कुल्माषान् प्रहरद्वयव्यपगते मे सूर्पकोणस्थितान्,
दद्यात् पारणकं तदा भगवतः सोऽयं महाभिग्रहः ॥२॥

प्रायो नाम तपः प्रोक्तं, चित्तं निश्चलमुच्यते ।
तपोनिश्चलसंयुक्तं, प्रायश्चित्तमिति स्मृतम् ॥३॥

तपस्तीव्रघरट्टोऽयं, क्षमामर्कटीकान्वितः ।
धृतिहस्तो मनः किलः, कर्मधान्यानि चूर्णयेत् ॥४॥

सुमतिस्त्वेकभक्तेन, चतुर्थाद्वसुपूज्यभूः ।
अष्टमेन पार्श्व-मल्ली, शेषाः षष्ठात्प्रवव्रजुः ॥५॥

अष्टमात्केवलं प्रापुः पार्श्वनेमादिमल्लयः ।
वासुपूज्यश्चतुर्थेन, शेषाः षष्ठेन तीर्थपाः ॥६॥

उपवासैः शिवं षड्भि-रगान्नाभिभवो जिनः ।
द्वाभ्यां वीरोऽपरे मास-क्षपणेन जिनाधिपाः॥७॥

ऋषभस्वामिनो निष्क्रमणतपश्चैत्रमासबहुलाष्टमीदिने एव षष्टं कार्यं, श्रीवर्धमानस्वामिनश्च मार्गशीर्षबहुल–दशमी-दिने एव एवमन्येषां जिनेश्वराणामपि ।

अट्ठमं भत्तं तंमि य, पासोसहमल्लिरिट्ठनेमिणं ।
वासुपुज्जस्स चउत्थेण, छट्ठमभत्तेण सेसाणं ॥८॥

निव्वाणमंतकिरिया, चोद्दसमेण पढमनाहस्स ।
सेसाण मासिएण, वीरजिणिंदस्स छट्ठेण ॥९॥

सुमइत्थ णिच्चभत्तेण, णिग्गओ वासुपुज्जजिणो चउत्थेण ।
पासो मल्ली वि य अट्ठमेण सेसाउ छट्ठेण ॥१०॥

यत्र रोधः कषायाणां, ब्रह्मध्यानं जिनस्य च ।
ज्ञातव्यं तत्तपः शुद्ध-मवशिष्टं तु लङ्घनम् ॥११॥

बुभुक्षा देहकार्श्यं वा, तपसो नास्ति लक्षणम् ।
तितिक्षा ब्रह्मगुप्त्यादि-स्थानं ज्ञानं तु तद्वपुः ॥१२॥

कर्म तापकरं ज्ञानं, तपः तन्नैव वेत्ति यः ।
प्राप्नोतु स हतस्वान्तो, विपुलां निर्जरां कथम् ॥१३॥

ज्ञानयोगः तपः शुद्ध-मित्याहुर्मुनिपुङ्गवाः ।
तस्मान्निकाचितस्यापि, कर्मणो युज्यते क्षयः ॥१४॥

यस्माद्विघ्नपरंपराविघटते दास्यं सुराः कुर्वते,
कामः शाम्यति दाम्यतीन्द्रियगणः कल्याणमुत्सर्पति ।

उन्मीलन्ति महर्द्धयः कलयति ध्वंसचयः कर्मणां,
स्वाधीनं त्रिदिवं शिवं च भवति श्लाघ्यं तपस्तन्न किम् ॥१५॥

रसरुधिरमांसमेदो-स्थिमज्जा शुक्राण्यनेन तप्यन्ते ।
कर्माणि चाशुभानीत्यतस्तपो नाम नैरूक्तम् ॥१६॥

यत्पूर्वार्जितकर्मशैलकुलिशं यत्कामदावानलः,
ज्वालाजालजलं यदुग्रकरणग्रामाहिमन्त्राक्षरम् ।
यत्प्रत्यूहतमःसमूहदिवसो यल्लब्धिलक्ष्मीलता,-
मूलं तद्द्विविधं यथाविधितपः कुर्वीत वीतस्पृहः ॥१७॥

दुर्लभं सुलभं वक्रं, सरलं वास्थिरं स्थिरम् ।
दुःसाध्यं च सुसाध्यं स्या-त्तपोभिरमलैर्नृणाम् ॥१८॥

भवैरनेकैराचीर्णा-न्येनांस्यतिमहान्त्यपि ।
सम्यगालोचनापूर्वं, शुद्ध्यत्येव तपः सृजन् ॥१९॥

निःसंदेहमयं देहस्तेषामेव फलेग्रहिः ।
साहाय्येनास्य यैस्तेपे, महोदयफलं तपः ॥२०॥

अट्ठमभत्ते कोडी, कोडाकोडी य दसमभत्तंमि ।
अओ परं बहुनिज्जर-हेऊ नूणं तवो भणिओ॥२१॥

सट्ठिं वाससहस्साइं, अविलंबं अंबिलाइं बिहिआइं ।
जाए निक्खमणकए, सा सुन्दरी साविया धन्ना ॥२२॥

अथिरं पि थिरं वंकं-पि उज्जुयं दुल्लहं सुलहं हवइ ।
दुस्सज्झं पि सुसज्झं, तवेण संपज्जए कज्जंम् ॥२३॥

# ११ भावसूक्तानि

न कृतं सुकृतं किञ्चित्, सतां च स्मरणोचितम् ।
मनोरथैकसाराणां, एवमेव गतं वयः ॥१॥

यन्मयोपार्जितं पुण्यं, जिनशासनसेवया ।
जिनशासनसेवैव, तेन मेऽस्तु भवे भवे ॥२॥

सुखस्य दुःखस्य न कोऽपि दाता, परो ददातीति कुबुद्धिरेषा ।
पुराकृतं कर्म तदेव भुज्यते, पुरुष! हे ! निस्तर तत्त्वया कृतम्॥३॥

शत्रुर्दहति संयोगे, वियोगे मित्रमप्यहो ! ।
उभयो र्दुःखदायित्वात्, को भेदः शत्रुमित्रयोः ? ॥४॥

हत्वा नृपं पतिमुपेक्ष्य भुजङ्गदष्टं,
देशान्तरे विधिवशाद् गणिकाऽस्मि जाता ।
पुत्रस्य भोगमभिगम्य चितां प्रविष्टा,
शोचामि गोपगृहिणी कथमद्य तक्रम् ॥५॥

इहोपपत्तिर्मम केन कर्मणा,
क्व च प्रयातव्यमितो भवादिति ।
विचारणा यस्य न जायते हृदि,
कथं स धर्मप्रवणो भविष्यति ? ॥६॥

ज्वालाभिः शलभा जलैर्जलचराः स्फूर्जज्जटाभिर्वटाः,
मुण्डैश्चोरणकाः समस्तपशवो नग्नैः खरा भस्मभिः ।

काष्ठाङ्गावरणैर्द्रुमाः शुकवराः पाठैर्बका ध्यानकैः,
किं शुध्यन्ति? न भावशुद्धिरहिताः सर्वाःक्रिया निष्फलाः ॥७॥

पुनः प्रभातं पुनरेव शर्वरी,
पुनः शशाङ्कः पुनरुत्थितो रविः ।
कालस्य किं गच्छति ? याति जीवितं,
तथाऽपि मूढः स्वहितं न बुध्यते ॥८॥

दिवसरजन्यौ सायं प्रातः, शिशिरवसन्तौ पुनरायातः तौ ।
कालः क्रीडति गच्छत्यायु-र्विरमति नायमविद्यावायुः ॥९॥

प्रहरद्वयमार्गेऽपि, नराः कुर्वन्ति शम्बलम् ।
न कुर्वन्ति परत्रार्थे, वर्षकोटिप्रयाणके ॥१०॥

ग्रामान्तरे विहितशम्बलकः प्रयाति,
सर्वोऽपि लोक इह रूढिरिति प्रसिद्धा ।
मूढस्तु दीर्घपरलोकपथप्रयाणे,
पाथेयमात्रमपि नो विदधात्यधन्यः ॥११॥

जागर्ति यावदिह कालभुजङ्गमो नो,
पञ्चाननः स्वपिति यावदयं च कामः ।
यावद्विवेकनिहताऽस्ति च मोहरात्रि-
र्निर्गच्छ संसृतिवनाद् निभृतोऽङ्ग ! तावत् ॥१२॥

जिनधर्मविनिर्मुक्तो, मा भूवं चक्रवर्त्यपि ।
स्यां चेटोऽपि दरिद्रोऽपि, जिनधर्माधिवासितः ॥१३॥

त्यक्तसङ्गो जीर्णवासा, मलक्लिन्नकलेवरः ।
भजन् माधुकरीं वृत्तिं, मुनिचर्यां कदा श्रये ॥१४॥

त्यजन् दुःशीलसंसर्गं, गुरुपादरजः स्पृशन् ।
कदाऽहं योगमभ्यस्यन् , प्रभवेयं भवच्छिदे ॥१५॥

महानिशायां प्रकृते, कायोत्सर्गे पुराद्बहिः ।
स्तम्भवत् स्कन्धकषणं, वृषाः कुर्युः कदा मयि ॥१६॥

वने पद्मासनासीनं, क्रोडस्थितमृगार्भकम् ।
कदाऽऽघ्रास्यन्ति वक्त्रे मां, जरन्तो मृगयूथपाः ॥१७॥

शत्रौ मित्रे तृणे स्त्रैणे, स्वर्णेऽश्मनि मणौ मृदि ।
मोक्षे भवे भविष्यामि, निर्विशेषमतिः कदा ॥१८॥

क्रियाशून्यस्य यो भावो, भावशून्यस्य या क्रिया ।
अनयोरन्तरं दृष्टं, भानु–खद्योतयोरिव ॥१९॥

मेरुस्स सरिसवस्स य, जत्तियमित्तं तु अंतरं होइ ।
भावत्थय–दव्वत्थये, तत्तियं अंतरं जाण ॥२०॥

उक्कोसं दव्वथुयं, आराहिय जाइ अच्चुयं जाव ।
भावत्थएण पावइ, अंतोमुहुत्तेण निव्वाणं ॥२१॥

चिन्तारत्नमतिक्लिष्टं, आन्तरं धनमुच्यते ।
यस्य तन्मुषितं दोषैस्तस्य शिष्टा विपत्तयः ॥२२॥

इगुणवीसं लक्खा, तेसट्ठिसहस्सदुसयसत्ताहि-
पलियाइं देवाउं, बंधइ नवकारउस्सग्गे ॥२३॥

लक्खिगसट्ठिपणतीस, सहस्सदुसयदुअपलिअं देवाउं ।
बंधइ अहियं जीवो, पणवीसूसासउस्सग्गे ॥२४॥
छठ्ठट्ठमदसमदुवालसेहिं, अबहुसुअस्स जा सोही ।
इत्तो अ अणेगगुणा, सोही नाणिस्स जिमिअस्स ॥२५॥
श्रीशान्तिनाथादपरो न दानी: दशार्णभद्रादपरो न मानी ।
श्रीशालिभद्रादपरो न भोगी, श्रीस्थूलभद्रादपरो न योगी ॥२६॥
यतः पूर्वं श्रुतज्ञानं, संयमश्च ततः परः [श्लोकार्धः]
अजिर्णं तपसः क्रोधो, ज्ञानाजीर्णमहङ्कृतिः ।
परतप्तिः क्रियाऽजीर्णं, अन्नाजीर्णं विसूचिका ॥२७॥
पूआ जिणिंदे सुरई वएसु, जत्तो य सामाइयपोसहेसु ।
दाणं सुपत्ते सयणं सुतित्थे, सुसाहुसेवा सिवलोयमग्गो ॥२८॥
आसन्ने परमपए, पावेयव्वंमि सयलकल्लाणे ।
जीवो जिणिंदभणियं, पडिवज्जइ भावओ धम्मं ॥२९॥
अस्मादृशां प्रमादग्रस्तानां चरणकरणहीनानाम् ।
अब्धौ पोत इवेह, प्रवचनरागः शुभोपायः ॥३०॥
विषयानुबन्धबन्धुर–मन्यन्न किमप्यहं फलं याचे ।
किन्त्वेकमिह जन्मनि, जिनमतरागं परत्राऽपि ॥३१॥
शास्त्राभ्यासो जिनपदनतिः संगतिः सर्वदार्यैः,
सद्वृत्तानां गुणगणकथा दोषवादे च मौनम् ।
सर्वस्यापि प्रियाहितवचो भावना चात्मतत्त्वे,
सम्पद्यन्तां मम भवभवे यावदाप्तोऽपवर्गः ॥३२॥

# १२ रत्नत्रयमाहात्म्यसूक्तानि

सज्ज्ञानमूलशाली, दर्शनशाखश्च येन व्रततरुः ।
श्रद्धाजलेन सिक्तो, मुक्तिफलं तस्य स ददाति ॥१॥

मिथ्यात्वानुचरे विचित्रगतिभिः संचारितस्योद्भटै-
रत्युग्रभ्रममुद्गराहतिवशात्संमूर्च्छितस्याऽनिशम् ।
संसारेऽत्र नियन्त्रितस्य निगडैर्मायामयैश्चौरवत्,
मुक्तिः स्यान्मम सत्वरं कथमतः सद्वृत्तवित्तं विना ॥ २ ॥

वयसमणधम्मसंजम-वेयावच्चं च बंभगुत्तीओ ।
नाणाइतियं तवकोहनिग्गहा इइ चरणमेयं ॥ ३ ॥

पिंडविसोही समिई, भावण पडिमा य इंदियनिरोहो ।
पडिलेहणगुत्तीओ, अभिग्गहा चेव करणं तु ॥ ४ ॥

पञ्चाश्रवपरिहारः, कषायेन्द्रियनिग्रहः ।
त्रिदण्डविरतिः सप्त-दशधा संयमो भवेत् ॥ ५ ॥

देवलोकसमानो हि, पर्यायो यतीनां व्रते ।
रतानामरतानां च, महानरकसन्निभः ॥ ६ ॥

यदज्ञानात्क्षिपेत्कर्म, बह्वीभिर्वर्षकोटिभिः ।
तत्कर्मोच्छ्वासमात्रेण, त्रिगुप्तो ज्ञानवान् क्षिपेत् ॥७ ।

निर्जितमदमदनानां, वाक्कायमनोविकाररहितानां ।
विनिवृत्तपराशाना-मिहैव मोक्षः सुविहितानाम् ॥ ८ ॥

एषां च वस्त्रे न पतन्ति यूका न देशभङ्गो न च राष्ट्रचिन्ता।
पादोदकेनापि गदोपशान्तिर्युगप्रधाना मुनयो वदन्ति ॥९॥

धैर्यं यस्य पिता क्षमा च जननी शान्तिश्चिरं गेहिनी,
सत्यं सूनुरयं दया च भगिनी भ्राता मनःसंयम।
शय्या भूमितलं दिशोऽपि वसनं ज्ञानामृतं भोजनं,
एते यस्य कुटुम्बिनो वद सखे! कस्माद् भयं योगिनः? ॥१०॥

ये तीर्णा भववारिधिं मुनिवरास्तेभ्यो नमस्कुर्महे,
येषां नो विषयेषु गृध्यति मनो नो वा कषायैः प्लुतम्।
रागद्वेषविमुक् प्रशान्तकलुषं साम्याप्तशर्माऽद्वयं।
नित्यं खेलति प्राप्तसंयमगुणाक्रीडे भजद्भावनाः ॥११॥

स्वाध्यायमाधित्ससि नो प्रमादैः,
शुद्धा न गुप्तीः समितीश्च धत्से।
तपो द्विधा नार्जसि देहमोहा-
दल्पेऽपि हेतौ दधसे कषायान् ॥१२॥

परीषहान्नो सहसे न चोप-
सर्गान् न शीलाङ्गधरोऽपि चाऽसि।
तन्मोक्ष्यमाणोऽपि भवाब्धिपारं,
मुने! कथं यास्यसि वेषमात्रात्? ॥१३॥ युग्मम् ॥

सारङ्गी सिंहशावं स्पृशति सुतधिया नन्दिनी व्याघ्रपोतं,
मार्जारी हंसबालं प्रणयपरिवशात्केकिकान्ता भुजङ्गम्।

वैराण्याजन्मजातान्यपि गलितमदा जन्तवोऽन्ये त्यजेयु-
र्दृष्ट्वा साम्यैकरूढं प्रशमितकलुषं योगिनं क्षीणमोहम् ॥ १४ ॥

यैः क्षुण्णाः प्रसरद्विवेकपविना कोपादिभूमिभृतो,
योगाभ्यासपरश्वधेन मथितो यैर्मोहधात्रीरुहः।
बद्धः संयमसिद्धमन्त्रविधिना यैः प्रौढकामज्वर-
स्तान्मोक्षैकसुखालुधङ्गरसिकान्वन्दामहे योगिनः ॥ १५ ॥

यैस्त्यक्ता किल शाकिनीवदसमप्रेमाञ्चिता प्रेयसि,
लक्ष्मीः प्राणसमापि पन्नगवधूवत्प्रोज्झिता दूरतः।
मुक्तं चित्रगवाक्षराजिरुचिरं वल्मीकवन्मन्दिरं,
निःसङ्गत्वविराजिताः क्षितितले नन्दन्तु ते साधवः ॥ १६ ॥

यः परवादे मूकः, परनारीवक्त्रवीक्षणेऽप्यन्धः।
पङ्गुः परधनहरणे, स जयति लोके महापुरुषः ॥ १७ ॥

आक्रोशेन न दूयते न च चटुप्रोक्त्या समानन्द्यते,
दुर्गन्धेन न बाध्यते न च सदा मोदेन संप्रीयते।
स्त्रीरूपेण न रज्यते न च मृतश्वानेन विद्विष्यते,
माध्यस्थेन विराजितो विजयते कोऽप्येष योगीश्वरः ॥ १८ ॥

मित्रे नन्दति नैव नैव पिशुने वैरातुरं जायते,
भोगे लुभ्यति नैव नैव तपसि क्लेशं समालम्बते।
रत्ने रज्यति नैव नैव दृषदि प्रद्वेषमापद्यते,
येषां शुद्धहृदां सदैव हृदयं ते योगिनो योगिनः ॥ १९ ॥

कारुण्येन हता वधव्यसनिता सत्येन दुर्वाच्यता,
सन्तोषेण परार्थचौर्यपटुता शीलेन रागान्धता।
नैर्ग्रन्थ्येन परिग्रहिलता यैर्यौवनेऽपि स्फुटं,
पृथ्वीयं सकलाऽपि तैः सुकृतिभिर्मन्ये पवित्रीकृता॥ २०॥
धर्मज्ञो धर्मकर्ता च, सदा धर्मपरायणः।
सत्त्वेभ्यो धर्मशास्त्रार्थ–देशको गुरुरुच्यते॥ २१॥
विना गुरुभ्यो गुणनीरधिभ्यो,
जानाति धर्मं न विचक्षणोऽपि।
आकर्णदीर्घो–ज्ज्वल–लोचनोऽपि,
दीपं विना पश्यति नान्धकारे॥ २२॥
दोसा जेण निरुज्झन्ति, जेण खिज्जंति पुव्वकम्माइं।
सो सो मुक्खोवाओ, रोगावत्थासु समणं व॥ २३॥
जोगे जोगे जिणसासणम्मि दुक्खक्खयं पउंजन्ता।
इक्किकम्मि अणंता, वट्टंता केवलं पत्ता॥ २४॥
मिच्छत्तमोहणिज्जा, नाणावरणा चरित्तमोहाओ।
तिविहतमा उम्मुक्का, तम्हा ते उत्तमा हुंति॥ २५॥
नाणं चरित्तहीणं, लिंगग्गहणं च दंसणविहूणं।
संजमहीणं च तवं, जो चरइ निरत्थयं तस्स॥ २६॥
नो दुष्कर्मप्रयासो न कुयुवतिसुतस्वामिदुर्वाक्यदुःखं,
राजादौ न प्रणामोऽशनवसनधनस्थानचिन्ता न चैव।
ज्ञानाप्तिर्लोकपूजाप्रशमसुखरतिः प्रेत्य मोक्षाद्यवाप्तिः,

श्रामण्येऽमी गुणाः स्युः तदिह सुमतयः तत्र यत्नं कुरुध्वम्॥२७॥

सव्वरयणामएहिं, *विभूसिअं जिणहरेहिं* महिवलयं ।
जो कारिज्ज समग्गं, तओ वि चरणं महिड्ढीअं॥ २८॥

आजन्माराधिताद् देश-संयमाद् यत् फलं भवेत् ।
अन्तर्मुहूर्तमात्रेण, तत् पुनः सर्वसंयमात् ॥ २९॥

उत्कृष्टाद् देशविरतेः, स्थानात् सर्वजघन्यकम् ।
स्थानं तु सर्वविरते-रनन्तगुणतोऽधिकम् ॥ ३०॥

एगदिवसं पि जीवो, पव्वज्जमुवागओ अणन्नमणो ।
जइ नवि पावइ मुक्खं, अवस्स वेमाणिओ होइ ॥ ३१॥

जत्थ य विसयविराओ, कसायचाओ गुणेसु अणुराओ ।
किरियासु अप्पमाओ, सो धम्मो सिवसुहोवाओ ॥ ३२॥

कायो न केवलमयं परितापनीयो,
मिष्टैरसैर्बहुविधैर्न च लालनीयः ।
चित्तेन्द्रियाणि न चरन्ति यथोत्पथेन,
वश्यानि येन च तदाचरितं जिनानाम् ॥ ३३॥

कषायदोषनिर्मुक्तः, साम्यवान् जितमानसः ।
शुक्लध्यानमयः स्वात्माऽध्यक्षो मोक्ष उदीरितः ॥ ३४॥

नवे वयसि या दीक्षा नैव हास्याय सा भवेत् ।
नहि पीयूषपानेऽपि, प्रस्तावः प्रेक्ष्यते बुधैः ॥ ३५॥

नैवास्ति राजराजस्य, तत्सुखं नैव देवराजस्य ।

यत्सुखमिहैव साधो–र्लोकव्यापाररहितस्य ॥ ३६ ॥

विक्रमोऽरिष्विवारीणां, वाग्वादिष्विव वादिनाम् ।
मुनीनामवदातं हि, विराद्धेषु सहिष्णुता ॥ ३७ ॥

न च राजभयं न च चोरभयं, नरकीर्तिकरं नरदेवनतम् ।
इहलोकसुखं परलोकहितं, श्रमणत्वमिदं रमणीयतरम् ॥ ३८ ॥

स्नेहमूलानि दुःखानि, रसमूलाश्च व्याधयः ।
लोभमूलानि पापानि, त्रीणि त्यक्त्वा सुखी भव ॥ ३९ ॥

फरुसवयणेण दिणतवं, अहिखिवंतो य हणइ मासतवं ।
वरिसतवं सवमाणो, हणइ हणंतो य सामन्नं ॥ ४० ॥

जोए करणे सन्ना–इंदियभोमाइसमणधम्मे य ।
सीलंगसहस्साण, अट्ठारसगस्स निप्फत्ती ॥ ४१ ॥

ताम्बूलं सूक्ष्मवस्त्राणि, स्त्रीकथेन्द्रियपोषणम् ।
दिवा निद्रा सदा क्रोधो, यतीनां पतनानि षट् ॥ ४२ ॥

व्रते ह्येकाहमात्रेऽपि, न स्वर्गादन्यतो गतिः ॥ [ श्लोकार्धम् ]

सुरगणसुहं समत्तं, सव्वद्धा पिंडिअं अनंतगुणं ।
णवि पावइ मुत्तिसुहं, णंताहिं वि वग्गवग्गेहिं ॥ ४३ ॥

## १३ गौचरीसूक्तानि

आहाकम्मनिमंतण–पडिसुणमाणे अइक्कमो होइ ।
पयभेयाइ वइक्कम, गहिए तइएयरो गिलिए ॥१॥

वाहवहनाडिपायं, पढमं उप्पाडिऊण वच्चिज्जा ।
धरणियलं नो दंडं, धरिज्ज जा लब्भए भिक्खं ॥२॥

उसभस्स य पारणए, इक्खुरसो आसि लोगनाहस्स ।
सेसाण य परमन्नं, अमियरसरसोवमं आसि ॥३॥

अक्खीणमहाणसियलद्धि—संजुओ जगगुरू गोयमो भयवं ।
जस्स पसाएण पज्जाहि, साहुणो मुनिवया भरहे ॥४॥

भुंजइ आहाकम्मं, सम्मं न य जो पडिक्कमइ लुद्धो ।
सव्वजिणाणाविमुहस्स तस्स आराहणा नत्थि ॥५॥

यतिर्ध्यानादियुक्तो यो, गुर्वाज्ञायां व्यवस्थितः ।
सदाऽनारम्भिणस्तस्य, सर्वसंपत्करी मता ॥६॥

वृद्धाद्यर्थमसंगस्य, भ्रमरोपमयाऽटतः ।
गृहिदेहोपकाराय, विहितेति शुभाशयात् ॥७॥

प्रव्रज्यां प्रतिपन्नो यस्तद्विरोधेन वर्तते ।
असदारम्भिणस्तस्य, पौरुषघ्नीति कीर्तिता ॥८॥

निस्वान्धपङ्गवो ये तु, न शक्ता वै क्रियान्तरे ।
भिक्षामटन्ति वृत्त्यर्थं, वृत्तिभिक्षेयमुच्यते ॥९॥

## १४ वैराग्यसूक्तानि

क्वचिद् वीणावाद्यं क्वचिदपि च हा हेति रुदितं,
क्वचिद्विद्वद्गोष्ठी क्वचिदपि सुरापानकलहः ।

क्वचिद् रम्या रामा क्वचिदपि गलत्कोष्ठवपुषो,
न जाने संसारः किममृतमयः किं विषमयः ? ॥१॥

अहह ! सृजसि धातर्विश्वविश्वावतंसं,
पुरुषमखिलविद्यावन्तमुद्यत्प्रशंसम् ।
तमपि यमसमीपं प्रापयन् नात्मनैव,
व्रजसि बत विनाशं किं कृतघ्नेश ! न त्वम् ॥२॥

ये विश्वोरुपरोपकाररसिका ये सर्वसाधारणा,
ये दीनार्तिहराः स्फुरद्गुणधरा ये शीलरत्नाकराः ।
ये विद्वज्जनमौलिमण्डननिभा ये सज्जनानन्दना,
धिक् सन्तः कृपणेन तेऽपि विधिना दीर्घायुषो नो कृताः ॥३॥

मनो न वैराग्यतरङ्गितं चेद्, वृथा तदा ज्ञानतपःप्रयासः ।
लावण्यमङ्गे यदि नाङ्गनानां, मुधा तदा विभ्रमवल्गितानि ॥४॥

प्रियावाणीवीणाशयनतनुसम्वाहनसुखै-
र्भवोऽयं पीयूषैर्घटित इति पूर्वमतिरभूत् ।
अकस्मादस्माकं परिकलिततत्त्वोपनिषदा-
मिदानीमेतस्मिन्न रतिरपि तु स्वात्मनि रतिः ॥५॥

भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं,
मौने दैन्यभयं बले रिपुभयं रूपे जराया भयम् ।
शास्त्रे वादभयं गुणे खलभयं काये कृतान्ताद्भयं,
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् ॥६॥

लोकः पृच्छति मे वार्तां, शरीरे कुशलं तव।
कुतः कुशलमस्माक–मायुर्याति दिने दिने ॥७॥

संसारे संवसतां, कुशलं किं पृच्छ्यते शरीरवताम्।
पतितस्य दहनराशौ, दग्धोऽसि न वेति कः प्रश्नः? ॥८॥

धर्माख्याने श्मशाने च, या मती रागिणां भवेत्।
सा यदि निश्चला बुद्धिः, को न मुच्येत बन्धनात् ॥९॥

अस्तीहाऽमुत्र नैवाऽस्ति, नास्तीहाऽमुत्र विद्यते।
अस्तीहाऽमुत्र चाप्यस्ति, तदस्ति नाप्यमुत्र च ॥१०॥

नीरागस्य तृणं नारी, निरीहस्य तृणं नृपः।
तृणं ज्ञानवतां सर्वं, तृणं शून्यस्य जीवितम् ॥११॥

ओतुः पयः पश्यति नैव दण्डं,
कीरोऽपि शालींश्च च लोष्ठखण्डम्।
काकः पलं नो बत सिंहतुण्डं,
जन्तुस्तथा शं न यमं प्रचण्डम् ॥१२॥

पलाशं पादपस्याऽपि, विरागं जायते क्रमात्।
सचेतनोऽपि यो नैवं, स काष्ठादपि बालीशः ॥१३॥

तच्छ्रुतं यातु पातालं, तच्चातुर्यं विलीयताम्।
ते विशन्तु गुणा वह्नौ, येषु सत्स्वप्यधोगतिः ॥१४॥

आपद् व्यापादिता नैव, जरा नो जर्जरीकृता।
न मृत्युर्निहतो जीव !, गर्वं कुर्वन् न लज्जसे ॥१५॥

आत्मवत् परभूतानि, परद्रव्याणि च लोष्ठवत् ।
मातृवत्परदारांश्च, यः पश्यति स पश्यति ॥१६॥

देहे विमुह्य कुरुषे किमघं न वेत्सि ?,
देहस्थ एव भजसे भवदुःखजालम् ।
लोहाश्रितो हि सहते घनघातमग्नि-
र्बाधा न तेऽस्य च नभोवदनाश्रयत्वे ॥१७॥

प्रमोदसे स्वस्य यथान्यनिर्मितैः,
स्तवैस्तथा चेत्प्रतिपन्थिनामपि ।
विगर्हणैः स्वस्य यथोपतप्यसे,
तथा रिपूणामपि चेत् ततोऽसि वित् ॥१८॥

रागादयो हि रिपवो जिननायकेना-
जीयन्त भो ! निजबलाद् बलिनोऽपि बाढम् ।
पुष्णन्ति तान् जडधियो हृदयालये ये,
तेषां प्रसीदति कथं जगतामधीशः ॥१९॥

स्वश्लाघा परनिन्दा च, मत्सरो महतां गुणे ।
असंबन्धप्रलापित्व-मात्मानं पातयत्यधः ॥२०॥

अतीतसमयोपात्तं, पुण्यं भुञ्जन्ति येऽखिलम् ।
न बीजमपि रक्षन्ति, कुतस्तेषां पुनः सुखम् ? ॥२१॥

अहिंसा सत्यमस्तेयं, ब्रह्मचर्यमसङ्गता ।
गुरुभक्तिस्तपो ज्ञानं, सत्पुष्पाणि प्रचक्षते ॥२२॥

निर्वाणदीपे किमु तैलदानं?, चौरे गते हा? किमु सावधानम्?।
वयोगते किं वनिताविलासः? पयोगते किं खलु सेतुबन्धः?॥

लज्जेयं प्रलयं प्रयाति झटिति ब्रह्मव्रतं भ्रश्यति,
ज्ञानं संकुचति स्मरज्वरवशात्पश्यामि यावत्प्रियाम्।
यावत् तु स्मृतिमेति नारकगतेः पाककमो भीषणः,
तावत्तन्निरीक्षणात् प्रियतमाप्येषा विषीयायते॥२४॥

आनन्दाय न कस्य मन्मथकथा कस्य प्रिया नो प्रिया,
लक्ष्मीः कस्य न वल्लभा मनसि नो कस्याङ्गजः क्रीडति।
ताम्बूलं न सुखाय कस्य न मतं कस्याऽम्बुशीतोदकं,
सर्वाशाद्रुमकर्तनैकपरशुर्मृत्युर्न चेन्मानसे॥२५॥

भार्येयं मधुराकृतिर्मम मम प्रीतिमानितोऽयं सुतः,
स्वर्णस्यैष महानिधिर्मम ममाऽसौ बन्धुरो बान्धवः।
रम्यं हर्म्यमिदं ममेत्यसकृता व्यामोहितो मायया,
मृत्युं पश्यति नैव दुर्वलकः क्रुद्धं पुरःस्थायिनम्॥२६॥

कष्टोपार्जितमत्र वित्तमखिलं द्यूते त्वया योजितं,
विद्या कष्टतरं गुरोरधिगता व्यापारिता कुत्सुतौ।
पारम्पर्यमसामान्य विनयो वामेक्षणायां कृतः,
मत्पात्रे किमहं करोमि विवशः कालेऽद्य नेदीयसि॥२७॥

आत्मा यद्विनियोजितो न विनये नोग्रं तपः प्रापितो,
न क्षान्त्या समलङ्कृतः प्रतिकलं सत्येन न प्रीणितः।

तत्त्वं निन्दसि नैव कर्महतकं प्राप्ते कृतान्तक्षणे,
दैवायैव ददासि जीव ! नितरां शापं विमूढोऽसि रे ! ॥२८॥

बालो यौवनसंपदा परिगतः क्षिप्रं क्षितौ लक्ष्यते,
वृद्धत्वेन युवा जरापरिणतो व्यक्तं समालोक्यते ।
सोऽपि क्वाऽपि गतः कृतान्तवशतो न ज्ञायते सर्वथा,
पश्यैतद्यदि कौतुकं किमपरैस्तैरिन्द्रजालैः सखे ! ॥२९॥

ब्रह्मज्ञानविवेकिनोऽमलधियः कुर्वन्त्यहो ! दुष्करं,
यन्मुञ्चन्त्युपभोगभाञ्ज्यपि धनान्येकान्ततो निःस्पृहाः ।
न प्राप्तानि पुरा न संप्रति न तु प्राप्तौ दृढप्रत्यया,
वाञ्छामात्रपरिग्रहाण्यपि परं त्यक्तुं न शक्ता वयम् ॥३०॥

अवश्यं यातारश्चिरतरमुषित्वाऽपि विषया,
वियोगे को भेदस्त्यजति न जनो यत् स्वयममून् ।
व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः,
स्वयं त्यक्ता ह्येते शमसुखमनन्तं विदधति ॥३१॥

शुद्धोसि बुद्धोसि निरञ्जनोसि,
संसारमायापरिवर्जितोऽसि ।
न कस्यचित्त्वं न च तेऽस्ति कश्चित्,
मदालसा वाक्यमुवाच पुत्रम् ॥ ३२ ॥

भुक्त्वा च मेऽन्तिकगतैः, पठनीयमिदं सदा ।
जितो भवान् वर्धते भी-स्तस्मान् मा हन मा हन ॥ ३३ ॥

जितोऽस्मि केन? हुं ज्ञातं, कषायैर्वर्धते च भीः,
कुतो मे? तेभ्य एवेति, मा हन्यां प्राणिनस्ततः ॥ ३४ ॥

इहैव नरकव्याधेः, चिकित्सां न करोति यः ।
गतो निरौजसं स्थानं, सरुजः किं करिष्यति ः ॥ ३५ ॥

मरणाय भवे जन्म, कायो रोगनिबन्धनम् ।
तारुण्यं जरसो हेतु–र्वियोगाय समागमः ॥ ३६ ॥

निमित्तं विपदां लोके, देहिनां सर्वसंपदः ।
तन्नास्ति यन्न दुःखाय, वस्तु सांसारिकं जनाः ! ॥ ३७ ॥

वुच्छिन्ना किं खु जरा, नट्ठा रोगा य किं गयं मरणं ।
थइअं च नरयदारं, जेण जणो धम्मनिरविक्खो ॥ ३८ ॥

मा सुअह जग्गिअव्वे, पलाइअव्वम्मि कीस वीसमह ? ।
तिन्नि जणा अणुलग्गा, रोगो य जरा य मच्चू य ॥ ३९ ॥

इतः क्रोधो गृध्रः प्रकटयति पक्षं निजमितः,
शृगाली तृष्णेयं विवृतवदना धावति पुरः ।
इतः क्रूरः कामो विचरति पिशाचश्चिरमहो !,
श्मशानं संसारः क इह पतितः स्थास्यति सुखम् ? ॥ ४० ॥

यथा कुमारी स्वप्नान्तरेषु,
जातं च पुत्रं च मृतं च पश्येत् ।

जातेति हृष्टा विगतेति खिन्ना,
तथा जना ! जानत सर्वभावान् ॥ ४१ ॥

जह चयइ चक्कवट्टी, पवित्थरं तत्तियं मुहुत्तेण ।
न चयइ तहा अहन्नो, दुब्बुद्धी खप्परं दमओ ॥ ४२ ॥

अलसंतेण सज्जणेण जे अक्खरा समुल्लविआ ।
ते पत्थरटंकुक्कीरिअ व्व न अन्नहा हुंति ॥ ४३ ॥

निःस्पृहो नाधिकारी स्यात्, नाऽकामी मण्डनप्रियः ।
नाऽविदग्धः प्रियं ब्रूयात्, स्पष्टवक्ता न वञ्चकः ॥ ४४ ॥

देहः सैकतगेहवत् तरुणता शैलापगापूरवत्,
लक्ष्मीः स्त्रैण्यकटाक्षवत् प्रणयिनीसङ्गस्तडिद्दण्डवत् ।
ऐश्वर्यं खलमैत्र्यवत् परिजनस्नेहः पताकाग्रवत्,
सौख्यं वारितरङ्गवत् श्वसितमप्यम्भोदवच्चञ्चलम् ॥ ४५ ॥

कः क्षमेत सुधीस्तर्हि, न्याय्ये कोपस्य कारणे ।
यदि नैकं कृतं पापं, कोटिधा परिपच्यते ॥ ४६ ॥

न देवकामैः सुहितोऽर्णवोपमै-
श्चिराय भुक्तैरपि यस्तृषार्त्तवत् ।
स बिन्दुवद्भिर्नरभोगशर्मभिः,
कथं त्वहं जङ्गमिताऽशितम्भवम् ॥ ४७ ॥

शालिः स्वस्याऽधिपं श्रुत्वा, स्थूलभद्रः पितुर्मृतेः ।
विरक्तः कार्त्तिको दूनो, मेतार्यस्तु विगोपितः ॥ ४८ ॥

प्राप्ताः श्रियः सकलकामदुघास्ततः किं ?,
दत्तं पदं शिरसि विद्विषतां ततः किम् ? ।
कल्पं स्थित तनुभृतां तनुभिस्ततः किं ?,
चेद्धर्मसाधनविधौ न रतोऽयमात्मा ॥ ४९ ॥

जं पुव्वभवज्जियकडुविवागकम्माण वेयणं मुत्तुं ।
अन्नो न अत्थि नरयवयणसंभवो किमिह रुन्नेण ॥ ५० ॥

सोसिज्जइ चरममहोयही विचालिज्जइ सुरगिरी वि ।
न हु छुट्टिज्जइ पुव्वज्जियाउ ता किमिह रुन्नेण ॥ ५१ ॥

किर चक्किणोऽवि चक्कं, खलिज्जए वज्जिणोऽवि किर वज्जं ।
न हु पुव्वकयं कम्मं, केण वि ता किमिह रुन्नेण ॥ ५२ ॥

## १५ सम्यग्दर्शनसूक्तानि

मूलं दारं पइट्ठाणं आहारो भायणं निही ।
दुछक्कस्सा वि धम्मस्स सम्मत्तं परिकित्तियं ॥ १ ॥

सम्मद्दिट्ठी जीवो विमाणवज्जं न बन्धए आउं ।
जइ नवि सम्मत्तजढो अहव न बद्धाउओ पुव्वि ॥ २ ॥

जिनेन्द्रचन्द्रप्रणिपातलालसं मया शिरोऽन्यस्य न नाम नाम्यते ।
गजेन्द्रगण्डस्थलदानलम्पटं शुनीमुखे नाऽलिकुलं निलीयते॥३॥

एवं संसृतिनाटकेऽत्र नटवत् प्राणी चिरं चेष्टते,
कुर्वन् भूरितराणि कर्मवशगो रूपाणि मायामयः ।

योनिं मुञ्चति याति वा न कतमां संवेदयन् वेदनां,
यावत्सर्वतमोपहं न लभते सम्यक्त्वरत्नं पदम् ॥ ४ ॥

यस्य निखिलाश्च दोषा, न सन्ति सर्वे गुणाश्च विद्यन्ते ।
ब्रह्मा वा विष्णुर्वा हरो जिनो वा नमस्तस्मै ॥ ५ ॥

भवबीजाङ्कुरजनना, रागाद्याः क्षयमुपागता यस्य ।
ब्रह्मा वा विष्णुर्वा, हरो जिनो वा नमस्तस्मै ॥ ६ ॥

प्रत्यक्षतो न भगवानृषभो न विष्णु-
रालोक्यते न च हरो न हिरण्यगर्भः ।
तेषां स्वरूपगुणमागमसंप्रभावात् ,
ज्ञात्वा विचारयत कोऽत्र परापवादः ॥ ७ ॥

मित्रा तारा बला दीप्रा, स्थिरा कान्ता प्रभा परा ।
नामानि योगदृष्टीनां, लक्षणैश्च निबोधत ॥ ८ ॥

तृणगोमयकाष्ठाग्नि-कणदीपप्रभोपमा ।
रत्नातारार्कचन्द्राभा, सद्दृष्टेर्दृष्टिरष्टधा ॥ ९ ॥

दानानि शीलानि तपांसि पूजा,
सत्तीर्थयात्रा प्रवरा दया च ।
सुश्रावकत्वं व्रतधारकत्वं,
सम्यक्त्वमूलानि महाफलानि ॥ १० ॥

बालः पश्यति लिङ्गं, मध्यमबुद्धिर्विचारयति वृत्तम् ।
आगमतत्त्वं तु सुधीः, परीक्षते सर्वयत्नेन ॥ ११ ॥

पक्षपातो न मे वीरे, न द्वेषः कपिलादिषु ।
युक्तिमद्वचनं यस्य, तस्य कार्यः परिग्रहः ॥ १२ ॥

वीतरागं जनो ध्यायन्, भजते वीतरागताम् ।
इलिका भ्रमरीध्यानाद्, भ्रमरी जायते क्रमात् ॥ १३ ॥

शङ्का काङ्क्षा विचिकित्सा, मिथ्यादृष्टिप्रशंसनम् ।
तत्संस्तवश्च पञ्चाऽपि, सम्यक्त्वं दूषयन्त्यमी ॥ १४ ॥

तंमि अ तइअचउत्थभवंमि सिज्झंति खइअसम्मत्ते ।
सुरनिरयजुगलिसु गई इमं तु जिणकालिअनराणं ॥ १५ ॥

अंतमुहुत्तोवसमो, छावली सासाण वेअगो समओ ।
साहियतित्तीसायर, खइओ दुगुणो खओवसमो ॥ १६ ॥

उक्कोसं सासायण–उवसमिया हुंति पंचवाराओ ।
वेयगखायग इक्कसि, असंखवारा खओवसमो ॥ १७ ॥

बीयगुणे सासाणो, तुरियाइसु अट्ठिगारचउचउसु ।
उवसमखायगवेयग–खाओवसमा कमा हुंति ॥ १८ ॥

दंसणभट्ठो भट्ठो, दंसणभट्ठस्स नत्थि निव्वाणं ।
सिज्झंति चरणरहिया, दंसणरहिया न सिज्झंति ॥ १९ ॥

कालो सहाव नियई, पुव्वकयं पुरिसकारणं पंच ।
समवाए सम्मत्तं, एगंते होइ मिच्छत्तं ॥ २० ॥

जा गंठी ता पढमं, गंठी समइच्छओ भवे बीअं ।
अनिअट्टिकरणं पुण, सम्मत्तपुरक्कडे जीवे ॥ २१ ॥

गंठि त्ति सुदुब्भेओ, कक्खडघणरूढगूढगंठि व्व।
जीवस्स कम्मजणिओ, घणरागदोसपरिणामो ॥ २२ ॥

सम्मत्तंमि उ लद्धे, पलियपुहुत्तेण सावओ हुज्जा।
चरणोवसमखयाणं, सागरसंखंतरा होंति ॥ २३ ॥

ध्यातव्योऽयमुपास्योऽयमयं शरणमिष्यताम्।
अस्यैव प्रतिपत्तव्यं, शासनं चेतनाऽस्ति चेत् ॥ २४ ॥

प्राणेभ्योऽपि गुरुर्धर्मः, सत्यामस्यामसंशयम्।
प्राणांस्त्यजति धर्मार्थं, न धर्मं प्राणसङ्कटे ॥ २५ ॥

स्नेहो न ज्ञायते देवे, प्रणामाच्च मृदूक्तिभिः।
ज्ञायते तु क्वचित् कार्ये, सद्यः प्राणप्रदानतः ॥ २६ ॥

सावयघरम्मि वर हुज्ज, चेडओ नाणदंसणसमेओ।
मिच्छत्तमोहिअमई, मा राया चक्कवट्टी पि ॥ २७ ॥

संवेगसंज्ञा शिवसंपदिच्छा,
निर्वेदनामा तु भवाद्विरागः।
कृतापराधेऽपि शमः शमत्वं,
दया तु जीवेषु सदाऽनुकम्पा ॥ २८ ॥

थाएण णंतदेउलजिणपडिमाओ कारिआ उ जीवेण।
असमंजसवित्तीए न हु सिद्धो दंसणलवो वि ॥ २९ ॥

तथ्ये धर्मे ध्वस्तहिंसाप्रबन्धे,
देवे रागद्वेषमोहादिमुक्ते।

साधौ सर्वग्रन्थसंदर्भहीने,
संवेगोऽसौ निश्चलो योऽनुरागः ॥ ३० ॥

सति सम्यग्दर्शने न्याय्यमणुव्रतादीनां ग्रहणम् ॥
श्रमभक्तिविनिश्चयात्मगतं, तस्मात्कोऽयः सदोपदेष्टव्यम् ।
आत्मानं न परं न हि विशेषदेशाऽनुग्रहाति ॥ ३१ ॥

कृपाप्रशमसंवेग–निर्वेदास्तिक्यलक्षणाः ।
गुणा भवन्ति यच्चित्ते, स स्यात् सम्यक्त्वभूषितः ॥ ३२ ॥

इतश्च न जिनव्याघ्राऽमर्षीनिकितात् श्रुतम् ।
कृतघ्नमपि उद्धृत्य क्रमात्काव्यान्यमुन्मतम् ॥ ३३ ॥

सद्यो म्रियस्व जीव त्वं चिरं जीव म्रियस्व वा ।
मा जीव मा म्रियस्वेति वचो सद्गो मृगं नृपः ॥ ३४ ॥
॥ युग्मम् ॥

तातादेशवशादपीह नृभवे न त्वं मयाऽऽराधितः,
तेनाऽहं भवसागरे निपतितोऽसंबोधो महापातकी ।
तस्मात्त्वं जिनेन्द्र ! मम शरणं सर्वज्ञबिम्बाकृतीः,
मीनो मीनवरान नमस्कृतिपरो जातिस्मृतेः स्वर्ययौ ॥३५॥

नाऽदंसणिस्स नाणं, नाणेण विणा न हौंति चरणगुणा ।
अगुणिस्स नत्थि मोक्खो, नत्थि अमुक्खस्स निव्वाणं ॥३६॥

नाणेण जाणइ भावे, दंसणेण य सद्दहे ।
चरित्तेण न गिण्हाइ, तवेण परिसुज्झइ ॥ ३७ ॥

त्रैकालं द्रव्यषट्कं नवपदसहितं जीवषट्कायलेश्या,
पञ्चाऽन्ये चाऽस्तिकाया व्रतसमितिगतिज्ञानचारित्रभेदाः।
इत्येवं मोक्षमार्गं त्रिभुवनमहितैः प्रोक्तमर्हद्भिरीशैः,
प्रत्येति श्रद्दधाति स्पृशति च मतिमान् यः स वै शुद्धदृष्टिः ॥३८॥

यथा रोगभरे क्षीणे, रुचिर्भोज्येषु जायते।
तथा भावमले क्षीणे, तत्त्वार्थेषु रुचिः स्मृता ॥ ३९ ॥

अप्पा चेव दमेअव्वो, अप्पा हु खलु दुद्दमो।
अप्पा दंतो सुही होइ, अस्सि लोए परत्थ य ॥ ४० ॥

जितात्मता पुनर्लिङ्गैर्ज्ञायते न तु भाषितैः।
सूर्योदयो हि प्रभया, लक्ष्यो न शपथशतैः ॥ ४१ ॥

शमसंवेगनिर्वेदास्तिक्यमैत्रीदयायमैः।
समत्वाऽममत्वाद्यैश्च, ज्ञायते हि जितात्मता ॥ ४२ ॥

यथा चतुर्भिः कनकं परीक्ष्यते,
निघर्षणच्छेदनतापताडनैः।
तथैव धर्मो विदुषा परीक्ष्यते,
सत्येन शीलेन तपोदयागुणैः ॥ ४३ ॥

निस्सग्गुवएसरुई, आणरुई सुत्तबीअरुइमेव।
अभिगमवित्थाररुई, किरियासंखेवधम्मरुई ॥ ४४ ॥

सम्मत्तं उच्छिंदिय, मिच्छत्तारोवणं कुणइ नियकुलस्स।
तेण सयलो वि वंसो, दुग्गइमुहसंमुहं नीओ ॥ ४५ ॥

मिच्छत्तं उच्छिदिय, सम्मत्तारोवणं कुणइ नियकुलस्स ।
तेण सयलो वि वंसो, सिद्धिपुरीसंमुहं नीओ ॥ ४६ ॥

देवो जिणिंदो जिणरायधम्मो,
जिणिंदधम्मंमि ठिआ मुणिंदा ।
पाणप्पिए तिन्नि वि हुंति एए,
तिलोअसारे खलु पंडिआणं ॥ ४७ ॥

जिणभत्तनिवा इगारलक्खसोलसहस्स होहिंति ।
इगकोडिमित्तसासणपभावगा दुस्समसमयंमि ॥ ४८ ॥

रागोऽङ्गनासंगमतोऽनुमेयो,
द्वेषो द्विषद्दारणहेतिगम्यः ।
मोहः कुवृत्तागमदोषगम्यो,
नो यस्य देवस्य स चैवमर्हन् ॥ ४९ ॥

यस्याऽस्ति देवो हृदि मोहजेता,
गुरुश्च पञ्चेन्द्रियवैरिजेत्रः ।
धर्मश्च दुष्कर्मजयैकतानः,
स एव युद्धेऽपि जयं लभेत ॥ ५० ॥

भक्तिर्न यस्याऽर्हति सद्‌गुरौ च,
जिनोक्तधर्मे च रुचिर्न काचित् ।
भवे भवे सर्वपराभवानां,
सुदुःसहानां भवनं भवेत्सः ॥ ५१ ॥

सुलहो विमाणवासो, एगच्छत्ता य मेइणी सुलहा ।
दुलहा पुण जीवाणं, जिणिंदवरसासणे बोही ॥ ५२ ॥
दग्धे बीजे यथाऽत्यन्तं, प्रादुर्भवति नाङ्कुरः ।
कर्मबीजे तथा दग्धे, नाऽऽरोहति भवाङ्कुरः ॥ ५३ ॥
जं बोहिरयणरहिओ, चउदसरयणाहिवो वि रोरु व्व ।
बोहिरयणेण सहिओ, नूणं रोरो वि चक्कि व्व ॥ ५४ ॥
चक्कित्तं इन्दत्तं, अहमिन्दत्तं जणाण इह सुलहं ।
अकयसुकयाण न उणो, जिणिंदवरसासणे बोही ॥ ५५ ॥
वीतरागं सर्वविद–माप्तं त्रैलोक्यपूजितम् ।
विनाऽर्हन्तं न मे कश्चिन्, नमस्योऽस्ति कदाचन ॥ ५६ ॥
तादृक्पुण्योदयाभावाद्, नास्ति प्राप्तिर्द्वयं तव ।
एकं वृणु वरं मन्त्रिन्नित्याचष्ट सुरेश्वरी ॥ ५७ ॥

सतीमतल्लिका स्माह, प्राणेशं सा कृताञ्जली ।
भवाङ्कुरनिभं पुत्रं, मुक्त्वार्हन्मन्दिरं वृणु ॥ ५८ ॥
दर्शनं मुक्तिबीजं च, सम्यक्त्वं तत्त्ववेदनम् ।
दुःखान्तकृत् सुखारम्भः, पर्यायाः तस्य कीर्तिताः ॥५९॥
सम्मत्तं सामाइयं, संतोसो संजमो अ सज्झायं ।
पंच सयारा जस्स, न पयारो तस्स संसारे ॥ ६० ॥

बोधिशब्दार्थः—बोधिं जिनोक्तधर्मावाप्तिलक्षणं इति उत्तराध्ययने भावविजयगणिकृतटीकायां तृतीयाध्ययने गाथा ॥ १९ ॥

बोहिलाभो उ पेच्च जिणधम्मसंपत्ति इति संघाचारभाष्ये, बोधिलाभः प्रेत्य धर्मावाप्तिरुच्यते इति आवश्यकनिर्युक्ति-दीपिका पृष्ठ–१५८ कायोत्सर्गाध्ययने ।

बोधिर्जिनप्रणितधर्मप्राप्तिः तत्त्वार्थश्रद्धानलक्षणसम्य-ग्दर्शनरूपा इति राजप्रश्नीयोपाङ्गे श्रीमलयगिरिपादाः ।

## १६ मिथ्यादर्शनसूक्तानि

स्त्रीसंगः काममाचष्टे, द्वेषमायुधसंग्रहः ।
व्यामोहश्चाक्षसूत्रादि, त्वशौचं च कमण्डलुः ॥ १ ॥

ऋणं देवस्य यागेन, ऋषीणां दानकर्मणा ।
सन्तत्या पितृलोकानां, शोधयित्वा परिव्रजेत् ॥ २ ॥

सरागोऽपि हि देवश्चेद्, गुरुरब्रह्मचार्यपि ।
कृपाहीनोऽपि धर्मः स्यात्, कष्टं नष्टं हहा ! जगत् ॥३॥

अपुत्रस्य गतिर्नास्ति, स्वर्गो नैव च नैव च ।
तस्मात् पुत्रमुखं दृष्ट्वा, स्वर्गं गच्छन्ति मानवाः ॥ ४ ॥

अग्निर्देवो जलं तीर्थं, वधो धर्मो गुरुर्गृही ।
गौर्नमस्या द्विकाः पात्रं, येषां तैः कोऽस्तु संस्तवः ॥५॥

सकामाः सरामाः समानाः समोहाः,
सदम्भाः सलोभाः सकोपाः सपापाः ।

यदि स्युश्च देवास्तदा को विशेषो,
नरैः सार्द्धमेषां समानत्वभाजाम् ॥ ६ ॥

कामानुषक्तस्य रिपुप्रहारिणः,
प्रपञ्चिनोऽनुग्रहशापकारिणः ।
सामान्यपुंवर्गसमानधर्मिणो,
महत्त्वक्लृप्तौ सकलस्य तद्भवेत् ॥ ७ ॥

जीवादितत्त्वविपुलैकस्तपोभिः,
मुक्तो न तामलिरजातसुसाधुसंगः ।
कः स्वर्णसिद्धिमधिगच्छति कूटकल्कैः,
को वाऽम्बुधिं तरति जर्जरयानपात्रैः ॥ ८ ॥

मिथ्यात्वं परमो रोगो, मिथ्यात्वं परमं तमः ।
मिथ्यात्वं परमः शत्रुः, मिथ्यात्वं परमं विषम् ॥ ९ ॥

जन्मन्येकत्र दुःखाय, रोगो ध्वान्तं रिपुर्विषम् ।
अपि जन्मसहस्रेषु, मिथ्यात्वमचिकित्सितम् ॥ १० ॥

सर्वं पश्यतु वा मा वा, तत्त्वमिष्टं तु पश्यतु ।
कीटसंख्यापरिज्ञानं, तस्य नः क्वोपयुज्यते ॥ ११ ॥

पञ्चविंशतितत्त्वज्ञो, यत्र तत्राश्रमे रतः ।
जटी मुण्डी शिखी वाऽपि, मुच्यते नाऽत्र संशयः ॥१२॥

तथा हि यागहोमादिकर्माणीष्टानि कुर्वताम् ।
वापीकूपतडागादीन्यपि पूर्तान्यनेकशः ॥ १३ ॥

श्वानशूकरसर्पाद्या, दृश्यन्ते बहुसूनवः ।
तत्रे दिवं प्रयास्यन्ति, न बालब्रह्मचारिणः ॥ १४ ॥
पुत्रैरावर्जितं पिण्डं, लभेते पितरौ यदि ।
तृप्तास्तत् किमु भुक्तेन, कस्याऽपि पितरो वयम् ॥ १५ ॥
सस्यानीवोषरे क्षेत्रे, निक्षिप्तानि कदाचन ।
न व्रतानि प्ररोहन्ति, जीवे मिथ्यात्ववासिते ॥ १६ ॥
अदेवागुर्वधर्मेषु, या देवगुरुधर्मधीः ।
तन्मिथ्यात्वं भवेद् व्यक्तं, अव्यक्तं मोहलक्षणम् ॥ १७ ॥
कामरागस्नेहरागावीषत्करनिवारणौ ।
दृष्टिरागस्तु पापीयान्, दुरुच्छेदः सतामपि ॥ १८ ॥
उत्तिष्ठन्त्यारतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा,
धृत्वा चान्येन वासो विगलितकवरीभारमंसं वहन्त्या ।
भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः,
शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु॥१९॥
गङ्गायां दीयते दान–मेकचित्तेन भाविना ।
दाताऽहो ! नरकं याति, प्रतिग्राही न जीवति ॥ २० ॥
एतावानेव लोकोऽयं, यावानिन्द्रियगोचरः ।
भद्रे ! वृकपदं पश्य, यद्वदन्त्यबहुश्रुताः ॥ २१ ॥
पिब खाद च चारुलोचने !, यदतीतं वरगात्रि ! तन्न ते ।
न हि भीरु ! गतं निवर्तते, समुदयमात्रमिदं कलेवरम् ॥२२॥

पतौ प्रव्रजिते क्लीबे, प्रणष्टे पतिते मृते ।
पञ्चस्वापत्सु नारीणां, पतिरन्यो विधियते ॥ २३ ॥

## १७ सम्यग्ज्ञानसूक्तानि

भवविटपिसमूलोन्मूलने मत्तदन्ती,
जडिमतिमिरनाशे पद्मिनीप्राणनाथः ।
नयनमपरमेतद् विश्वतत्त्वप्रकाशे,
करणहरिणबन्धे वागुरा ज्ञानमेव ॥ १ ॥

ज्ञानं कर्ममहीध्रभेदकुलिशं शंसन्ति मोहापहं,
ज्ञानं भूषणमङ्गिनां वरधनं ज्ञानं जगद्दीपनम् ।
एतत्तत्त्वमतत्त्वमेतदपरं ज्ञानेन विज्ञायते,
लोकालोकविलोकनैकपटवः स्युर्ज्ञानदानाज्जिनाः ॥२॥

आरोग्य-बुद्धि-विनयोद्यम-शास्त्ररागाः,
पञ्चाऽऽन्तराः पठनवृद्धिकरा भवन्ति ।
आचार्य-पुस्तक-निवास-सहाय-भोज्याः,
बाह्याश्च पञ्च पठनं परिवर्द्धयन्ति ॥ ३ ॥

शुश्रूषा श्रवणं चैव, ग्रहणं धारणं तथा ।
ऊहापोहोऽर्थविज्ञानं, तत्त्वज्ञानं च धीगुणाः ॥ ४ ॥

ताल्वादिजन्मा ननु वर्णवर्गो,
वर्णात्मको वेद इति स्फुटं च ।

पुंसश्च ताल्वादिरतः कथं स्या–
दपौरुषेयोऽयमिति प्रतीतिः ॥ ५॥
निकषच्छेदतापैश्च, सुवर्णमिव पण्डितैः ।
परीक्ष्य भिक्षवो ! ग्राह्यं, मद्वचो न तु गौरवात् ॥ ६ ॥
विषयप्रतिभासं चात्मपरिणतिमत्तथा ।
तत्त्वसंवेदनं चैव, ज्ञानमाहुर्महर्षयः ॥ ७ ॥

यावद्दूरसक्षयाय नितरां नाहारलौल्यं जितं,
सिद्धान्तार्थमहौषधैर्निरुपमश्चूर्णो न जीर्णो हृदि ।
पीतं ज्ञानलवूदकं न विधिना तावत्स्मरोत्थो ज्वरः,
शान्तिं याति न तात्त्विकीं हृदय ! हे ! शेषैरलं भेषजैः ॥ ८ ॥

क्रोधाद्युग्रचतुष्कषायचरणो व्यामोहहस्तः सखे !,
रागद्वेषनिशातदीर्घदशनो दुर्वारमारोद्धुरः ।
सज्ज्ञानाङ्कुशकौशलेन स महामिथ्यात्वदुष्टद्विपो,
नीतो येन वशं वशीकृतमिदं तेनैव विश्वत्रयम् ॥ ९ ॥

चक्षुष्मन्तस्त एवेह, ये श्रुतज्ञानचक्षुषा ।
सम्यक् सदैव पश्यन्ति, भावान् हेयेतरान्नराः ॥ १० ॥
तज्ज्ञानमेव न भवति, यस्मिन्नुदिते विभाति रागगणः ।
तमसः कुतोऽस्ति शक्ति–र्दिनकरकिरणाग्रतः स्थातुम् ॥११॥
तदधीतं श्रुतं येन, नैवात्मा नरके पतेत् ।
क्लेशाय सकलं शेषं, सर्वमेव विडम्बना ॥ १२ ॥

मिथ्याज्ञानं समस्तं तदिहलोकोपयोगि यत् ।
रागद्वेषादयो यस्मात्, प्रवर्धन्ते शरीरिणाम् ॥ १३ ॥

सर्वज्ञेन जिनेनाप्तेनाऽऽगमो भणितोऽत्र यः ।
सम्यग्ज्ञानं भवेत् तच्च, परलोकैकसाधनम् ॥ १४ ॥

अनार्यदेशे विज्ञानं, जानन्ति विविधं जनाः ।
ज्ञानं तत्रैव यत्र त्वं, हेयाऽऽदेयप्ररूपकः ॥ १५ ॥

आग्रही बत निनीषति युक्तिं, तत्र यत्र मतिरस्य निविष्टा ।
पक्षपातरहितस्य तु युक्ति-र्यत्र तत्र मतिरेति निवेशम् ॥१६॥

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं,
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं,
विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः ॥१७॥

वरं हि सप्पो गहिउं, मा कुगुरुसेवणं भद्दं ।
सप्पो इक्कं मरणं, कुगुरू (कुणइ) अणंताइं मरणाइं ॥१८॥

जं अन्नाणी कम्मं, खवेइ बहुयाहिं वासकोडीहिं ।
तं नाणी तिहिं गुत्तो, खवेइ ऊसासमित्तेणं ॥ १९ ॥

यतः पूर्वं श्रुतज्ञानं संयमश्च ततः परः । [ श्लोकार्धम् ]

## १८ अज्ञानसूक्तानि

माता वैरी पिता शत्रुर्येन बाल्ये न पाठिताः ।
सभामध्ये न शोभन्ते, हंसमध्ये बका यथा ॥ १ ॥

स्वायत्तमेकान्तगुणं विधात्रा, विनिर्मितं छादनमज्ञतायाः ।
विशेषतः सर्वविदां समाजे, विभूषणं मौनमपण्डितानाम् ॥२॥

अल्पज्ञानेन नो शान्तिं, याति दृप्तात्मनां मनः ।
स्तोकवृष्ट्या यतस्तप्त–भूमिरूष्मायतेतराम् ॥ ३ ॥

पुराणं मानवो धर्मः, साङ्गो वेदश्चिकित्सितम् ।
आज्ञासिद्धानि चत्वारि, न हन्तव्यानि हेतुभिः ॥ ४ ॥

अन्यधर्मस्थिताः सत्त्वा, असुरा इव विष्णुना ।
उच्छेदनीयास्तेषां हि, वधे दोषो न विद्यते ॥ ५ ॥

हत्थागया इमे कामा, कालिया जे अणागया ।
को जाणइ परे लोए, अत्थि वा नत्थि वा पुणो ॥ ६ ॥

बहुपुत्रा दुली गोधा, ताम्रचूडस्तथैव च ।
तेषां च प्रथमं स्वर्गः, पश्चाल्लोको गमिष्यति ॥ ७ ॥

मृद्वी शय्या प्रातरुत्थाय पेया,
भक्तं मध्ये पानकं चापराह्णे ।
द्राक्षाखण्डः शर्करा चार्धरात्रे,
मोक्षश्चान्ते शाक्यसिंहेन दृष्टः ॥ ८ ॥

कष्टं नष्टदृशां नृणां यददृशां जात्यन्धवैदेशिकः,
कान्तारे प्रदिशत्यभीप्सितपुराध्वानं किलोत्कन्धरः ।

एतत्कष्टतरं तु सोऽपि सुदृश: सन्मार्गगांस्तद्विद:,
तद्वाक्यानुवर्तिनो हसति यत् सावज्ञमज्ञानिव ॥ ९ ॥

किमतोऽपि महापाप-मज्ञानात् पातुकः स्वयम् ।
पातयन्नन्धकूपे यद्, मूढः सहचरानपि ॥ १० ॥

उदितौ चन्द्रादित्यौ, प्रज्वलिता दीपकोटिरमलाऽपि ।
नोपकरोति यथान्धे, तथोपदेशस्तमोन्धानाम् ॥११॥

अमेध्यमश्नाति विवेकशून्या,
स्वनन्दनं कामयतेऽतिसक्ता ।
खुराग्रश्रृङ्गैर्विनिहन्ति जन्तून्,
गौर्वन्द्यते केन गुणेन राजन् ॥१२॥

स्थानं तीर्थर्षिदेवानां, सर्वेषामपि गौर्यदि ।
विक्रीयते दुह्यते च, हन्यते च ततः कथम् ॥१३॥

पयःप्रदानसामर्थ्या-द्वन्द्या चेन्महिषी न किम् ।
विशेषो दृश्यते नास्या, महिषीतो मनागपि ॥१४॥

जस्सवि अ दुप्पणिहिआ, होंति कसाया तवं चरंतस्स ।
सो बालतवस्सीविव, गयण्हाणपरिस्समं कुणइ ॥१५॥

वृत्तिः—यस्यापि कस्यचिद् व्यवहारतपस्विनस्तपश्चरतस्तपः कुर्वतः क्रोधादिकषाया अनिरूद्धा भवन्ति, स बालतपस्वीव उपवा-सपारणकप्रभूततरारम्भको जीवो गजस्नानपरिश्रमं करोति, चतुर्थषष्ठादिनिमित्ताभिधानतः प्रभूतकर्मबन्धोत्पत्तेः॥

नातः परमहं मन्ये, जगतो दुःखकारणम् ।
यथाऽज्ञानमहारोगो, दुरन्तः सर्वदेहिनाम् ॥१६॥

अज्ञानं खलु कष्टं, क्रोधादिभ्योपि सर्वपापेभ्यः ।
अर्थं हितमहितं वा, न वेत्ति येनावृत्तो लोकः ॥१७॥

जं जयइ अगीयत्थो, जं च अगीयत्थनिस्सिओ होइ ।
वट्टावेइ य गच्छं, अणंतसंसारिओ होइ ॥१८॥

नाहं बालो महाराज, न बाला मे सरस्वती ।
अपूर्णे पञ्चमे वर्षे, वर्णयामि जगत्त्रयम् ॥१९॥

## १९ श्रीजिनाज्ञासूक्तानि

जत्थ य उसभाईणं, तित्थयराणं सुरिन्दमहियाणं ।
कम्मट्ठविमुक्काणं, आणं न खलिज्जइ सो गच्छो ॥१॥

आणाइ तवो आणाइ संजमो तह य दाणमाणाए ।
आणारहिओ धम्मो, पलालपुलु व्व पडिहाइ ॥२॥

जह तुसखंडणमयमंडणाइं रुण्णाइ सुन्नरन्नंमि ।
विहलाइं तह जाणसु, आणारहियं अणुट्ठाणं ॥३॥

आणाखंडणकारी, जइ वि तिकालं महाविभूईए ।
पूएइ वीयरायं, सव्वं पि निरत्थयं तस्स ॥४॥

एगो साहू एगा, साहुणी सावओ वि सड्ढी वा ।
आणाजुत्तो संघो, सेसो पुण अट्ठिसंघाओ ॥५॥

सुहसीलाओ सच्छंदचारिणो वेरिणो सिवपहस्स ।
आणाभट्ठाओ बहु-जणाओ मा भणइ संघु त्ति ॥६॥

पुढविदगअगणिमारुअ-वणस्सइ तह तसाण विविहाणं ।
मरणन्ते वि न पीडा, कीरइ मणसा तयं गच्छं ॥७॥

यस्य चाराधनोपायः, सदाज्ञाभ्यास एव हि ।
यथाशक्ति विधानेन, नियमात् स फलप्रदः ॥८॥

जिणाणाए कुणंताणं, सव्वं निव्वाणकारणं ।
सुन्दरं पि सबुद्धीए, सव्वं भवनिबन्धणं ॥९॥

इहलोयम्मि अकित्ती, परलोए दुग्गइ धुवा तेसिं ।
आणं विणा जिणाणं, ये ववहारं ववहरन्ति ॥१०॥

जा जयमाणस्स भवे, विराहणा सुत्तविहिसमग्गस्स ।
सा होइ निज्जरफला, अज्झप्पविसोहिजुत्तस्स ॥११॥

संथरणंमि असुद्धं, दुण्हं वि गिण्हन्तदिन्तिआणऽहिअं ।
आउरदिट्ठंतेण, तं चेव हियं असंथरणे ॥१२॥

सो हु तवो कायव्वो, जेण मणो मंगुलं न चिंतेई ।
जेण न इंदियहाणी, जेण य जोगा न हायंति ॥१३॥

जिणदिक्खं पि गहेउं, जयणविहुणा कुणंति तिव्वतवं ।
जिणआणखंडगा जे, गोयम ! गिहिणो वि अब्भहिआ ॥१४॥

आणारुइस्स चरणं, तब्भंगे जाण किं न भग्गं ति ।
आणं च अइकंतो, कस्साएसा कुणइ सेसं ॥१५॥

सुणह सोअव्वाइं, पसंसह पसंसणिज्जाइं ।
परिहरह परिहरिअ-व्वाइं आयरह आयरिअव्वाइं ॥१६॥
सोअव्वाइं नरामरसिवसुहजणयाइं अत्थसाराइं ।
सव्वन्नुभासिआइं, भुवणम्मि पइट्ठिअजसाइं ॥१७॥
ताइं चिअ विबुहाणं, पसंसणिज्जाइं तह य जाइं च ।
तहिं चिय भणिआइं, सम्मत्तनाणचरणाइं ॥ १८ ॥
परिहरिअव्वाइं तहा, कुगइवासस्स हेउभूआइं ।
मिच्छत्तमाइआइं, लोगविरुद्धाइं य तहेव ॥ १९ ॥
आयरिअव्वाइं अणि–सिसएण सम्मत्तनाणचरणाइं ।
दोगच्चविडडणाइं, चिंतामणिरयणभूआइं ॥ २० ॥
सव्वस्स चेव निन्दा, विसेसओ तह य गुणसमिद्धाणं ।
उजुधम्मकरणहसणं, रीढा जणपूयणिज्जाणं ॥ २१ ॥
बहुजणविरुद्धसंगो, देसादाचारलंघणं चेव ।
उव्वणभोगो य तहा, दाणाइ वि पगडमण्णे तु ॥ २२ ॥
साहुवसणंमि तोसो, सइ सामत्थम्मि अपडियारो य ।
एवमाइयाणि एत्थं, लोगविरुद्धाणि णेयाणि ॥ २३ ॥
आयरणा वि हु आणा, अविरुद्धा चेव होइ आण त्ति ।
इहरा तित्थयरासा–यण त्ति तल्लक्खणं चेयं ॥२४॥
असढेण समाइण्णं, जं कत्थइ केणई असावज्जं ।
न निवारियमन्नेहिं, बहुमणुमयमेवमाइण्णं ॥ २५ ॥

संविग्गा विहिरसिया, गीयत्थतमा सूरिणो पुरिमा ।
न य ते सुत्तविरुद्धं, सामायारिं परूविंति ॥ २६ ॥
जं बहुखायं दीसइ, न य दीसइ कह विभासियं सुत्ते ।
पडिसेहो वि न दीसइ, मोणं चिय तत्थ गीयाणं ॥ २७ ॥
प्रायश्चित्तं गुरूणां हि, वचांसि निखिलैनसाम् ।
नातिक्रान्तगुरूणां हि, क्रिया क्वाऽपि फलेग्रहिः ॥ २८ ॥

## २० श्रीवीतरागशासनाराधनासूक्तानि

अर्हतस्त्रिजगद्वन्द्यान्, सिद्धान् विध्वस्तबन्धनान् ।
साधूंश्च जैनधर्मं च, प्रपद्ये शरणं त्रिधा ॥ १ ॥
महाव्रतानि पञ्चैव, षष्ठकं रात्रिभोजनम् ।
विराधितानि यत्तत्र, मिथ्यादुष्कृतमस्तु मे ॥ २ ॥
अर्हन्तः शरणं सन्तु, सिद्धाश्च शरणं मम ।
शरणं जिनधर्मो मे, साधवः शरणं सदा ॥ ३ ॥
कदाऽहं सुगुरोरन्ते, परिव्रज्यां यथोदिताम् ।
करिष्यामि गताशेष-कर्मनिर्मूलनक्षमाम् ॥ ४ ॥
यदपीष्टं प्रियं कान्तं, चिरकालं च लालितम् ।
शरीरमन्तिमोच्छ्वासे, तदपि व्युत्सृजाम्यहम् ॥ ५ ॥
मस्तके चाञ्जलिं न्यस्य, बभाण विशदाक्षरम् ।
नमोऽर्हद्भ्यो भगवद्भ्यो, नमो मे धर्मसूरये ॥ ६ ॥

यातं भोगाभिलाषैरखिलमिदमहो ! जीवितं तावकीनं,
यत्नो नैव त्वयाऽज्ञ ! कृत इह जननक्लेशविच्छेदहेतुः ।
त्यक्त्वासक्तिं गजेन्द्रश्रुतिशिखरचलेष्वेषु भोगेषु शीघ्रं,
आत्मानन्दप्रकाशं कुरु हृदयगतं येन शश्वत्सुखं स्यात् ॥ ७ ॥

वरमग्गिम्मि पवेसो, वरं विसुद्धेण कम्मुणा मरणं ।
मा गहियव्वयभङ्गो, मा जीअं खलिअसीलस्स ॥ ८ ॥

कइया संविग्गाणं, गीअत्थाणं पायमूले ।
सयणाइसंगरहिओ, पव्वज्जं संपवज्जिस्सं ॥ ९ ॥

छउमत्थो मूढमणो, कित्तियमित्तं च संभरइ जीवो ।
जं च न सुमरामि अहं, मिच्छा मि दुक्कडं तस्स ॥ १० ॥

जस्स कए आहारो, तस्सट्ठा चेव होइ आरंभो ।
आरंभे पाणिवहो, पाणिवहे दुग्गई चेव ॥ ११ ॥

तवनियमेण य मोक्खो, दाणेण य हुंति उत्तमा भोगा ।
देवच्चणेण रज्जं, अणसणमरणेण इन्दत्तं ॥ १२ ॥

आलोयसु अइयारे, वयाइं उच्चरसु खमसु जीवेसु ।
वोसिरसु भाविअप्पा, अट्ठारसपावठाणाइं ॥ १३ ॥

चउसरणं दुक्कडगरि-हणं च सुकडाणुमोयणं कुणसु ।
सुहभावणं अणसणं, पंचनमुक्कारसरणं च ॥ १४ ॥

ज्ञानाचारेऽष्टभेदेऽभूद्, योऽतिचारः कथञ्चन ।
समस्तमपि निन्दामि, तं त्रेधा शुद्धमानसः ॥ १५ ॥

अष्टधा दर्शनाचारे, जातं निः(यत्)शङ्कितादि मे ।
जन्मतोऽहमतिचारं, सर्वं गर्हे समाहितः ॥ १६ ॥

ख्याताः समितयः पञ्च, तिस्रस्तु किल गुप्तयः ।
अष्टावेताः समेता याः, प्रोक्ताः शासनमातरः ॥ १७ ॥

तदेकात्मनि चारित्रा-चारेऽतीचारमागतम् ।
अन्तिमाराधनां सम्यग्, विधित्सुर्व्युत्सृजाम्यहम् ॥ १८ ॥
॥ युग्मम् ॥

षोढा बाह्यं तपः षोढा, वदन्त्याभ्यन्तरं तथा ।
तत्रातीचारमायातं, निन्दामि प्रयतोऽधुना ॥ १९ ॥

स्वानुष्ठानेषु यद्भूयद्-धैर्यो वीर्यमगोपयम् ।
तत्त्रिधा त्रिविधेनाऽहं, गर्हे दौरात्म्यमात्मनः ॥ २० ॥

सूक्ष्मबादरभेदेषु, स्थावरेषु त्रसेषु च ।
प्राणातिपातमाजन्म-कृतं निन्दाम्यहं त्रिधा ॥ २१ ॥

हास्यलोभभयक्रोधैः, पीडाकारि परस्य यत् ।
अजल्पिषं मृषा किञ्चित्, तत्सर्वं व्युत्सृजाम्यहम् ॥ २२ ॥

अल्पमल्पेतरं वा यत्, परकीयं मया क्वचित् ।
अदत्तमात्तमाबाल्यात्, तं निन्दामि पुनः पुनः ॥ २३ ॥

तैरश्चं मानुषं दिव्यं, यदब्रह्म निषेवितम् ।
त्रिविधेन त्रिधा तत्र, मिथ्यादुष्कृतमस्तु मे ॥ २४ ॥

समस्तवास्तु-धान्यादौ, द्विपदे च चतुष्पदे।
यदकार्षमहं मूर्छां, तन्निन्दामि मुहुर्मुहुः ॥२५॥

समृद्धिगृद्धिना पूर्व-माहारश्च चतुर्विधः।
अभुज्यत मया नक्तं, विविक्तस्तं त्यजाम्यहम् ॥२६॥

महाव्रतानि चत्वारि, सूत्रतोऽप्यर्थतोऽपि च।
परावर्त्य तदेकाग्रः, पुनरुज्ज्वलतां नये ॥२७॥

दुर्वाक्यादपकाराद्वा, यद्वा द्रव्यापहारतः।
यो मया लम्भितः पीडां, स मे क्षाम्यतु संप्रति ॥२८॥

देवत्वे ये मया देवा, नारकत्वे च नारकाः।
तिर्यक्त्वेऽपि च तिर्यञ्चो, मानुषत्वे च मानुषाः ॥२९॥

स्थापयाञ्चक्रिरे दुःखे, सर्वे क्षाम्यन्तु ते मयि।
उपेतः समतां सर्वं, तेषामहमपि क्षमे ॥३०॥ युग्मम् ॥

लक्ष्मी रूपं प्रियैर्योगो, जीवितं यौवनं बलम्।
वातोद्धूताब्धिकल्लोल-चञ्चलं सकलं खलु ॥३१॥

रोग-मृत्यु-जरा-जन्म-दुःस्थानामिह देहिनाम्।
धर्ममेकं विना जैनं, न कोऽपि शरणं भवेत् ॥३२॥

जन्तवः स्वजनाः सर्वे, जाता परजनाश्च ये।
विवेकी तेषु कुर्वीत, को ममत्वं मनागपि ? ॥३३॥

एकस्यैव भवे जन्म, स्यादेकस्यैव पञ्चता।
एकस्यैवाङ्गभाजः स्यु-र्दुःखानि च सुखानि च ॥३४॥

वपुरन्यदिदं जीवा-दन्यद्धान्यधनादिकम् ।
जीवोऽन्यः पुनरेतेभ्यः, कथं मुह्यन्ति बालिशाः ? ॥३५॥

वसाशोणितविण्मूत्र-यकृन्मांसाऽस्थिसंभृते ।
अशुचिप्रचिते देहे, को हि मुह्यति कोविदः ? ॥३६॥

अवक्रयकुटीतुल्यं, यत्नाल्लालितपालितम् ।
अचिरादपि मोक्तव्यं, विनश्वरमिदं वपुः ॥३७॥

धीरस्य कातरस्यापि, मृत्युरेत्येव देहिनः ।
तन्म्रियेत तथा धीमान्, न म्रियेत यथा पुनः ॥३८॥

अर्हन्तो निखिलाः सिद्धाः, साधवः स्वगुणान्विताः ।
अर्हद्धर्मश्च शरणं, भवन्त्वशरणस्य मे ॥३९॥

साधवो बान्धवाः सर्वे, धर्मः स्वामी गुरुः पिता ।
नात्मीयं मे परं किञ्चित्, कर्मबन्धनिबन्धनम् ॥४०॥

सद्भ्योऽथ भूत-भाविभ्य-स्तरण्डेभ्यो भवार्णवे ।
शाश्वतेभ्यश्च मे शश्व-दर्हद्भ्योऽस्तु नमो नमः ॥४१॥

कर्मकक्षे क्षणाद्येषां, ध्यानेन दहनायितम् ।
तेभ्यो भवतु सिद्धेभ्य-स्त्रिविधेन नमो नमः ॥४२॥

पञ्चधाऽऽचारधारिभ्यो, भानुभ्यः शासनेऽर्हताम् ।
कृतभव्याब्जबोधेभ्य, आचार्येभ्यो नमो नमः ॥४३॥

एत्याऽन्तेवासिना नित्यं, येभ्यः सूत्रमधीयते ।
उपाध्यायपदस्थेभ्य-स्तेभ्यो मेऽस्तु नमो नमः ॥ ४४ ॥

असहायसहायेभ्यः, साधुभ्योऽस्तु नमो नमः ।
चारित्रयानपात्रे ये, दधते कर्णधारताम् ॥४५॥

बाह्याभ्यन्तरमुपधिं, धर्मस्यानुपकारकम् ।
सावद्ययोगविरत-स्त्रिविधं व्युत्सृजाम्यहम् ॥४६॥

चतुष्प्रकारमाहारं, प्रत्याख्यामि समाधिना ।
चरमोच्छ्वासवेलायां, तनूमेतां त्यजामि च ॥४७॥

दंडगुलहिंमि लोए, मा अमइं कुणसु दंडिओ किह त्ति ।
एस दुलहो हु दंडो, भवदंडनिवारणो जीव ! ॥४८॥

नानाशास्त्रसुभाषितामृतरसैः श्रोत्रोत्सवं कुर्वतां,
येषां यान्ति दिनानि पण्डितजनव्यायामखिन्नात्मनाम् ।
तेषां जन्म च जीवितं च सफलं तैरेव भूर्भूषिता,
शेषैः किं पशुवद्विवेकरहितैर्भूभारभूतैर्नरैः ॥४९॥

जे मे जाणंति जिणा, अवराहा जेसु जेसु ठाणेसु ।
ते हं आलोएमि, उवट्ठिओ सव्वभावेण ॥५०॥

सत्यं वच्मि हितं वच्मि, सारं वच्मि पुनः पुनः ।
अस्मिन्नपारसंसारे, सारं आत्महितं कुरु ॥५१॥

अहिंसा प्रथमं पुष्पं, पुष्पमिन्द्रियनिग्रहः ।
सर्वभूतदया पुष्पं, क्षमा पुष्पं विशेषतः ॥५२॥

ध्यानं पुष्पं तपः पुष्पं, ज्ञानं पुष्पं तु सप्तमम् ।
सत्यं चैवाष्टमं पुष्पं, तेन तुष्यन्ति देवताः ॥५३॥

आलोचनां व्रतोच्चारं, क्षामणां पापगर्हणाम् ।
चतुर्णां शरणं भक्त्या, चतुर्धाऽनशनं व्यधात् ॥५४॥

## २१ आत्मजागृतिसूक्तानि

जेसिं अवड्ढपोग्गल–परियट्टो सेसओ उ संसारो ।
ते सुक्कपक्खिया खलु, अहिए पुण किण्हपक्खिआ ॥ १ ॥

विषयकषायावेश–स्तत्त्वाश्रद्धा गुणेषु च द्वेषः ।
आत्माज्ञानं च यदा, बाह्यात्मा स्यात् तदा व्यक्तः ॥ २ ॥

तत्त्वश्रद्धा ज्ञानं, महाव्रतान्यप्रमादपरता च ।
मोहजयश्च यदि स्यात्, तदान्तरात्मा भवेद् व्यक्तः ॥ ३ ॥

ज्ञानं केवलसंज्ञं, योगनिरोधः समग्रकर्महतिः ।
सिद्धिनिवासश्च यदा, परमात्मा स्यात् तदा व्यक्तः ॥ ४ ॥

आत्मानदी संयमतोयपूर्णा, सत्यावहा शीलतटा दयोर्मिः ।
तत्राभिषेकं कुरु पाण्डुपुत्र !, न वारिणा शुध्यति चान्तरात्मा ॥

या निशा सर्वभूतानां, तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि, सा निशा पश्यतो मुनेः ॥ ६ ॥

बालस्तावत्क्रीडा–सक्त स्तरुणस्तावत्तरुणीरक्तः ।
वृद्धस्तावच्चिन्ता–मग्नो न परब्रह्मणि कोऽपि तु लग्नः ॥७॥

धनार्थिनां यथा नास्ति, शीततापादिदुस्सहम् ।
तथा भवविरक्तानां, तत्त्वज्ञानार्थिनामपि ॥ ८ ॥

कषायविषयाहार–त्यागो यत्र विधीयते ।
उपवासः स विज्ञेयः, शेषं लङ्घनकं विदुः ॥९॥

पूजाकोटिसमं स्तोत्रं, स्तोत्रकोटिसमो जपः ।
जपकोटिसमं ध्यानं, ध्यानकोटिसमो लयः ॥ १० ॥

मोहव्यतीतस्य नरस्य यत्सुखं,
न तत्सुखं केशवशक्रचक्रिणाम् ।
कृताङ्गरागस्य हि शल्यभाजिनो,
न तत्सुखं यद् गतशल्यके जने ॥ ११ ॥

अक्खाण रसणी कम्माण, मोहणी तहा वयाण बंभवयं ।
गुत्तीण य मणगुत्ती, चउरो दुक्खेण जिप्पन्ति ॥ १२ ॥

किं राज्येन धनेन धान्यनिचयैर्देहस्य सद्भूषणैः,
पाण्डित्येन भुजाबलेन महता वाचां पटुत्वेन च ।
जात्याऽप्युत्तमया कुलेन शुचिना शुभ्रैर्गुणानां गणैः,
आत्मा चेन्न विमोचितोऽतिगहनात् संसारकारागृहात् ॥१३॥

चर्मचक्षुर्भृतः सर्वे, देवाश्चावधिचक्षुषः ।
सर्वतः चक्षुषः सिद्धा, योगिनो ज्ञानचक्षुषः ॥ १४ ॥

मणमरणेन्दियमरणं, इन्दियमरणे मरन्ति कम्माइं ।
कम्ममरणेण मुक्खो, तम्हा मणमारणं पवरं ॥ १५ ॥

अप्पाण जाणइ अप्पा, जहट्ठिओ अप्पसक्खिओ धम्मो ।
अप्पा करेइ तं तह, जह अप्पसुहावहं होइ ॥ १६ ॥

कुणउ तवं पालउ संजमं पढउ सयलसत्थाइं ।
जाव न झायइ अप्पा ताव न मुक्खो जिणो भणइ ॥ १७ ॥

जा दव्वे होइ मई, अहवा तरुणीसु रूववन्तीसु ।
सा जइ जिणवरधम्मे, करयलमज्झट्ठिया सिद्धि ॥ १८ ॥

संयमाय श्रुतं धत्ते, नरो धर्माय संयमम् ।
धर्मं मोक्षाय मेधावी, त्रयं व्यर्थं विपर्ययात् ॥ १९ ॥

तत्त्वार्थचिन्तनेनाऽत्र, नाऽन्यः कोऽप्यात्मनो रिपुः ।
आत्मैवात्मनि शत्रुत्वं, आत्मना याति निश्चितम् ॥ २० ॥

उत्तमानां जरा स्वान्ते, मध्यमानां च मस्तके ।
अधमानां शरीरेषु, न नीचानां कुतश्चन ॥ २१ ॥

उत्तमा जन्मतो वृद्धा, मध्यमा मस्तके पलिः ।
अधमाः शरीरे श्रान्ता, नीचा नैव कदाचन ॥ २२ ॥

आत्मानं आत्मना वेत्ति, मोहत्यागाद् य आत्मनि ।
तदेव तस्य चारित्रं, तज्ज्ञानं तच्च दर्शनम् ॥ २३ ॥

कर्माहितमिह चामुत्र, चाधमतमो नरः समारभते ।
इहफलमेव त्वधमो, विमध्यमस्तूभयफलार्थम् ॥ २४ ॥

परलोकहितायैव, प्रवर्तते मध्यमः क्रियासु सदा ।
मोक्षायैव तु घटते, विशिष्टमतिरुत्तमः पुरुषः ॥ २५ ॥

न शब्दशास्त्राभिरतस्य मोक्षो, न बाह्यकाडम्बरबन्धुरस्य ।
न भोजनाच्छादनविस्मितस्य, न लोकचित्तग्रहणे रतस्य ॥२६॥

एकाग्रचित्तस्य दृढव्रतस्य, पञ्चेन्द्रियप्रीतिनिवर्तकस्य ।
अध्यात्मयोगे गतमानसस्य, मोक्षो ध्रुवं नित्यमहिंसकस्य ॥२७॥

उपावृत्तस्य दोषेभ्यः, सम्यग्वासो गुणैः सह ।
उपवासः स विज्ञेयः, न शरीरविशोषणम् ॥ २८ ॥

ज्ञाते ह्यात्मनि नो भूयो, ज्ञातव्यमवशिष्यते ।
अज्ञाते पुनरेतस्मिन्, ज्ञातमन्यन्निरर्थकम् ॥ २९ ॥

कर्मणस्ते हि पर्याया, नात्मनः शुद्धसाक्षिणः ।
कर्मक्रियास्वभावं यद्, आत्मा त्वजस्वभाववान् ॥ ३० ॥

सदा यत्र स्थितो द्वेषो-ल्लेखः स्वप्रतिपन्थिषु ।
सुखानुभवकालेऽपि, तत्र तापहतं मनः ॥ ३१ ॥

स्कन्धात् स्कन्धान्तरारोपे, भारस्येव न तत्त्वतः ।
अथाह्लादेऽपि दुःखस्य, संस्कारो विनिवर्त्तते ॥ ३२ ॥

आत्मा चित्ते कृतो यत्ने, धिषणायां कलेवरे ।
परमात्मनि जीवेऽर्के, हुताशनसमीरयोः ॥ ३३ ॥

सह कलेवरखेदमचिन्तयन्,
स्ववशता हि पुनस्तव दुर्लभा ।
बहुतरं च सहिष्यसि जीव ! हे !,
परवशो न च तत्र गुणोऽस्ति ते ॥ ३४ ॥

क्व हि पुङ्गणना तेषां, येऽन्यशिक्षाविचक्षणाः ।
ये स्वं शिक्षयितुं दक्षाः, तेषां पुङ्गणना नृणाम् ॥ ३५ ॥

उत्तमाः स्वगुणैः ख्याता, मध्यमास्तु पितुर्गुणैः ।
अधमा मातुलैः ख्याताः, श्वशुरैश्चाधमाधमाः ॥ ३६ ॥

अप्पा नई वेअरणी, अप्पा मे कूडसामली ।
अप्पा कामदुहा धेणू, अप्पा मे नंदणं वणं ॥ ३७ ॥

अप्पा कत्ता विकत्ता य, दुहाण य सुहाण य ।
अप्पा मित्तममित्तं च, दुप्पट्ठिअ सुपट्ठिओ ॥ ३८ ॥

यः कर्ता कर्मभेदानां, भोक्ता कर्मफलस्य च ।
संसर्ता परिनिर्वाता, स ह्यात्मा नान्यलक्षणः ॥ ३९ ॥

प्रत्यहं प्रत्यवेक्षेत, नरश्चरितमात्मनः ।
किं नु मे पशुभिस्तुल्यं, किं वा सत्पुरुषैरिति ॥ ४० ॥

## २२ आत्मनिन्दासूक्तानि ।

हालाहलं पिबसि वाञ्छसि दीर्घमायु-
र्दावानलं विशसि काङ्क्षसि शीतिमानम् ।
भुङ्क्षे कुपथ्यमथ चेच्छसि कल्यतां च,
पापं तनोसि सुखसंततिमीहसे च ॥ १ ॥

श्रुत्वा श्रद्धाय सम्यक् शुभगुरुवचनं वेश्मवासं निरस्य,
प्रव्रज्याऽथो पठित्वा बहुविधतपसा शोषयित्वा शरीरम् ।
धर्मध्यानाय यावत्प्रभवति समयस्तावदाकस्मिकीयं,
प्राप्ता मोहस्य धाटी तडिदिव विषमा हा हता कुत्र यामः? ।२।

एकेनाऽपि महाव्रतेन यतिनः खण्डेन भग्नेन वा,
दुर्गत्यां पततो न सोऽपि भगवानीष्टे स्वयं रक्षितुम् ।

हत्वा तान्यखिलानि दुष्टमनसो वर्तामहे ये वयं,
तेषां दण्डपदं भविष्यति कियज्जानाति तत्केवली ॥३॥

कट्यां चोलपटं तनौ सितपटं कृत्वा शिरोलुञ्चनं,
स्कन्धे कम्बलिकां रजोहरणकं निक्षिप्य कक्षान्तरे ।

वक्त्रे वस्त्रमथो विधाय ददतः श्रीधर्मलाभाशिषं,
वेषाडम्बरिणः स्वजीवनकृते विद्मो गतिं नात्मनः ॥४॥

भिक्षापुस्तकवस्त्रपात्रवसतिप्रावारलुब्धा यथा,
नित्यं मुग्धजनप्रतारणकृते कष्टेन खिद्यामहे ।

आत्मारामतया तथा क्षणमपि प्रोज्झ्य प्रमादद्विपं,
स्वार्थाय प्रयतामहे यदि तदा सर्वार्थसिद्धिर्भवेत् ॥५॥

पाखण्डानि सहस्रशो जगृहिरे ग्रन्था भृशं पेठिरे,
लोभाज्ञानवशात् तपांसि बहुधा मूढैश्चिरं तेपिरे ।

क्वाऽपि क्वाऽपि कथञ्चनाऽपि गुरुभिर्भूत्वा मदो भेजिरे,
कर्मक्लेशविनाशसंभवसुखान्यद्यापि नो लेभिरे ॥६॥

किं भावी नारकोऽहं किमुत बहुभवी दूरभव्यो न भव्यः,
किं वाऽहं कृष्णपक्षी किमचरमगुणस्थानकं कर्मदोषात् ।

वह्निज्वालेव शिक्षाव्रतमपि विषवत् खड्गधारा तपस्या,
स्वाध्यायः कर्णसूची यम इव विषमः संयमो यद्विभाति ॥७॥

वस्त्रं पात्रमुपाश्रयं बहुविधं भैक्षं चतुर्थौषधं,
शय्यापुस्तकपुस्तकोपकरणं शिष्यं च शैक्षामपि ।
गृह्णीमः परकीयमेव सुतरामाजन्म वृद्धा वयं,
यास्यामः कथमीदृशेन तपसा तेषां हहा निष्क्रयम् ॥८॥

अन्तर्मत्सरिणां बहिःशमवतां प्रच्छन्नपापात्मनां,
नद्यम्भःकृतशुद्धिमद्यवणिग्दुर्वासनाशालिनाम् ।
पाखण्डव्रतधारिणां बकदृशां मिथ्यादृशामीदृशां,
बद्धोऽहं धुरि तावदेव चरितैस्तन्मे हहा का गतिः? ॥९॥

येषां दर्शनवन्दनप्रगमनस्पर्शप्रशंसादिना,
मुच्यन्ते तमसा निशा इव सिते पक्षे प्रजास्तत्क्षणात् ।
तादृक्षोऽपि च सन्ति केऽपि मुनयस्तेषां नमस्कुर्महे,
संविग्ना वयमात्मनिन्दनमिदं कुर्मः पुनर्बोधये ॥१०॥

रागो मे स्फुरति क्षणं क्षणमथो वैराग्यमुज्जृम्भते,
द्वेषो मां भजति क्षणं क्षणमथो मैत्री समालिङ्गति ।
दैन्यं पीडयति क्षणं क्षणमथो हर्षोऽपि मां बाधते,
कोपोऽयं कृपणो कृपापरिवृतैः कार्यं हहा कर्मभिः ॥११॥

न कयं दीणुद्धरणं, न कयं साहम्मिआण वच्छल्लं ।
हिययंमि वीअराओ, न धारियो हारियो जम्मो ॥ १२ ॥

ममैवाऽयं दोषो यदपरभवे नार्जितमहो !,
शुभं यस्माल्लोको भवति मयि कुप्रीतिहृदयः ।

अपापस्यैवं मे कथमपरथा मत्सरमयं,
जनो याति स्वार्थं प्रतिविमुखतामेत्य सहसा ॥ १३ ॥

पंच पंचाऽऽ[illegible] उ. सुत्तंमि जे पदंसिआ ।
ते नाऽ[illegible], किन्तु मे उवल्लक्खणं ॥ १४ ॥

न तं अरी कंठछित्ता करेति, जं से करे अप्पणिया दुरप्पा ।
से नाहिई मच्चुमुहं तु पत्ते, पच्छाणुतावेण दयाविहूणो ॥१५॥

[illegible] पापं, त्रिदोषैस्त्रिविधं त्रिधा ।
त्रिलोक्यां यन्मयाऽकारि, तन्निन्दे निजदुष्कृतम् ॥ १६ ॥

आत्मनिन्दासमं पुण्यं, न भूतं न भविष्यति ।
परनिन्दासमं पापं, न भूतं न भविष्यति ॥ १७ ॥

परनिन्दां महापापं, वदन्ति मुनयः खलु ।
इहलोके पराभूतिः, परत्र नरके गतिः ॥ १८ ॥

यः स्वयं [illegible] शुद्धाचारान् प्रणामयेत् ।
तस्यात्मानमि[illegible], नरकेऽपि पतितं हि ॥ १९ ॥

मोहस्य तदपि विलसितं, अभिमानो यः परप्रीणितायाः ।
तत्तमसोऽपि तमिस्रं, यात्मस्तुतिरात्मना क्रियते ॥ २० ॥

## २३ श्राद्धधर्मसूक्तानि

लद्धट्ठो सवणाओ, सुयस्स अवधारणाउ गहियट्ठो ।
संकाइ पुच्छियट्ठो, कहणाओ निच्छियट्ठो य ॥ १ ॥

जत्थऽत्थि चेइआइं, जत्थ य साहूहिं होइ संजोगो ।
जत्थऽन्ने साहम्मी, तत्थ निवेसे वसइ सड्ढो ॥ २ ॥

सर्वज्ञो हृदि, वाचि तद्गुणगणः कायेन देशव्रतं,
धर्मे तत्परता परः, (रा), परिणतो बोधो बुधश्लाघ्यता ।
प्रीतिः साधुषु बन्धुता, बुधजने जैने रतिः शासने,
यस्यैवं भवभेदको गुणगणः स श्रावकः पुण्यभाग् ॥ ३ ॥

त्रैकाल्यं जिनपूजनं प्रतिदिनं सङ्घस्य सन्मानन,
स्वाध्यायो गुरुसेवनं च विधिना दानं तथावश्यकम् ।
शक्त्या च व्रतपालनं वरतपो ज्ञानस्य पाठस्तथा,
सैष श्रावकपुङ्गवस्य कथितो धर्मो जिनेन्द्रागमे ॥ ४ ॥

शृङ्गी यथा क्षारजले पयोनिधौ,
वसन्नपि स्वादुजलं पिबेत्सदा ।
तथैव जैनामृतवाणीमादरात्,
भजेद् गृही संसृतिमध्यगोऽपि सन् ॥ ५ ॥

बुद्धेः फलं तत्त्वविचारणं च,
देहस्य सारं व्रतधारणं च ।

अर्थस्य सारं किल पात्रदानं,
वाचः फलं प्रीतिकरं नराणाम् ॥ ६ ॥

जत्थ पुरे जिणभवणं, समयविओ साहुसावया जत्थ ।
तत्थ सया वसियव्वं, पउरजणा भद्दगा जत्थ ॥ ७ ॥

सामग्गिअभावे वि हु, वसणे वि सुहे वि तह कुसंगे वि ।
जस्स न हायइ धम्मो, निच्छयओ जाण तं सड्ढं ॥ ८ ॥

सावयघरम्मि वरं हुज्ज, चेडओ नाणदंसणसमेओ ।
मिच्छत्तमोहिअमई, मा राया चक्कवट्टी वि ॥ ९ ॥

जिनेन्द्रपूजा गुरुपर्युपास्तिः, सत्त्वानुकम्पा शुभपात्रदानम् ।
गुणानुरागः श्रुतिरागमस्य, नृजन्मवृक्षस्य फलान्यमूनि ॥१०॥

देवपूजा गुरूपास्तिः, स्वाध्यायः संयमस्तपः ।
दानं चेति गृहस्थानां, षट्कर्माणि दिने दिने ॥११॥

श्रद्धालुतां याति जिनेन्द्रशासने, धनानि पात्रेषु वपन्त्यनारतम् ।
करोति पुण्यानि सुसाधुसेवना–दतोऽपि तं श्रावकमाहुरुत्तमाः ॥

सचित्तादेस्तु संक्षेपो, दिने रात्रावपीह यः ।
देशावकाशिकं प्राहु–र्मुख्यतस्तं विचक्षणाः ॥१३॥

दिग्विरतेस्तु संक्षेपोऽधुना देशावकाशिकम् ।
व्यवहारनये ख्यातं, विख्यातं दृश्यते श्रुते ॥१४॥

सौम्यत्वेन निशामणिर्दिनमणिस्तीव्रप्रतापेन च,
संदीपनकारणाद् गृहमणिश्चिन्तामणिर्दानतः ।

धर्मात् श्राद्धशिरोमणिर्मदविषध्वंसान् मणिर्भोगिनः,
एकोऽनेकमयो गुणैर्नवनवैः श्रीकर्मराजः सुधीः ॥१५॥

कयवयकम्मो तह सीलवं च गुणवं च उज्जुववहारी ।
गुरुसुस्सूसो पवयण–कुसलो खलु भावओ सड्ढो ॥१६॥

भक्तिस्तीर्थकरो गुरे जिनमते श्रद्धालुता शासने,
शुश्रूषा मुनिपुङ्गवे सुविहिते दानप्रवृत्तिः सदा ।
वात्सल्यं सहधर्मचारिषु दया भूतेषु सर्वेष्वहो,
मन्ये श्रावकधर्मवर्तिनि जने पर्याप्तकल्पो विधिः ॥१७॥

अन्नन्नदेसजाया, अन्नन्नहारवड्ढियसरीरा ।
जिणसासणपवन्ना, सव्वे ते बन्धवा भणिया ॥१८॥

पूजामाचरतां जगत्त्रयपतेः सङ्घार्चनं कुर्वतां,
तीर्थानामभिवन्दनं विदधतां जैनं वचः शृण्वताम् ।
सद्दानं ददतां तपश्च चरतां सत्त्वानुकम्पाकृतां,
येषां यान्ति दिनानि जन्म सफलं तेषां सुपुण्यात्मनाम् ॥१९॥

निद्रान्ते परमेष्ठिसंस्मृतिरथो देवार्चने व्यापृतिः,
साधुभ्यः प्रणतिः प्रमादविरतिः सिद्धान्ततत्त्वश्रुतिः ।
सर्वस्योपकृतिः शुचिव्यवहृतिः सत्पात्रदाने रतिः,
श्रेयोनिर्मलधर्मकर्मनिरतिः श्लाघ्या नराणां स्थितिः ॥२०॥

कृत्वार्हत्पदपूजनं यतिजनं नत्वा विदित्वागमं,
हत्वा सङ्गमधर्मकर्मठधियां पात्रेषु दत्वा धनम् ।

गत्वा पद्धतिमुत्तमक्रमजुषां जित्वान्तरारिव्रजं,
स्मृत्वा पञ्चनमस्कृतिं कुरु करक्रोडस्थमिष्टं सुखम् ॥२१॥

वाणी रसवती यस्य, भार्या पुत्रवती सती।
लक्ष्मी दानवती यस्य, सफलं तस्य जीवितम् ॥२२॥

## २४ नरजन्मश्रेष्ठता-दुर्लभतयोः सूक्तानि

नरेषु चक्री त्रिदशेषु वज्री, मृगेषु सिंहः प्रशमो व्रतेषु।
मतो महीभृत्सु सुवर्णशैलो, भवेषु मानुष्यभवः प्रधानः ॥१॥

निर्वाणादिसुखप्रदे नरभवे जैनेन्द्रधर्मान्विते,
लब्धे स्वल्पमचारुकामजसुखं किं सेवितुं युज्यते ?।
वैडूर्यादि महोपलौघनिचिते प्राप्तेऽपि रत्नाकरे,
लातुं स्वल्पमचारुकाचशकलं किं चोचितं साम्प्रतम् ॥२॥

अवाप्य धर्मावसरं विवेकी कुर्याद्विलम्बं न हि विस्तराय।
यतो जिनस्तक्षशिलाधिपेन, रात्रिं व्यतिक्रम्य पुनर्न नेमे ॥३॥

आयुर्वर्षशतं नृणां परिमितं रात्र्या तदर्धीकृतं,
तस्यार्द्धस्य कदाचिदर्द्धमधिकं वार्द्धक्यबाल्ये गतम्।
शेषं रोगवियोगशोकमदनक्रोधादिभिर्व्याकुल-
स्यायुर्याति नरस्य तत्र कतमो यो धर्मकर्मक्षणः ॥४॥

यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा,
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः।

आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्,
आदीप्ते भवने च कूपखननं प्रत्युद्यमः कीदृशः ? ॥५॥

स्वर्णस्थाले क्षिपति स रजः पादशौचं विधत्ते,
पीयूषेण प्रवरकरिणं वाहयत्यैन्धभारम् ।
चिन्तारत्नं विकिरति कराद् वायसोड्डायनार्थं,
यो दुष्प्रापं गमयति मुधा मर्त्यजन्म प्रमत्तः ॥६॥

ते धत्तूरतरुं वपन्ति भवने प्रोन्मूल्य कल्पद्रुमं,
चिन्तारत्नमपास्य काचशकलं स्वीकुर्वते ते जडाः ।
विक्रीय द्विरदं गिरीन्द्रसदृशं क्रीणन्ति ते रासभं,
ये लब्धं परिहृत्य धर्ममधमा धावन्ति भोगाशया ॥ ७ ॥

यः प्राप्य दुष्प्राप्यमिदं नरत्वं, धर्मं न यत्नेन करोति मूढः ।
क्लेशप्रबधेन स लब्धमब्धौ, चिन्तामणिं पातयति प्रमादात्॥८॥

चूल्लगपासगधन्ने, जुए रयणे अ सुविणचक्के अ ।
कुम्मजूगे परमाणु, दस दिट्ठंता मणुअजम्मे ॥ ९ ॥

विप्रः प्रार्थितवान् प्रसन्नमनसः श्रीब्रह्मदत्तात्पुरा,
क्षेत्रेऽस्मिन् भरतेऽखिले प्रतिगृहं मे भोजनं दापय ।
इत्थं लब्धवरोऽथ तेष्वपि कदाप्यश्नात्यहो ! द्विः स चेद्,
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति नो ॥ १० ॥

स्तम्भानां हि सहस्रमष्टसहितं प्रत्येकमष्टोत्तरं,
कोणानां शतमेषु तानपि जयन् द्यूतेऽथ तत्संख्यया ।

साम्राज्यं जनकात्सुतः स लभते स्याच्चेदिदं दुर्घटं,
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति नो ॥ ११ ॥

वृद्धा काऽपि पुरा समस्तभरतक्षेत्रस्य धान्यावलिं,
पिण्डीकृत्य च तत्र सर्षपकणान् क्षिप्त्वाढकेनोन्मितान् ।
प्रत्येकं हि पृथक्करोति किल सा सर्वाणि चान्नानि चेद्,
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति नो ॥ १२ ॥

सिद्धद्यूतकलाबलाद् धनिजनं जित्वाऽथ हेम्नां भरैः,
चाणक्येन नृपस्य कोशनिवहः पूर्णीकृतो हेलया ।
दैवादाढ्यजनेन तेन स पुनर्जीयेत मन्त्री क्वचिद् ।
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति नो ॥ १३ ॥

रत्नान्याढ्यसुतैर्वितीर्य वणिजां देशान्तरादीयुषां,
पश्चात्तापवशेन तानि पुनरादातुं कृतोपक्रमैः ।
लभ्यन्ते निखिलानि दुर्घटमिदं दैवाद् घटेत क्वचिद्,
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति नो ॥ १४ ॥

स्वप्ने कार्पटिकेन रात्रिविगमे श्रीमूलदेवेन च,
प्रेक्ष्येन्दुं सकलं कुनिर्णयवशादल्पं फलं प्राप्य च ।
स्वप्नस्तेन पुनः स तत्र शयितेनालोक्यते कुत्रचिद्,
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति नो ॥ १५ ॥

राधाया वदनादधः क्रमवशाच्चक्राणि चत्वार्यपि,
भ्राम्यन्तीह विपर्ययेण तदधो धन्वी स्थितोऽवाङ्मुखः ।

तस्या वामकनीनिकामिषुमुखेनैवाशु विध्यत्यहो !
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति नो ॥ १६ ॥

दृष्ट्वा कोऽपि हि कच्छपो ह्रदमुखे सेवालबन्धच्युते,
पूर्णेन्दुं मुदितः कुटुम्बमिह तद्द्रष्टुं समानीतवान् ।
सेवाले मिलिते कदाऽपि स पुनश्चन्द्रं समालोकते,
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति नो ॥ १७ ॥

शम्या पूर्वपयोनिधौ निपतिता भ्रष्टं युगं पश्चिमा–
म्भोधौ दुर्धरवीचिभिश्च सुचिरात् संयोजितं तद्द्वयम् ।
सा शम्या प्रविशेद्युगस्य विवरे तस्य स्वयं क्वाऽपि चेद्,
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति नो ॥ १८ ॥

चूर्णीकृत्य पराक्रमान् मणिमयं स्तम्भं सुरः क्रीडया,
मेरौ सन्नलिकासमीरवशतः क्षिप्त्वा रजो दिक्षु चेत् ।
स्तम्भं तैः परमाणुभिः सुमिलितैः कुर्यात्स चेत्पूर्ववद्,
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति नो ॥ १९ ॥

दुष्प्रापं मकराकरे करतलाद्रत्नं निमग्नं यथा,
संसारेऽत्र तथा नरत्वमथ तत्प्राप्तं मया निर्मलम् ।
भ्रातर् ! पश्य विमूढतां मम हहा नीतं यदेतन्मुधा,
कामक्रोधकुबोधमत्सरकुधीमायामहामोहतः ॥ २० ॥

देवा विसयपसत्ता, नेरइया विविहदुक्खसंतत्ता ।
तिरिया विवेकविकला, मणुआणं धम्मसामग्गी ॥ २१ ॥

ज्ञानदर्शनचारित्र–रत्नत्रितयभाजने ।
मनुजत्वे पापकर्म, स्वर्णभाण्डे सुरोपमम् ॥ २२ ॥

चत्तारि परमंगाणि, दुल्लहाणीह जंतुणो ।
माणुसत्तं सुई सद्धा, संजमंमि अ विरियं ॥ २३ ॥

न गृहरक्षणे दक्षं, न दंशमशकापहम् ।
शुनः पुच्छमिव व्यर्थं, मानुष्यं धर्मवर्जितम् ॥ २४ ॥

देवता विषयासक्ता, नारका दुःखविह्वलाः ।
ज्ञानहीनाश्च तिर्यञ्चो, धर्मयोग्या हि मानवाः ॥ २५ ॥

## २५ स्वाध्यायसूक्तानि

वायणा पुच्छणा चेव, तहा य परियट्टणा ।
अणुप्पेहा धम्मकहा, सज्झाओ होइ पंचहा ॥ १ ॥

निरन्तरं विचारो यः, श्रुतार्थस्य गुरोर्मुखात् ।
तन्निदिध्यासनं प्रोक्तं, तच्चैकाग्र्येण लभ्यते ॥ २ ॥

एत्तो सव्वन्नुत्तं, तित्थयरत्तं च जायइ कमेणं ।
इअ परमं मोक्खंगं, सज्झाओ तेण विन्नेयो ॥ ३ ॥

तं नत्थि जं न पासइ, सज्झायविऊ पयत्थपरमत्थं ।
गच्छइ सुगइमूलं, खणे खणे परमसंवेगं ॥ ४ ॥

यश्चेतोऽस्थिरवाजिवारणविधौ प्रौढोरुवल्गोपमो,
वाग्व्याघ्रीपविपञ्जरप्रतिनिभः कायद्विपेन्द्राङ्कुशः ।

हे ! लोकाः ! परदोषतप्तिविषयव्यापारमुत्सृज्य तं,
स्वाध्यायं कुरुतादरेण शिवदं श्रीमज्जिनैर्भाषितम् ॥५॥

जइ वि हु दिवसेण पयं, धरेइ पक्खेण वा सिलोगद्धं ।
उज्जोयं मा मुंचसु, जइ इच्छसि सिक्खिउं नाणं ॥ ६ ॥

ये लेखयन्ति जिनशासनपुस्तकानि,
व्याख्यानयन्ति च पठन्ति च पाठयन्ति ।
शृण्वन्ति रक्षणविधौ च समाद्रियन्ते,
ते मर्त्यदेवशिवशर्म नरा लभन्ते ॥ ७ ॥

पठति पाठयते पठतामसौ, वसनभोजनपुस्तकवस्तुभिः ।
प्रतिदिनं कुरुते य उपग्रहं, स इह सर्वविदेव भवेन्नरः ॥८॥

बारसविहम्मि वि तवे, सब्भिंतरबाहिरे कुसलदिट्ठे ।
न वि अत्थि न वि अ होही, सज्झायसमं तवोकम्मं ॥९॥

सज्झायं धम्मकहं, च तस्स सोऊण उवसमं पत्ता ।
करि–वग्घ–सिंह–चित्तय–सबर–हरिणाइणो सत्ता ॥१०॥

ते केवि सावगत्तं, सम्मत्तं केवि केवि अविरोहं ।
केवि हु भद्दगभावं, पडिवन्ना अणसणं केवि ॥११॥

बारसविहम्मि वि तवे, सब्भिंतरबाहिरे कुसलदिट्ठे ।
नवि अत्थि नवि अ होही, सज्झायसमं तवोकम्मं ॥१२॥

सज्झायेण पसत्थं, झाणं जाणइ अ सव्वपरमत्थं ।
सज्झाये वट्टंतो, खणे–खणे जाइ वेरग्गं ॥१३॥

अपुव्वो कोइ धुवं, पभावो जिणिंदवयणस्स ।
जं निसुणिऊण तिरिया–वि जंति वेरग्गमग्गंमि ॥१४॥

इय चिंतिऊण सविसेस–मायरं तेसिं दंसए सेट्ठी ।
भव्वेसु पक्खवायं, वहंति जं वीयरागा वि ॥१५॥

साहम्मिवच्छलं जेण, जिणिंदेहिं भुवणपणएहिं ।
सम्मत्तसुद्धिहेउं, निद्दिट्ठं धम्मियजणस्स ॥१६॥

## २६ जैनसिद्धान्तसूक्तानि

कत्थ अम्हारिसा पाणी, दूसमादोसदूसिआ ।
हा अणाहा कहं हुंता, न हुंतो जइ जिणागमो ॥१॥

आगमं आयरंतेण, अत्तणो हियकंखिणो ।
तित्थनाहो गुरू धम्मो, सव्वे ते बहुमन्निया ॥२॥

बालस्त्रीमन्दमूर्खाणां, नृणां चारित्रकाङ्क्षिणाम् ।
अनुग्रहार्थं सर्वज्ञैः, सिद्धान्तः प्राकृतः कृतः ॥३॥

तद्गीः सुधार्दाधितिदीप्तिदीप्ता, नाऽकर्णि कर्णैः किमु ते सकर्णाः।
करोत्करैर्यः कुरुते नलिन्याः, नोल्लासनं को नलिनीपतिः सः॥४॥

अद्दामलगपमाणे, पुढविकायंमि हुंति जे जीवा ।
ते पारेवयमित्ता, जंबूदीवे न मायन्ति ॥५॥

एगंमि उदगबिंदुंमि, जे जीवा जिणवरेहिं पन्नत्ता ।
ते जइ सरसवमित्ता, जंबूदीवे न मायन्ति ॥६॥

आमे घडे निहत्तं, जहा जलं तं घडं विणासेइ ।
इअ सिद्धंतरहस्सं, अप्पाहारं विणासेइ ॥७॥
धर्मध्वंसे क्रियालोपे, स्वसिद्धान्तार्थविप्लवे ।
अपृष्टेनाऽपि शक्तेन, वक्तव्यं तन्निषेधितुम् ॥८॥
सव्वत्थ संजमं सं-जमाओ अप्पाणमेव रक्खिज्जा ।
मुंचंति अइवायाओ, पुणो विसोही न याऽविरई ॥९॥
मोहस्सेवोवसमो, खओवसमो चउण्हं घाईणं ।
उदयक्खयपरिणामा, अट्ठण्हमवि होंति कम्माणं ॥१०॥
सुवैद्यवचनाद्यद्वद्, व्याधेर्भवति संक्षयः ।
तद्वदेव हि तद्वाक्याद्, ध्रुवः संसारसंक्षयः ॥११॥
वेसागिहेसु गमणं, महा विरुद्धं जहा कुलवहूणं ।
जाणाहि तहा सावय !, सुसावगाणं कुतित्थेसु ॥१२॥
जम्हा न मुत्तिमग्गे, मुत्तूणं आगमं इह पमाणं ।
विज्जइ छउमत्थाणं, तम्हा तत्थेव जइयव्वं ॥१३॥
नत्थि परलोकमग्गे, पमाणमन्नं जिणागमं मोत्तुं ।
आगमपुरस्सरं चिय, करेइ तो सव्वकिच्चाइं ॥१४॥
जं जीयमसोहिकरं, पासत्थपमत्तसंजयाईहिं ।
बहुएहिं वि आयरियं, न पमाणं सुद्धचरणाणं ॥१५॥
जं सव्वहा न सुत्ते, पडिसिद्धं नेव जीववहहेउं ।
तं सव्वं पि पमाणं, चारित्तधणाण भणियं च ॥१६॥

सुई जहाससुत्ता, न नासइ कयवरंमि पडिआ वि ।
जीवो तहा ससुत्तो, न णस्सइ गओ वि संसारे ॥१७॥

उववाओ लंतगंमि, चोद्दसपुव्वीस्स होइ उ जहन्नो ।
उक्कोसो सव्वट्ठे, सिद्धिगमो वा अकम्मस्स ॥१८॥

पयमक्खरं पि इक्कं, जो न रोएइ सुत्तनिद्दिट्ठं ।
सेसं रोयंतो वि हु, मिच्छद्दिट्ठी मुणेयव्वो ॥१९॥

सामग्गिअभावाओ, ववहारियरासिअप्पवेसाओ ।
भव्वा वि ते अणंता, जे मुक्खसुहं न पावंति ॥२०॥

चेइअदव्वविणासे, इसिघाए पवयणस्स उड्डाहे ।
संजइचउत्थभंगे, मूलग्गी बोहिलाभस्स ॥२१॥

एगंतेण निसेहो, जोगेसु न देसिओ विही वा वि ।
दलियं पप्प निसेहो, होज्ज विही वा जहा रोगे ॥२२॥

अणुमित्तो वि न कस्सइ, बंधो परवत्थुपच्चओ भणिओ ।
तह वि य जयंति जइणो, परिणामविसोहिमिच्छंता ॥२३॥

भावना च विमुक्तिश्च, रतिकल्पमथापरम् ।
तथा विचित्रचर्येत्य-ध्ययनानां चतुष्टयम् ॥२४॥

परलोकविधौ शास्त्रात्, प्रायो नान्यदपेक्षते ।
आसन्नभव्यो मतिमान्, श्रद्धाधनसमन्वितः ॥२५॥

उपदेशं विनाप्यर्थ-कामौ प्रति पटुर्जनः ।
धर्मस्तु न विना शास्त्रा-दिति तत्रादरो हितः ॥२६॥

तस्मात्सदैव धर्मार्थी, शास्त्रयत्नः प्रशस्यते ।
लोके महान्धकारेऽस्मिन्, शास्त्रालोकः प्रवर्तकः ॥२७॥

पापामयौषधं शास्त्रं, शास्त्रं पुण्यनिबन्धनम् ।
चक्षुः सर्वत्रगं शास्त्रं, शास्त्रं सर्वार्थसाधनम् ॥२८॥

न यस्य भक्तिरेतस्मिन्, तस्य धर्मक्रियाऽपि हि ।
अन्धप्रेक्षाक्रियातुल्या, कर्मदोषादसत्फला ॥२९॥

यस्य त्वनादरः शास्त्रे, तस्य श्रद्धादयो गुणाः ।
उन्मत्तगुणतुल्यत्वात्, न प्रशंसास्पदं सताम् ॥३०॥

मलीनस्य यथात्यन्तं, जलं वस्त्रस्य शोधनम् ।
अन्तःकरणरत्नस्य, तथा शास्त्रं विदुः बुधाः ॥३१॥

शास्त्रे भक्तिर्जगद्वन्द्यैः, मुक्तेर्दूती परोदिता ।
अत्रैवेयं अतो न्याय्या, तत्प्राप्त्यासन्नभावतः ॥३२॥

ये योजनसहस्रेऽपि, जीवा मान्ति न मान्ति वा ।
प्रभुः प्रभुप्रभावात् ते, पीठे तत्रैकयोजने ॥३३॥

उदयक्खयखओवसम–उवसमा जं च कम्मुणो भणिया ।
दव्वं खेत्तं कालं, भावं च भवं च संपप्प ॥३४॥

ओहो सुओवउत्तो, सुयनाणी जइ वि हु गिण्हइ असुद्धं ।
तं केवली वि भुंजइ, अपमाण सुयं भवे इहरा ॥३५॥

माइज्ज घडसहस्सा, अहवा माइज्ज सागरा सव्वे ।
जस्सेयारिसलद्धी, सो पाणिपडिग्गाही होइ ॥३६॥

सुत्तं गणहररइयं, तहेव पत्तेयवुद्धरइयं च ।
सुयकेवलिणा रइयं, अभिन्नदसपुव्विणा रइयं ॥३७॥

कारणमेव तदन्त्यं, सूक्ष्मो नित्यश्च भवति परमाणुः ।
एकरसगन्धवर्णो, द्विस्पर्शः कार्यलिङ्गश्च ॥३८॥

अत्थि अणंता जीवा, जेहिं न पत्तो तसाइपरिणामो ।
ते पि अणन्ताणन्ता, निगोयवासं अणुहवंति ॥३९॥

सिज्झन्ति जत्तिया किर, इह संववहारजीवरासिमज्झाओ ।
इंति अणाइवणस्सइ–रासीओ तत्तिआ तम्मि ॥४०॥

आग्नेय्यां गणभृद्विमानवनिताः साध्व्यस्तथा नैरृते,
ज्योतिर्व्यन्तरभावनेशदयिता वायव्यगास्तत्प्रियाः ।
ऐशान्यां च विमानवासिनरनार्यः संश्रिता यत्र तज्,
जैनस्थानमिदं चतुस्त्रिपरिषत्संभूषितं पातु वः ॥४१॥

जत्थ जलं तत्थ वणं, जत्थ वणं तत्थ निच्छओ तेऊ ।
तेऊवाऊसहगया, तसा य पच्चक्खया चेव ॥४२॥

साध्वीशिलिक्षनिर्देव–द्रव्यभोगो मुनेर्वधः ।
उड्डाहः शासनस्याऽपि, बोधेर्मूलाग्निरुच्यते ॥४३॥

## २७ जिनबिम्बसूक्तानि

यास्यामीति जिनालयेऽत्र लभते ध्यायंश्चतुर्थं फलं,
षष्ठं चोत्थितमुद्यतोऽष्टममथो गन्तुं प्रवृत्तोऽध्वनि ।

श्रद्धालुर्दशमं बहिर्जिनगृहात् प्राप्तस्ततो द्वादशं,
मध्ये पाक्षिकमीक्षिते जिनपतौ मासोपवासं फलम् ॥१॥

सयं पमज्जणे पुण्णं, सहस्सं च विलेवणे ।
सयसाहस्सिया माला, अणंतं गीयवाइए ॥२॥

अलङ्कारा तथा कार्या, बिम्बानामर्हतां पुनः ।
रत्नगाङ्गेयमाणिक्य-रचिता गृहमेधिना ॥३॥

एकस्याऽपि विम्बस्या-लङ्कारश्रीर्विनिर्मिता ।
त्रैलोक्यकमलाभूपा-कारित्वं कुरुते नृणाम् ॥४॥

यः कारयेत्तीर्थकृतः प्रतिष्ठां, प्राप्स्यत्यसौ तीर्थकृतः प्रतिष्ठाम् ।
यदुप्यते तद्विधमेव बीज-मवाप्यते तत्तदवस्थमेव ॥ ५ ॥

मेरोर्गुरुर्गिरिर्नाऽन्यः, कल्पद्रोर्न परो द्रुमः ।
न धर्मो जिनबिम्बानां, निर्मापणादपरो गुरुः ॥ ६ ॥

अङ्गुष्ठमानमपि यः प्रकरोति बिम्बं,
वीरावसानवृषभादिजिनेश्वराणाम् ।
स्वर्गे प्रधानविपुलर्द्धिसुखानि भुक्त्वा,
पश्चादनुत्तरपदं समुपैति धीरः ॥ ७ ॥

पांच प्रकारना चैत्योना नाम

भत्ती मंगलचेइअ, निस्सकड अनिस्सचेइए वावि ।
सासयचेइय पंचम-मुवइट्ठं जिणवरिंदेहिं ॥ ८ ॥

श्रीजिनबिंब करणफल

न यान्ति दास्यं न दरिद्रभावं,
न प्रेष्यतां नैव च हीनभावम् ।
न चापि वैकल्यमिहेन्द्रियाणां,
ये कारयन्तीह जिनस्य बिम्बम् ॥ ९ ॥

अङ्गुष्ठमात्राऽपि जिनेन्द्रमूर्त्तिः,
कारापिताऽनन्तशुभावहेह (हा हि) ।
चिन्तामणिः किं न किलाल्पकोऽपि,
सञ्चिन्तितं यच्छति वस्तुजातम् ॥ १० ॥

दालिद्दं दोहग्गं, कुजाइकुसरीरकुगइकुमईओ ।
अवमाण-रोग-सोगा, न हुन्ति जिणबिंबकारिणं ॥ ११ ॥

राग-द्वेष-मोहजितां, प्रतिमां श्रीमदर्हताम् ।
यः कारयेत्तस्य हि स्या-द्धर्मः स्वर्गापवर्गदः ॥ १२ ॥

श्रीजिनबिंबकरणइतिहास तथा विधान

नमेस्तीर्थकृतस्तीर्थे, वर्षे द्विकचतुष्टये ।
आषाढश्रावको गौडो-ऽकारयत् प्रतिमात्रयम् ॥ १३ ॥

श्रीविक्रमादित्यनृपस्य काला-दष्टोत्तरे वर्षशते व्यतीते ।
शत्रुञ्जये शैलशीलामयस्य, कारापिता जावडिना प्रतिष्ठा ॥१४॥

नववाससयेहिं नवु-त्तरेहिं, रयणेण रेवयगिरिम्मि ।
संठवियं मणिबिंबं, कञ्चणभवणाओ नेऊणं ॥ १५ ॥

उच्चैश्चैत्यानि जैनानि, ग्रामाकरपुरादिषु ।
कोटिशः कारयामास, स चक्री परमार्हतः ॥ १६ ॥
ग्रामाकरपुरद्रोण-मुखादिषु स उच्चकैः ।
कोटिशोऽकारयच्चैत्यान्नद्रीनिव नवोत्थितान् ॥ १७ ॥

शाश्वती प्रतिमाओना प्रमाणनी साक्षी

उस्सेहमंगुलेणं, अहउड्ढमसेससत्तरयणीओ ।
तिरिलोए पंचधणुसय-सासयपडिमा पणिवयामि ॥ १८ ॥
ज्योतिष्कगतचैत्यानां, न मानमुपलभ्यते ।
प्रायः क्वाप्यागमे तस्मादस्माभिरपि नोदितम् ॥ १९ ॥
स्वाम्यप्याख्यत्समुद्दिश्य, समवसरणं निजम् ।
सर्वानर्हदतिशयान्, जिनार्चां स्थापनामपि ॥ २० ॥
जे ते देवेहिं कया, तिदिसिं पडिरूवगा जिणवरस्स ।
तेसिं पि तप्पभावा, तयाणुरूपं हवइ रूवं ॥ २१ ॥
"पुव्वधरकालविहिआ, पडिमाइ (उ) संति केसु वि पुरेसु ॥"

श्रीजिन प्रतिष्ठानो प्रभाव

अवहणइ रोगमारिं, दुब्भिक्खं हणइ कुणइ सुहभावे ।
भावेण किरमाणा, सुपइट्ठा सयललोयस्स ॥ २२ ॥
जिणबिंबपइट्ठासु, सुहकज्जेसु लग्गइ जं च ।
तं चिय दव्वं सहलं, दुग्गइजणणं हवइ सेसं ॥ २३ ॥
एवं नाऊण सया, जिणवरबिंबस्स कुणह सुपइट्ठं ।
पावेह जेण जरमरण-वज्जियं सासयं ठाणं ॥ २४ ॥

यत्त्वयोपार्जितं वित्तं, यशोवीर ! प्रतिष्ठया ।
तल्लक्षगुणितां नीतं, यशो वीरप्रतिष्ठया ॥ २५ ॥

सत्कीर्तिवल्लीघनमूलकन्दं, सद्धर्मकल्पद्रुवनालम्बम् ।
निर्वाणसौधादिमपीठबन्धं, जिनेन्द्रचैत्यं सुकृती करोति ॥२६॥

निष्पन्नस्यैवं खलु, जिनबिम्बस्योदिता प्रतिष्ठा तु ।
दशदिवसाभ्यन्तरतः, सा चवलं स्यातिमङ्कवति ॥ २७ ॥

आचार्यैः पाठकैश्च, साधुभिः ज्ञानसत्क्रियैः ।
जैनविप्रैः कुलश्रेष्ठैः, प्रतिष्ठा क्रियतेऽर्हतः ॥ २८ ॥

प्रतिष्ठाप्या जिनेन्द्राणां, प्रतिमा निर्मिता नवाः ।
विधिना सूरिमन्त्रेण, गुरुणा ब्रह्मचारिणा ॥ २९ ॥

जिनबिम्बनी स्थापना अंगे समजवा योग्य

वरिससयाओ उड्ढं, जं बिंबं उत्तमेहि संठवियं ।
वियलंगु विय पूइज्जइ, तं बिंबं निष्फ(क)लं न जओ ॥ ३० ॥

एकादशाङ्गुलेभ्योऽभ्यधिकप्रमाणा जिनमूर्तिः प्रासादे
पूजनीया न तु स्वगृहे ॥

गिहपडिमाणं पुरओ, बलिवित्थारो न चेव कायव्वो ।
(निचं) निच्चं रियसंझ अच्चणं भावओ कुज्जा ॥ ३१ ॥

जिनमंदिरमां पबासण बनाववानुं विधान

देवतावसरं कुर्यात्, सार्द्धहस्तोर्ध्वभूमिके ।
नीचैर्भूमिस्थितं कुर्याद्, देवतावसरं यदि ॥
नीचैर्नीचैस्ततो वंश संतत्यापि सदा भवेत् ॥३२॥

अष्टापद तीर्थना मंदिरनुं प्रमाण

क्रोशद्वयपृथु क्रोश-त्रयोच्चं योजनायतम् ।
चतुर्मुखं रत्नमयं, तत्र चैत्यं ददर्श सः ॥ ३३ ॥

नंदीश्वर द्वीपना चैत्य अने प्रतिमानुं वर्णन

चत्वारोऽञ्जनशैलेषु, दधिमुखेषु षोडशः ।
द्वात्रिंशच्च रतिकरा-भिधानेषु जिनालयाः ॥ ३४ ॥

दीर्घेषु योजनशतं, तदर्धं पृथुलेषु च ।
चैत्येषु तेषु तुङ्गेषु, योजनानि द्विसप्ततिम् ॥ ३५ ॥

चतुर्विंशं शतं सन्ति, प्रतिमा शाश्वतार्हताम् ।
सर्वरत्नमया पञ्च-धनुःशतसमुच्छ्रयाः ॥ ३६ ॥

## २८ जिर्णोद्धारसूक्तानि

नवीनजिनगेहस्य, विधाने यत्फलं भवेत् ।
तस्मादष्टगुणं पुण्यं, जिर्णोद्धारेण जायते ॥ १ ॥

रायाअमच्चसिट्ठी-कोडुंबीए वि देसगं काउं ।
जिण्णे पुव्वाययणे, जिणकप्पी वा वि कारवइ ॥ २ ॥

जिणभवणाई जे उद्ध-रंति भत्तिए सडिअपडिआइं ।
ते उद्धरंति अप्पं, भीमाओ भवसमुद्दाओ ॥ ३ ॥

जीर्णोद्धारः कृतो येन, विभवेन सुचारुणा ।
जिनाज्ञा पालिता तेन, क्लेशकूपारपारदा ॥ ४ ॥

स्थाने तेन नियोजितं निजधनं प्रोल्लासितं शासनं,
बिम्बे चन्द्रमसः स्वनामलिखितं द्वारं हृतं दुर्गतेः ।
धन्यं जन्म कृतं समग्रसुकृतं स्वीयं कृतार्थीकृतं,
जीर्णं येन समुद्धृतं जिनगृहं निःशेषपापापहम् ॥ ५ ॥
प्रायेण कीर्तिप्रिय एव लोकः स्वकीर्तनं कारयते नवीनम् ।
विशीर्णचैत्योद्धरणात्तु शुद्धयन्, वरेण्यपुण्यस्पृह एव चिन्त्यः ॥६॥

## २९ जिनपूजासूक्तानि

विग्घोवसामिगेगा, अब्भुदयपसाहणी भवे बीआ ।
निव्वुइकरणी तइया, फलया उ जहत्थनामेहिं ॥ १ ॥
वस्त्रैर्वस्त्रविभूतयः शुचितराऽलङ्कारतोऽलङ्कृतिः,
पुष्पैः पूज्यपदं सुगन्धितनुता गन्धैर्जिने पूजिते ।
दीपैर्ज्ञानमनावृतं निरुपमा भोगाश्च रत्नादिभिः,
सन्त्येतानि किमद्भुतं शिवपदप्राप्तिस्ततो देहिनाम् ॥ २ ॥
अप्रसन्नात्कथं प्राप्यं, फलमेतदसंगतम् ।
चिन्तामण्यादयः किं न, फलन्त्यपि विचेतनाः ॥ ३ ॥
एकवस्त्रो न भुञ्जीत, न कुर्याद्देवताऽर्चनम् ।
न कञ्चुकं विना कार्या, देवार्चा स्त्रीजनेन तु ॥ ४ ॥
कायकंडुयणं वज्जे, तहा खेलविगिंचणं ।
थुइथुत्तभणणं चेव, पूयंतो जगबन्धुणो ॥ ५ ॥

श्रीजिनेश्वर देवनी पूजा इच्छित फळ आपनारी छे.

उवसमइ दुरिअवग्गं, हरइ दुहं कुणइ सयलसुक्खाइं ।
चिंताईयं वि फलं, साहइ पूआ जिणिंदाणं ॥ ६ ॥

श्रीतीर्थंकर देवने वंदननुं फल

तित्थयरवन्दणत्थं, चलिओ भावेण पावए सग्गं ।
जह दद्दुरदेवेणं, पत्तं वेमाणियसुरत्तं ॥ ७ ॥

श्रीजिनेश्वर देवनी भक्तिनुं महात्म्य

इक्कावि सा समत्था जिणभत्ती दुग्गइं निवारेउं ।
दुल्लहाइं लहावेउं, आसिद्धिपरंपरसुहाइं ॥ ८ ॥

चिरसंचियपावपणा–सणीइ भवसयसहस्समहणीए ।
चउव्वीसजिणविणिग्गय–कहाइ वोलंतु मे दिअहा ॥ ९ ॥

द्रव्य अने भाव पूजा

दुविहा जिणिंदपूआ, दव्वे भावे अ इत्थ बोधव्वा ।
दव्वेहिं जिणपूआ, जिणआणापालणं भावे ॥ १० ॥

क्रोधादिकनो त्याग करी एकचित्ते पूजा करवी

क्रोध–मानविनिर्मुक्तो, राग–द्वेषविवर्जितः ।
एकाग्रमानसो भूत्वा, जिनेन्द्रमभिपूजयेत् ॥ ११ ॥

पांच प्रकारनी भक्ति

पुष्पाद्यर्चा तदाज्ञा च तद्रव्यपरिरक्षणम् ।
उत्सवास्तीर्थयात्रा च, भक्तिः पञ्चविधा जिने ॥ १२ ॥

सात शुद्धि

१ २ ३ ४ ५ ६ ७
मनोवाक्कायवस्त्रोर्वीपूजोपकरणस्थितेः ।
शुद्धिः सप्तविधा कार्या, श्रीअर्हत्पूजनक्षणे ॥ १३ ॥

पूजा वखते ध्यान राखवा योग्य

पद्मासनं समासीनो, नासाग्रन्यस्तलोचनः ।
मौनी वस्त्रावृतास्योयं, पूजां कुर्याज्जिनेशितुः ॥ १४ ॥

आश्रयन् दक्षिणां शाखां, पुमान्योषित्त्वदक्षिणाम् ।
यत्नपूर्वं प्रविश्यान्त-र्दक्षिणेनाङ्घ्रिणा ततः ॥ १५ ॥

सुगन्धिमधुरैर्द्रव्यैः, प्राङ्मुखो वाप्युदङ्मुखः ।
वामनाड्यां प्रवृत्तायां, मौनवान् देवमर्चयेत् ॥ १६ ॥

चैत्यायतनप्रस्थापनानि, कृत्वा च शक्तितः प्रयतः ।
पूजाश्च गन्ध-माल्या-धिवास-धूप-प्रदीपाद्याः ॥१७॥

जिनालयमां पण तेलना दीवा थता

संजाया ते सड्ढा, तत्तो नायज्जिणेण तेल्लेण ।
दीवयवम्मि तीए, दिन्नो जिणमंदिरे दीवो ॥१८॥

अग्र पूजा

गंधव्व-नट्टवाइत्त, लवणजलारत्तियाइ दीवाइ ।
जं किच्चं तं सव्वं, विअरइ अग्गपूआए ॥१९॥

धूपादि पूजानुं फळ

धूपं दहति पापानि, दीपो मृत्युविनाशकः ।
नैवेद्यैर्विपुलं राज्यं, प्रदक्षिणा शिवप्रदा ॥२०॥

साधुओ पण जैनशासननी प्रभावना माटे पूजा करावे

पूजा प्रभावनाहेतुः, कार्यते संयतैरपि ।
दिव्यैः पुष्पैः सुरानीतैः, श्रीवज्रस्वामिना यथा ॥२१॥

श्रीजिन पूजानुं फळ

नौरेषा भववारिधौ शिवपदप्रासादनिःश्रेणिका,
मार्गः स्वर्गपुरस्य दुर्गतिपुरद्वारप्रवेशार्गला ।
कर्मग्रन्थशिलोच्चयस्य दलने दम्भोलिधारासमा,
कल्याणैकनिकेतनं निगदिता(मूर्तिः)पूजा जिनानां परा ॥२२॥

यैस्त्वं नाथ ! न वन्दितो न च जिनः सम्पूजितः पूजनैः,
सद्भक्त्या न च संस्तुतस्तव गुणग्रामोऽभिरामः सदा ।
न ध्यातः परमेश्वरः शिवगतः सद्ध्यानयोगैर्न हि,
तैर्नूनं विफलीकृतो निजभवोऽरण्ये यथा मालती ॥ २३ ॥

जिनेन्द्रपूजनाध्यान–मपि स्वर्गापवर्गदम् ।
स्थविराया इव भवे–द्भव्यानां भावयोगतः ॥ २४ ॥

जिनार्चाकारकाणां न, कुजन्म कुगतिर्न च ।
न दारिद्र्यं न दौर्भाग्यं, न चान्यदपि कुत्सितम् ॥ २५ ॥

दुःखाग्नेरम्बुधारा सकलसुखकरी रूपसौभाग्यभर्त्री,
पूजा तीर्थेश्वराणां भवतु भवभृतां सर्वकल्याणकर्त्री ॥ २६ ॥

असर्वभावेन यदृच्छया वा, परानुवृत्त्या विचिकित्सया वा ।
ये त्वां नमस्यन्ति जिनेन्द्रचन्द्र, तेऽप्यामरीं सम्पदमाप्नुवन्ति ॥

विपुलमञ्जुलमङ्गलकारणं, दुरितसंततितापनिवारणम् ।
जनितविश्वमनोरथपूरणं, कुरुत भव्यजना जिनपूजनम् ॥२८॥

आयुष्कं यदि सागरोपममितं व्याधिव्यथावर्जितं,
पाण्डित्यञ्च समस्तवस्तुविषयं प्रावीण्यलब्धास्पदम् ।
जिह्वा कोटिमिता च पाटवयुता स्यान्मे धरित्रीतले,
नो शक्नोमि तथापि वर्णितुमलं तीर्थंकरपूजाफलम् ॥ २९ ॥

दौस्थ्यदुर्गतिदुःखादि, नार्हदर्चाकृतां भवेत् ।
क्षमश्च जायते स्वर्गा-पवर्गसुखदायकः ॥ ३० ॥

ये तवाष्टविधां पूजां, कुर्वन्ति परमेश्वर ! ।
अष्टापि सिद्धयस्तेषां, करस्था अणिमादयः ॥ ३१ ॥

द्रव्य पूजा करतां भावपूजा अधिक छे

जिनार्चा हि द्रव्यपूजा, भावपूजा तु संयमः ।
द्रव्यपूजाकृतो भाव-पूजाकृच्चाधिको मतः ॥ ३२ ॥

पूजा करतां केवां वस्त्र पहेरवां जोईए

न कुर्यात्सन्धितं वस्त्रं, देवकर्मणि भूमिप ! ।
न दग्धं न तु वै च्छिन्नं, परस्य तु न धारयेत् ॥ ३३ ॥

कटिस्पृष्टं तु यद्वस्त्रं, पुरीषं येन कारितम् ।
मूत्रं मैथुनं चापि, तद्वस्त्रं परिवर्जयेत् ॥ ३४ ॥

खण्डितं सन्धितं छिन्नं, रक्तं रौद्रैः कुवर्णकैः ।
दानं पूजा तपो होम-सन्ध्यादिनिष्फलं भवेत् ॥ ३५ ॥

भवति हि जिनपूजाजनितभावविशुद्धिप्रकर्षेण चारित्रमोहनीयक्षयोपशमसद्भावात्कालेनाऽसदारम्भेभ्यो निवृत्तिः, प्रयजना एव (जिनपूजा), तया जिनपूजा-प्रवृत्तिकाले वाऽसदारम्भाणामसम्भवाच्छुभभाव संभवाच्च तन्निवृत्तिफलासौ भवतीति उच्यते ॥

प्रभुस्नात्रजलालीढा, वन्दनीया मृदप्यभूत् ।
गुरूणां किल संसर्गा-द्गौरवं स्याल्लघोरपि ॥ ३६ ॥

## ३० सामायिकसूक्तानि

तिण्णि सहस्सपुहुत्तं, सयपुहुत्तं च होइ विरईए ।
एगभवे आगरिसा, एवइआ हुंति नायव्वा ॥१॥

तिन्नि असंखसहस्सा, सहसपुहुत्तं च होइ विरईए ।
नाणाभवे आगरिसा, एवइया हुन्ति नायव्वा ॥२॥

सामाइअपोसहसंठिअस्स, जीवस्स जाइ जो कालो ।
सो सफलो बोधव्वो, सेसो संसारफलहेऊ ॥३॥

त्यक्तार्त्तरौद्रध्यानस्य, त्यक्तसावद्यकर्मणः ।
मुहूर्त्तं समता या तं, विदुः सामायिकव्रतम् ॥४॥

जस्स सामाणिओ अप्पा, संजमे णियमे तवे ।
तस्स सामाइयं होइ, इइ केवलिभासिअं ॥५॥

जो समो सव्वभूएसु, तसेसु थावरेसु य ।
तस्स सामाइअं होइ, इइ केवलिभासिअं ॥६॥

जन्मलक्षत्रतैरुग्रै-र्यन्नैव क्षीयते क्वचित् ।
मनः शमरसे लग्नं, तत्कर्म क्षपयेत्क्षणात् ॥७॥

प्रणिहन्ति क्षणार्द्धेन, शाम्यमालम्ब्य कर्म यत् ।
तन्न हन्यान्नरस्तीव्र-तपसा जन्मकोटिभिः ॥८॥

सामायिअं तु काउं, गिहकज्जं जो वि चिन्तए सड्ढो ।
अट्टरुद्दोवगओ, निरत्थं सामाइअं तस्स ॥९॥

दिवसे दिवसे लक्खं, देइ सुवण्णस्स खंडियं एगो ।
एगो पुण सामाइअं, करेइ न पहुप्पए तस्स ॥१०॥

निन्दपसंसासु समो, समो य माणावमाणकारीसु ।
समसयणपरियणमणो, सामाइअसंगओ जीवो ॥११॥

सामायिक माहात्म्य

सामायिकं च मोक्षाङ्गं, परं सर्वज्ञभाषितम् ।
वासीचन्दनकल्पाना-मुक्तमेतन्महात्मनाम् ॥१२॥

कर्म जीवं च संश्लिष्टं, परिज्ञायाऽऽत्मनिश्चयः ।
विभिन्नीकुरुते साधुः, सामायिकशलाकया ॥१३॥

रागादिध्वान्तविध्वंसे, कृते सामायिकांशुना ।
स्वस्मिन् स्वरूपं पश्यन्ति, योगिनः परमात्मनाम् ॥१४॥

अयं प्रभावः परमः, समत्वस्य प्रतीयताम् ।
यत् पापिनः क्षणेनापि, पदमियर्ति शाश्वतम् ॥१५॥

संसाराम्भोधिबेडा शिवपुरपदवी दुर्गदारिद्र्यभूभृद्-
भङ्गे दम्भोलिभूता सुरनरविभवप्राप्तिकल्पद्रुकल्पा ।

सामाइयं कुणंतो, समभावं सावओ अ घडिअदुगं ।
आउं सुरेसु बंधइ, इत्तियमित्ताइ पलियाइं ॥१६॥

तिव्वतवं तवमाणो, जं नवि निट्ठवइ जम्मकोडीहिं ।
तं समभावभाविचित्तो, खवेइ कम्मं खणद्धेण ॥१७॥

जे केवि गया मोक्खं, जे वि य गच्छंति जे गमिस्संति ।
ते सव्वे सामाइय-माहप्पेण मुणेयव्वा ॥१८॥

किं तिव्वेण तवेणं, किं च जवेणं त्रिं चरित्तेण ।
समयाइ विण मुक्खो, न हु हुओ कहवि न हु होइ ॥१९॥

यदा सव्वसामाइयं काउमसत्तो,
तदा देससामाइयंपि ताव बहुसो कुज्जा ।
तथा जत्थ वा विसमइ अच्छइ वा,
निव्वावारो सव्वत्थ सामाइयं करेइ ॥

जीवो पमायबहुलो, बहुसोवि अबहुविहेसु अत्थेसु ।
एएण कारणेण, बहुसो सामाइयं कुज्जा ॥२०॥

"आया सामाइए, आया सामाइअस्स अट्ठे ॥"
"जाहे खणिओ ताहे सामाइअं करेइ ॥"

अनिरिक्खियापमज्जिय थंडिले ठाममाइ सेवंतो ।
हिंसाऽभावेवि न सो कडसामाइओ पमायाओ ॥२१॥

## ३१ प्रतिक्रमणसूक्तानि

स्वस्थानाद्यत् परस्थानं, प्रमादस्य वशाद् गतः ।
तत्रैव क्रमणं भूयः, प्रतिक्रमणमुच्यते ॥१॥

क्षायोपशमिकाद्भावा-दौदयिकवशं गतः ।
तत्राऽपि च स एवार्थः, प्रतिकूलगमात्स्मृतः ॥२॥

पडिक्कमणं पडिअरणं, पडिहरणा वारणा नियत्ती य ।
निन्दा गरिहा सोही, पडिक्कमणं अट्ठहा होइ ॥३॥

जह विसं कुट्ठगयं, मंतमूलविसारया ।
विज्जा हणंति मंतेहिं, तो तं हवइ निव्विसं ॥४॥

एवं अट्ठविहं कम्मं, रागदोससमज्जिअं ।
आलोअंतो अ निंदंतो, खिप्पं हणइ सुसावओ ॥५॥

कयपावो वि मणुस्सो, आलोइअनिंदिअ गुरुसगासे ।
होइ अइरेगलहुओ, ओहरियभरुव्व भारवहो ॥६॥

पंचविहायारहेउं, इह साहुसावगो वा वि ।
पडिक्कमणं सह गुरुणा, गुरुविरहे कुणइ इक्को वि ॥७॥

जं किंचि अणुट्ठाणं, आवस्सयमाइयं चरणहेऊ ।
तक्करणं गुरुमूले, गुरुविरहे ठावणापुरओ ॥८॥

भवनिष्क्रमणं भाव-द्विपदाक्रमणं च सुकृतसंक्रमणम् ।
मुक्तेः क्रमणं कुर्याद्, द्विः प्रतिदिवसं प्रतिक्रमणम् ॥ ९ ॥

पडिसिद्धाणं करणे, किच्चाणमकरणे अ पडिक्कमणं ।
असद्दहणे अ तहा, विवरीअपरूवणाए अ ॥ १० ॥

आवश्यकनी अवश्य कर्तव्यता

समणेण सावगेण य, अवस्सकायव्वं हवइ जम्हा ।
अंतो अहोनिसस्स य, तम्हा आवस्सयं नाम ॥ ११ ॥

"प्रतिक्रमणमिथ्यादुष्कृतनिन्दादय एकार्थाः ॥"

इत्तुच्चिय पडिकमणं, पच्छायावाइ भावओ सुद्धम् ।
भणियं जिणप्पवयणे, इहरा तं दव्वओ दिट्ठम् ॥ १२ ॥

आरंभस्स निवारणं सुहमणोवित्तीइ जं कारणं,
अक्खारीण निरोहणं दिणनिसापच्छित्तसंसोहणं ।
कम्माणं मुसुमूरणं तवसिरीभंडारसंपूरणं,
तं धन्ना भवनासणं अणुदिणं सेवंति आवस्सयं ॥ १३ ॥

काउस्सग्गनी समजण

प्रलम्बितभुजद्वन्द्व–मूर्ध्वस्थस्याऽऽसितस्य वा ।
स्थानं कायाऽनपेक्षं यत्, कायोत्सर्गः स कीर्तितः ॥ १४ ॥

वासीचंदणकप्पो, जो मरणे जीविए य समसण्णो ।
देहे य अपडिबद्धो, काउसग्गो हवइ तस्स ॥ १५ ॥

## ३२ ज्ञानक्रिययोः सूक्तानि

विधिकथनं विधिरागो, विधिमार्गे स्थापनं विधीच्छूनाम् ।
अविधिनिषेधश्चेति, प्रवचनभक्तिः प्रसिद्धा नः ॥ १ ॥

अध्वस्तबीजोऽपि पुमान् विशक्ते,
स्त्रिया विहीनो न हि वंशवृद्धिम् ।
विना पुमांसं न तु साप्यवन्ध्या,
योगे द्वयोः स्यात्पुनरिष्टसिद्धिः ॥ २ ॥

एकस्मिन् विपिने प्रदीप्तदहने दग्धो दवार्चिष्मता,
चक्षुष्मानपि पङ्गुलो गतिरतोऽप्यन्धश्च भिन्नाशयौ ।
अन्धो मूर्ध्नि दधाति चेदचरणं तत्तत्प्रणीताध्वना,
धावन्नेष निरेति दीप्तदवतः पङ्गुश्च तद्योगतः ॥ ३ ॥

न केवलं तीक्ष्णमपीह शस्त्रं, करोति भङ्गं द्विषतां कदाचित् ।
न तेन हीनः प्रबलोऽपि योधः, पुनर्द्वियोगे रणसिद्धिरस्ति ॥४॥

जहा खरो चंदणभारवाही, भारस्स भागी न हु चंदणस्स ।
एवं खु नाणी चरणेण हीणो, नाणस्स भागी न हु सुग्गईए ॥

विहिसारं चिअ सेवइ, सद्धालू सत्तिमं अणुट्ठाणं ।
दव्वाइदोसनिहओ वि, पक्खवायं वहइ तम्मि ॥ ६ ॥

धन्नाण विहीजोगो, विहीपक्खाराहगा सया धन्ना ।
विहिबहुमाणा धन्ना, विहिपक्खअदूसगा धन्ना ॥ ७ ॥

आसन्नसिद्धिआणं, विहिपरिणामो होइ उ सयकालं ।
विहिचाओ अविहिभत्ती, अभव्वजिअदूरभव्वाणं ॥ ८ ॥

देहे द्रव्ये कुटुम्बे च, सर्वसंसारिणां रतिः ।
जिने जिनमते संघे, पुनर्मोक्षाभिकाङ्क्षिणाम् ॥ ९ ॥

तित्थयरत्तं संमत्तं, खाइअं सत्तमीइ तइयाए ।
आउं वंदणएणं, बद्धं च दसारसीहेण ॥ १० ॥

क्रियैव फलदा पुंसां, न ज्ञानं फलदं मतम् ।
यतः स्त्रीभक्ष्यभोगज्ञो, न ज्ञानात्सुखितो भवेत् ॥ ११ ॥

अञ्जनस्य क्षयं दृष्ट्वा, वल्मीकस्य च वर्धनम् ।
अवन्ध्यं दिवसं कुर्याद्, दानाध्ययनकर्मसु ॥ १२ ॥

गृहीत इव केशेषु, मृत्युना धर्ममाचरेत् ।
अजरामरवत्प्राज्ञो, विद्यामर्थं च चिन्तयेत् ॥ १३ ॥

सम्यक्त्वधारी पथि पादचारी, सचित्तवारी वरशीलधारी ।
भूस्वापकारी सुकृती सदैका–हारी विशुद्धां विदधाति यात्राम् ॥

विषं गरोऽननुष्ठानं, तद्धेतुरमृतं परम् ।
गुरुसेवाद्यनुष्ठानमिति पञ्चविधं जगुः ॥१५॥

आहारोपधिपूजर्द्धि–प्रभृत्याशंसया कृतम् ।
शीघ्रं सच्चित्तहन्तृत्वाद्, विषानुष्ठानमुच्यते ॥१६॥

दिव्यभोगाभिलाषेण, कालान्तरपरिक्षयात् ।
स्वादृष्टफलसंपूर्ते–र्गरानुष्ठानमुच्यते ॥१७॥

प्रणिधानाद्यभावेन, कर्माऽनध्यवसायिनः ।
संमूर्च्छिमप्रवृत्त्याभ–मननुष्ठानमुच्यते ॥१८॥

एतद्रागादिदं हेतुः, श्रेष्ठो योगविदो विदुः ।
सदनुष्ठान भावस्य, शुभभावांशयोगतः ॥१९॥

धर्मयौवनकालोऽयं, भवबालदशाऽपरा ।
अत्र स्यात् सत्क्रियारागो–ऽन्यत्र चाऽसत्क्रियादरः ॥२०॥
जैनीमाज्ञां पुरस्कृत्य, प्रवृत्तं चित्तशुद्धितः ।
संवेगगर्भमत्यन्त–ममृतं तद्विदो विदुः ॥२१॥
पासत्थाई वंदमाणस्स, नेव किंत्ति न निज्जरा होइ ।
कायकिलेसो एमेव, कुणई तह कम्मबन्धं च ॥२२॥
आउत्तया जस्स य नत्थि काई । इरियाइ भासाइ तहेसणाए ।
आयाणनिक्खेव दुगंछणाए, न वीरजायं अणुजाइ मग्गं ॥२३॥
एकाङ्गः शिरसो नामे, द्व्यङ्गश्च करयोर्द्वयोः ।
त्रयाणां नमने त्र्यङ्गः, करयोः शिरसस्तथा ॥२४॥
चतुर्णां करयोर्जान्वो–र्नमने चतुरङ्गकः ।
शिरसः करयोर्जान्वोः, पञ्चाङ्गः पञ्चमो मतः ॥२५॥

"जो अकिरियावाई सो भविओ अभविओ वा नियमा कण्हपक्खिओ । किरियावाई नियमा भविओ, नियमा सुक्कपक्खिओ । अंतोपुग्गलपरिअट्टस्स नियमा सिज्झइ सम्मद्दिट्ठी वा मिच्छादिट्ठी वा हुज्जा" ॥२६॥

हयं नाणं कियाहीणं, हया अन्नाणओ किया ।
पासंतो पंगुलो दड्ढो, धावमाणो अ अंधओ ॥२७॥

## ३३ वीतरागस्य यथार्थवादः

अपक्षपातेन परीक्षमाणा–द्वयं द्वयस्याऽप्रतिमं प्रतीमः ।
यथास्थितार्थप्रथनं तवैत–दस्थाननिर्बन्धरसं परेषाम् ॥१॥

क्षिप्येत वाऽन्यैः सदृशीक्रियेत वा, तवाङ्घ्रिपीठे लुठनं सुरेशितुः
इदं यथावस्थितवस्तुदेशनं, परैः कथङ्कारमपाकरिष्यते ॥३॥
परःसहस्राः शरदः तपांसि, युगान्तरं योगमुपासतां च ।
तथाऽपि ते मार्गमनापतन्तो, न मोक्ष्यमाणा अपि यान्ति मोक्षम्॥
इमां समक्षं प्रतिपक्षसाक्षिणा-मुदारघोषामवघोषणां ब्रुवे ।
न वीतरागात् परमस्ति दैवतं, न चाप्यनेकान्तमृते नयस्थितिः॥
त्वच्छासनस्य साम्यं ये, मन्यन्ते शासनान्तरैः ।
विषेण तुल्यं पीयूषं, तेषां हन्त हतात्मनाम् ॥ ५ ॥
नेत्रैर्निरीक्ष्य बिलकण्टककीटसर्पान्,
सम्यक्पथा व्रजत तान् परिहृत्य सर्वान् ।
कुज्ञानकुश्रुतिकुमार्गकुदृष्टिदोषान्,
सम्यग् विचारयत कोऽत्र परापवादः ॥ ६ ॥
हिंसाद्यसत्कर्मपथोपदेशा-दसर्वविन्मूलतया प्रवृत्तेः ।
नृशंसदुर्बुद्धिपरिग्रहाच्च, ब्रूमस्त्वदन्यागममप्रमाणम् ॥ ७ ॥
हितोपदेशात् सकलज्ञक्लृप्तेः, मुमुक्षुसत्साधुपरिग्रहाच्च ।
पूर्वापरार्थेऽप्यविरोधसिद्धे-स्त्वदागमा एव सतां प्रमाणत् ॥८॥

सर्वज्ञनी वाणी क्यांय पण हणाय नहीं

" स्याद्वादवादिनी वाणी, न क्वचित्प्रतिहन्यते । "

मतिनीमंदताथी वीतरागनुं कोई वचन न समजाय तो पण
ते असत्य छे तेम न विचारवुं

क्वापि मतिदौर्बल्येन तद्विधाचार्यविरहतो वापि ।
ज्ञेयगहनत्वेन च, ज्ञानावरणोदयेन च ॥९॥

हेतूदाहरणासम्भवे च सति सुष्ठु यन्न बुद्धयेत ।
सर्वज्ञमतमवितथं, तथापि तच्चिन्तयेन्मतिमान् ॥१०॥

अनुपकृतपरानुग्रह–परायणा यज्जिना युगप्रवराः ।
जितराग–द्वेष–मोहा–श्च नान्यथावादिनः तेन ॥ ११ ॥

सूत्रनो एक अक्षर पण न रुचे ते मिथ्यादृष्टि

सूत्रोक्तस्यैकस्या–प्यरोचनादक्षरस्य भवति नरः ।
मिथ्यादृष्टिः सूत्रं हि, नः प्रमाणं जिनाभिहितम् ॥ १२ ॥

एकस्मिन्नप्यर्थे, संदिग्धे, प्रत्ययोऽर्हति हि नष्टः ।
मिथ्या च दर्शनं तत्–स चादिहेतुर्भवगतीनाम् ॥ १३ ॥

वीतरागनुं वचन सत्य ज छे

वीतरागा हि सर्वज्ञा, मिथ्या न ब्रूवते क्वचित् ।
यस्मात्तस्माद्वचस्तेषां, तथ्यं भूतार्थदर्शनम् ॥१४॥

उदेति भानुर्यदि पश्चिमायां, जहाति सीमामपि सागरोऽत्र ।
चलत्यथो मेरुगिरिः कदाचि–दर्हद्वचः स्यान्न तथाप्यसत्यम् ।१५।

संसारमां वीतरागना वचन सिवाय कोई शरण नथी

पयालं अवि उड्ढमुहं सग्गं होज्जा अहोमुहं ।
न उण केवलिपन्नत्तं, वयणं अन्नहा भवे ॥१६॥

जन्मजरामरणभयै–रभिद्रुते व्याधिवेदनाग्रस्ते ।
जिनवरवचनादन्यत्र, नास्ति शरणं क्वचिल्लोके ॥१७॥

“ तमेव सच्चं नीसंकं, जं जिणेहिं पवेइयं । ”

स्याद्वादसिद्धिनो नमुनो

गुडो हि कफहेतुः स्यान्नागरं पित्तकारणम् ।
द्वयात्मनि न दोषोऽस्ति, गुडनागरभेषजे ॥१८॥

## ३४ अनित्यभावसूक्तानि

अकस्मात्संगतो यश्च, यद्यकस्माद्विनश्यति ।
शोकः किं तत्र जन्तूनां, सततं हि गतागतम् ॥१॥

न वियोगे (तु) संतापः, कार्यः किल विवेकिभिः ।
अभावानुभवे भावा, भवे हि क्षणभङ्गिनः ॥२॥

ते जनास्ते प्रभावाश्च, ताश्च प्रज्वलिताः श्रियः ।
हेलया किल कालेन, प्रापिताः स्मृतिशेषताम् ॥३॥

मुहूर्त्तमपि जन्तूनां, कालोऽयं कलिताखिलः ।
सार्थः सुदूरगामीव, नार्थितोऽपि विलम्बते ॥४॥

क्षणार्धमपि कार्येषु, न विलम्बेत पण्डितः ।
न जानीमः कदा कस्मिन्, कृतान्तो निपतिष्यति ॥५॥

अहो नु मोहमुग्धस्य, लोकस्येयं प्रमादिता ।
यद्बालं मृतमालोक्य, वृद्धस्तिष्ठति निर्भयः ॥६॥

आकीटाद्यावदिन्द्रं मरणमसुमतां निश्चितं बान्धवानां,
संबन्धश्चैकवृक्षोषितबहुविहगव्यूहसाङ्गत्यतुल्यः ।
प्रत्यावृत्तिर्मृतस्योपलतलनिहितप्लुष्टबीजप्ररोह--
प्राया प्राप्येत शोकात् तदयमकुशलैः क्लेशमात्मा मुधैव ॥७॥

आपद्गतं हससि किं द्रविणान्धमूढ !,
लक्ष्मीः स्थिरा न भवतीति किमत्र चित्रम् ।
एतान् न पश्यसि घटान् जलयन्त्रचक्रे,
रिक्ता भवन्ति भरिता भरिताश्च रिक्ताः ॥८॥

रात्रिर्गमिष्यति भविष्यति सुप्रभातं,
भास्वानुदेष्यति हसिष्यति पङ्कजं च ।
इत्थं विचिन्तयति कोषगते द्विरेफे,
हा ! हन्त हन्त नलिनीं गज उज्जहार ॥९॥

चेतोहरा युवतयः स्वजनोऽनुकूलः,
सद्बान्धवाः प्रणयगर्भगिरश्च भृत्याः ।
वल्गन्ति दन्तिनिवहास्तरलास्तुरङ्गाः,
संमीलने नयनयोर्न हि किञ्चिदस्ति ॥ १० ॥

गगननगरकल्पं संगमं वल्लभानां,
जलदपटलतुल्यं यौवनं वा धनं वा ।
स्वजनसुतशरीरादीनि विद्युच्चलानि,
क्षणिकमिति समस्तं विद्धि संसारवृत्तं ॥ ११ ॥

अम्भोधीनपि शोषयन्ति चतुरो येऽनन्तवीर्यान्विता,
ये मेरुन् दलयन्ति वज्रकठिनैर्मुष्टिप्रहारैरपि ।
दण्डीकृत्य सुराचलं वसुमतिं छत्राकृतिं कुर्वते,
तावत्तेऽपि जनाः कृतान्तवदने कालेन सर्वे गताः ॥ १२ ॥

कालो न यातो वयमेव याता, भोगा न भुक्ता वयमेव भुक्ताः ।
तृष्णा न जीर्णा वयमेव जीर्णाः, तपो न तप्तं वयमेव तप्ताः ॥

चला विभूतिः क्षणभङ्गि यौवनं,
कृतान्तदन्तान्तर्वर्ति जीवितम् ।
तथाऽप्यवज्ञा परलोकसाधने
ऽहहो ! नृणां विस्मयकारि चेष्टितम् ॥ १४ ॥

आयुर्वारितरङ्गभङ्गुरतरं श्रीस्तूलतुल्यस्थितिः,
तारुण्यं करिकर्णचञ्चलतरं स्वप्नोपमाः सङ्गमाः ।
यच्चान्यद्रमणीमणिप्रभृतिकं वस्त्वस्ति तच्चास्थिरं,
विज्ञायेति विधीयतामयमतो धर्मः सदा शाश्वतः ॥ १५ ॥

यदुपतेः क्व गता मथुरापुरी, रघुपतेः क्व गतोत्तरकोशला ।
इति विचिन्त्य कुरु स्वमनः स्थिरं, जगदिदं न सदित्यवधारय ॥

अवश्यं यान्ति यास्यन्ति, पुत्रस्त्रीधनबान्धवाः ।
शरीराणि तदेतेषां, कृते किं खिद्यते वृथा ॥ १७ ॥

भवं दुःखालयं विद्धि, संगमं स्वप्नसन्निभम् ।
लक्ष्मीं विद्युल्लतालोलां जीवितं बुद्बुदोपमम् ॥ १८ ॥

स्वशरीरशरीरिणावपि, श्रुतसंयोगविपर्ययौ यदा ।
विरहः किमिवाऽनुतापयेद्, वद बाह्यैर्विषयैर्विपश्चिताम् ॥१९॥

यथा काष्ठं च काष्ठं च, समेयातां महोदधौ ।
समेत्य च व्यपेयातां, तद्वद्भूतसमागमः ॥ २० ॥

संयुज्यन्ते वियुज्यन्ते, कर्मणा जीवराशयः ।
वायुना प्रेरिता इमे, पर्णपुञ्जा इव स्फुटम् ॥ २१ ॥

यत्प्रातस्तन्न मध्याह्ने, यत्तत्र निशि तन्नहि ।
विलोक्यतेऽत्र संसारे, तद्रागो विषयेषु कः ? ॥ २२ ॥

जरा जाव न पीडेइ, वाहि जाव न वड्ढइ ।
जाव न इंदियहाणी, ताव धम्मं समायरे ॥ २३ ॥

परिमियमाउ जुव्वण-मसंठियं वाहिवाहियं देहं ।
परिणइविरसा विसया, अणुरज्जसि तेसु किं जीव ! ॥ २४ ॥

सामित्तणधणजुव्वण-रूवबलाउइट्ठसंजोगा ।
अइलोला घणपवणा-हयपायवपक्कपत्तं व्व ॥२५॥

तित्थयरा गणहारी, सुरवइणो चक्किकेसवा रामा ।
संहरिया हयविहिणा, सेसजीयाणं तु का वत्ता ? ॥२६॥

कालदण्डे स्थिते मूर्ध्नि, संसारे क्रियते कथम् ? ।
लक्ष्मीविषयबन्धूनां, प्रत्याशा मोहकारिणी ॥२७॥

स्थिराशा क्रियते तस्यां, कथं लक्ष्म्यां चलैव सा ।
यदुद्योतोऽपि जायेत, व्यामोहस्यैव कारणम् ॥२८॥

अत्थायोत्थाय बोद्धव्यं, किमद्य सुकृतं कृतम् ।
आयुष्यखण्डमादाय, रविरस्तमयं गतः ॥ २९ ॥

श्वः कार्यमद्यकुर्वीत, पूर्वाह्णे चापराह्णिकम् ।
मृत्युर्नैव प्रतीक्षेत, कृतं चास्य न वा कृतम् ॥ ३० ॥

नित्यं निशादिनव्याजा–ज्जीवानां यौवनायुषः ।
त्रुटयन्ति खण्डखण्डानि, न जानाति जडो जनः ॥३१॥

जनायुर्जलमादाय, निशादिनघटीचयैः ।
अर्केन्दुधुर्यौ कालार–घट्टं भ्रमयतः सदा ॥ ३२ ॥

अनित्यानि शरीराणि, विभवो नैव शाश्वतः ।
नित्यं सन्निहितो मृत्युः, कर्तव्यो धर्मसङ्ग्रहः ॥ ३३ ॥

अचिन्तितः समभ्येत्य, महामूल्यानि मूलतः ।
जन्तुजीवितरत्नानि, हरते कालतस्करः ॥ ३४ ॥

वज्रकायशरीराणा–मर्हतां यद्यनित्यता ।
कदलीसारतुल्येषु, का कथा शेषजन्तुषु ॥ ३५ ॥

प्रभाते संस्कृतं सायं, नूनमन्नं विनश्यति ।
तदीयरससम्पुष्टे, काये का नाम नित्यता ? ॥ ३६ ॥

मरणं प्रकृतिः शरीरिणां, विकृतिर्जीवितमुच्यते बुधैः ।
क्षणमप्यवतिष्ठते श्वसन्, यदि जन्तुर्ननु लाभवानसौ ॥३७॥

अनिशं क्षुत्तृषामूत्र–विष्टारोगादिबाधिते ।
इष्टवस्तुवियोगाद्यैः, किं सुखं मानवे भवे ॥ ३८ ॥

न मन्त्रं तन्त्रं भैषज्य–करणानि शरीरिणाम् ।
त्राणाय मरणव्याघ्र–मुखकोटरवासिनाम् ॥ ३९ ॥

यद्यात्मानं विजानीयात्, कृतान्तवशवर्तिनम् ।
कः श्वासमपि गृह्णीयात्, पापकर्मसु का कथा ॥ ४० ॥

# ३५ अशरणभावनासूक्तानि

संसारमावण्णु परस्स अट्ठा, साहारणं जं च करेइ कम्मं ।
कम्मस्स ते तस्स उ वेयकाले, न बंधवा बंधवयं उविंति ॥१॥

धिग् धिग् बलं परिजनं स्वजनं धिगस्तु,
धिग् वैभवं विषयसौख्यमहो धिगेतत् ।
यज्जन्तुरत्रनिजकर्मवशः क्षणेन,
सर्वं विहाय परलोकमयं प्रयाति ॥२॥

रामे प्रव्रजनं बलेर्नियमनं पाण्डोः सुतानां वनं,
वृष्णीनां निधनं नलस्य नृपते राज्यात्परिभ्रंशनम् ।
कारागारनिषेवणं च मरणं संचिन्त्य लङ्केश्वरे,
सर्वं कालवशादवाप्स्यति जनः कः कं परित्रायते ? ॥३॥

मान्धाता स महीपतिः कृतयुगालङ्कारभूतो गतः;
सेतुर्येन महोदधौ विरचितो क्वाऽसौ दशास्यान्तकः ।
अन्ये चाऽपि युधिष्ठिरप्रभृतयो दिवं गता भूपते !,
नैकेनाऽपि समं गता वसुमती मन्ये त्वया यास्यति ॥४॥

आवासं परिमार्ष्टि वायु ऋतवः पुष्पोत्करं तन्वते,
कीनाशो महिषेण वारि वहते ब्रह्मा पुरोधाः पुरः ।
सद्वार्यां च नियन्त्रिता ग्रहततिर्निर्णेजकः पावक-
श्चामुण्डा तलरक्षिका गणपतिः शुक्रीवतीचारकः ॥५॥

दीपाः सर्पशिरोवसूनि सविता सूदः सुतः शक्रजि-
ल्लङ्कापूः परिखाम्बुधिः परिकरोऽस्त्रकूपास्त्रिकूटो गिरिः।
देवा दास्यकृतोऽरिविजयी भ्राता छटादोऽम्बुदः,
पिष्टा यस्य विधिश्च सोऽपि गतवान् दुष्टां दशास्यो दशाम् ॥६॥

पितुर्मातुः स्वसुर्भ्रातु-स्तनयानां च पश्यताम् ।
अत्राणो नीयते जन्तुः, कर्मभिर्यमसद्मनि ॥७॥

शोचन्ति स्वजनानन्तं, नीयमानान् स्वकर्मभिः ।
नेष्यमाणं तु शोचन्ति, नात्मानं मूढबुद्धयः ॥८॥

संसारे दुःखदावाग्नि-ज्वलज्ज्वालाकरालिते ।
वने मृगार्भकस्येव, शरणं नास्ति देहिनाम् ॥९॥

संयोगे च वियोगे च, संभवे मरणेऽथवा ।
सुखदुःखविधौ वाऽस्य, न सखाऽन्योऽस्ति देहिनः ॥१०॥

अनन्तैः पार्थिवैर्भुक्ता, कालेनोर्वी धनानि च ।
मेलितानि परं त्यक्त्वा, गतास्ते स्वकृतैः सह ॥ ११ ॥

पिउमाउभयणीभज्जा-भडाण पच्चक्खमिक्खमाणाणं ।
जीवं हरेइ मच्चू, नत्थि सरणं विणा धम्मं ॥ १२ ॥

## ३६ संसारभावनासूक्तानि

एकेऽद्य प्रातरपरे, पश्चादन्ये पुनः परे ।
सर्वे निःसीम्नि संसारे, यान्ति कः केन शोच्यते ? ॥ १ ॥

दुःखं स्त्रीकुक्षिमध्ये प्रथममिह भवे गर्भवासे नराणां,
बाल्यत्वे चापि दुःखं मललुलितवपुःस्त्रीपयःपानमिश्रम् ।
तारुण्ये चापि दुःखं विरहदहनजं वृद्धभावोऽप्यसारः,
संसारे रे ! मनुष्या ! वदत यदि सुखं स्वल्पमप्यस्ति किञ्चित् ॥

यावद्देहमिदं गदैर्न मृदितं नो वा जराजर्जरं,
यावत्त्वक्षकदम्बकं स्वविषयज्ञानावगाहक्षमम् ।
यावच्चायुरभङ्गुरं निजहिते तावद्बुधैर्यत्यतां,
कासारे स्फुटिते जले प्रचलिते पालिः कथं बध्यते ? ॥३॥

श्रियो विद्युल्लोला कतिपयदिनं यौवनधनं,
सुखं दुःखाघ्रातं वपुरनियतं व्याधिविधुरम् ।
दुरापाः सत्पत्न्यो बहुभिः किमथवा प्रलपितैः,
असारः संसारस्तदिह निपुणं जागृत जनाः ! ॥ ४ ॥

यः पिता स भवेत्पुत्रो, यः पुत्रः स भवेत् पिता ।
या कान्ता सा भवेन्माता, या माता साऽपि सा भवेत् ॥५॥

का तव कान्ता कस्ते पुत्रः, संसारोऽयमतीव विचित्रः ।
कस्य त्वं वा कुत आयात–स्तत्त्वं चिन्तय तदिदं भ्रातः ! ॥६॥

वृद्धस्य मृतभार्यस्य, पुत्राधीनधनस्य च ।
स्नुषावाक्येन दग्धस्य, जीवितान्मरणं वरम् ॥ ७ ॥

अत्र द्रोणशतं दग्धं, पाण्डवानां शतत्रयम् ।
दुर्योधनसहस्रं च, कर्णसंख्या न विद्यते ॥ ८ ॥

गात्रं संकुचितं गतिर्विगलिता दन्ताश्च नाशं गता,
दृष्टिर्भ्राम्यति रूपमेव ह्रसते वक्त्रं च लालायते ।
वाक्यं नैव करोति बान्धवजनः पत्नी न शुश्रूयते,
धिक्कष्टं जरयाभिभूतपुरुषं पुत्रोऽप्यवज्ञायते ॥९॥

न सा जाइ न सा जोणि, न तं ठाणं न तं कुलं ।
न जाया न मुआ जत्थ, सव्वे जीवा अणंतसो ॥१०॥

जाइं एगं मुंचन्तो, अवरं जाइं तहेव गिण्हंतो ।
भमइ चिरमविरामं, भमरो व्व जीओ भवारामे ॥११॥

पंचेव य कोडीओ लक्खा, अडसट्ठि सहस्सनवनवइ ।
पंचसया चुलसीई, रोगाणं हुंति संखाओ ॥१२॥

दुर्गः संसारमार्गो मरणमनियतं व्याधयो दुर्निवारा,
दुष्प्रापा कर्मभूमिर्न खलु निपततामस्ति हस्तावलम्बः ।
इत्येवं संप्रधार्य प्रतिदिवसनिशं मानसे शुद्धबुद्ध्या,
धर्मे चित्तं निधेयं नियतमतिगुणं वाञ्छता मोक्षसौख्यम् ॥१३॥

पीयं थणयच्छीरं, सागरसलिलाउ हुज्ज बहुययरं ।
संसारम्मि अणंते, माऊणं अन्नमन्नाणं ॥१४॥

भ्राताऽसि तनुजन्माऽसि, वरस्यावरजोऽसि च ।
भ्रातृव्योऽसि पितृव्योऽसि, पुत्रपुत्रोऽसि चाऽर्भक ! ॥१५॥

यश्च बालक ! ते पिता, स मे भवति सोदरः ।
पिता पितामहो भर्ता, तनयः श्वशुरोऽपि च ॥१६॥

या च बालक ! ते माता, सा मे माता पितामही ।
भ्रातृजाया वधूः श्वश्रूः, सपत्नी च भवत्यहो ! ॥१७॥

रङ्गभूमिर्न सा काचित्, शुद्धा जगति विद्यते ।
विचित्रैः कर्मनेपथ्यै-र्यत्र जीवैर्न नाटितम् ॥१८॥

किं किं न कयं को को, न पत्थिओ कह कह न नामिअं सीसं।
दुब्भरउयरस्स कए, किं किं न कयं न कायव्वं ॥१९॥

संसारमां सर्व प्रकारना सर्व संबंधो आत्माए करेल छे माटे
कोई कोईनुं नथी

कति न कति भुक्ता भूरिभोगोपभोगाः,
कति न कति जाताः पुत्र-पौत्रादियोगाः ।
कति न कति भूताः सार्द्धमेतैर्वियोगा-
स्तदिह भवनिवासे कः सुतः कः परो वा ॥२०॥

अनादिकेऽत्र संसारे, भ्राम्यतो भवकोटिषु ।
माता-पितादिरूपेण, जाताः सर्वेऽपि जन्तवः ॥२१॥

वैरभावोपि संजातः, सर्वेषामप्यनन्तशः ।
परस्परं ततः कोत्र, माता-पितादिनिश्चयः ॥२२॥

निजं पुत्रं मृतं नष्टं, व्याधितं व्यसनैर्द्रुतम् ।
सहन्ति मातरः पुत्रं, वराक्यो विवशा अपि ॥२३॥

गर्भवासे महादुःखं, विशेषान्निर्गमक्षणे ।
गर्भगतानां जीवानां, स्वागतं पृच्छयते कथम् ॥२४॥

रङ्को राजा नृपो रङ्कः, स्वसा जाया जनी स्वसा।
दुःखी सुखी सुखी दुःखी, तेनासौ निर्गुणो भवः ॥२५॥

नत्थि किर सो पएसो, लोए वालग्गकोडिमित्तोवि।
जम्मण-मरणाबाहा, जत्थ जिएहिं न संपत्ता ॥२६॥

## ३७ चतुर्गत्यात्मकसंसारदारुणसूक्तानि

दुर्गन्धतोऽपि यदणोर्हि पुरस्य मृत्यु-
रायुंषि सागरमितान्यनुपक्रमाणि।
स्पर्शः खरः क्रकचतोतितमोमितश्च,
दुःखावनन्तगुणितौ भृशशैत्यतापौ ॥१॥

तीव्रा व्यथाः सुरकृता विविधाश्च यत्राऽऽ-
क्रन्दारवैः सततमभ्रभृतोऽप्यमुष्मात्।
किं भाविनो न नरकात् कुमते! बिभेषि,
यन्मोदसे क्षणसुखैर्विषयैः कषायैः ॥२॥

बन्धानिशं वाहनताडनानि, क्षुत्तृड्दूरामातपशीतवातः।
निजान्यजातीयभयापमृत्यु-दुःखानि तिर्यक्ष्विति दारुणानि।३॥

मरणसमं नत्थि दुःखं, खुहासमा वेयणा नत्थि।
पंथसमा नत्थि जरा, दालिद्दसमो पराभवो नत्थि ॥४॥

अच्छिनिमीलणमित्तं, नत्थि सुहं दुःखमेव पडिबद्धं।
नरए नेरइयाणं, अहोनिसं पच्चमाणाणं ॥५॥

जं नरए नेरइया, दुक्खं पावंति गोयमा ! तिक्खं ।
तं पुण निगोयमज्झे, अणंतगुणियं मुणेयव्वं ॥६॥

सूईहिं अग्गिवण्णाहिं, संभिन्नस्स निरंतरं ।
जावइयं गोयमा ! दुःक्खं, गब्भे अट्ठगुणं तओ ॥७॥

माल्यम्लानिः कल्पवृक्षप्रकम्पः, श्रीह्रीनाशो वाससां चोपरागः ।
दैन्यं तन्द्रा कामरागाङ्गभङ्गौ, दृष्टेर्भ्रंशो वेपथुश्चारतिश्च ॥८॥

संसारवर्त्यपि समुद्विजते विपद्भ्यो,
यो नाम मूढमनसां प्रथमः स नूनम् ।
अम्भोनिधौ निपतितेन शरीरभाजां,
संसृज्यतां क्षिपरं सलिलं विहाय ॥९॥

रम्भागर्भस्थः कुक्षौ शिखिशिखावर्णाभिरुच्चैरयः-
सूचिभिः प्रतिरोमभेदितवपुस्तारुण्यपुण्यः पुमान् ।
दुःखं यद्भजते तदष्टगुणितं स्त्रीकुक्षिमध्यस्थितो,
संपद्येत ततोऽप्यनन्तगुणितं जन्मक्षये प्राणिनाम् ॥१०॥

गब्भाओ नीहरंतस्स, जोणीजंतनिपीलणे ।
सयसाहस्सियं दुक्खं, कोडाकोडीगुणं पि वा ॥११॥

जारिसा माणुसे लोए, ताया ! दिसंति वेयणा ।
एत्तो अणंतगुणिआ, नरएसुं दुक्खवेअणा ॥१२॥

पापी रूपविवर्जितो गतकृपो यो नारकादागतः,
तिर्यग्योनिसमागतश्च कपटी नित्यं बुभुक्षातुरः ।

मानी ज्ञानविवेकबुद्धिकलितो यो मर्त्यलोकागतो,
यस्तु स्वर्गसमागतः स सुभगः प्राज्ञः कविः श्रीयुतः ॥१३॥

## ३८ एकत्वभावनासूक्तानि

पान्थानामिव वर्त्मनि क्षितिरुहां नद्यामिव भ्रश्यतां,
मेघानामिव पुष्करे जलनिधौ सांयात्रिकाणामिव ।
संयोगः पितृमातृबन्धुतनयभ्रातृप्रियाणां यदा,
सिद्धो दूरवियोग एव विदुषां शोकोदयः कस्तदा ॥१॥

समाहतं यस्य करैर्विसर्पिभि-
स्तमो दिगन्तेष्वपि नावतिष्ठते ।
स एव सूर्यस्तमसाभिभूयते,
स्पृशन्ति कङ्कालवशेन नापदः ॥२॥

मित्रपुत्रकलत्रादि-कृते कर्म करोत्ययम् ।
यत्तस्य फलमेकाकी, भुङ्क्ते श्वभ्रादिषु स्वयम् ॥३॥

किं कस्याऽपि कृतं किञ्चिद्, भुवने वस्तु विद्यते ।
स्वेनैवोत्पद्यते काले, स्वयमेव विपद्यते ॥४॥

तदेवं सति को मोहो, देहिनां यदिदं मम ।
गते च तत्र कः खेदो, यदिदं मे गतं मृतम् ॥५॥

इक्को कम्माइं समं, जणेइ भुंजइ फलं पि तस्सिक्को ।
इक्कस्स जम्ममरणे, परभवगमणं च इक्कस्स ॥६॥

एकोऽहं नास्ति मे कश्चिन्, नाहमन्यस्य कस्यचित् ।
न तं पश्यामि यस्याऽहं, नाऽसौ दृश्योऽस्ति यो मम ॥७॥

यद्वद् इमे महति पक्षिगणा विचित्राः,
कृत्वाश्रयं हि निशि यान्ति पुनः प्रभाते ।
तद्वज्जगत्यसकृदेव कुटुम्बजीवाः,
सर्वे समेत्य पुनरेव दिशो भजन्ते ॥८॥

एकोऽहं न च मे कश्चित्, स्वः परो वाऽपि विद्यते ।
यदेको जायते जन्तु-र्म्रियते चैक एव हि ॥९॥

बहुनी कलहो नित्यं, द्वयोः संघर्षणं भवेत् ।
एकाकी विहरिष्यामि, कुमारीवलयं यथा ॥१०॥

## ३९ अन्यत्वभावनासूक्तानि

वृक्षं क्षीणफलं त्यजन्ति विहगाः शुष्कं सरः सारसाः,
निर्द्रव्यं पुरुषं त्यजन्ति गणिका भ्रष्टं नृपं सेवकाः ।
निर्गन्धं कुसुमं त्यजन्ति मधुपा दग्धं वनान्तं मृगाः,
सर्वः स्वार्थवशाज्जनोऽभिरमते नो कस्य को वल्लभः ॥१॥

पुत्रमित्रकलत्राणि, वस्तूनि च धनानि च ।
सर्वथाऽन्यस्वभावानि, भावय त्वं प्रतिक्षणम् ॥२॥

खिलालियं पि देहं, जइ जीअमन्नंमि नाणुवट्टेइ ।
ता तं पि होइ अन्नं, धणकणगाईण का वत्ता ? ॥३॥

अन्नं इमं कुटुंबं, अन्ना लच्छी सरीरमवि अन्नं ।
मोत्तुं जिणिंदधम्मं, न भवंतरगामिओ अन्नो ॥४॥

पुत्रमित्रकलत्रादेः, शरीरस्याऽपि सत्क्रिया ।
परकार्यमिदं सर्वं, न स्वकार्यं मनागपि ॥५॥

मायापिआणुसाभाया-भज्जापुत्ता य ओरसा ।
नाऽलं ते मम ताणाय, लुप्पंतस्स सकम्मुणा ॥६॥

थावरं जंगमं चेव, धणं धन्नं उवक्खरं ।
पच्चमाणस्स कम्मेहिं, नाऽलं दुक्खाउ मोयणे ॥७॥

आत्मार्थं सीदमानः स्वजनपरिजनो रौति हाहाग्वार्तो,
भार्या चात्मीयभोगं गृहविभवसुखं स्वं वयस्थाश्च कार्यम् ।
क्रन्दन्त्यन्योन्यमन्यस्त्विह हि बहुजनो लोकयात्रानिमित्तं,
यो वा यस्माच्च किञ्चिन् मृगयति हि गुणं रोदितीष्टः स तस्मै ॥८॥

## ४० अशुचिभावनासूक्तानि

विलोक्य दूरस्थममेध्यमल्पं, जुगुप्ससे मोटितनासिकस्त्वम् ।
भृतेषु तैरेव विमूढ ! योषावपुष्षु, तत्किं कुरुषेऽभिलासम् ॥१॥

यतः शुचीन्यप्यशुचीभवन्ति, कृम्याकुलात्काकशुनादिभक्ष्यात् ।
द्राग् भाविनो भस्मतया ततोऽङ्गान्, मांसादिपिण्डात्स्वहितं गृहाण ॥२॥

अमेध्यपूर्णे कृमिजालसंकुले, स्वभावदुर्गन्धयुते विनश्वरे ।
कलेवरे मूत्रपुरीषसंग्रहे, रमन्ति मूढा विरमन्ति पण्डिताः ॥३॥

मेअवसरेमलमुत्त-पुरिअं चम्मवेढिअं ततो ।
जंगममिव वच्चहरं, कह एवं मुज्झए देहं ॥ ४ ॥

अथिरेण थिरो समले-ण निम्मलो परवसेण साहीणो ।
देहेण जइ विढप्पइ, धम्मो ता किं न पज्जत्तं ॥ ५ ॥

न शक्यं निर्मलीकर्तुं, गात्रं स्नानशतैरपि ।
अश्रान्तमिव स्रोतोभि-र्नवभिर्मलमुद्गिरन् ॥ ६ ॥

"तत्र च प्रसरत्पूती-क्लिन्नं कृमिकुलाकुलम् ।
गृध्रविक्षिप्तवक्षोजं, वायसाऽऽकृष्टलोचनम् ॥ ७ ॥

आकृष्टान्त्रं शृगाली-भिरावृत्तं मक्षिकागणैः ।
विष्णुश्रियो वपुर्वीक्ष्या-ऽध्यासीदिति महीपतिः ॥ ८ ॥

अहो! असारे संसारे, सारं किञ्चिन्न दृश्यते ।
मया त्वसौ सारमिति, ध्याता मूढेन धिक् चिरम् ॥ ९ ॥

कुलशीलयशोलज्जा-स्त्यक्ता यस्याः कृते त्वया ।
रे! जीव! मत्त! पश्याऽद्य, तस्या जातेदृशी दशा" ॥१०॥
(चतुर्भिः कलापकम्)

रसासृग्मांसमेदास्थि-मज्जाशुक्राणि धातवः ।
सप्तैव दशधैकेषां, रोमत्वक्स्नायुभिः सह ॥ ११ ॥

एवंविधस्य मलमूत्रनिकेतनस्य,
रोगाकुलस्य विकलस्य विनश्वरस्य ।
कुर्वन्ति हन्त वपुषोऽस्य (ऽपि) कृते वराकाः (हताशाः)
पापान्यहो! भवसहस्रनिबन्धनानि ॥ १२ ॥

सत्यं वदाऽत्र यदि जन्मनि बन्धुकृत्य-
माप्तं त्वया किमपि बन्धुजनाद्धितार्थम् ।
एतावदेव परमस्ति मृतस्य पश्चात्,
संभूय कायमहितं तव भस्मयन्ति ॥ १३ ॥

शरीरनुं अशुचिपणुं

अभ्यक्तोपि विलिप्तोपि, धौतोपि घटकोटिभिः ।
न याति शुचितां कायः, शुण्डाघट इवाशुचिः ॥ १४ ॥

एतानि तानि नवयौवनगर्वितानि,
मिष्टान्न-पान-शयनासनगर्वितानि ।
सन्ध्याभ्ररागसदृशानि विनश्वराणि,
भूमौ लुठन्ति क्वथितानि कलेवराणि ॥ १५ ॥

उत्पन्नमशुचेर्वृद्धं, रसेनाऽशुचिना वपुः ।
अशुचिद्रव्यसम्पूर्णं, स्रवत्यशुचि चान्वहम् ॥ १६ ॥

चेद्भवेदस्य देहस्य, बहिरन्तर्विपर्ययः ।
दक्षो रक्षां च कुर्यात्कः, काक—गोमायु—गृध्रतः ॥ १७ ॥

## ४० अ. आश्रवभावनासूक्तानि

आश्रवनी व्याख्या

मनोवाक्कायकर्माणि, योगाः कर्म शुभाशुभम् ।
यदाश्रवन्ति जन्तूना—माश्रवास्तेन कीर्तिताः ॥१॥

शुभाशुभ आश्रव बंधनी समजण

मैत्र्यादिवासितं चेतः, कर्म सूते शुभात्मकम् ।
कषायविषयाक्रान्तं, वितनोत्यशुभं पुनः ॥२॥

शुभार्जनाय निर्मिथ्यं, श्रुतज्ञानाश्रितं वचः ।
विपरीतं पुनर्ज्ञेय-मशुभार्जनहेतवे ॥३॥

शरीरेण सुगुप्तेन, शरीरी चिनुते शुभम् ।
सततारम्भिणा जन्तु-घातकेनाशुभं पुनः ॥४॥

## ४१ संवरभावनासूक्तम्

आकालमियमाज्ञा ते, हेयोपादेयगोचरा ।
आश्रवः सर्वथा हेय, उपादेयश्च संवरः ॥ १ ॥

द्रव्य अने भाव संवर

यः कर्मपुद्गलादान-च्छेदः स द्रव्यसंवरः ।
भवहेतुक्रियात्यागः, स पुनर्भाव उच्यते ॥ २ ॥

"जे आसवा ते परिसवा, जे परिसवा ते आसवा ॥"

संवर कोने होय

यस्य च भावचारित्ररूपाध्यवसानावरणीयानां कर्मणां क्षयोपशमः तस्यैव शुभाध्यवसायवृत्तिलक्षणः संवरो नान्यस्य ॥

## ४१ अ. निर्जराभावनासूक्तम्

यया कर्माणि शीर्यंते, बीजभूतानि जन्मतः ।
प्रणीता ज्ञानिभिः सेयं, निर्जरा शीर्णबन्धनैः ॥१॥

## ४२ लोकस्वरूपभावनासूक्तानि

लोए असंखजोयण—माणे पइजोयणंगुला संखा ।
पइ तं असंखअंसा, पइअंसमसंखया गोला ॥१॥
गोले असंखनिगोओ, सोऽणंतजिओ जिवोऽसंखपएसो ।
असंखे पइपएसं, कम्माणं वग्गणाऽणंता ॥२॥
पइवग्गणणंता अणू य पइअणु अणंतपज्जाया ।
एयं लोगसरूवं, भाविज्ज तहत्ति जिणवुत्तं ॥३॥

निगोदनुं स्वरुप

गोला य असंखिज्जा, असंखनिगोओ य हवइ गोलो ।
इक्किक्कमि निगोए, अणंत जीवा मुणेयव्वा ॥ ४ ॥
सव्वोवि किसलओ, उग्गममाणो अणंतओ भणिओ ।
सो चेव विवड्ढंतो, होइ परित्तो अणंतो वा ॥ ५ ॥
अत्थि अणंता जीवा, जेहिं न पत्तो तसाइपरिणामो ।
उप्पजंति चयंति य, पुणोवि तत्थेव तत्थेव ॥ ६ ॥
सन्त्यनन्ता जीवा यैर्न प्राप्तस्त्रसादिपरिणामः ।
उत्पद्यन्ते म्रियन्ते च पुनरपि तत्रैव तत्रैव ॥ ७ ॥
तेऽप्यनन्तानन्ता निगोदवासमनुवसन्ति ।

अहिंथी जेटला मोक्षमां जाय तेटला अनादिनि गोदमांथी व्यवहार राशिमां आवे

सिज्झंति जत्तिया किर, इह संववहारजीवरासिमज्झाओ ।
इंति अणाइवणस्सइ—रासीओ तत्तिआ तंमि ॥ ८ ॥

संस्कृतछायानुवाद :—

सिध्यन्ति यावन्तः किलेह संव्यवहारराशिमध्यात् ।
आयान्ति अनादिवनस्पतिराशितः तावन्तस्तस्मिन् ॥ ९ ॥

## ४३ धर्मदायकदुर्लभताभावनासूक्तानि

भवगिहमज्झंमि पमा–य जलणजलिअंमि मोहनिद्दाए ।
उट्ठवइ जो सुअन्तं, सो तस्स जणो परमबन्धु ॥ १ ॥

जो जेण सुद्धधम्मम्मि, ठाविओ संजएण गिहिणा वा ।
सो चेव तस्स जायइ, धम्मगुरू धम्मदाणाओ ॥ २ ॥

संसारसागरमिणं, परिभमंतेहिं सव्वजीवेहिं ।
गहियाणि य मुक्काणि य अणंतसो दव्वलिंगाइं ॥ ३ ॥

## ४४ मैत्र्यादिभावनासूक्तानि

सर्वत्र मैत्रीमुपकल्पयाऽऽत्मन् !,
चिन्त्यो जगत्यत्र न कोऽपि शत्रुः ।
कियद्दिनस्थायिनि जीवितेऽस्मिन्,
किं खिद्यसे वैरिधिया परस्मिन् ॥ १ ॥

सर्वेऽपि सुखिनः सन्तु, सर्वे सन्तु निरामयाः ।
सर्वे पश्यन्तु भद्राणि, मा कश्चिद् दुःखमाचरेत् ॥ २ ॥

मैत्रीप्रमोदकारुण्य–माध्यस्थ्याख्या महागुणाः ।
युक्तस्तैर्लभते मुक्तिं, जीवोऽनन्तचतुष्टयाम् ॥ ३ ॥

मैत्री परहिते चिन्ता, परार्तिच्छेदधीः कृपा ।
मुदिता सद्गुणे तुष्टि–र्माध्यस्थ्यं पाप्युपेक्षणम् ॥ ४ ॥

मैत्री परस्मिन् हितधीः समग्रे, भवेत्प्रमोदो गुणपक्षपातः ।
कृपा भवार्ते प्रतिकर्तुमीहा पेक्षैव माध्यस्थ्यमवार्यदोषे ॥५॥

मा कार्षीत्कोऽपि पापानि, मा भूत्कोऽपि च दुःखितः ।
मुच्यतां जगदप्येषा, मतिर्मैत्री निगद्यते ॥ ६ ॥

अपास्ताशेषदोषाणां, वस्तुतत्त्वावलोकिनाम् ।
गुणेषु पक्षपातो यः, स प्रमोदः प्रकीर्तितः ॥ ७ ॥

दीनेष्वार्तेषु भीतेषु, याचमानेषु जीवितम् ।
प्रतिकारपरा बुद्धिः, कारुण्यमभिधीयते ॥ ८ ॥

क्रूरकर्मसु निःशङ्कं, देवतागुरुनिन्दिषु ।
आत्मशंसिषु योपेक्षा, तन्माध्यस्थ्यमुदीरितम् ॥ ९ ॥

## ४५ ध्यानसूक्तानि

रुद्धे प्राणप्रचारे वपुषु नियमिते संवृतेऽक्षप्रपञ्चे,
नेत्रस्पन्दे निरस्ते प्रलयमुपगते सर्वसंकल्पजाले ।
भिन्ने मोहान्धकारे प्रसरति महसि क्वाऽपि विश्वप्रदीपे,
धन्यो ध्यानावलम्बी कलयति परमानन्दसिन्धौ प्रवेशम् ॥१॥

स्वाध्यायोत्तमगीतिसंगतिजुषः संतोषपुष्पाञ्चिताः,
सम्यग्ज्ञानविलासमण्डपगताः सद्ध्यानशय्यां श्रिताः ।

तत्त्वार्थप्रतिबोधदीपकलिकाः क्षान्त्यङ्गनासंगिनो,
निर्वाणैकसुखाभिलाषिमनसो धन्या नयन्ते निशाम् ॥ २ ॥

किं लोलाक्षि ! कटाक्ष लम्पटतया किं स्तम्भजृम्भादिभिः,
किं प्रत्यङ्गनिदर्शनोत्सुकतया किं प्रोल्लसच्चाटुभिः ।
आत्मानं प्रतिबाधसे त्वमधुना व्यर्थं मदर्थं यतः,
शुद्धध्यानमहारसायनरसे लीनं मदीयं मनः ॥ ३ ॥

बन्धो ! क्रोध ! विधेहि किञ्चिदपरं स्वस्याधिवासास्पदं,
भ्रातर्मान ! भवानपि प्रचलतु त्वं देवि ! माये ! व्रज ।
हंहो ! लोभ ! सखे ! यथाभिलषितं गच्छ द्रुतं वश्यतां,
नीतः शान्तरसस्य सम्प्रति लसद्वाचा गुरूणामहम् ॥ ४ ॥

दृश्यन्ते बहवः कलासु कुशलास्ते च स्फुरत्कीर्तयः,
सर्वस्वं वितरन्ति ये तृणमिव क्षुद्रैरपि प्रार्थिताः ।
धीरास्तेऽपि च ये त्यजन्ति झटिति प्राणान्कृते स्वामिनो,
द्वित्रास्ते तु नरा मनः समरसं येषां सुहृद्वैरिणोः ॥ ५ ॥

जह छउमत्थस्स मणो, झाणं भण्णइ सुनिच्चलो सन्तो ।
तह केवलिणो काओ, सुनिच्चलो भन्नए झाणं ॥ ६ ॥

स्थितः शीतांशुवज्जीवः, प्रकृत्या भावशुद्धया ।
चन्द्रिकावच्च विज्ञानं, तदावरणमभ्रवत् ॥ ७ ॥

अहो ! ध्यानस्य माहात्म्यं, येनैकाऽपि हि कामिनी ।
अनुरागविरागाभ्यां, स्याद् भवाय शिवाय च ॥ ८ ॥

झाणं चउव्विहं होइ, पिंडत्थयं पयत्थं च।
रूवत्थं च रूवाईयं, एएसिमिमं वक्खाणं ॥ ९ ॥

देहत्थं गयकम्मं, चंदाभं नाणिगं विऊ जत्थ।
परमेसरियं अप्पं, पिच्छइ तं होइ पिंडत्थं ॥ १० ॥

पणतीससोलछप्पण–चउदुगमेगं च जाव झाएह।
परमेट्ठिवाययाणं, अन्नं च गुरूवएसेणं ॥ ११ ॥

जं पुण सपाडिहेरं, समुसरणत्थं जिणं परमनाणिं।
पडिमाइ समारोविय, झायइ तं होइ रूवत्थं ॥ १२ ॥

जं परमाणंदमयं. परमप्पाणं निरंजणं सिद्धं।
झाएइ परमयोगी, रूवाईयं तमिह झाणं ॥ १३ ॥

आज्ञापायविपाकानां, संस्थानस्य विचिन्तनात्।
इत्थं वा ध्येयभेदेन, धर्मध्यानं प्रकीर्त्तितम् ॥ १४ ॥

मैत्र्यादिभिश्चतुर्भेदं, यदाज्ञादिचतुर्विधम्।
पिण्डस्थादिचतुर्धा वा, धर्मध्यानं प्रकीर्त्तितम् ॥१५॥

चेतोवृत्तिनिरोधनेन, करणग्रामं विधायोद्वसं,
तत्संहृत्य गतागतं, च मरुतो धैर्यं समाश्रित्य च।
पर्यङ्केन मया शिवाय विधिवच्छून्यैकभूभृद्दरी–
मध्यस्थेन कदाचिदर्पितदृशा स्थातव्यमन्तर्मुखम् ॥ १६ ॥

चित्ते निश्चलतां गते प्रशमिते रागाद्यविद्यामदे,
विद्राणेऽक्षकदम्बके विघटिते ध्वान्ते भ्रमारम्भके।

आरूढे प्रशमश्रियं जिनपतेर्ज्ञाने समुन्मीलिते,
मां द्रक्ष्यन्ति कदा वनस्थमभितः शस्ताशयाः श्वापदाः ॥१७॥

चिदावदातैर्भवदागमानां, वाग्भैषजैरागरुजं निवर्त्य ।
मया कदा प्रौढसमाधिलक्ष्मी–र्निवीक्ष्यते निर्वृतिनिर्विपक्षा ॥

रागादिहव्यानि मुहुर्लिहाने, ध्यानानले साक्षिणि केवलश्रीः ।
कलत्रतामेष्यति मे कदैषा, वपुर्व्यपायेऽप्यनुयायिनी या ॥१९॥

संसारव्यवहारतोऽस्तमतिर्व्यावर्तकर्तव्यता–
वार्तामप्यपहाय चिन्मयतया त्रैलोक्यमालोकयन् ।
श्रीशत्रुञ्जयशैलगह्वरगुहामध्ये निबद्धस्थितिः,
श्रीनाभेय ! कदा लभेय गलितज्ञेयाभिमानं मनः ॥२०॥

स्वामिन् ! रैवतकाद्रिसुन्दरगुहाकोणप्रणीतासनः,
प्रत्याहारमलौकिकं मुकुलयन् कल्लोललोलं मनः ।
त्वां चण्डांशुमरीचिमण्डलरुचिं साक्षादिवालोकयन्,
संध्येय कदाचिदात्मकपरानन्दोर्मिसंवर्मितम् ॥२१॥

गङ्गातीरे हिमगिरिशिलाबद्धपद्मासनस्य,
ब्रह्मज्ञानाभ्यसनविधिना योगनिद्रां गतस्य ।
किं तैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशङ्काः,
संप्राप्स्यन्ते जरठहरिणाः शृङ्गकण्डूविनोदम् ॥२२॥

वितीर्णे सर्वस्वे तरुणकरुणापूर्णहृदयाः,
स्मरन्तः संसारे स्वगुणपरिणामावधिगतिम् ।

कदा पुण्येऽरण्ये परिणतशरच्चन्द्रकिरणां,
त्रियामां नेष्यामो गुरुमादिततत्त्वैकशरणाः ॥२३॥

तप्येद् वर्षशतैर्यश्च, एकपादस्थितो नरः ।
एकेन ध्यानयोगेन, कलां नार्हति षोडशीम् ॥२४॥

सामान्य ध्यान

सारङ्गाः सुहृदो गृहं गिरिगुहा शान्तिः प्रिया गेहिनी,
वृत्तिर्विन्ध्यलताफलैर्निवसनं श्रेष्ठं तरूणां त्वचा ।
ते ध्यानामृतपूरमग्नमनसां येषामियं निर्वृति-
स्तेषामिन्दुकलावतां संयमिनां मोक्षेऽपि नैव स्पृहा ॥२५॥

कया ध्यानथी कइ गति

अट्टेण तिरिक्खगइ, रुद्दज्झाणेण गम्मइ निरयंमि ।
धम्मेण देवलोयं, सिद्धिगइ सुक्कज्झाणेण ॥२६॥

आर्त-रौद्र अने धर्मध्यान कया गुणस्थानके प्राप्त थाय छे ?

आर्तध्यानस्य संभवस्तु षष्ठगुणस्थानं यावद् बोध्यः ।
रौद्रध्यानस्य संभवस्तु पञ्चमगुणस्थानं यावज्ज्ञेयः ॥२७॥

धर्मध्यानस्य संभवस्तु चतुर्थात्पञ्चमाद्वा गुणस्थानाद् आरभ्य सप्तमाष्टमे यावदवगन्तव्यः तत्र चतुर्थे आद्यौ द्वौ भेदौ पञ्चमे तु त्रय इति ॥

छद्मस्थ अने केवलीना ध्याननी मर्यादा

अन्तो मुहुत्तमित्तं, चित्तावत्थाणमेगवत्थुमि ।
छउमत्थाण झाणं, जोगनिरोहो जिणाणं तु ॥२८॥

"प्रादुर्भवेद्यथाभ्यासं, संस्कारो हि भवान्तरे ।"
श्लोकार्थः

भृशाभ्यासेऽपि संस्कारा, धर्म्याः प्रेत्य न यान्त्यपि ।
मन्दा अमन्दास्त्वितरे, यान्त्येवाग्रेसरा इव ॥२९॥

## ४६ महाव्रतानां भावनासूक्तानि

मनोगुप्त्येषणादाने-र्याभिः समितिभिः सदा ।
दृष्टान्नपानग्रहणे-नाहिंसां भावयेत्सुधीः ॥१॥

हास्यलोभभयक्रोध-प्रत्याख्यानैर्निरन्तरम् ।
आलोच्य भाषणेनाऽपि, भावयेत् सुनृतव्रतम् ॥२॥

आलोच्यावग्रहयाञ्चा-भीक्ष्णावग्रहयाचनम् ।
एतावन्मात्रमेवैत-दित्यवग्रहधारणम् ॥३॥

समानधार्मिकेभ्यश्च,-तथावग्रहयाचनम् ।
अनुज्ञापितपानान्ना-शनमस्तेयभावना ॥४॥

स्त्रीषण्ढपशुमद्वेश्मा-सनकुड्यान्तरोज्झनात् ।
सरागस्त्रीकथात्यागात्, प्राक्कृतस्मृतिवर्जनात् ॥५॥

स्त्रीरम्याङ्गेक्षणस्वाङ्ग-संस्कारपरिवर्जनात् ।
प्रणीतात्यशनत्यागाद्, ब्रह्मचर्यं तु भावयेत् ॥६॥

स्पर्शे रसे च गन्धे च, रूपे शब्दे च हारिणि ।
पञ्चस्वितीन्द्रियार्थेषु, गाढं गार्ध्यस्य वर्जनम् ॥७॥

साधुना २७ गुणो

छव्वयकायरक्खा, पंचिंदियलोहनिग्गहो खंति ।
भावविसुद्धि पडिलेह णा--करणे विसुद्धि य ॥८॥

संजमजोए जुत्तो, अकुसलमणवयणकायसंरोहो ।
सीयाइपीडसहणं, मरणांतउवसग्गसहणं च ॥९॥

## ४७ लेश्याषट्कसूक्तानि

अतिरौद्रः सदा क्रोधी, मत्सरी धर्मवर्जितः ।
निर्दयो वैरसंयुक्तः, कृष्णलेश्याधिको नरः ॥१॥

अलसो मन्दबुद्धिश्च, स्त्रीलुब्धः परवञ्चकः ।
कातरश्च सदा मानी, नीललेश्याधिको भवेत् ॥२॥

शोकाकुलः सदा रुष्टः, परनिन्दात्मशंसकः ।
संग्रामे दारुणो दुःस्थः, कापोतक उदाहृतः ॥३॥

विद्वांश्च करुणायुक्तः, कार्याकार्यविचारकः ।
लाभालाभे सदा प्रीतः, पीतलेश्याधिको नरः ॥ ४ ॥

क्षमावान् निरतत्यागी, देवार्चनरतो यमी ।
शुचीभूतः सदानन्दः, पद्मलेश्याधिको भवेत् ॥ ५ ॥

रागद्वेषविनिर्मुक्तः, शोकनिन्दाविवर्जितः ।
परात्मभावसंपन्नः, शुक्ललेश्यो भवेन्नरः ॥ ६ ॥

किण्हाए जाइ निरये, नीलाए थावरो नरो होइ ।
कापोताए तिरियं, पीताए माणुसो होइ ॥ ७ ॥

पम्हाए देवलोयं, सुक्काए जाइ सासयं ठाणं।
इय लेसाण वियारो, नायव्वो भव्वजीवेहिं ॥ ८ ॥
यादृशी जायते लेश्या, समयेऽन्त्ये शरीरिणः।
तादृश्येव भवेल्लेश्या, प्रायस्तस्याऽन्यजन्मनि ॥ ९ ॥
तिरिनर आगामिभव–लेसाए अइगए सुरा निरया।
पुव्वभवलेससेसे, अंतमुहुत्ते मरणमिन्ति ॥ १० ॥
समत्तसुअं सव्वासु, लहइ सुद्धासु तिसु व चारित्तं।
पुव्वपडिवन्नओ पुण, अन्नयरीए वि लेसाए ॥ ११ ॥

शुक्ल लेश्यानी स्थिति

मुहुत्तद्धं (अन्तर्मुहूर्त) तु जहन्ना, उक्कोसा होइ पुव्वकोडीओ।
नवहि वरिसेहिं ऊणा, नायव्वा सुक्कलेसाए ॥१२॥

## ४८ कर्मबलवत्तरताख्यापकसूक्तानि

गोपो वब्बूलशूलाग्रे, प्रोतयूकोत्थपातकात्।
अष्टोत्तरशतं वारान्, शूलिकारोपणान् मृतः ॥ १ ॥
नीचैर्गोत्रावतारश्चरमजिनपतेर्मल्लिनाथेऽबलात्व–
मान्ध्यं श्रीब्रह्मदत्ते भरतनृपजयः सर्वनाशश्च कृष्णे।
निर्वाणं नारदेऽपि प्रशमपरिणतिः स्याच्चिलातीसुतेऽपि,
त्रैलोक्याश्चर्यहेतुर्जयति विजयिनी कर्मनिर्माणशक्तिः ॥२॥
सुतारा विक्रीता स्वजनविरहः पुत्रमरणं,
विनीतायास्त्यागो रिपुबहुलदेशे च गमनम्।

हरिश्चन्द्रो राजा वहति सलिलं प्रेतसदने,
अवस्थानेकाहोऽप्यहह ! विषमाः कर्मगतयः ॥ ३ ॥

धनानि तिष्ठन्ति गृहेषु नार्यो विश्रामभूमौ स्वजनाः श्मशाने ।
देहं चितायां परलोकमार्गे कर्मानुगो याति स एकजीवः ॥४॥

वैद्या वदन्ति कफपित्तमरुद्विकारं,
नैमित्तिका ग्रहकृतं प्रवदन्ति दोषम् ।
भूतोपसर्गमथ मन्त्रविदो वदन्ति,
कर्मैव शुद्धमतयो यतयो गृणन्ति ॥५॥

यच्चिन्तितं तदिह दूरतरं प्रयाति,
यच्चेतसा न गणितं तदिहाभ्युपैति ।
प्रातर्भवामि वसुधाधिपचक्रवर्ती,
सोऽहं व्रजामि विपिने जटिलस्तपस्वी ॥ ६ ॥

पुण्याऽपुण्यचयेन बुद्धिरमला स्यात् कमलाऽप्यङ्गिनां,
वातेनैव युगन्धरी सदसता मुक्ताफलाऽङ्गारभाः ।
लङ्केशो नलकूबरप्रियतमां नाम्नोपरम्भां रता-
मत्याक्षीदरतां च रामवनितां सीतां जहाराशु यत् ॥७॥

हरो वरो ब्रह्मविवाहकर्ता विश्वानलश्चाहुतिदायकश्च ।
तथाऽपि वन्ध्या गिरिराजपुत्री न कर्मणः कोऽपि बली समर्थः ॥

कुमुदवनमपश्रि श्रीमदम्भोजखण्डं,
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः ।

उदयमहिमरश्मिर्याति शीतांशुरस्तं,
हतविधिललितानां हा ! विचित्रो विपाकः ॥ ९ ॥
निदाघे दाहार्तिप्रचुरतरतृष्णातरलितः,
सरः पूर्णं दृष्ट्वा त्वरितमुपयातः करिवरः ।
तथा पङ्के मग्नस्तटनिकटवर्त्तिन्यपि यथा,
न नीरं नो तीरं द्वयमपि विनष्टं विधिवशात् ॥ १० ॥
उदयति यदि भानुः पश्चिमायां दिशायाम्,
प्रचलति यदि मेरुः शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे शिलायां,
तदपि न चलतीयं भाविनी कर्मरेखा ॥ ११ ॥
शशिनि खलु कलङ्कं कण्टकाः पद्मनाले,
जलधिजलमपेयं पण्डिते निर्धनत्वम् ।
स्वजनजनवियोगो दुर्भगत्वं सुरूपे,
धनवति कृपणत्वं रत्नदोषी कृतान्तः ॥ १२ ॥
रिक्तोऽहमर्थैरिति मा विषीद, पूर्णोऽहमर्थैरिति मा प्रसीद ।
रिक्तं च पूर्णं भरितं च रिक्तं, करिष्यतो नास्ति विधेर्विलम्बः॥
आरूढाः प्रशमश्रेणिं, श्रुतकेवलिनोऽपि च ।
भ्राम्यन्तेऽनन्तसंसार–महो ! दुष्टेन कर्मणा ॥ १४ ॥
येषां भ्रूभङ्गमात्रेण, भज्यन्ते पर्वता अपि ।
अहो ! कर्मवैषम्ये, भूपैर्भिक्षाऽपि नाप्यते ॥ १५ ॥

आढ्यं निःस्वं नृपं रङ्कं, ज्ञं मूर्खं सज्जनं खलम् ।
निर्विशेषेण संहर्तुं, समवर्ती प्रवर्त्तते ॥१६॥

यत्र तत्र च वा यातु, यद्वा तद्वा करोत्वसौ ।
तथाऽपि मुच्यते प्राणी, न पूर्वकृतकर्मणा ॥१७॥

याति दूरमसौ जीवो–ऽपायस्थानाद्भयद्रुतः ।
तत्रैवाऽऽनीयते भूयो–ऽभिनवप्रौढकर्मणा ॥१८॥

दैवे वक्रे भवेत्पुंसां, सुकृतं दुष्कृतोपमम् ।
न सिध्यन्ति स्वकार्याणि, विधिना रचितान्यपि ॥१९॥

गोभद्रो जनको यस्या, भद्रा यस्या जनन्यहो ! ।
शालिभद्रानुजा सेयं, शीर्षे वहति मृत्तिकाम् ॥२०॥

क्व हरिश्चन्द्रः क्वाऽन्त्यजदास्यं,
क्व च पृथासूनुः क्व च नटलास्यम् ।
क्व च वनकष्टं क्वाऽसौ रामः,
कटरे विकटो विधिपरिणामः ॥२१॥

उद्यमं कुर्वतां पुंसां, फलं पुण्यानुसारतः ।
समुद्रमथनाल्लेभे, हरिर्लक्ष्मीं हरो विषम् ॥२२॥

रक्ष्यते तपसा नैव, न देवैर्न च दानवैः ।
नीयते वटशाखायां, कर्मणाऽसौ महाबलः ॥२३॥

अवश्यभव्येष्वनवग्रहग्रहा, यया दिशा धावति वेधसः स्पृहा ।
तृणेन वात्येव तयाऽनुगम्यते, जनस्य चित्तेन भृशावशात्मना ॥

द्वारं दन्तिमदप्रवाहनिवहैर्येषामभूत् पङ्किलं,
ग्रासाभाववशान्न संचरति यद्भृङ्गोऽपि तेषां पुरः ।
येऽभूवन् विमुखाः स्वकुक्षिभरणे तेषामकस्मादहो !,
यच्च श्रीरिह दृश्यतेऽतिविपुला तत्कर्मलीलायितम् ॥२५॥

अणथोवं वणथोवं, अग्गीथोवं कसायथोवं च ।
न हु भे विससिअव्वं, थोवं वि हु तं बहु होइ ॥२६॥

एकोदरसमुत्पन्ना, एकनक्षत्रजातकाः,
न भवन्ति समशीला, यथा बदरीकण्टकाः ॥२७॥

अवश्यमेव भोक्तव्यं, कृतं कर्म शुभाशुभम् ।
नाभुक्तं क्षीयते कर्म, कल्पकोटिशतैरपि ॥२८॥

कुलादपि वरं शीलं, वरं दारिद्र्यमामयात् ।
राज्यादपि वरं विद्या, तपसोऽपि वरं क्षमा ॥२९॥

"जीवितं संततिर्द्रव्यं, दैवायत्तमिदं त्रयम् [ श्लोकार्ध ]"

आपदर्थे धनं रक्षेत्, भाग्यभाजः क्व चापदः ।
दैवं हि कुप्यते क्वापि, संचयोऽपि विनश्यति ॥३०॥

कत्थ वि जीवो बलिओ, कत्थ वि कम्माइं हुंति बलियाइं ।
जीवस्स य कम्मस्स य, पुव्वनिबद्धाइं वइराइं ॥३१॥

शुभाशुभ कर्म परिणामने रोकवा कोई समर्थ नथी

धारिज्जइ इंतो जल--निही वि कल्लोलभिन्नकुलसेलो ।
न हु अन्नजम्मनिम्मिय, सुहासुहो कम्मपरिणामो ॥३२॥

"पावाणं च खलु भो कडाणं कम्माणं पुव्वि दुच्चिण्णाणं दुप्पडिकंताणं वेइत्ता मुक्खो, नत्थि अवेइत्ता तपसा वा सोसइत्ता ॥"

गयणंमि गहा सयणंमि, सुमिणया सउणया वणग्गेसु ।
तह वा हरंति पुरिसं, जह दिट्ठं पुव्वकम्मेहिं ॥३३॥

पुन्यहीनना मनोरथ सफल थता नथी

वनकुसुमं कृपणश्रीः, कूपच्छाया सुरङ्गधूली च
तत्रै(थै)व यान्ति विलयं, मनोरथाः पुण्यहीनानाम् ॥३४॥

तत्र पुण्यक्षयाद् दुःखाद्, ग्रीष्माद् मार्गश्रमादपि ।
मद्यात् सलवणाहाराद्, तृषार्तोऽभूद् भृशं हरिः ॥३५॥

रामोऽपि मुद्रिकां दत्त्वा, भोज्यं कांदविकाच्छुभम् ।
आददे कटकं दत्त्वा, शौण्डिकाद्वारुणीमपि ॥३६॥

सुरापानात् सलवणा--शनाद् ग्रीष्मतापाच्च्क्रमात् ।
शोकात्पुण्यक्षयाच्चाभूत्, तत्र विष्णुस्तृषातुरः ॥३७॥

## ४९ कर्मबन्ध—विपाकयोः सूक्तानि

यथा धेनुसहस्रेषु, वत्सो विन्दति मातरम् ।
एवं पूर्वकृतं कर्म, कर्तारमनुधावति ॥ १ ॥

वहमारणअभक्खाण—दाणं परधणविलोवणाईणं ।
सव्वजहन्नो उदओ, दसगुणिओ इक्कसिकयाणं ॥२॥

तिव्वतरेण (हि) पओसे, सयगुणिओ सयसहस्सकोडिगुणो ।
कोडाकोडिगुणो वा, हुज्ज विवागो बहुतरो वा ॥३॥

सव्वो पुव्वकयाणं कम्माणं पावए फलविवागं ।
अवराहेसु गुणेसु य, निमित्तमेत्तं परो होइ ॥४॥

ज्ञानस्य ज्ञानिनां चैव, निन्दाप्रद्वेषमत्सरैः ।
उपघातैश्च विघ्नैश्च, ज्ञानघ्नं कर्म बध्यते ॥५॥

जं जं समयं जीवो, आविसइ जेण जेण भावेण ।
सो तम्मि तम्मि समये, सुहासुहं बंधए कम्मं ॥६॥

एअं सत्तट्ठकम्मं, बन्धिऊण महाभवे दुरन्तम्मि ।
सुचिरं भमन्ति जीवा, दीहे संसारकंतारे ॥७॥

कर्म दुःखमयं दुःखा–नुभवं दुःखहेतु च ।
कर्मायत्तः (सं) सुखं जीवो, न लेशमपि सेवते ॥८॥

नरकं येन भोक्तव्यं, चिरं तत्पापपूर्तये ।
नियुङ्क्ते तं विधी राज्ये, महारम्भपरिग्रहे ॥९॥

मिच्छदिट्ठिमहारंभ–परिग्गहो तिव्वकोहनिस्सीलो ।
नरयाउयं निबन्धइ, पावरुई रुद्दपरिणामो ॥१०॥

असन्निसरिसिवपक्खी–सीहउरगित्थी जंति जा छट्ठि ।
कमसो उक्कोसेणं, सत्तमपुढवीं मणुअमच्छा ॥११॥

संखपणिंदियतिरिया, मरिउं चउसु वि गईसु गच्छंति ।
थावरविगला नियमा, संखाउयतिरिनरे जंति ॥१२॥

पावं न तिव्वभावा, कुणइ न बहुमन्नई भवं घोरं।
उचियट्ठिइं च सेवइ, सव्वत्थ वि अपुणवंधो त्ति ॥१३॥

कर्म विपाकनी दुर्धरता

स्नेहादाश्लिश्य शक्रेणा–र्द्धासनेऽध्यास्यते स्म यः।
श्रेणिकः सोप्यशरणोऽ–श्रोतव्यां प्राप तां दशाम् ॥१४॥
पूर्वकर्मपरिपाकः, कल्पार्णव इवापतन्।
शक्रचक्रयर्द्ध–चक्रयाद्यै–रपि शक्यो न लङ्घितुम् ॥१५॥
"परलोकजुषां स्वकर्मभिर्गतयो भिन्नपथा हि देहिनाम्॥"
शक्रेणापन्निषेधार्थं, यः सिद्धार्थो न्ययुज्यत।
गोशालोत्तरवेलायां, जजृम्भे सोऽपि नान्यदा ॥१६॥
यत्पादान्ते किङ्करन्ति, लुठन्ति च मुहुर्मुहुः।
सुरेन्द्रास्तेपि हा सर्वे, तत्पीडायामुदासते ॥१७॥
यन्नाममन्त्रमात्रेण, द्रवन्ति दुरुपद्रवाः।
सोप्युपद्रूयते क्षुद्रैः, कस्य पूत्कूर्महे पुरः ॥१८॥
धिक् सुकृतानि जगतो, यैः स्वामिप्रभवैरपि।
कृतघ्नैः विघ्ननिघ्नात्मा, स्वामी त्राता न दुर्विधैः ॥१९॥
"कृतकर्मक्षयो नास्ति, कल्पकोटिशतैरपि॥ श्लोकार्धः॥"
दैवाधीनं वृथा कार्यं विधातुं शक्नुवन्ति के।
कर्मत एव सङ्गोऽभूद्भाविनीकर्मरेखयोः ॥ २० ॥
शुभाशुभानि कर्माणि, स्वयं कुर्वन्ति देहिनः।
स्वयमेवोपभुज्यन्ते, दुःखानि च सुखानि च ॥ २१ ॥

उप्तो यः स्वत एव मोहसलिलो जन्मालवालोऽशुभो,
राग-द्वेष-कषायसन्ततिमहान्निर्विघ्नबीजस्त्वया ।
रोगैरङ्कुरितो विपत्कुसुमितः कर्मद्रुमः साम्प्रतं,
सोढा नो यदि सम्यगेष फलितो दुःखैरधोगामिभिः ॥२२॥

पुनरपि सहनीयो दुर्विपाकस्त्वयाऽयं,
न खलु भवति नाशः कर्मणां सञ्चितानाम् ।
इति सह गणयित्वा यद्यदायाति सम्यक्,
सदसदिति विवेको मानवानां कुतस्त्यः ॥२३॥ युग्मम् ॥

पूर्वजन्मनि कस्यापि, कलङ्कः कोऽपि निर्ममे ।
अधुना तत्फलं प्राप्तं, परिपाकेन सुन्दरम् ॥२४॥

## ५० पुण्यसूक्तानि

वने रणे शत्रुजलाग्निमध्ये, महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमं स्थितं वा, रक्षन्ति पुण्यानि पुराकृतानि ॥१॥

रम्येषु वस्तुषु मनोहरतां गतेषु,
रे! चित्त ! खेदमुपयासि किमत्र चित्रम् ।
पुण्यं कुरुष्व यदि तेषु तवास्ति वाञ्छा,
पुण्यं विना न हि भवन्ति समीहितार्थाः ॥२॥

वेद् वाञ्छसीदमवितुं परलोकदुःख-
भीत्या ततो न कुरुषे किमु पुण्यमेव ।

शक्यं न रक्षितुमिदं हि च दुःखभीतिः,
पुण्यं विना क्षयमुपैति च वज्रिणोऽपि ॥ ३ ॥

जीवदया जिणधम्मो, सावयजम्मो गुरूण पयभत्ती ।
एअं रयणचउक्कं, पुण्णेहिं विणा न पावन्ति ॥४॥

जिनेन्द्रशासनं सद्भिः, संगः सद्गुरुसेवनम् ।
काले सुपात्रदानं च, लभ्यन्ते पुण्यतः परम् ॥ ५ ॥

अहो ! अनभ्राऽजनि मेघवृष्टि-रहो ! विना पुष्पमभूत्फलर्द्धिः ।
पचेलिमं पुण्यमहो ! मदीय-माकस्मिको यद् गुरुसंगमो मे ॥

दक्खत्तणयं पुरिसस्स, पंचगं सइयमाहु सुन्दरं ।
बुद्धी सहस्समूला, सयसहस्साइं पुण्णाइं ॥७॥

सत्थाहसुओ दक्ख-त्तेण सेट्ठीसुओ अ रूवेण ।
बुद्धीइ अमच्चसुओ, जीवइ पुण्णेहिं रायसुओ ॥८॥

अरक्षितं तिष्ठति दैवरक्षितं, सुरक्षितं तद्विहतं विनश्यति ।
जीवत्यनाथोऽपि वने विसर्जितः, कृतप्रयत्नोऽपि गृहे विनश्यति।

उद्भवन्ती विना यत्न-मभवन्ती प्रयत्नतः ।
लक्ष्मीरेव समाख्याति, विशेषं पुण्यपापयोः ॥१०॥

दानं प्रियवाक्सहितं, ज्ञानमगर्वं क्षमान्वितं शौर्यम् ।
त्यागसहितं च वित्तं, दुर्लभमेतत् चतुर्भद्रम् ॥ ११ ॥

श्रीसंघवात्सल्यमुदारचित्तता, कृतज्ञता सर्वजनेष्वनुग्रहः ।
प्रपन्नधर्मे दृढताऽर्च्यपूजनं, तीर्थङ्करैश्वर्यनिबन्धनानि ॥१२॥

क्लिश्यन्ते केवलं स्थूला, सुधीस्तु फलमश्नुते ।
दन्ता दलन्ति कष्टेन, जिह्वा गिलति लीलया ॥ १३ ॥

राजा नयज्ञः सचिवो विवेकी,
यतिः क्षमावान् विनयी धनाढ्यः ।
विद्वान् क्रियावान् युवतिः सती च,
भवन्ति सर्वत्र महोदयाय ॥ १४ ॥

पुण्य बंधना नव प्रकार

अन्नं[1] पानं[2] तथा वस्त्र[3]–माल्य[4]: शयना[5]सने[6] ।
शुश्रुषा[7] वन्दनं[8] तुष्टिः[9] पुण्यं नवविधं स्मृतम् ॥१५॥

मन वचन कायानी एकाग्रताथी पुण्यनी अधिकता

मनसापि भवेत्पुण्यं, वचसा च विशेषतः ।
कर्तव्येनापि तद्योगे, स्वर्द्रुमोऽभूत् फलेग्रहिः ॥१६॥

पुण्यथी असंभवित पण संभवित बने

पुण्यैः सम्भाव्यते पुंसा–मसंभाव्यमपि क्षितौ ।
तेरुर्मेरुसमाः शैलाः, किं न रामस्य वारिधौ ? ॥१७॥

"प्राच्यपुण्यवतां पुंसां, किं किं सम्पद्यते नवा ॥श्लोकार्धः॥"

आवी वस्तुओ पुन्यथी प्राप्त थाय

अकर्णदुर्बलः शूरः, कृतज्ञः सात्त्विको गुणी ।
वदान्यो गुणरागी च, प्रभुः पुण्यैरवाप्यते ॥१८॥
जिणनाह भुवणकरणं, तप्पडिमापूयणं तिसंज्झं च ।
दाणम्मि य पडिबन्धो, तिन्निवि पुन्नेहिं लब्भन्ति ॥१९॥

दानं प्रियवाक्सहितं, ज्ञानमगर्वं क्षमान्वितं शौर्यम् ।
त्यागसहितं च वित्तं, दुर्लभमेतच्चतुर्भद्रम् ॥२०॥

महीनाथा महातीर्थं, महौषध्यो मुनीश्वराः ।
अल्पभाग्यवतां पुंसां, प्रायो दुर्लभदर्शनाः ॥२१॥

तओ ठाणाइं देवेहिंपीहिज्जा तं जहा—माणुस्सगं भवं,
आरियखित्ते जम्मं, सुकुलपच्चइयं जाइं ॥२२॥

स्थाने निवासः सुकुलं कलत्रं, पुत्रःपवित्रः स्वजनानुरागः ।
आयाच्च वित्तं सुहितं च चित्तं, निश्छद्मधर्मश्च सुखानि सप्त ॥

## ५१ पापसूक्तानि

द्यूतं च मांसं च सुरा च वेश्या, पापर्धिचौर्ये परदारसेवा ।
एतानि सप्त व्यसनानि लोके, घोरातिघोरं नरकं नयन्ति ॥१॥

अन्यस्थाने कृतं पापं, धर्मस्थाने विनश्यति ।
धर्मस्थाने कृतं पापं वज्रलेपो भविष्यति ॥२॥

कुमन्त्रैः पच्यते राजा, फलं कालेन पच्यते ।
लङ्घनैः पच्यते पापः, पापी पापेन पच्यते ॥३॥

दुष्कृतं सुकृतबुद्ध्या, कृतमप्यसुखं दिशेत् ।
पुष्पदामधिया स्पृष्टो, न किं दशति पन्नगः ॥४॥

मलमइला पंकमइला धूलिमइला न ते नरा मइला ।
जे पावपंकमइला, ते मइला जीवलोगंमि ॥५॥

अहियं मरणं अहियं च, जीवियं पावकम्मकारीणं ।
तमसम्मि पडंति मया, वेरं वड्ढंति जीवंता ॥६॥

हिंसाऽनृतादयः पञ्च, तत्त्वाश्रद्धानमेव च ।
क्रोधादयश्च चत्वार, इति पापस्य हेतवः ॥७॥

दुष्टानां दुर्जनानां च, पापीनां क्रूरकर्मणाम् ।
अनाचारप्रवृत्तानां, पापं फलति तद्भवे ॥८॥

## ५२ दैवसूक्तानि

विधिर्विधाता नियतिः स्वभावः, कालो ग्रहाश्चेश्वरकर्मदैवाः ।
भाग्यानि पुण्यानि यमः कृतान्तः, पर्यायनामानि पुराकृतस्य ॥

खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके,
वाञ्छन् देशमनातपं विधिवशाद् बिल्वस्य मूलं गतः ॥
तत्राऽप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः,
प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः ॥२॥

भाग्याधिकं नैव नराधिपोऽपि, ददाति वित्तं चिरसेवकेभ्यः ।
निरन्तरं वर्षति वारिधारः, तथापि पत्रत्रितयं पलाशे ॥३॥

अघटितघटितानि घटयति, सुघटितघटितानि जर्जरीकुरुते ।
विधिरेव तानि घटयति, यानि पुमान् नैव चिन्तयति ॥४॥

भग्नाशस्य करण्डपिण्डिततनोर्गुप्तेन्द्रियस्य क्षुधा,
कृत्वाऽऽखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।

तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा,
स्वस्थास्तिष्ठत दैवमेव हि नृणां दुःखे सुखे कारणम् ॥५॥

छित्वा पाशमपास्य कूटरचनां भङ्क्त्वा बलाद्वागुरां,
पर्यन्ताग्निशिखाकलापजटिलाद् निर्गत्य दूरं वनात् ।
व्याधानां शरगोचरण्यतिजवेनोल्लङ्घ्य धावन्मृगः,
कूपान्तः पतितः करोतु विधुरे किं वा विधौ पौरुषम् ॥६॥

कर्मणो हि प्रधानत्वं, किं कुर्वन्ति शुभा ग्रहाः ।
वसिष्ठदत्तलग्नोऽपि, रामः प्रव्रजितो वने ॥७॥

सेवितोऽपि चिरं स्वामी, विना पुण्यं न तुष्यति ।
भानोराजन्मभक्तोऽपि, पश्य निश्चरणोऽरुणः ॥ ८ ॥

प्राप्तव्यमर्थं लभते मनुष्यो, दैवो न तल्लङ्घयितुं समर्थः ।
तस्मान्न शोको न हि विस्मयो मे, यदस्मदीयं न हि तत्परेषाम् ॥

समीहितं यन्न लभामहे वयं, प्रभो ! न दोषस्तव कर्मणो मम ।
दिवाऽप्युलूको यदि नावलोकते, तदा स दोषः कथमंशुमालिनः॥

पदे पदे हि रत्नानि, योजने रसकूपिका ।
भाग्यहीना न पश्यन्ति, बहुरत्ना वसुन्धरा ॥११॥

सर्वत्र वायसाः कृष्णाः, सर्वत्र हरिताः शुकाः ।
सर्वत्र सुखिनां सौख्यं, दुःखं सर्वत्र दुःखिनाम् ॥ १२ ॥

नाऽपत्यानि न वित्तानि, न सौधानि भवन्त्यहो ।
मृत्युना नीयमानस्य, पुण्यपापे परं पुरः ॥ १३ ॥

परीक्ष्य सत्कुलं विद्यां, शीलं शौर्यं सुरूपताम् ।
विधिर्ददाति निपुणं, कन्यामिव दरिद्रताम् ॥ १४ ॥

सद्योदयव्ययाः पञ्च, दरिद्रस्यानुजीविनः ।
ऋणं दौर्भाग्यमालस्यं, बुभुक्षापत्यसन्ततिः ॥ १५ ॥

कुग्रामवासः कुलहीनसेवा, कुभोजनं क्रोधमुखी च भार्या ।
कन्याबहुत्वं च दरिद्रता च, षड् जीवलोके नरका भवन्ति॥१६॥

सुग्रामवासः कुलजस्य सेवा, सुभोजनं शान्तमुखी च भार्या ।
पुत्रबहुत्वं च धनाढ्यता च, षड् जीवलोके स्वर्गा भवन्ति॥१७॥

भोज्यं भोजनशक्तिश्च, रतिशक्तिर्वराः स्त्रियः ।
विभवो दानशक्तिश्च, सदाज्ञा तपसः फलम् ॥ १८ ॥

काले दानं सुपात्रेभ्यः, सद्गुरूणां समागमः ।
भवान्याः शोभिलाभश्च, भाग्यलभ्यमिदं त्रयम् ॥ १९ ॥

आपदर्थे धनं रक्षेद्, भाग्यभाजः क्व चापदः ।
दैवे हि कुपिते क्वाऽपि, संचयोऽपि विनश्यति ॥ २० ॥

अम्भोधिः स्थलतां स्थलं जलधितां धूलीलवः शैलतां,
मेरुर्मृत्कणतां तृणं कुलिशतां वज्रं तृणप्रायताम् ।
वह्निः शीतलतां हिमं दहनतामायाति यस्येच्छया,
लीलादुर्ललिताद्भुतव्यसनिने दैवाय तस्मै नमः ॥ २१ ॥

दैवं खड्गं चपेटां किं, विश्राणयति जातुचित् ।
तां काञ्चिद् दुर्मतिं दत्ते, यया लुठति रङ्कवत् ॥ २२ ॥

नवाकृतिर्फलति नैव कुलं न शीलं,
विद्यापि नैव न च यत्नकृतापि सेवा ।
भाग्यानि पूर्वतपसा किल सञ्चितानि,
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ २३ ॥

कम्मयरो घरस्सामी, घरस्सामी तस्स चेव कम्मयरो ।
को संदेहः खु एयं, अच्चो विहिविलसियं विसमं ॥ २४ ॥

(तेर क्रोड धननो घणी, संचयशीलो शेठ,
मरी थयो निज घर विषे, करे पुत्रनी वेठ) ॥ २५ ॥

## ५३ भवितव्यतासूक्तानि

पातालमाविशतु यातु सुरेन्द्रलोक-
मारोहतु क्षितिधराधिपतिं सुमेरुम् ।
मन्त्रौषधैः प्रहरणैश्च करोतु रक्षां,
यद्भावि तद्भवति नाऽत्र विचारहेतुः ॥ १ ॥

पौलस्त्यः कथमन्यदारहरणे दोषं न विज्ञातवान्,
रामेणाऽपि वने न हेमहरिणस्याऽसंभवो लक्षितः ।
अक्षैश्चाऽपि युधिष्ठिरेण सुमहान् प्राप्तो ह्यनर्थः कथं,
प्रत्यासन्नविपन्न(द्वि)मूढमनसां प्रायो मतिः क्षीयते ॥ २ ॥

विभवो निर्धनत्वं च, बन्धनं मरणं तथा ।
येन यत्र यदा लभ्यं, तस्य तत्र तदा भवेत् ॥ ३ ॥

यद्भाव्यं तद्भवत्येव, नालिकेरीफलाम्बुवत् ।
गन्तव्यं च गच्छत्येव, गजभुक्तकपित्थवत् ॥ ४ ॥

स वटस्ते सुराः पञ्च, ददति च हरन्ति च ।
अक्षान् पातय कल्याणि ! यद्भाव्यं तद्भविष्यति ॥ ५ ॥

## ५४ सप्तनयसूक्तानि

बौधानामृजुसूत्रतो मतमभूद् वेदान्तिनां संग्रहात्,
सांख्यानां तत एव नैगमनयाद्यौगश्च वैशेषिकः ।
शब्दब्रह्मविदोऽपि शब्दनयतः सर्वैर्नयैर्गुम्फिता,
जैनी दृष्टिरितीह सारतरता प्रत्यक्षमुद्वीक्ष्यते ॥ १ ॥

निच्छयनयमग्गामुक्खो, ववहारो पुण्णकारणो वुत्तो ।
पढमो संवरहेऊ, आसवहेऊ बीओ भणिओ ॥ २ ॥

निगमसंगहववहार–उज्जुसुए चेव होइ बोधव्वे ।
सद्दे य समभिरूढे, एवंभूते य मूलनया ॥ ३ ॥

जइ जिणमयं पवज्जह, ता मा ववहारनिच्छए मुअह ।
ववहारनउच्छेए, तित्थुच्छेओ जओ भणिओ ॥ ४ ॥

## ५५ विवेकसूक्तानि

एकं हि चक्षुरमलं सहजो विवेक–
स्तद्वद्भिरेव सह संवसतिर्द्वितीयम् ।
पुंसो न यस्य तदिह द्वयमस्ति सोऽन्ध–
स्तस्याऽपमार्गचलने खलु कोऽपराधः ? ॥ १ ॥

आहारनिद्राभयमैथुनानि, तुल्यानि सार्द्धं पशुभिर्नराणाम् ।
ज्ञानं विशेषं खलु मानुषाणां, ज्ञानेन हीनाः पशवो मनुष्याः॥२॥

सगुणमपगुणं वा कुर्वता कार्यजातं,
परिणतिरवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानां कर्मणामाविपत्ते-
र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥ ३ ॥

क्रोधावेशे नदीपूर-प्रवेशे पापकर्मणि ।
अजीर्णे भुक्तौ भीस्थाने, कालक्षेपः प्रशस्यते ॥ ४ ॥

धर्मारम्भे ऋणच्छेदे, कन्यादाने धनागमे ।
शत्रुघाते च रोगे च, कालक्षेपं न कारयेत् ॥ ५ ॥

प्रस्तावे भाषितं वाक्यं, प्रस्तावे दानमङ्गिनाम् ।
प्रस्तावे वृष्टिरल्पाऽपि, भवेत्कोटिफलप्रदा ॥ ६ ॥

व्यूढो गणभृतां शब्दः, सत्पुम्भिर्गौतमादिभिः ।
यो जानानः कुपात्रे तं, न्यस्येत् पापी स कथ्यते ॥ ७ ॥

तुल्ले वि उअरभरणे, मूढअमूढाण अंतरं पिच्छ ।
एगाण निरयदुक्खं, अन्नेसिं सासयं सुक्खं ॥ ८ ॥

जाणाहि जीवलोए, दो चेव नरेण सिक्खिअव्वाइं ।
कम्मेण जेण जीवइ, जेण मओ सुग्गइं जाइ ॥ ९ ॥

औचित्यमेकमेकत्र, गुणानां कोटिरेकतः ।
विषायते गुणग्राम, औचित्यपरिवर्जितः ॥ १० ॥

तेणं चिय जयगुरुणो, तित्थयरा वि हु गिहत्थभावम्मि ।
अम्मापिउणमुचिअं, अब्भुट्ठाणाइ कुव्वंति ॥ ११ ॥

ममैवायं दोषो यदपरभवे नार्जितमहो !,
शुभं यस्माल्लोको भवति मयि कुप्रीतिहृदयः ।
अपापस्यैवं मे कथमपरथा मत्सरमयं,
जनो याति स्वार्थं प्रति विमुखतामेति सहसा ॥ १२ ॥

रोगिवृद्धान्धपूज्यानां, बालधेनुक्षमाभुजाम् ।
भारयुक्तगर्भिणीनां, मार्गं दत्त्वा बुधश्चरेत् ॥ १३ ॥

सत्त्वं सत्त्वहितं चेत् स्याद्, बुद्धिः सिद्धिसमृद्धिदा ।
कारुण्यं देहतारुण्यं, तदैतत् सर्वसंभवः ॥ १४ ॥

यथाऽद्रिषु गुरुर्मेरु-र्ग्रहेषु दिवसाधिपः ।
चिन्तामणिश्च रत्नेषु विवेकोऽपि गुणेष्विति ॥ १५ ॥

### विवेकनी विशेषता

यत्सन्तोषसुखं यदिन्द्रियदमो यच्चेतसः शान्तता,
यद्दीनेषु दयालुता यदपि गीः सत्यामृतस्यन्दिनी ।
शौर्यं धैर्यमनार्यसङ्गविरतिर्या सङ्गतिः सज्जने,
एते ये परिणामसुन्दरतराः सर्वे विवेकाङ्कुराः ॥ १६ ॥

विवेको दुःखदावाग्निर्विवेकोऽज्ञानतस्करः ।
विवेकः संपदां मूलं, दयावनीघनाघनः ॥ १७ ॥ (स्वोपज्ञ)

अवसरे करेल कार्यनी महत्ता

जं अवसरे न हु दिन्नं, दाणं विणओ सुभासियं वयणं ।
पच्छा गयकालेण, अवसररहियेण किं तेण ॥ १८ ॥

बधाने जमाडया पछी जमवुं

पितुर्मातुः शिशूनां च, गर्भिणीवृद्धरोगिणाम् ।
प्रथमं भोजनं दत्त्वा, स्वयं भोक्तव्यमुत्तमैः ॥ १९ ॥

उत्तम मनुष्यो उचितनो त्याग करता नथी

मुंचंति न मज्जायं, जलनिहिणो नाचला वि हु चलंति ।
न कयावि उत्तमनरा, उचिआचरणं विलंघन्ति ॥ २० ॥

## ५६ विनयसूक्तानि

अकलङ्ककुलपसूया, जगसिरमणिणा जिणेण दिण्णवया ।
एयारिसं तमज्जे !, रयणिविहारं कह पवन्ना ॥ १ ॥

तो सा पायनिवडिआ, पवत्तिणीए खमाविउं लग्गा ।
एसो ममावराहो, मरिसिज्जउ न पुण काहामि ॥ २ ॥

एसा महाणुभावा, पवत्तिणी सयललोयनमणिज्जा ।
कह मज्झ पमाएणं; एवमसंतोसमाणिया ॥ ३ ॥
( मिगावई–चंदणा )

विणया नाणं नाणाओ, दंसणं दंसणाओ चरणं च ।
चरणाहिंतो मोक्खो, मोक्खे सुक्खं निराबाहं ॥ ४ ॥

विनयफलं सुश्रूषा, गुरुशुश्रूषाफलं श्रुतज्ञानम् ।
ज्ञानस्य फलं विरति-र्विरतिफलं चाश्रवनिरोधः ॥ ५ ॥

संवरफलं तपोबल-मथ तपसो निर्जराफलं दृष्टम् ।
तस्मात्क्रियानिवृत्तिः, क्रियानिवृत्तेरयोगित्वम् ॥ ६ ॥

योगनिरोधाद् भवसं-ततिक्षयः संततिक्षयान् मोक्षः ।
तस्मात्कल्याणानां, सर्वेषां भाजनं विनयः ॥ ७ ॥

"पंचहिं ठाणेहिं जीवा, सुलहबोहित्ताए कम्मं पकरन्ति । तंजहा-अरहन्ताणं वण्णं वयमाणे, अरहन्तपन्नत्तस्स धम्मस्स वण्णं वयमाणे, आयरियउवज्झायाणं वण्णं वयमाणे, चाउव्वण्णस्स संघस्स वण्णं वयमाणे, विविक्कतवबंभचेराणं देवाणं वण्णं वयमाणे य ॥"

साहूण चेइयाण य, पडिणीयं तह अवण्णवायं च ।
जिणपवयणस्स अहियं, सव्वत्थामेण वारेइ ॥ ८ ॥

विणओ सासणे मूलं, विणया संजमे तवे ।
विणया विप्पमुक्कस्स, कओ धम्मो कओ तवो ॥ ९ ॥

विणीओ आवहइ सिरिं, लहइ विणीओ जसं च कित्तिं च ।
न कयाइ दुव्विणीओ, सकज्जसिद्धिं समाणेइ ॥ १० ॥

## ५७ वैयावृत्यसूक्तानि

आयरियउवज्झाए, थेरतवस्सीगिलाणसेहाणं ।
साहम्मिकुलगणसंघे,-वेयावच्चं हवइ दसहा ॥ १ ॥

वेयावच्चं निययं, करेह उत्तमगुणे धरिन्ताणं ।
सव्वं किल पडिवाई, वेयावच्चं अपडिवाई ॥ २ ॥

पडिभग्गस्स मयस्स व, नासइ चरणं सुयं अगुणणाए ।
न हु वेयावच्चचिअं, सुहोदयं नासए कम्मं ॥ ३ ॥

लाभेण जोजयंतो, जइणो लाभंतराइयं हणइ ।
कुणमाणो य समाहिं, सव्वसमाहिं लहइ साहू ॥ ४ ॥

भरहो बाहुबली वि य, दसारकुलनंदणो य वसुदेवो ।
वेयावच्चाहरणा, तम्हा पडितप्पह जईणं ॥ ५ ॥

होज्ज न व होज्ज लंभो, फासुगआहारउवहिमाईणं ।
लंभो य निज्जराए, नियमेण अओ उ कायव्वं ॥ ६ ॥

वेयावच्चे अब्भु–ट्ठियस्स सद्धाए काउकामस्स ।
लाभो चेव तवस्सिस्स, होइ अदीणमणस्स नियमा ॥ ७ ॥

एमेव पूइयंमि वि, एक्कंमि वि पूइया जइगुणा उ ।
थोवं बहूनिवेसं, इइ नच्चा पूयए मइमं ॥ ८ ॥

तम्हा जइ एस गुणो, एक्कंमि वि पूइयमि ते सव्वे ।
भत्तं वा पाणं वा, सव्वपयत्तेण दायव्वं ॥ ९ ॥

भक्तिनी महत्ता

आयरियअणुकंपाए, गच्छो अणुकंपिओ महाभागो ।
गच्छाणुकम्पाए, अवोच्छित्ति कया तित्थे ॥ १० ॥

एकनी भक्तिना त्यागमां सर्वनी भक्तिनो त्याग

चत्ता होंति गिलाणा, आयरिया बालवुड्ढसेहा य।
खमगा पाहुणगावि य, मज्जायमइक्कमंतेणं ॥ ११ ॥

एकनी भक्तिमां सर्वनी भक्ति

सारक्खिया गिलाणा, आयरिया बालवुड्ढसेहा य।
खमगा पाहुणगावि य, मज्जायं ठवयंतेणं ॥ १२ ॥

वेयावच्चथी तीर्थंकर नामकर्म बंधाय

"वेयावच्चेण भंते जीवे किं जणयइ ? गोयमा !
वेयावच्चेण तित्थयरनामगोयं कम्मं निबंधेइ ॥"

धर्मकृत्येषु सारं हि, वैयावृत्यं जिना जगुः।
तत्पुनर्ग्लानसम्बन्धि, विना पुण्यं न लभ्यते ॥ १३ ॥

"जो गिलाणं पडियरइ, से मं पडियरइ।
जो मं पडियरइ, सो गिलाणं पडियरइ ॥"

## ५८ परोपकारसूक्तानि

जीवन्तु कामं पशवोऽपि लोके, चर्मादिकं स्यादुपकारि येषाम्।
परोपकारेण विवर्जितस्य, धिग् जीवितं तस्य विपौरुषस्य ॥१॥

कस्यादेशात् क्षपयति तमः सप्तसप्तिः प्रजानां,
छायां कर्तुं पथि विटपिनामञ्जलिः केन बद्धः।
अभ्यर्थ्यन्ते नवजलमुचः केन वा वृष्टिहेतो–
र्जात्यैवैते परहितविधौ साधवो बद्धकक्षाः ॥ २ ॥

साधुभ्यः साधुदानं रिपुजनसुहृदां चोपकारान् कुरु त्वं,
सौजन्यं बन्धुवर्गे निजहितमुचितं स्वामिकार्यं यथार्थम् ।
कर्णान्ते तथ्यमेतत्कथयति भवतो लेखिनी भाग्यशालिन् !,
नो चेन्नष्टेऽधिकारे मम मुखसदृशं तावकास्यं भवेद्धि ॥ ३ ॥

शूराः सन्ति सहस्रशः प्रतिपदं विद्याविदोऽनेकशः,
सन्ति श्रीपतयो निरस्तधनदास्तेऽपि क्षितौ भूरिशः ।
किन्त्वाकर्ण्य निरीक्ष्य वाऽन्यमनुजं दुःखार्दितं यन्मनः,
ताद्रूप्यं प्रतिपद्यते जगति ते सत्पुरुषाः पञ्चषाः ॥ ४ ॥

कस्तूरी पृषतां रदाः करटिनां कृत्तिः पशूनां पयो,
धेनूनां छदमण्डलानि शिखिनां रोमाण्यवीनामपि ।
पुच्छस्नायुवसाविषाणनखरस्वेदादिकं किञ्चन,
स्यात्कस्याप्युपकारि मर्त्यवपुषो नामुष्य किञ्चित्पुनः ॥ ५ ॥

गत्वान्तर्दशनं तनोति शुचितां गोमुख्यकुक्षिस्थितं,
दुग्धीभूय जगद्धिनोति नयति ध्वंसं क्षुधं पाशवीम् ।
शीताद्यं दलयत्यवत्यरिगणात्प्राणान् परार्थोद्यतं,
यद्येवं तृणमप्यहो ! ननु तदा वाच्यः किमीदृग् जनः ॥ ६ ॥

श्लोकार्द्धेन प्रवक्ष्यामि, यदुक्तं ग्रन्थकोटिभिः ।
परोपकारः पुण्याय, पापाय परपीडनम् ॥ ७ ॥

कृतभूरिपरित्राणाः, प्राणा यान्ति स्वयं नृणाम् ।
तैश्चेत्परोपकारः स्यात्, सुन्दरं किमतः परम् ॥ ८ ॥

तृणं चाऽहं वरं मन्ये; नरादनुपकारिणः ।
ग्रासो भूत्वा पशून् पाति, भीरून् पाति रणाङ्गणे ॥ ९ ॥

नैव नद्यः पिबन्त्यम्भो, वृक्षाः स्वादन्ति नो फलम् ।
मेघाः शस्यं च नाऽश्नन्ति, क्रमोऽमीषां परार्थकृत् ॥ १० ॥

दानं वित्ताद्दतं वाचः, कीर्तिधर्मौ तथायुषः ।
परोपकरणं काया–दसारात्सारमुद्धरेत् ॥ ११ ॥

बोधयन्ति न याचन्ते, भिक्षाद्वारा गृहे गृहे ।
दीयतां दीयतां किञ्चि–ददातुः फलमीदृशम् ॥ १२ ॥

किंपौरुषं रक्षति येन नार्त्तान्,
किं वा धनं नार्थिजनाय यत्स्यात् ।
सा का क्रिया या न हितानुबन्धा,
किंजीवितं साधुविरोधि यत्स्यात् ॥ १३ ॥

छायामन्यस्य कुर्वन्ति, स्वयं तिष्ठन्ति चातपे ।
फलन्ति च परस्यार्थे, नात्महेतोर्महाद्रुमाः ॥ १४ ॥

एके सत्पुरुषाः परार्थरचकाः स्वार्थं परित्यज्य ये,
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
तेऽमी मानवराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये,
ये तु घ्नन्ति निरर्थकं परहितं ते के? न जानीमहे ॥ १५ ॥

दो पुरिसे धरउ धरा, अहवा दोहिं वि धारिया धरणी ।
उवयारे जस्स मई, उवयरियं जो न विस्सरइ ॥ १६ ॥

धनेषु जीवितव्येषु, स्त्रीषु चान्नेषु सर्वदा ।
अतृप्ताः प्राणिनः सर्वे, याता यास्यन्ति यान्ति च ॥ १७ ॥

धनं क्वाऽपि यशः क्वाऽपि, पुण्यं क्वाऽपि यथाक्रमम् ।
नीचमध्योत्तमैः प्राप्य–मुपकारतरोः फलम् ॥ १८ ॥

बालभावाल्लघिष्ठाश्चे–न्न चलन्त्यग्रजाज्ञया ।
तथापि स शुभान्वेषी, परुषं ताडयेन्न तान् ॥ १९ ॥

अधिकारपदं प्राप्य, नोपकारं करोति चेत् ।
अकारस्य ततो लोपः, ककारो द्वित्वमाप्नुयात् ॥ २० ॥

धन्यः प्रागुपकुर्वीत, धन्यो मन्येत यत्कृतम् ।
धन्यः प्रत्युपकुर्वीत, त्रयोऽमी पुरुषोत्तमाः ॥ २१ ॥

एह्यागच्छ समाविशासनमिदं प्रीतोऽस्मि ते दर्शनात्,
का वार्ता पुरि दुर्बलोऽसि च कथं कस्मात् चिराद् दृश्यसे ।
इत्येवं गृहमागतं प्रणयिनं ये भाषयन्त्यादरात्,
तेषां युक्तमशङ्कितेन मनसा गन्तुं गृहे सर्वदा ॥ २२ ॥

यद्वत्कर्करकम्बुरत्नमुदधौ नाशाङ्गभोगव्यय–
त्यागं च श्रियि पत्रपुष्फलमप्युर्वीरुहि श्रीफले ।
काये रोगमलोपकारकरणं दुष्कर्मकीर्त्यर्जना–
पुण्यं चाधममध्यमोत्तमतया तद्वन्मनुष्यायुषि ॥ २३ ॥

स एव पूज्यो भवति, गुरुश्च जनकोऽपि च ।
शिष्यं सुतं च यः क्वाऽपि, नैवोन्मार्गे प्रवर्तयेत् ॥ २४ ॥

## ५९ क्रोधादिकषायाणां दुष्टतासूक्तानि ।

कोहो पीइं विणासेइ, माणो विणयनासणो ।
माया मित्ताणि नासेइ, लोहो सव्वविणासणो ॥ १ ॥

कट्ठकिरियाहिं देहं, दमन्ति किं ते जडा निरवराहं ।
मूलं सव्वदुहाणं, जेहिं कसाया न निग्गहिया ॥ २ ॥

सव्वेसु वि तवेसु(य), कसायनिग्गहसमं तवो नत्थि ।
जं तेण नागदत्तो, सिद्धो बहुसो वि भुंजंतो ॥ ३ ॥

तत्तमिणं सारमिणं, दुवालसंगीइ एस भावत्थो ।
जं भवभमणसहाया, इमे कसाया चइज्जंति ॥ ४ ॥

मुक्खमग्गपवण्णाणं, सिणेहो वज्जसिंखला ।
वीरे जीवंतए जाओ, गोयमो जं न केवली ॥ ५ ॥

सामन्नमणुचरन्तस्स, कसाया जस्स उक्कडा हुंति ।
मन्नामि उच्छुपुप्फं व्व, निप्फलं तस्स सामन्नं ॥ ६ ॥

सव्वे वि य अइयारा, संजलणाणं तु उदयओ हुंति ।
मूलच्छेज्जं पुण होइ, बारसण्हं कसायाणं ॥ ७ ॥

पंचमहव्वयमइयं, अट्ठारससीलंगसहस्सकलियं वि ।
चरित्तं घाएन्ति त्ति, [कसाया] सव्वघाइणो ॥ ८ ॥

जातिलाभकुलैश्वर्य-बलरूपतपःश्रुतैः ।
कुर्वन् मदं पुनस्तानि, हीनानि लभते जनः ॥ ९ ॥

रागद्वेषौ यदि स्यातां, तपसा किं प्रयोजनम् ।
तावेव यदि न स्यातां, तपसा किं प्रयोजनम् ॥ १० ॥

हास्यान्महान्तो लघवो भवन्ति,
हास्याद्धनाको वनितां च मुक्तवान् ।
ज्ञानं गतं क्षुल्लवरस्य हास्याद्,
हास्याच्च मित्राणि भवन्ति शत्रवः ॥ ११ ॥

जच्चाइएहिं हीला, मणसा निन्दा परुक्खओ खिंसा ।
गरिहा तस्स समक्खं, पराभवो होइ अवमाणो ॥ १२ ॥

लोभमूलानि पापानि, रसमूलाश्च व्याधयः ।
स्नेहमूलानि दुःखानि, त्रीणि त्यक्त्वा सुखी भव ॥ १३ ॥

"कर्मणः कषाया मूलमिति–यतो मिथ्यात्वाविरतिप्रमाद–कषाययोगा बन्धहेतवः, तथाचागमः–जीवेणं भंते ! कतिहिं ठाणेहिं णाणावरणिज्जं कम्मं बंधइ? गोयमा ! दोहिं ठाणेहिं, तं जहा–रागेण य दोसेण य, रागे दुविहे माया लोभे य, दोसे दुविहे कोहे य माणे य ॥ "

## ६० क्रोधदुष्टतासूक्तानि

कोपनीया न केनाऽपि, साक्षरा हितकाङ्क्षिणा ।
संजाता विपरीतास्ते, राक्षसा एव केवलम् ॥ १ ॥

नाकारणरुषां संख्या, संख्याताः कारणे क्रुधः ।
कारणेऽपि न कुप्यन्ति, ये ते जगति पञ्चषाः ॥ २ ॥

पोता अपि निमज्जन्ति मत्सरे मकराकरे ।
तत्तत्र मज्जनेऽन्येषां दृषदामिव किं नवम् ॥ ३ ॥
विद्यावाणिज्यविज्ञान–वृद्धिऋद्धिगुणादिषु ।
जातौ ख्यातौ प्रोन्नतौ च, धिग् धिग् धर्मेऽपि मत्सरः ॥४॥

क्रोधनी भयंकरता

देशोनपूर्वकोट्या य--दर्जितं व्रतमर्हतः ।
तत्कषायमनोवृत्ति–र्हरयत्येव संयमी ॥ ५ ॥
अतिरागप्रणीतान्यतिरभसकृतानि च ।
तापयन्ति नरं पश्चात्, क्रोधाध्यवसितानि च ॥ ६ ॥
तिव्वंपि पुव्वकोडी--कयं सुकयं मुहुत्तमित्तेण ।
कोहग्गहिओ हणिउं, हहा हवइ भवदुगेवि दुहो ॥ ७ ॥
पढमं चा रोसभरे, जा बुद्धि होइ सा न कायव्वा ।
जा किज्जइ ता नुणं, न सुंदरो होइ परिणामो ॥ ८ ॥
क्रोधो नाम नराधीश !, हव्यवाहो निरिन्धनः ।
अव्यन्तरः पिशाचोऽयं, पारवश्यमहेतुकम् ॥ ९ ॥
मुषित्वा गुणरत्नानि, क्रोधश्चौर इव क्षणात् ।
बिडम्बयति लोकेऽस्मि--न्नरं निःस्वमिवोच्चकैः ॥ १० ॥
क्रोधी भाण्ड इवानेन, संयोगं यः करोत्यलम् ।
त्यक्तलज्जाम्बरो ब्रूतेऽसभ्यानि वचनानि सः ॥ ११ ॥
धत्ते मनोविपर्यासं, क्रोधो मद्यमिव क्षणात् ।
अनुशास्ति परं द्वेष्टि, गुरुं च पितरं निजम् ॥ १२ ॥

मकराकरवत् क्रोधः, क्रूरत्वागाधदुस्तरः ।
ये पुनः प्रविशन्त्येनं, निमज्जन्तितरां तु ते ॥ १३ ॥
क्षणमात्रभवः क्रोधः, प्रेमापि चिरसञ्चितम् ।
दूषयत्यचिरादेव, कूपाम्भोविषलेशवत् ॥ १४ ॥
मन्यन्ते दुर्धियोऽन्यस्मिन्, क्रुद्धेनापकृतं मया ।
नेदं विदन्ति सोढव्यं, मया शतगुणं पुरः ॥ १५ ॥
यद्यथा क्रियतेऽन्यस्मिन्, तत्तथैव शुभाशुभम् ।
आदर्श इव सर्वं हि, संक्रामत्यात्मनि क्षणात् ॥ १६ ॥
द्रुमोद्भवं हन्ति विषं न हि द्रुमं,
न वा भुजङ्गप्रभवं भुजङ्गमम्
अदः समुत्पत्तिपदं दहत्यहो,
ह्रहोल्बणं क्रोधहलाहलं पुनः ॥१७॥
क्रोधो धर्मद्रुमज्वाला-जिह्वः, स्वपरदाहकः ।
स्वार्थनाशं विधत्तेऽसौ, दत्तेऽमुत्र च दुर्गतिम् ॥ १८ ॥
अह्नैकेन हरत्येव, तेजः षाण्मासिकं ज्वरः ।
क्रोधः पुनः क्षणेनापि, पूर्वकोट्यार्जितं तपः ॥ १९ ॥

क्रोधथी खंधकसुरिए करेला नियाणानुं फल.

द्वादशयोजनायामं, तद्भूखण्डं महासुरः ।
चकार भस्मसात् कामं, स्वबोधिं च सुदुर्लभाम् ॥ २० ॥
दण्डकारण्यमित्याख्या-ख्यातमद्यापि तत्त्वऽभूत् ।
यस्मिंस्तृणप्ररोहोऽपि, नाविर्भवति सर्वथा ॥ २१ ॥

कृत्वेति स्कन्दकासुरो, निजस्थानमशिश्रियत् ।
अर्जयामास कर्माणि, वेद्यानि भवकोटिभिः ॥२२॥

## ६१ मानदुष्टतासूक्तानि

मृत्योः कोऽपि न रक्षितो न जगतो दारिद्र्यमुत्त्रासितं,
रोगस्तेननृपादिजा न च भियो निर्णाशिताः षोडश ।
विध्वस्ता नरका न नाऽपि सुखिता धर्मैस्त्रिलोकी सदा,
तत्को नाम गुणो मदश्च विभुता का ते स्तुतीच्छा च का ॥१॥

मानपातोऽपि तस्य स्याद्, यस्य मानोन्नतिः क्षितौ ।
प्रणतिः पादयोरेव, निगडोऽपि पुनस्तयोः ॥ २ ॥

अहङ्कारे सति प्रौढे, वदत्येवं गुणावली ।
अहङ्कारं पतिष्यामि, समायाता तवान्तिके ॥ ३ ॥

सूच्यग्रेण सुतीक्ष्णेन, या सा भिद्यते मेदिनी ।
तदर्धं तु न दास्यामि, विना युद्धेन केशव ! ॥ ४ ॥

नाचरन्ति सदाचारं, न शृण्वन्ति हितं वचः ।
न पश्यन्ति पुरः पूज्यं, क्षीबा इव महीधवाः ॥ ५ ॥

प्रवर्धमानपुरुष–त्रयाणामुपघातकः ।
पूर्वोपार्जितमित्राणां, दाराणामथ वेश्मनाम् ॥ ६ ॥

ज्ञानं मददर्पहरं, माद्यति यस्तेन तस्य को वैद्यः ? ।
अमृतं यस्य विषायते, तस्य चिकित्सा कथं क्रियते ? ॥७॥

विद्ययैव मदो येषां, कार्पण्यं विभवे सति ।
तेषां दैवाभिभूतानां, सलिलादग्निरुत्थितः ॥ ८ ॥

बलिभ्यो बलिनः सन्ति, वादिभ्यः सन्ति वादिनः ।
धनिभ्यो धनिनः सन्ति, तस्माद् दर्पं त्यजेद् बुधः ॥ ९ ॥

विषभारसहस्रेण, वासुकिर्नैव गर्जति ।
वृश्चिकस्तृणमात्रेणा–प्युग्रं वहति कण्टकम् ॥१०॥

व्रतानि चीर्णानि तपोभितप्तं, कृतापि यत्नेन च पिण्डशुद्धिः।
अभूत् फलं यत्तु न निन्हवाना–मसद्ग्रहस्यैव हि सोपराधः ॥११॥

## ६२ मायादुष्टतासूक्तानि

विधाय मायां विविधैरुपायैः, परस्य ये वञ्चनमाचरन्ति ।
ते वञ्चयन्ति त्रिदिवापवर्ग-सुखान्महामोहसखा स्वमेव ॥१॥

सुत्यजं रसलाम्पट्यं, सुत्यजं देहभूषणम् ॥
सुत्यजाः कामभोगाश्च, दुस्त्यजं दम्भसेवनम् ॥ २ ॥

किं व्रतेन तपोभिर्वा, दम्भश्चेन्न निराकृतः ।
किमादर्शेन किं दीपै–र्यदान्ध्यं न दृशोर्गतम् ॥ ३ ॥

अहो ! मोहस्य माहात्म्यं, दीक्षां भागवतीमपि ।
दम्भेन यद्विलुम्पन्ति, कज्जलेनैव रूपकम् ॥ ४ ॥

दम्भलेशोऽपि मल्ल्यादेः, स्त्रीत्वानर्थनिबन्धनम् ।
अतस्तत् परिहाराय, यतितव्यं महात्मना ॥ ५ ॥

माया क्वाऽपि न कर्तव्या, सुधिया स्वहितैषिणा ।
साऽनर्थाय कृता कन्याऽर्थिके भरटके यथा ॥ ६ ॥

मायाविनी भयंकरता

बालेनाचुम्बिता नारी, ब्राह्मणोऽतृणग्राहकः ।
काष्ठीभूतो वने पक्षी, जीवानां रक्षको व्रती ॥७॥
आश्चर्याणीति चत्वारि, मयापि निजलोचनैः ।
दृष्टान्यहो ततः कस्मिन्, विश्वसीमि नन्वहं खलु ॥८॥
कथञ्चित्तेन न ज्ञातं, श्राद्धत्वं छद्मनाऽन्वितम् ।
सुप्रयुक्तस्य दम्भस्य, ब्रह्माप्यन्तं न गच्छति ॥९॥

## ६३ लोभदुष्टतासूक्तानि

यावन्न द्रव्यं भवने प्रभूतं, तावत् सचिन्तस्तदुपार्जनाय ।
प्राप्तेऽपि तस्मिन् धनरक्षणायो–पायैः
सदाऽव्यग्रमना जनोऽयम् ॥ १ ॥
यावन्न लावण्यकलं कलत्रं, प्राप्तं तदर्थ्यां म्रियतेऽत्र तावत् ।
प्राप्तेऽपि चाप्ते सकले कलत्रे, पुत्राप्तिकामः पुरुषं दुनोति ॥२॥
धनेश्वरो प्राप्तकलत्रवांश्च, प्रभूतपुत्रोऽपि जनाश्रितोऽपि ।
काष्ठं घुणौघैरिव रोगशोकै–र्नरः समर्थोऽप्यबलीक्रियेत ॥३॥
सुखाय धत्से यदि लोभमात्मनो,
ज्ञानादिरत्नत्रितये विधेहि तत् ।

दुःखाय चेदत्र परत्र वा कृतिन् !
परिग्रहे तद्बहिरान्तरेऽपि च ॥ ४ ॥
वह्निस्तुष्यति नेन्धनैरिह यथा नाम्भोभिरम्भोनिधिः,
तद्वन्मोहघनो घनैरपि धनैर्जन्तुर्न सन्तुष्यति ।
नत्वेवं मनुते विमुच्य विभवं निःशेषमन्यं भवं,
यात्यात्मा तदहं मुधैव विदधाम्येनांसि भूयांसि किम् ॥५॥
यद् दुर्गामटवीमटन्ति विकटं क्रामन्ति देशान्तरं,
गाहन्ते गहनं समुद्रमतनुक्लेशां कृषिं कुर्वते ।
सेवन्ते कृपणं पतिं गजघटासंघट्टदुःसंचरं,
सर्पन्ति प्रधनं धनान्धितधियस्तल्लोभविस्फूर्जितम् ॥६॥
जहा लाहो तहा लोहो, लाहा लोहो पवड्ढइ ।
दोमासकणयकज्जे, कोडिए वि न निट्ठियं ॥ ७ ॥

## ६४ प्रमाददुष्टता सूक्तानि

वध्यस्य चौरस्य यथा पशोर्वा, संप्राप्यमाणस्य पदं वधस्य ।
शनैः शनैरेति मृतिः समीपं, तथाऽखिलस्येति कथं प्रमादः ॥१॥
चौरैस्तथा कर्मकरैर्गृहीते,
दुष्टैः स्वमात्रेऽप्युपतप्यसे त्वम् ।
पुष्टैः प्रमादैस्तनुभिश्च पुण्य—
धनं न किं वेत्स्यपि लुण्ट्यमानम् ॥ २ ॥
यस्यागमाम्भोदरसैर्न धौतः, प्रमादपङ्कः स कथं शिवेच्छुः ? ।
रसायनैर्यस्य गदाः क्षता नो, सुदुर्लभं जीवितमस्य नूनम् ॥

मज्जं विसयकसाया, निद्दा विगहा च पञ्चमी भणिआ।
एए पंच पमाया, जीवं पाडेंति संसारे ॥ ४ ॥

यत्नेन पापानि समाचरन्ति, धर्मं प्रसंगादपि नाचरन्ति।
आश्चर्यमेतद्धि मनुष्यलोके, क्षीरं परित्यज्य विषं पिबन्ति ॥ ५ ॥

धर्मस्य फलमिच्छन्ति, धर्मं नेच्छन्ति मानवाः।
फलं पापस्य नेच्छन्ति, पापं कुर्वन्ति सादराः ॥ ६ ॥

सम्यक् शौचेन हीनं क्षतविवशतनुं मुक्तकेशं हसन्तं,
निष्ठीवन्तं रुदन्तं मदनपरवशं जृम्भमाणं स्खलन्तम्।
भीतिभ्रान्तं विवस्त्रं परिकलितरुषं लङ्घितोच्छिष्टधान्यं,
छिद्रं लब्ध्वा विशन्ति ध्रुवमिव पुरुषं प्रायशो दुष्टदेवाः ॥ ७ ॥

मिथ्यात्वमविरतिश्च, कषाया दुःखदायिनः।
प्रमादा दुष्टयोगाश्च, पञ्चैते बन्धकारणम् ॥ ८ ॥

नान्तकस्य प्रियः कश्चिन्, न लक्ष्म्याः कोऽपि वल्लभः।
नाशो जरायाः कोऽप्यस्ति, यूयं तदपि सुस्थिताः ॥ ९ ॥

निष्पुण्यास्ते जना जैनं, धर्मं ये नहि जानते।
ते निष्पुण्यतमा ये तु, जानन्तोऽपि न तन्वते ॥ १० ॥

चउदसपुव्वी आहारगा य, मणनाणिणो वीयरागा य।
हुंति पमायपरवसा, तयणंतरमेव चउगइया ॥ ११ ॥

दृष्टुं मृतं जरां जीर्णं, व्याधींश्च व्याधितान् हृदि।
सर्वं निर्भरं वल्गन्, कथं ज्ञानी भवेज्जनः ॥ १२ ॥

करोति यत्कर्म मदेन देही, हसन् त्वधर्मं सहसा विहाय।
रुदंश्चिरं रौरवरन्ध्रमध्ये, भुङ्क्ते फलं तस्य किमप्यवाच्यम् ।१३॥

आलस्समोहऽवन्ना, थंभा कोहा पमायकिविणत्ता।
भयसोगा अन्नाणा, वक्खेवकुऊहला रमणा ॥ १४ ॥

यथा प्रमादादनुपात्तविद्यः, स मन्दधीर्दुःखमिहैव लेभे।
तथाङ्गिनोऽन्येऽपि लभन्ति तत्त्व—ज्ञानं विना दुःखमनेकभेदम्॥

सत्यं वच्मि हितं वच्मि, सारं वच्मि पुनः पुनः।
अस्मिन्नसारे संसारे, सारं सारङ्गलोचना ॥ १६ ॥

प्रियादर्शनमेवास्तु, किमन्यैर्दर्शनान्तरैः।
निर्वाणं प्राप्यते येन, सरागेणाऽपि चेतसा ॥ १७ ॥

जइ चउद्दसपुव्वधरो, वसइ निगोए अणंतयं कालं।
निद्दाइपमायाओ, कहं होहिसि ता तुमं जीव ! ॥ १८ ॥

" श्रीजिनप्रभसूरिकृतं–आत्मसंबोधकुलकम्– "

मोक्खसुक्खे सया मोहं, अमोहं जाण सासणे।
तेसिं कयपणामो हं, सम्बोहं अप्पणो करे ॥ १९ ॥

दसहिं चुल्लगाईहिं, दिट्ठन्तेहिं कयाइ उ।
संसरन्ता भवे सत्ता, पाविंति मणुयत्तणं ॥ २० ॥

नरत्ते आरियं खेत्तं, खेत्ते वि विमलं कुलं।
कुले वि उत्तमा जाई, जाईए रूवसंपया ॥ २१ ॥

रूवे वि [अ] अरोगत्तं, नीरोगे चिरजीवियं ।
हियाहियाइविन्नाणं, जीविए खलु दुल्लहं ॥ २२ ॥

सद्धम्मसवणं तम्मि सवणे धारणं तहा ।
धारणे सद्दहाणं च, सद्दहाणे वि संजमो ॥ २३ ॥

एवं रे जीव ! दुल्लहं, बारसंगाण संपयं ।
संपयं पाविऊणेह, पमाओ नेव जुज्जए ॥ २४ ॥

पमाओ य जिणिंदेहिं, अट्ठहा परिवन्निओ ।
अन्नाणं संसओ चेव, मिच्छानाणं तहेव य ॥ २५ ॥

रागदोसो मइब्भंसो, धम्मंमि य अणायरो ।
जोगाणं दुप्पणिहाणं, अट्ठहा वज्जियव्वओ ॥ २६ ॥

वरं महाविसं भुत्तं, वरं अग्गिपवेसणं,
वरं सत्तूहिं संवासो, वरं सप्पेहिं किलियं ॥ २७ ॥

मा धम्मंमि पमाओ, जमेगमच्चू विसाइणो ।
पमाएणं अणंताणि, जम्माणि मरणाणि य ॥ २८ ॥

सग्गापवग्गमग्गंमि, लग्गा वि जिणसासणे ।
पाडिया हा ! पमाएणं, संसारे सेणियाइया ॥ २९ ॥

सोढाइं तिक्खदुक्खाइं, सारीरमाणसाणि य ।
रे ! जीव ! नरए घोरे, पमाएणं अणंतसो ॥ ३० ॥

दुक्खाइं णेगलक्खाइं, छुहातण्हाइयाणि य ।
पत्ताइं तिरियत्ते वि, पमाएणं अणंतसो ॥ ३१ ॥

रोगसोगविओगाइ, रे ! जीव ! मणुयत्तणे ।
अणुभूयं महादुक्खं, पमाएणं अणंतसो ॥ ३२ ॥

कसाया विसया ईसा–भयाइणि सुरत्तणे ।
पत्ते पत्ताइं दुक्खाइं, पमाएणं अणंतसो ॥ ३३ ॥

जं संसारे महादुक्खं, जं मुक्खे सुक्खमक्खयं ।
पाविंति पाणिणो तत्थ, पमाया अपमायओ ॥ ३४ ॥

पत्ते वि सुद्धसम्मत्ते, सत्ता सुत्तनिउत्तया ।
उवउत्ता जं न मग्गंमि, हा ! पमाओ दुरंतओ ॥ ३५ ॥

बाढं पढंति पाढंति, नाणासत्थविसारया ।
भुल्लंति ते पुणो मग्गा, हा ! पमाओ दुरंतओ ॥ ३६ ॥

अन्नेसिं दिंति संबोहं, निस्संदेहं दयालुया ।
सयं मोहहया ते वि, हा ! पमाओ दुरंतओ ॥ ३७ ॥

पंचसयाण मज्झंमि, खंदगायरिओ तदा ।
कहं विराहओ जाओ, हा ! पमाओ दुरंतओ ॥ ३८ ॥

तयवत्थं तयाहूओ, खुड्डदेवेण बोहिओ ।
अज्जसाढगणी कट्ठं, हा ! पमाओ दुरंतओ ॥ ३९ ॥

सूरी य महुरामंगू, सुत्तअत्थधरो थिरं ।
पुरनिद्धमणे जक्खो, हा ! पमाओ दुरंतओ ॥ ४० ॥

जं हरिसविसाएहिं, चित्तं चिन्तिज्जए फुडं (कूडं)
महामुणीण संसारे, हा ! पमाओ दुरंतओ ॥ ४१ ॥

अप्पायत्तं कयं संतं, चित्तं चारित्तसंगयं ।
परायत्तं पुणो होइ, हा ! पमाओ दुरंतओ ॥ ४२ ॥
एयावत्थं तुमं जाओ, सव्वसत्तो गुणायरो ।
संपयं पि न उज्जुत्तो, हा ! पमाओ दुरंतओ ॥ ४३ ॥
हा ! हा ! कहं तुमं होसि, पमायकुलमन्दिरं ।
जीव ! मुक्खे सया सुक्खे, किं न उज्जमसी(सि) लहुं ॥४४॥
पावं करेसि किच्छेण, धम्मं सुक्खेण नो पुणो ।
पमाएणं दुरंतेणं, कहं होसि न याणिमो ॥ ४५ ॥
हा ! हा ! महापमायस्स, सव्वमेयं वियंभियं ।
जं न सुणंति पिच्छंति, कन्नदिट्ठिजुया वि हु ॥ ४६ ॥
सेणावई मोहनिवस्स एसो, सुहाण जं विग्धकरो दुरप्पा ।
महारिऊ सव्वजियाण एसो, अहो ! हु कट्ठं ति महापमाओ ॥
जह पयट्टंति अणज्जकज्जे, तिहा वि निच्चं मणसा वि नूणं ।
तह खणेगं जइ धम्मकज्जे, ता दुक्खिओ होइ न कोइ लोए ॥
जेणं सुलद्धेण दुहाइ दूरं, वयंति जायंति सुहाइ नूणं ।
रे ! जीव ! एयंमि सुहालयंमि, जिणिदधम्मंमि कहं पमाओ? ॥
एयं वियाणिऊणं, मुंच पमायं सया वि रे ! जीव ! ।
पाविहिसि जेण सम्मं, जिणपहुसेवाफलं रम्मं ॥ ५० ॥

प्रमादयोगमां जीवो उपर अनुकंपा नथी आरंभ छे.

जइयाऽणेण चत्तं, अप्पणयं नाणदंसणचरित्तं ।
तइया तस्स परेसु, अणुकंपा नत्थि जीवेसु ॥ ५१ ॥

आदाने निक्खेवे, भासुस्सगे अ ठाणगमणाई ।
सव्वो पमत्तजोगो, समणस्स वि होइ आरंभो ॥ ५२ ॥

नरकनुं स्थान प्रमाद

प्रमादः परमद्वेषी, प्रमादः परमं विषम् ।
प्रमादो मुक्तिपूर्दस्युः, प्रमादो नरकायनम् ॥ ५३ ॥

आयु क्षणे क्षणे जाय छे माटे जागो

आलस्यं नैव कर्तव्य–मायुर्याति क्षणे क्षणे ।
यामोदयां (?) न जानाति, कालस्य त्वरिता गतिः ॥५४॥

रागदोसकसायेहिं, इंदियेहिं य पंचहिं ।
दुहा वा मोहणिज्जेण, अट्टा संसारिणो जीवा ॥ ५५ ॥

" सर्वनिकृष्टो जीवस्य, दृष्ट उपयोग एष वीरेण ॥ "

## ६५ प्रमादत्यागसूक्तानि

आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं,
व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते ।
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते,
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ १ ॥

जानामि क्षणभङ्गुरं जगदिदं जानामि तुच्छं सुखं,
जानामीन्द्रियवर्गमेतमखिलं स्वार्थैकनिष्ठं सदा ।
जानामि स्फुरिताचिरद्युतिचलं विस्फूर्जितं संपदां,
नो जानामि तथाऽपि कः पुनरसौ मोहस्य-हेतुर्मम ॥ २ ॥

ताराभ्रतारातटिनीभुजङ्ग-तरङ्गगङ्गासिकताकणानाम् ।
संख्यां स कृत्वा कुरुतां हि धर्मं, यो धर्ममीप्सुः कृतगेहकृत्यः ॥

यथेद्विपश्चिन्न च पश्चिमेऽपि, वयस्यनालस्यमधत्त धर्मे ।
दासत्वमासेदुष एव तस्य, जन्मोभयी यास्यति पाप्मभाजः ॥

सुट्ठु वाइयं, सुट्ठु गाइयं, सुट्ठु नच्चिअं सामसुंदरि !
अणुपालिय दीहराइया, सुमिणन्ते मा पमायए ॥ ५ ॥

## ६६ विषयविडम्बनासूक्तानि

केचिद् भोजनभङ्गीनिर्भरधियः केचित् पुरन्ध्रीपराः,
केचि न्माल्यविलेपनैकरसिकाः केचिच्च गीतोत्सुकाः ।
केचिद् द्यूतकथामृगव्यमदिरानृत्यादिबद्धादराः,
केचिद् वाजिगजोक्षयानरसिका धन्यास्तु धर्मे रताः ॥ १ ॥

भिक्षाशनं तदपि नीरसमेकवारं
शय्या च भूः परिजनो निजदेहमात्रम् ।
वस्त्रं च जीर्णशतखण्डमयी च कन्था ।
हा हा तथापि विषयान्न परित्यजन्ति ॥ २ ॥

कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलो,
व्रणीपूयक्लिन्नः कृमिकुलशतैरावृततनुः ।
क्षुधाक्षामो जीर्णः पीठरककपालार्पितगलः,
शुनीमन्वेति श्वा हतमपि च हन्त्येव मदनः ॥ ३ ॥

दन्तीन्द्रदन्तदलनैकविधौ समर्थाः,
सन्त्यत्र रौद्रमृगराजवधे प्रवीणाः ।
आशीविषोरगवशीकरणेऽपि दक्षाः,
पञ्चाक्षनिर्जयपरास्तु न सन्ति मर्त्याः, ॥४॥

गेहं जर्जरमाखुभिः कृतबिलं चेलं च युकालयः,
शय्यामत्कुणसंकुला वपुषि रुग् रुक्षाशनं भोजनम् ।
वृत्तिर्भारवहादिका परुषवागङ्गा कुरूपा वधूः,
यस्येत्थं ननु सोऽपि नोज्झति गृहासङ्गं महामूढधीः ॥ ५ ॥

तार्णं जीर्णं कुटीरं वृषणकुलकुलैः संकुलं धान्यशून्यं,
काणा काली कुरूपा कटुरटनपरा गेहिनी स्नेहहीना ।
दण्डी खण्डी च हण्डी श्रुतिविकलखरी द्वारि कोकूयमाना,
जीवानां संपदेषा रमयति हृदयं धिग् महामोहचेष्टा ॥६॥

दिवा पश्यति नोलूकः, काको नक्तं न पश्यति ।
अपूर्वः कोऽपि कामान्धो, दिवा नक्तं न पश्यति ॥७॥

अप्राप्तत्वभ्रमादुच्चै-रवाप्तेष्वप्यनन्तशः ।
कामभोगेषु मूढानां, समीहा नोपशाम्यति ॥ ८ ॥

सौम्यत्वमिव सिंहानां, पन्नगानामिव क्षमा ।
विषयेषु प्रवृत्तानां, वैराग्यं खलु दुर्वचम् ॥ ९ ॥

अकृत्वा विषयत्यागं, यो वैराग्यं दिधीर्षति ।
अपथ्यमपरित्यज्य, स रोगोच्छेदमिच्छति ॥ १० ॥

ये नैकाङ्गुलितर्जनामपि गुरोः सोढुं समर्था नराः,
मानाभ्युन्नतमानसाश्च सकलं पश्यन्त्यधस्ताज्जगत् ।
ते कामेन कदर्थिता धृतिभिदा पादैर्हता योषितां,
आज्ञां मूर्धभिरुद्वहन्ति कृपणा राज्ञामिव प्रोल्वणाम् ॥ ११ ॥

सौख्यं वारिधिवारितोऽपि विपुलं मुञ्चन्ति ये स्वर्गिणां,
मूढा गोष्पदवारितोऽपि लघुनः सौख्यस्य हेतो र्नृणाम् ।
त्यक्त्वा सारशितोपलादिकलितं स्वर्धामधेनोः पयः,
तृष्णाव्याकुलितेक्षणाः प्रकुथितं गृह्णन्ति ते काञ्जिकम् ॥१२॥

सति प्रदीपे सत्यग्नौ, सत्सु नानामणिषु च ।
विनैकां मृगशावाक्षिं, तमोभूतमिदं जगत् ॥ १३ ॥

स्तनौ मांसग्रन्थी कनककलशावित्युपमितौ,
मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम् ।
स्रवन्मुत्रक्लिन्नं करिवरशिरःस्पर्द्धि जघनं,
मुहुर्निन्द्यं रूपं कविजनविशेषैर्गुरुकृतम् ॥ १४ ॥

श्रुत्वाऽऽह्वानं स्त्रियस्तामनुसरति रसो हंसकोन्नादपादे-
नाशोकः स्पृष्टमात्रस्तिलककुरबकौ चुम्बनालिङ्गनाभ्याम् ।
पुष्पेद्वक्त्राब्जवासाधिकरससुरया केसरश्चेद्विकारोऽ-
प्येषां तत्सत्यकीवाधिकविषयरतिर्यातु नो किं भवार्तिम् ! ॥

नटवन्नर्तितः शम्भुः, पुत्र्यां रागी कृतो विधिः,
हताऽऽत्मयोनिना येन, किमेतत्तस्य कथ्यते ॥१६॥

योगे पीनपयोधराञ्चिततनोर्विच्छेदने बिभ्यतां,
मानस्यावसरे चटूक्तिविधुरं दीनं मुखं बिभ्रताम् ।
विश्लेषस्मरवह्निनानुसमयं दन्दह्यमानात्मनां,
भ्रातः ! सर्वदशासु दुःखगहनं धिक्कामिनां जीवितम् ॥१७॥
मध्ये स्वां कृशतां कुरङ्गकदृशोर्भ्रूनेत्रयोर्वक्रतां ।
कौटिल्यं चिकुरेषु रागमधरे मान्द्यं गतिप्रक्रमे ।
काठिन्यं कुचमण्डले तरलतामक्ष्णोर्निरीक्ष्य स्फुटं,
वैराग्यं न भजन्ति मन्दमतयः कामातुरा हि नराः ॥ १८ ॥
पाण्डुत्वं गमितान्कचान्प्रतिहतां तारुण्यपुण्यश्रियं,
चक्षुः क्षीणबलं कृतं श्रवणयोर्बाधिर्यमुत्पादितम् ।
स्थानभ्रंशमवापिताश्च जरया दन्तास्थिमांसत्वचः,
पश्यन्तोऽपि जडा हहा हृदि सदा ध्यायन्ति तां प्रेयसीम् ॥१९॥
अन्यायार्जितवित्तवत् क्वचिदपि भ्रष्टं समस्तै रदैः,
तापाक्रान्ततमालपत्रवदभूद् हहा अङ्गावलीभंगुरम् ।
केशेषु क्षणचन्द्रवद्धवलिमाव्यक्तं श्रितो यद्यपि,
स्वैरं धावति मे तथाऽपि हृदयं भोगेषु मुग्धं हहा ! ॥२०॥
उद्गृणन्ति प्रपञ्चेन, योषितो गद्गदां गिरम् ।
तामामनन्ति प्रेमोक्तिं, कामग्रहिलचेतसः ॥ २१ ॥
शृङ्गारद्रुमनीरदे प्रसृमरक्रीडारसस्रोतसि,
प्रद्युम्नप्रियबान्धवे चतुरवाग् मुक्ताफलोदन्वति ।

तन्वीनेत्रचकोरपार्वणविधौ सौभाग्यलक्ष्मीनिधौ,
धन्यः कोऽपि न विक्रियां कलयति प्राप्ते नवे यौवने ॥२२॥

वसन्ति नो वसे जस्स, इन्दियाइं कसायवग्गो य ।
निच्छयं सो अ अन्नाणि, नाणासत्थे सुणन्तो वि ॥२३॥

पादाहतः प्रमदया विकसत्यशोकः
शोकं जहाति बकुलो मधुसीधुसिक्तः ।
आलिङ्गितः कुरबकः कुरुते विकास-
मालोकितस्तिलक उत्कलितो विभाति ॥ २४ ॥

अज्ञानाद् रमते बालः स्वपुरीषेऽपि मुग्धधीः
जुगुप्सनीये मोहान्धस्तथा विषयकर्दमे ॥ २५ ॥

जह कच्छूलो कच्छुं, कंडुयमाणो दुहं मुणइ सुक्खं ।
मोहाउरा मणुस्सा, कामस्स दुहं सुहं बिंति ॥ २६ ॥

विषयगणः कापुरुषं, करोति वशवर्तिनं न सत्पुरुषम् ।
बध्नाति मशकमेव हि, लूतातन्तुर्न मातङ्गम् ॥ २७ ॥

विषयाणां विषाणां च, दृश्यते महदन्तरम् ।
उपभुक्तं विषं हन्ति, विषयाः स्मरणादपि ॥ २८ ॥

रूपसेनो गर्भगतः, सर्पो ध्वांक्षोऽथ हंसकः ।
मृगोऽपि मारितो जातो हस्तित्वं सप्तमे भवे ॥ २९ ॥

इच्छाविच्छेयत्थं, भोगे भुंजंति भोइणो जे ते ।
सिंचंति पसमणट्ठा, आहुईए हुयासणयं ॥ ३० ॥

असुरसुरपतीनां यो न भोगेषु तृप्तः,
कथमिहमनुजानां तस्य भोगेषु तृप्तिः।
जलनिधिजलपानाद्यो न जातो वितृष्ण-
स्तृणशिखरगताम्भःपानतः किं स तृप्येत् ॥ ३१ ॥

## ६७ स्त्रीसंसर्गदुष्टताख्यापकसूक्तानि

अप्यश्मनिर्मितं पुंसां, यासां रूपं मनो हरेत्।
वनिता विश्वमोहाय, मन्ये ता वेधसा कृताः ॥ १ ॥
तावन्मौनी यतिर्ज्ञानि, सुतपस्वी जितेन्द्रियः।
यावन्न योषितां दृष्टि-गोचरं याति पुरुषः ॥ २ ॥
संसार! तव निस्तार-पदवी न दवीयसी।
अन्तरा दुस्तरा न स्यु-र्यदि रे मदिरेक्षणाः ॥ ३ ॥
अनृतं साहसं माया, मूर्खत्वमतिलोभता।
अशौचं निर्दयत्वं च, स्त्रीणां दोषाः स्वभावजाः ॥ ४ ॥
या रागिणि विरागिण्यः, स्त्रियस्ताः कामयेत कः?।
सुधीस्तां कामयेत् मुक्तिं, या विरागिणि रागिणी ॥ ५ ॥
हयविहिणा संसारे, महिलारूवेण मंडिअं पासं।
वज्झन्ति जाणमाणा, अयाणमाणा वि वज्झंति ॥ ६ ॥
रे! रे! मण्डक! मा रोदी-र्यदहं खण्डितोऽनया।
रामरावणमुञ्जाद्याः, स्त्रीभिः के के न खण्डिताः? ॥ ७ ॥

रे ! रे ! यन्त्रक ! मा रोदीः, कं कं न भ्रमयन्त्यमूः ।
कटाक्षाक्षेपमात्रेण, कराकृष्टस्य का कथा ? ॥ ८ ॥

सुवंशजोऽप्यकृत्यानि, कुरुते प्रेरितः स्त्रिया ।
स्नेहलं दधि मथ्नाति, पश्य मन्थानको न किम् ? ॥ ९ ॥

अणंता पावरासीओ, जया उदयमागया ।
तया इत्थित्तणं पत्तं, सम्मं जाणाहि गोयमा ! ॥१०॥

पिता रक्षति कौमार्ये, भर्त्ता रक्षति यौवने ।
पुत्रस्तु स्थविरे भावे, न स्त्री स्वातन्त्र्यमर्हति ॥ ११ ॥

स्थानं नास्ति क्षणं नास्ति, नास्ति प्रार्थयिता नरः ।
तेन नारद ! नारीणां, सतीत्वमुपजायते ॥ १२ ॥

नाग्निस्तृप्यति काष्ठानां, नापगानां महोदधिः ।
नान्तकः सर्वभूतानां, न पुंसां वामलोचनाः ॥ १३ ॥

सिद्धंतजलहिपारं, गओ वि जिइंदिओ सूरो विय ।
थिरचित्तो वि छलिज्जइ, जुवइपिसाईहिं खुद्दाहिं ॥ १४ ॥

दर्शने हरते चित्तं, स्पर्शने हरते बलम् ।
संगमे हरते वीर्यं, नारी प्रत्यक्षराक्षसी ॥ १५ ॥

यां चिन्तयामि सततं मयि सा विरक्ता,
साऽप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ।
अस्मत्कृते च परितुष्यति काचिदन्या,
धिक् तां च तं च मदनं च इमां च मां च ॥ १६ ॥

जलमज्झे मच्छपयं, आगासे पंखियाण पयपंत्ती ।
महिलाण हिअयमग्गो, तिन्नि वि लोए न दीसन्ति ॥१७॥

अश्वप्लुतं माधवगर्जितं च, स्त्रीणां चरितं भवितव्यता च ।
अवर्षणं चाऽपि सुवर्षणं च, देवा न जानन्ति कुतो मनुष्याः ॥

संपीड्येवाहिदंष्ट्राग्नि–यमजिह्वाविषाङ्कुरान् ।
जगज्जिघांसुना नार्यः, कृताः क्रूरेण वेधसा ॥ १९ ॥

नाम्ना नहि विषं हन्ति, स्वप्ने दृष्टमपि क्वचित् ।
स्वप्नेनाऽपि हि नाम्नाऽपि, हन्ति नारीविषं क्षणात् ॥ २० ॥

## ६८ विषयत्यागसमर्थकसूक्तानि

भवारण्यं मुक्त्वा यदि जिगमिषुर्मुक्तिनगरीं,
तदानीं मा कार्षीर्विषयविषवृक्षेषु वसतिम् ।
यत्तच्छायाऽप्येषां प्रथयति महामोहमचिरा–
दयं जन्तुर्यस्मात्पदमपि न गन्तुं प्रभवति ॥ १ ॥

अपारे संसारे कथमपि समासाद्य नृभवं,
न धर्मं यः कुर्याद्विषयसुखतृष्णातरलितः ।
ब्रुडन्पारावारे प्रवरमपहाय प्रवहणं,
स मुख्यो मूर्खाणामुपलमुपलब्धुं प्रयतते ॥ २ ॥

बिभेषि जन्तो? यदि दुःखराशेः, तदिन्द्रियार्थेषु रतिं कृथा मा ।
तदुद्भवं नश्यति शर्म यद्राक्, नाशे च तस्य ध्रुवमेव दुःखम् ॥

न्यस्तं यथा मूर्ध्नि मुदाऽत्ति मेषो,
यवाक्षताद्यं बलिकल्पितः सन् ।
मृत्युं समीपस्थितमप्यजानन्,
भुनक्ति मर्त्यो विषयांस्तथैव ॥ ४ ॥

यत्राऽब्जोऽपि विचित्रमञ्जरिभरव्याजेन रोमाञ्चितो,
दोलारूढविलासिनी विलसितं चैत्रे विलोक्याद्भुतम् ।
सिद्धान्तोपनिषन्निषण्णमनसां येषां मनः सर्वथा,
तस्मिन्मन्मथबाधया न मथितं धन्यास्त एव ध्रुवम् ॥ ५ ॥

## ६९ हिंसाप्रतिकारसूक्तानि

यदि ग्रावा तोये तरति तरणिर्यद्युदयति,
प्रतीच्यां सप्तार्चिर्यदि भजति शैत्यं कथमपि ।
यदि क्ष्मापीठं स्यादुपरि सकलस्याऽपि जगतः,
प्रसूते सत्त्वानां तदपि न वधः क्वाऽपि सुकृतम् ॥ १ ॥

स कमलवनमग्नेर्वासरं भास्वदस्ता-
दमृतमुरगवक्त्रात्साधुवादं विवादात् ।
रुगपगममजीर्णाज्जीवितं कालकूटा-
दभिलषति वधाद्यः प्राणिनां धर्ममिच्छेत् ॥ २ ॥

यावन्ति पशुरोमाणि, पशुगात्रेषु भारत ! ।
तावद्वर्षसहस्राणि पच्यन्ते पशुघातकाः ॥ ३ ॥

पञ्चेन्द्रियाणि त्रिविधं बलं च, उच्छ्वासनिःश्वासमथान्यदायुः ।
प्राणा दशैते भगवद्भिरुक्ताः, तेषां वियोगीकरणं तु हिंसा ॥४॥

अमेध्यमध्ये कीटस्य, सुरेन्द्रस्य सुरालये ।
समाना जीविताकाङ्क्षा, समं मृत्युभयं द्वयोः ॥ ५ ॥

दुर्योनिमपि संप्राप्तः, प्राणी मर्त्तुं न वाञ्छति ।
स्वादयन्तो भवन्ति स्व-स्वाहाराः कुक्षितावपि ॥ ६ ॥

पृथिव्यामप्यहं पार्थ !, वायावग्नौ जलेऽप्यहम् ।
वनस्पतिगतश्चाहं, सर्वभूतगतोऽप्यहम् ॥ ७ ॥

यो मां सर्वगतो ज्ञात्वा, न च हिंसेत्कदाचन ।
तस्याहं न प्रणश्यामि, स च मां न प्रणश्यति ॥ ८ ॥

यो दद्यात्काञ्चनं मेरुं, कृत्स्नां चैव वसुन्धराम् ।
एकस्य जीवितं दद्यात् , न च तुल्यं युधिष्ठिर ! ॥ ९ ॥

जले विष्णुः स्थले विष्णु-र्विष्णुः पर्वतमस्तके ।
सर्वभूतगतो विष्णु-स्तस्माद्विष्णुमयं जगत् ॥ १० ॥

वरं भिक्षाटनाभ्यासो, वरं हालाहलादनम् ।
वरं प्राणपरित्यागो, न हिंसाजीविका वरम् ॥ ११ ॥

किं ताए पढियाए, पयकोडिए पलालभूयाए ।
जइत्तियं न नायं, परस्स पीडा न कायव्वा ॥ १२ ॥

मेरुगिरिकणयदाणं, धन्नाणं देइ कोडिरासीओ ।
इक्कं वहेइ जीवं, न छुट्टए तेण पावेण ॥ १३ ॥

हन्मीति जन्मजनितं सुकृतं निहन्ति,
शस्त्रग्रहात् त्रिभवसंभवमेव धर्मम् ।
शस्त्राभिघातसमये शतजन्मजातं,
यत्किञ्चिदस्ति लवमात्रमिदं परासौ ॥ १४ ॥

इक्कमरणाओ वीहसि, अणंतमरणे भवंमि पाविहिसि ।
जम्हा अणेगकोडि–जीवा विणिवाइया तुमए ॥ १५ ॥

थेवदुहस्स वीहसि, अणंतदुक्खे भवंमि पाविहिसि ।
जम्हा अणेगकोडि–जीवा दुक्खे संताविआ तुमए ॥ १६ ॥

स्वमांसं दुर्लभं लोके, लक्षेणाऽपि न लभ्यते ।
अल्पमूल्येन लभ्येत, पलं परशरीरजम् ॥ १७ ॥

इक्कस्स कए नियजी–वियस्स बहुयाओ जीवकोडिओ ।
दुक्खे ठवंति जे के वि, ताण किं सासयं जीयं ? ॥ १८ ॥

शौनिकः स्वार्थलाभाय, प्राकृतः प्राणपुष्टये ।
श्रेयसे यः पशून् हन्ति, तस्य गाण्डनमण्डनम् ॥ १९ ॥

मामहं भक्षयाम्येनं, स वै मां भक्षयिष्यति ।
इत्यामिषस्य सर्वज्ञैर्मांसानामन्वयः कृतः ॥ २० ॥

कृमयो भस्म विष्टा वा, निष्ठा यस्येयमीदृशी ।
स कायः परपीडाभिः, पाल्यते ननु को नयः ? ॥ २१ ॥

निरर्थका ये चपलस्वभावा, यास्यन्त्यवश्यं स्वयमेव नाशम् ।
उपयान्ति क्रिययोपयोगं, प्राणाः परार्थे यदि किं न लब्धम्

नियपाणच्चाएण वि, परपाणा रक्खिया जहा इहयं ।
धम्मरुइसाहुणा तह, रक्खेयव्वा सया जीवा ॥ २३ ॥

तह जो मरणन्ते वि हु, मणसा वि न खंडए नियं नियमं।
सो सग्गाई पावइ, जह पत्तं धम्मरुइमुणिणा ॥ २४ ॥

## ७० अहिंसासमर्थकसूक्तानि

श्रूयतां धर्मसर्वस्वं, श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥ १ ॥

न सा दीक्षा न सा भिक्षा, न तज्ज्ञानं न तत्तपः ।
न तद्दानं न तद् ध्यानं, दया यत्र न विद्यते ॥ २ ॥

सर्ववेदा न तत्कुर्युः, सर्वे यज्ञाश्च भारत ! ।
सर्वतीर्थाभिषेकाश्च, यत्कुर्यात्प्राणिनां दया ॥ ३ ॥

दया महानदीतीरे, सर्वे धर्मास्तृणाङ्कुराः ।
तस्यां शोषमुपेतायां, कियन् नन्दन्ति ते चिरम् ॥ ४ ॥

थूला सुहुमा जीवा, संकप्पारंभओ भवे दुविहा ।
सावराहनिरवराहा, साविक्खा चेव निरविक्खा ॥ ५ ॥

नेव दारं पिहावेइ, भुंजमाणो सुसावओ ।
अणुकम्पा जिणंदेहिं, सड्ढाणां न निवारिया ॥ ६ ॥

लक्ष्म्या गार्हस्थ्यमक्ष्णा मुखममृतरुचिः श्यामयाऽम्भोरुहाक्षी,
भर्त्रा न्यायेन राज्यं वितरणकलया श्रीर्नृपो विक्रमेण ।

नीरोगत्वेन कायः कुलममलतया निर्मदत्वेन विद्या,
निर्दम्भत्वेन मैत्री किमपि करुणया भाति धर्मोऽन्यथा न ॥७॥

शरीरी म्रियतां मा वा, ध्रुवं हिंसा प्रमादिनः ।
दयैव यतमानस्य, वधेऽपि प्राणिनां क्वचित् ॥ ८ ॥

आउं दीहमरोगमंगमसमं रूवं पगिट्ठं बलं,
सोहग्गं तिजगुत्तमं निरुवमो भोगो जसो निम्मलो ।
आएसेक्कपरायणो परियणो लच्छी अविच्छेइणी,
होज्जा तस्स भवन्तरे कुणइ जो जीवाणुकम्पं नरो ॥ ९ ॥

सव्वे वि दुक्खभिरू, सव्वे वि सुहाभिलासिणो सत्ता ।
सव्वे वि जीवणपिआ, सव्वे मरणाओ बीहंति ॥ १० ॥

दीनं हीनं जनं दृष्ट्वा, कृपा यस्य न जायते ।
सर्वज्ञभाषितो धर्म-स्तस्य चित्ते न विद्यते ॥ ११ ॥

## ७१ सत्यताश्रेष्ठत्वसूक्तानि

प्रियं पथ्यं वचस्तथ्यं, सूनृतव्रतमुच्यते ।
तत्तथ्यमपि नो तथ्य-मप्रियं चाहितं च यत् ॥ १ ॥

कुदृष्टं कुश्रुतं चैव, कुज्ञानं कुपरीक्षितम् ।
कुभावजनकं सन्तो, भाषन्ते न कदाचन ॥ २ ॥

पारदारिकदस्यूनां, अस्ति काचित्प्रतिक्रिया ।
असत्यवादिनः पुंसः, प्रतिकारो न विद्यते ॥ ३ ॥

परो रुष्यतु वा मा वा, विषवत् प्रतिभातु वा ।
भाषितव्या हिता भाषा, स्वपक्षगुणकारिणी ॥ ४ ॥
राज्यं यातु श्रियो यान्तु, यान्तु प्राणा विनश्वराः ।
या मया स्वयमेवोक्ता, वाणी मा यातु शाश्वती ॥ ५ ॥
सच्चं जसस्स मूलं, सच्चं वीसासकारणं परमं ।
सच्चं सग्गद्दारं, सच्चं सिद्धिइ सोवाणं ॥ ६ ॥
सत्यं शौचं, तपः शौचं, शौचमिन्द्रियनिग्रहः ।
सर्वभूतदया शौचं, जलशौचं तु पञ्चमम् ॥ ७ ॥
महुरं निउणं थोवं, कज्जावडिअं अगव्विअमतुच्छं ।
पुव्वि मइसंकलियं, भणंति जं धम्मसंजुत्तं ॥ ८ ॥

सत्यनी महत्ता

आपद्यतामापदुपैतु दूरतः,
संपत्तिरायातु कुकीर्तिरुच्चताम् ।
प्राणाः प्रयाणाय भजन्तु सज्जतां,
तदप्यसत्यं ब्रुवते न पण्डिताः ॥ ९ ॥
तहेव फरुसा भासा, गुरुभुओवघाइणी ।
सच्चावि सा न वत्तव्वा, जओ पावस्स आगमो ॥ १० ॥
यदेव साधकं धर्मे, तद्वक्तव्यं वचस्विना ।
नत्वीषदपि बाधाकृ–देषा एव वचस्विता ॥ ११ ॥
दीक्षा भिक्षा गुरोः शिक्षा, ज्ञानं ध्यानं जपस्तपः ।
सर्वं मोक्षार्थिनामेतत्, सत्येन सफलीभवेत् ॥ १२ ॥

असत्यनी दुष्टता

धर्महानिरविश्वासो, देहार्थव्यसनं तथा ।
असत्यभाषिणां निंदा, दुर्गतिश्चोपजायते ॥ १३ ॥

असत्यमप्रत्ययमूलकारणं, कुवासनासद्म, समृद्धिवारणम् ।
विपन्निदानं परवञ्चनोर्जितं, कृतापराधं कृतिभिर्विवर्जितम् ॥१४॥

यशो यस्माद् भस्मीभवति वनवह्नेरिव वनं,
निदानं दुःखानां यदवनिरुहाणामिव जलम् ।
न यत्र स्याच्छायातप इव तपः संयमकथा,
कथंचित्तन्मिथ्यावचनमभिधत्ते न मतिमान् ॥ १५ ॥

सत्यना दशप्रकार

जनपद संमयठवणा, नामे रूवे पडुच्च सच्चे अ ।
ववहारभावजोगे, य दसमे उवमा सच्चे ॥ १६ ॥

## ७२ परिग्रहदुष्टतानिवेदकसूक्तानि

दोससयमूलजालं, पुव्वरिसिविवज्जियं जइयं तं ।
अत्थं वहसि अणत्थं, कीस अणत्थं तवं चरसि ॥ १ ॥

संग्रहे साग्रहाः सन्ति, कीटाद्या अपि कोटिशः ।
दानेऽतिविदुराः प्रायो, देवा अपि न केचन ॥ २ ॥

मूर्च्छा एज परिग्रह

न सो परिग्गहो वुत्तो, नायपुत्तेण ताइणा ।
मुच्छा परिग्गहो, वुत्तो, इइ वुत्तं महेसिणा ॥ ३ ॥

परदर्शनी मते परिग्रह सर्व नाशक

यानमर्धफलं हन्ति, तुरीयांशमुपानहौ ।
तृतीयांशञ्च मुण्डनं, सर्वं हन्ति परिग्रहः ॥ ४ ॥

परिग्रहने ओछो करवो जोइए

संसारमूलमारंभा–स्तेषां हेतुः परिग्रहः ।
तस्मादुपासकः कुर्या–दल्पमल्पं परिग्रहम् ॥ ५ ॥

अपुत्रीआने उपदेश

दारिद्र्यं जनकस्य नापनयते व्याधीन्न विध्वंसते,
नैकान्तेन हितो भवेदिह भवे नो सद्गुणश्चाङ्गजः ।
जन्तूनां गतयः पुनः परभवे भिन्नाः स्वकर्मानुगाः
पुत्रार्तिस्तुदते तदप्यसुमतो हि मोहविस्फुर्जितम् ॥ ६ ॥

## ७३ लक्ष्मीचापल्यसूक्तानि

आदत्यादत्य सर्वान् त्यजति जगति या पण्यनारीव पुंसो,
यस्या मोहेन देही गणयति च गुणान् नो विवेकादिकांस्तान् ।
स्वासक्तानामजस्रं जनयति सुधियामप्यहो ! या कुबुद्धिं,
तामासाद्य श्रियं को जललवचपलां मुह्यति ज्ञाततत्त्वः ॥१॥

दायादाः स्पृहयन्ति तस्करगणा मुष्णन्ति भूमिभुजो,
गृह्णन्ति छलमाकलय्य हुतभुग् भस्मीकरोति क्षणात् ।
अम्भः प्लावयति क्षितौ विनिहतं यक्षा हरन्ते हठाद् ।
दुर्वृत्तास्तनया नयन्ति निधनं धिग्बह्वधीनं धनम् ॥२॥

लक्ष्मीः सर्पति नीचमर्णवपयःसंगादिवाम्भोजिनी–
संसर्गादिव कण्टकाकुलपदा न क्वाऽपि धत्ते पदम् ।
चैतन्यं विषसन्निधेरिव नृणामुज्जासयत्यञ्जसा,
धर्मस्थाननियोजनेन गुणिभिर्ग्राह्यं तदस्याः फलम् ॥३॥

दानं भोगो नाश–स्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते, तस्य तृतीया गतिर्भवति ॥४॥

गात्रे धनं योजयते विमुग्धः, पात्रे धनं योजयते विदग्धः ।
गात्रेण पात्रेण न भुक्तदत्तं, खात्रेण तद्याति जडस्य वित्तम् ॥५॥

भो ! लोकाः ! मम दूषणं कथमिदं संचारितं भूतले,
सोत्सेका क्षणिकातिनिर्घृणतरा लक्ष्मीरिति स्वैरिणी ।
नैवाहं कुलटा न चास्मि चपला नो वा गुणद्वेषिणी,
पुण्येनैव भवाम्यहं स्थिरतरा युक्तं हि तस्याऽर्जनम् ॥ ६ ॥

शृङ्खलासदृशं पुण्यं, मर्कटीसदृशी रमा ।
तया नियन्त्रिता सा हि, चञ्चलाऽपि क्व गच्छति ? ॥७॥

आक्षीरधारैकभुजा–मागर्भैकनिवासिनाम् ।
नमोऽर्थेभ्यो ये पृथ–क्त्वं भ्रातृणामपि कुर्वते ॥ ८ ॥

निर्दयत्वं अहङ्कारः, तृष्णा कर्कशभाषणम् ।
नीचपात्रप्रियत्वं च, पञ्च श्रीसहचारिणः ॥ ९ ॥

## ७४ लक्ष्मीमहत्त्वख्यापकसूक्तानि

तानीन्द्रियाणि विदितं च तदेव नाम,
सा बुद्धिरप्रतिहता वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः क्षणेन,
सोऽप्यन्य एव भवतीति किमत्र चित्रम् ? ॥ १ ॥

यावत्साराणि टाराणि, ठक्कुरष्ठक्कुरायते ।
गते सारे मृते टारे, ठक्कुरष्ठिकरायते ॥ २ ॥

टकारामष्टका धाम, टका हि परमं पदम् ।
यस्मिन् गृहे टका नास्ति, तद्गृहं टकटकायते ॥ ३ ॥

यस्याऽस्ति वित्तं स नरः कुलीनः, स पण्डितः श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः, सर्वे गुणाः काञ्चनमाश्रयन्ते ॥४॥

पूज्यते यदपूज्योऽपि, यदगम्योऽपि गम्यते ।
वन्द्यते यदवन्द्योऽपि, तत्प्रभावो धनस्य हि ॥ ५ ॥

आदरं लभते लोको, न क्वाऽपि धनवर्जितः ।
कान्तिहीनो यथा चन्द्रो, वासरे न लभेत् प्रथाम् ॥ ६ ॥

मृत्युनिःस्वतयोर्मध्ये, वरं मृत्युर्न निःस्वता ।
पूर्वस्मादल्पदुःखत्वं, परस्माच्च पदे पदे ॥ ७ ॥

उत्सङ्गे सिन्धुभर्तुर्भवति मधुरिपुर्गाढमाश्लिष्य लक्ष्मीं,
अध्यास्ते वित्तनाथो निधिनिवहमुपादाय कैलासशैलम् ।

शक्रः कल्पद्रुमादीन् कनकशिखरिणोऽधित्यकासु न्यधासीद्
धूर्तेभ्यस्त्रासमित्थं दधति दिविषदो मानवाः के वराकाः ॥

आलस्यं स्थिरतामुपैति भजते चापल्यमुद्योगितां,
मूकत्वं मितभाषितां वितनुते मौग्ध्यं भवेदार्जवम् ।
पात्रापात्रविचारभावविरहो यच्छत्युदारात्मतां,
मातर्लक्ष्मि ! तव प्रसादवशतो दोषा अमी स्युर्गुणाः ॥ ९ ॥

वयोवृद्धास्तपोवृद्धा, ये च वृद्धा बहुश्रुताः ।
ते सर्वे धनवृद्धानां, द्वारि तिष्ठन्ति किङ्कराः ॥१०॥

अर्थात्त्रिवर्गनिष्पत्ति–र्न्यायोपार्जितवर्धनात् ।
अधर्मानर्थशोकानां, विपरीतात्समुद्भवः ॥११॥

लक्ष्मीविना सर्वं शून्यं

अपुत्रस्य गृहं शून्यं, दिशः शून्या अबान्धवाः ।
मूर्खस्य हृदयं शून्यं, सर्वशून्या दरिद्रता ॥१२॥

गुणज्ञोपि कृतज्ञोपि, कुलीनोपि महानपि ।
प्रियंवदोऽपि दक्षोऽपि, लोकंप्रीणो न निर्धनः ॥१३॥

लक्ष्मीज आदर अपावनार छे

रामः– स एव त्वं स एवाहं, स एव च त्वदाश्रमः ।
पूर्वं नैवादरः कोपि, साम्प्रतं केन हेतुना ? ॥१४॥

वसिष्ठः– स एव त्वं स एवाहं, स एव च मदाश्रमः ।
पूर्वं तु निर्धनोऽभूस्त्वं, साम्प्रतं तु पुरंदरः ॥१५॥

पुण्यानुबंधि पुण्यथी प्राप्त लक्ष्मीनी सफलता

प्राणित्राणप्रकारैर्जगदुपकृतिभिर्भक्तिभिः श्रीजिनानां,
सत्कारैर्धार्मिकाणां स्वजनजनमनःप्रीणनैर्दानमानैः ।
जीर्णोद्धारैर्यतिभ्यो वितरणविधिना शासनोद्योतनैश्च,
प्रायः पुण्यैकभाजां भजति सफलतां श्रीरियं पुण्यलभ्या ॥१६॥

## ७५ मनोवचनकायानामेकाग्रताख्यापकसूक्तानि

दानश्रुतध्यानतपोऽर्चनादि, वृथा मनोनिग्रहमन्तरेण ।
कषायचिन्ताकुलतोज्झितस्य, परो हि योगो मनसो वशत्वम् ॥१॥

जपो न मुक्त्यै न तपो द्विभेदं, न संयमो नाऽपि दमो न मौनम् ।
न साधनाद्यं पवनादिकस्य, किन्त्वेकमन्तःकरणं सुदान्तम् ॥२॥

मन एव मनुष्याणां, कारणं बन्धमोक्षयोः ।
यथैवालिङ्ग्यते भार्या, तथैवालिङ्ग्यते स्वसा ॥३॥

हृदयं सदयं यस्य, भाषितं सत्यभूषितम् ।
कायः परहितोपायः, कलिः कुर्वीत तस्य किम् ! ॥४॥

एगे जिए जिआ पंच, पंच जिए जिआ दस ।
दसहा उ जिणित्ताणं, सव्वसत्तू जिणामहं ॥५॥

अभ्यासेन जिताहारो-ऽभ्यासेनैव जितासनः ।
अभ्यासेन जितश्वासोऽ-भ्यासेनैवानिलत्रुटिः ॥६॥

अभ्यासेन स्थिरं चित्त–मभ्यासेन जितेन्द्रियः ।
अभ्यासेन परानन्दोऽ–भ्यासेनैवात्मदर्शनम् ॥७॥

विमुक्तकल्पनाजालं, समत्वे सुप्रतिष्ठितम् ।
आत्मरामं मनस्तज्ज्ञै–र्मनोगुप्तिरुदाहृता ॥८॥

संज्ञादिपरिहारेण, यन्मौनस्यावलम्बनम् ।
वाग्वृत्तेः संवृतिर्वा या, सा वाग्गुप्तिरिहोच्यते ॥९ ॥

उपसर्गप्रसंगेऽपि, कायोत्सर्गजुषो मुनेः ।
स्थिरीभावः शरीरस्य, कायगुप्तिर्निगद्यते ॥१०॥

शयनासननिक्षेपा–दान चङ्क्रमणेषु चः ।
स्थानेषु चेष्टानियमः, कायगुप्तिस्तु सा परा ॥११॥

मनशुद्धिनी जरुरियात

कामो कोहो लोहो, हरिसो माणो मओ य इयरूवं ।
दुरियारिछक्कं अंतर–मलद्धपसरं सया कुज्जा ॥१२॥

सव्वाओवि किरियाओ, किलिट्ठचित्तस्स होन्ति विहलाओ ।
तस्साफलकए ता, सयावि सुद्धं धरेज्ज मणं ॥१३॥

चञ्चलं हि मनः कृष्ण ! प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये, वायोरिवाति दुष्करम् ॥१४॥

काययोगनी व्याख्या

नित्यालीनप्रलीनाङ्गः, कूर्मवन्मुनिपुङ्गवः
तिष्ठेत्प्रयोजनाभावे, काययोगोऽयमीरितः ॥१५॥

## ७६ मनोवचनकायदुष्टत्वसूक्ते

एकत्र वसतां येषां, वाक्कायमनसां भवेत् ।
परस्परं पृथग्भावः, कुतस्तस्यात्मनः शिवम् ॥१॥

यदि वहसि त्रिदण्डं, नग्नमुण्डं जटां वा,
यदि पठसि पुराणं वेदसिद्धान्तरूपम् ।
यदि वससि गुहायां पर्वताग्रे शिलायां,
यदि हृदयमशुद्धं सर्वमेतन्न किञ्चित् ॥२॥

## ७७ क्षमागुणनिरूपकसूक्तानि

सम्यग्विचार्येति विहाय मानं, रक्षन् दुरापाणि तपांसि यत्नात् ।
मुदा मनीषी सहतेऽभिभूतीः, शूरः क्षमायामपि नीचजाताः ॥१॥

पराभिभूत्याल्पिकयाऽपि कुप्य–स्यधैरपीमां प्रतिकर्तुमिच्छन् ।
न वेत्सि तिर्यग्नरकादिकेषु, तास्तैरनन्तास्त्वतुला भवित्रीः ॥२॥

क्षमाखड्गः करे यस्य, दुर्जनः किं करिष्यति ? ।
अतृणे पतितो वह्निः, स्वयमेवोपशाम्यति ॥३॥

पराऽपराधसहनं, भावतः सा क्षमा मता ।
निरपराधः सर्वोऽपि, क्षमी सुरो विचक्षणः ॥४॥

## ७८ तृष्णादुष्टताख्यापकसूक्तानि

असुरसुरपतीनां यो न भोगेषु तृप्तः,
कथमिह मनुजानां तस्य भोगेन तृप्तिः ।

जलनिधिजलपानाद् यो न जातो वितृष्णः,
तृणशिखरगताम्भःपानतः किं स तृप्येत् ? ॥१॥

अङ्गं गलितं पलितं मुण्डं, दशनविहीनं जातं तुण्डम् ।
वृद्धो याति गृहित्वा दण्डं, तदपि न मुञ्चत्याशापिण्डम् ॥२॥

गतोदन्ता दन्ताः पलितकलितः कुन्तलभरः,
तमःक्षेत्रे नेत्रे विषयपटुनी न श्रुतिपुरी ।
अभूदङ्गं रङ्गद्वलिवलयवीथीविलुलितं,
तथाप्येतच्चेतस्तरुणमिव धावत्यनुदिनम् ॥३॥

तृष्णामहानदीपूरे, वाहिताः पामरा जनाः ।
पतन्ति दुःखगर्त्तायां, निस्सहायाः कुवासनाः ॥४॥

आशाया ये दासास्ते, दासा जीवलोकस्य हि ।
आशा दासीकृता येन, तेषां दासायते लोकः ॥५॥

दुक्खि वि विसयासत्ता, दुन्नि वि धणधण्णसंगहसमेया ।
सीसगुरुसमदोसा, तारिज्जइ भणसु को ? केण ॥६॥

धनेषु जीवितव्येषु, स्त्रीषु चान्नेषु सर्वदा ।
अतृप्ताः प्राणिनः सर्वे, याता यास्यन्ति यान्ति च ॥७॥

वाक्येनैकेन तद्वच्मि, यदुक्तं वाक्यकोटिभिः ।
आशापिशाची शान्ता चेत्, प्राप्तं हि परमं पदम् ॥८॥

न जातु कामः कामानां, उपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव, भूय एवाभिवर्धते ॥९॥

हते भीष्मे मृते द्रोणे, कर्णे चान्तमुपागते ।
आशा बलवती राजन्!, शल्यो जेष्यति पाण्डवान् ॥१०॥

सुवण्णरुप्पस्स य पव्वया भवे, सिया हु कैलाससमा असंखिया।
नरस्स लुद्धस्स न तेहिं किंचि, इच्छा हु आगाससमा अणंतिया॥

दुक्खं हयं जस्स न होइ मोहो, मोहो हओ जस्स न होइ तण्हा।
तण्हा हया जस्स न होइ लोहो, लोहो हओ जस्स न किंचणाइं॥

## ७९ सन्तोषसूक्तानि

सन्तोषस्त्रिषु कर्तव्यः, स्वदारे भोजने धने ।
त्रिषु नैव च कर्तव्यो, दाने चाध्ययने व्रते ॥१॥

निरीहस्य निधानानि, प्रकाशयति काश्यपी ।
बालकस्य निजाङ्गानि, न गोपयति कामिनी ॥२॥

सर्व गुणोमां संतोष गुण प्रधान छे

यथा नृणां चक्रवर्ती, सुराणां पाकशासनः ।
तथा गुणानां सर्वेषां, संतोषः प्रवरो गुणः ॥३॥

संतोषयुक्तस्य यते–रसंतुष्टस्य चक्रिणः ।
तुलया संमितो मन्ये, प्रकर्षः सुखदुःखयोः ॥४॥

संतोषायत्तचित्तानां, यत्तु संयमिनां सुखम् ।
लोभलम्पटयोस्तन्न, मानवेन्द्र–सुरेन्द्रयोः ॥५॥

संतोसतप्परस्स, तवे रयस्स सव्वत्थनिरभिलासस्स ।
चिट्ठउ ता इह धम्मो, दूरीकयदुग्गईमग्गो ॥६॥

आटला कदापि तृप्त थता नथी

अग्निर्विप्रो यमो राजा, समुद्र उदरं स्त्रियः ।
अतृप्ता नैव तृप्यन्ति, याचन्ते च दिने दिने ॥७॥

श्रियः सुखस्य कीर्तेश्च, सद्गीते जीवितस्य च ।
प्रेयः समागमानाञ्च, सूक्तानाञ्च न तृप्यते ॥८॥

न वह्निस्तृणकाष्ठाद्यै–र्नदीभिर्वा महोदधिः ।
न चैवात्मार्थसारेण, शक्यः तर्पयितुं क्वचित् ॥९॥

## ८० सज्जनसूक्तानि

तप्तं तप्तं पुनरपि पुनः काञ्चनं कान्तवर्णं,
घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धम् ।
छिन्नश्छिन्नः पुनरपि पुनः स्वादवानिक्षुदण्डः
प्राणान्तेऽपि प्रकृतिविकृतिर्जायते नोत्तमानाम् ॥१॥

ददतु ददतु गालिं गालिमन्तो भवन्तो,
वयमपि तदभावाद्गालिदानेऽप्यशक्ताः ।
जगति विदितमेतद् दीयते विद्यमानं,
न हि शशकविषाणं कोऽपि कस्मै ददाति ॥२॥

दुर्जनं प्रथमं वन्दे, सज्जनं तदनन्तरम् ।
गुदः प्रक्षालनं पूर्वं, हस्तप्रक्षालनं ततः ॥३॥

नालिकेरसमाकारा, दृश्यन्ते खलु सज्जनाः ।
अन्ये बदरीकाकारा, बहिरेव मनोहराः ॥४॥

शैत्यं नाम गुणस्तवैव भवतः स्वाभाविकी स्वच्छता,
किं ब्रूमः शुचितां भजन्त्य शुचयः संगेन यस्यापरे।
किं चातः परमस्ति ते स्तुतिपदं त्वं जीवितं देहिनां,
त्वं चेन्नीचपथेन गच्छसि पयः कस्त्वां निरोद्धुं क्षमः ॥५॥
सज्जनस्य हृदयं नवनीतं, यद्वदन्ति कवयस्तदलीकम् ।
अन्यदेहविलसत्परितापात्, सज्जनो द्रवति नो नवनीतम् ॥६॥
दुःखितेषु दयाऽत्यन्तमद्वेषो गुणवत्सु च ।
औचित्यासेवनं चैव, सर्वत्रैवाविशेषतः ॥७॥
प्रदानं प्रच्छन्नं गृहमुपगते संभ्रमविधिः,
प्रियं कृत्वा मौनं सदसि कथनं नाप्युपकृतेः ।
अनुत्सेको लक्ष्म्या निरभिभवसाराः परकथाः
श्रुते चासन्तोषः कथमनभिजाते निवसति ॥८॥
कृतज्ञस्वामिसंसर्ग–मुत्तमर्स्त्रीपरिग्रहम् ।
कुर्वन् मित्रमलोभं च, नरो नैवावसीदति ॥९॥

सज्जन अने दुर्जननी ओळखाण

गच्छतः स्खलनं क्वापि, भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र, समादधति सज्जनाः ॥१०॥
दोषलक्षान् परित्यज्य, गुणान् गृह्णन्ति साधवः ।
गुणलक्षाननादृत्य, दोषान् पश्यन्ति दुर्जनाः ॥११॥

सज्जन पुरुषो प्राणत्यागे पण सिद्धांत विरुद्ध न बोले

"न शुद्धसिद्धान्तविरुद्धवाक्यं प्राणप्रणाशेऽपिवदन्ति सन्तः ।"

आपत्तिमां पण अकार्य नही करनारनुं सर्व सफल

तं पढिअं तं गुणिअं, तं मुणिअं तेण चेइओ अप्पा ।
आवडिअ–पिल्लिआसंतिओवि जइ न कुणइ अकज्जं ॥१२॥

## ८१ दुर्जनताख्यापकसूक्तानि

हस्तौ दानविवर्जितौ श्रुतिपुटौ सारश्रुतेः द्रोहिणौ,
नेत्रे साधुविलोकनेन रहिते पादौ न तीर्थं गतौ ।
अन्यायार्जितवित्तपूर्णमुदरं गर्वेण तुङ्गं शिरः
रे रे जंबुक मुञ्च मुञ्च सहसा नीचस्य निन्द्यं वपुः ॥१॥

विद्या विवादाय धनं मदाय, शक्तिश्च नित्यं परपीडनाय ।
खलस्य साधोर्विपरीतमेतद्, ज्ञानाय दानाय च रक्षणाय ॥२॥

ग्राहोरुधिरमादीतं, भक्षितं मांसमृज्जम् ।
भागिरथ्यां पतिः क्षिप्तः, साधु साधु पतिव्रते ! ॥३॥

इतरतापशतानि समाश्लिके, वितर तानि सहे चतुरानन ! ।
अरसिकेरसार्थनिवेदनं, शिरसि मा लिख मा लिख मा लिख

मृगमीनसज्जनानां, तृणजलसन्तोषविहितवृत्तीनाम् ।
लुब्धकधीवरपिशुना, निष्कारणवैरिणो जगति ॥५॥

कपिरपि च कापिशायन–मदमत्तो वृश्चिकेन संदष्टः ।
अपि च पिशाचग्रस्तः, किं ब्रूमो वैकृतं तस्य ॥६॥

परोक्षे कार्यहन्तारं, प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं, विषकुम्भं पयोमुखम् ॥७॥

उपकारिणि विश्वस्ते, साधुजने यः समाचरति पापम् ।
तं जनमसत्यसन्धं, भगवति ! वसुधे ! कथं वहसि ! ॥८॥

विद्यया सह मर्तव्यं, न तु देया कुशिष्यके ।
विद्यया लालितो मूर्खः, पश्चात्संपद्यते रिपुः ॥९॥

दुर्जनेन समं सख्यं, प्रीतिं चापि न कारयेत् ।
उष्णो दहति चाङ्गारः, शीतः कृष्णायते करम् ॥१०॥

नाऽहं काको महाराज !, हंसोऽहं विमले जले ।
नीचसंगप्रसंगेन, मृत्युरेव न संशयः ॥११॥

चौराणां दुर्जनानां च, शाकिनीनां विशेषतः ।
अभिप्राया न सिध्यन्ति, तेनेदं वर्तते जगत् ॥१२॥

साऽऽह रे ! सर्षपामानि, परछिद्राणि पश्यसि ।
आत्मनो बिल्वमात्राणि, पश्यन्नपि न पश्यसि ॥१३॥

निस्सारस्य पदार्थस्य, प्रायेणाडम्बरो महान् ।
न हि तादृग् ध्वनिः स्वर्णे, यादृक् कांस्ये प्रजायते ॥१४॥

दुर्जनः परिहर्त्तव्यो, विद्ययाऽलङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः, किमसौ न भयङ्करः ॥१५॥

वरं मच्चु वरं वाहि, वरं दारिद्दसंगमो ।
वरं अरण्णावासो अ, मा कुमित्ताण संगमो ॥१६॥

क्षणे रुष्टा क्षणे तुष्टा, रुष्टा तुष्टा क्षणे क्षणे ।
अव्यवस्थितचित्तानां, प्रसादोऽपि भयङ्करः ॥१७॥

दुर्जनः कालकूटश्च, ज्ञातमेतौ सहोदरौ ।
अग्रजन्मानुजन्मा च, न विद्मः कतरोऽनयोः ॥१८॥

सर्पः खलो नृपो वह्नि-रर्थी नारी यमो विधिः ।
शस्त्रापथ्याम्भोधिपाश्च, कस्याऽपि स्वा भवन्ति न ॥१९॥

पश्य लक्ष्मण ! पम्पायां, बकोऽयं परमधार्मिकः ।
शनैर्हि मुञ्चते पादौ, जीवानामनुकम्पया ॥२०॥

सहवासी विजानाति, सहवासिविचेष्टितम् ।
बकः किं वर्ण्यते राम ! येनाऽहं निष्कुलीकृतः ॥२१॥

सर्पः क्रूरः खलः क्रूरः, सर्पात्क्रूरतरः खलः ।
मन्त्रेण शाम्यते सर्पः, खलः केन न शाम्यते ॥२२॥

रत्तिंधा दीहंधा जच्चंधा मायमाणकोहंधा ।
कामंधा लोहंधा, इमे कमेणं विसेसंधा ॥२३॥

कण्टकानां खलानां च, सद्वयेव प्रतिक्रिया ।
उपानद् मुखभङ्गो वा, दूरतो वा विसर्जनम् ॥२४॥

शृणुयाच्च खलोक्तं सन्, श्रुतं वा नावधारयेत् ।
भुजङ्गानां गरैः किं वा, घटवद् भाव्यते सरः ॥२५॥

उष्ट्राणां विवाहेषु, गर्दभा वेदपाठकाः ।
परस्परं प्रशंसन्ति, अहो ! रूपमहो ! ध्वनिः ॥२६॥

"व्याघ्रस्य चोपवासेन, पारणं पशुमारणम् ( श्लोकार्धम् )"
"मणिमयमन्दिरमध्ये पश्यति पिपीलिकाच्छिद्रम् (श्लोकार्धम्)"

## ८२ साङ्गत्यफलप्रतिपादकसूक्तानि

पश्य सत्सङ्गमाहात्म्यं, स्पर्शपाषाणयोगतः ।
लोहं स्वर्णीभवेत् स्वर्ण-योगात् काचो मणीयते ॥१॥

गुणायन्ते दोषाः सुजनवदने दुर्जनमुखे,
गुणा दोषायन्ते किमिति जगतां विस्मयपदम् ।
महामेघः क्षारं पिबति मधुरं वारि कुरुते,
फणी पीत्वा क्षीरं वमति गरलं दुस्सहतरम् ॥२॥

गवाशनानां स गिरः शृणोति, चाऽहं तु राजन् ! मुनिपुङ्गवानाम् ।
प्रत्यक्षमेतद्भवतापि दृष्टं, संसर्गजा दोषगुणा भवन्ति ॥३॥

अश्वः शस्त्रं शास्त्रं वाणी, वीणा नरश्च नारी च ।
पुरुषविशेषं प्राप्ता, भवन्त्ययोग्याश्च योग्याश्च ॥४॥

राज्ञि धर्मिणि धर्मिष्ठाः, पापे पापाः समे समाः ।
राजानमनुवर्तन्ते, यथा राजा तथा प्रजा ॥५॥

धर्मशोकभयाहार-निद्राकामकलिक्रुधः ।
यावन्मात्रा विधीयन्ते, तावन्मात्रा भवन्त्यमी ॥६॥

## ८३ सात्त्विकभावसूक्तानि

प्रयातु लक्ष्मीश्चपलस्वभावा, गुणा विवेकप्रमुखाः प्रयान्तु ।
प्राणाश्च गच्छन्तु कृतप्रयाणा, मा यातु सत्त्वं तु नृणां कदाचित् ॥

मार्तण्डान्वयजन्मना क्षितिभृता चाण्डालसेवा कृता,
रामेणाद्भुतविक्रमेण गहना संसेविता कन्दरा ।
भीमाद्यैः शशिवंशजैर्नृपवरैर्दैन्यं कृतं रङ्कवत्,
स्वां भाषां परिपालनार्थपुरुषैः किं किं न चाङ्गीकृतम् ॥२॥

वृद्धा विशन्ति वनवासमुपासते च,
राज्यं त्यजन्ति कमलामवहीलयन्ति ।
प्राणांश्च जीर्णतृणवद्गणयन्ति धीराः,
कुर्वन्ति किं न निजवाक्परिपालनार्थम् ॥३॥

हस्ती स्थूलतनुः स चाङ्कुशवशः किं हस्तिमात्रोऽङ्कुशः ?
वज्रेणैव हताः पतन्ति गिरयः किं वज्रमात्रो गिरिः ?।
दीपे प्रज्वलिते प्रणश्यति तमः किं दीपमात्रं तमः ?,
तेजो यस्य विराजते स बलवान् स्थूलेषु कः प्रत्ययः ?॥४॥

चलेच्च मेरुः प्रचलेत्तु मन्दरश्चलेत्तु ताराग्रहचन्द्रभानु ।
कदापि काले पृथिवी चलेद्धि, तथापि वाक्यं न चलेद्धि साधोः ॥

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु,
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा,
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥६॥

दुःखं वरं चैव वरं च भैक्ष्यं, वरं च मौर्ख्यं हि वरं रुजोऽपि ।
मृत्युप्रवासोऽपि वरं नराणां, परं सदाचारविलङ्घनं नो ॥७॥

एकोऽहमसहायोऽहं, कृशोऽहमपरिच्छदः ।
स्वप्नेऽप्येवंविधा चिन्ता, मृगेन्द्रस्य न जायते ॥८॥

पौष्याः पञ्चशरा शरासनमपि ज्याशून्यमक्ष्णोर्लता,
जेतव्यं च जगत्त्रयं प्रतिदिनं जेताऽप्यनङ्गः किल ।
ईदृक्षेऽपि वशीकृतं त्रिभुवनं जानेऽस्मि तत्कारणं,
तेजो यस्य विराजते स बलवान् स्थूलेषु कः प्रत्ययः ॥९॥

प्रारभ्यते न खलु विघ्नभयेन नीचैः,
प्रारभ्य विघ्ननिहता विरमन्ति मध्याः ।
विघ्नैः सहस्रगुणितैरपि हन्यमानाः,
प्रारब्धमुत्तमगुणा न परित्यजन्ति ॥१०॥

विजेतव्या लङ्का चरणतरणीयो जलनिधिः,
विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः ।
तथाऽप्याजौ रामः सकलमवधीद्राक्षसकुलं,
क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ॥११॥

तावद्भयेन भेतव्यं, यावदनागतं भयम् ।
आगतं तु भयं दृष्ट्वा, यतितव्यं तदत्यये ॥१२॥

विदारयति यत्कर्म, तपसा च विराजते ।
तपोवीर्येण संयुक्तः, तस्माद्वीर इति स्मृतः ॥१३॥

मुनिभ्यः पृथिवी दत्ता, विक्रिता ससुता प्रिया ।
यत्करिष्यति दैवं तत्, हरिश्चन्द्रः सहिष्यते ॥१४॥

ज्ञानी विनीतः सुभगः सुशीलः, प्रभुत्ववान् न्यायपथप्रवृत्तः ।
त्यागी धनाढ्यः प्रशमी समर्थः, पञ्चाऽप्यमी भूमिषु कल्पवृक्षाः

पत्थरेण हओ कीवो, तं पत्थरं डक्कुमिच्छइ ।
मिगारिउ सरं पप्प, सरुप्पत्तिं विमग्गइ ॥१६॥

जह जह वायइ विहि, नवनवभङ्गेहिं निट्ठुरं पडहं ।
धिरा पसन्नवयणा, तहा तहा चेव नच्चन्ति ॥१७॥

छिज्जउ सीसं अह होउ बंधणं, चयउ सव्वहा लच्छी ।
पडिवन्नपालणे पुण, सुपुरिसाण जं होउ तं होउ ॥१८॥

अशान्ति वार्या न हि तूलराशे, गिरेश्च कश्चित्प्रतिभाति भेदः ।
उपस्थिते विघ्न एव पुंसां, सारेतरत्वं प्रतिभाव्यतेऽन्तः ॥१९॥

वरं हि नरके वासो, धर्महीने कुले न तु,
नरकात् क्षीयते पाप–मितरस्माच्च वर्धते ॥२०॥

यथा गच्छन्ति सौख्यानि, तथा दुःखानि कर्मणा ।
हर्षखेदौ तथाऽप्यत्र, विमूढानां शरीरिणाम् ॥२१॥

दशायां विषमायां चेत्, वीरत्वं नोपयुज्यते ।
तत् तस्य समये कुत्रो–पयोगः क्रियते जनैः ॥२२॥

कज्जाइं अन्नह च्चिय–जीवा चिन्तन्ति निउणमइणो वि ।
कुणइ पुण अन्नह च्चिय, तिहुअणवलिओ विही ताइं ॥२३॥

पुव्वज्जियकम्मं चिय, संपयविवयाओ चिंतइ जियाणं ।
जा उण चिंता तेसिं, सा विहला दुक्खफलया वा ॥२४॥

जं च जत्थ जया होही, दिट्ठमणंतेहिं केवलीहिं तहा।
तं अन्नहा न सक्कइ, काउं सक्को वि कयजत्तो ॥२५॥

जं च जया नहु होइ, दिट्ठमणंतेहिं केवलीहि तहा।
तन्निव्वत्तणहेउं, जत्तो विहलो सुराणं वि ॥२६॥

जं चिय विहिणा लिहियं, तं चिय परिणमइ सयललोयस्स।
इय जाणेविय धीरा, विहुरे वि न कायरा हुंति ॥२७॥

विच्छायतां व्रजसि किं सहकारशाखिन् !,
यत्फाल्गुनेन सहसाऽपहृता मम श्रीः;
प्राप्ते वसन्तसमये तव सा विभूतिः,
भूयो भविष्यतितरामचिरादवश्यम् ॥२८॥

नाप्राप्यं अभिवाञ्छन्ति, नष्टं नेच्छन्ति शोचितुम्।
आपत्सु च न मुह्यन्ति, नराः पण्डितबुद्धयः ॥२९॥

दुःखं दुष्कृतसंक्षयाय महतां क्षान्तेः पदं वैरिणः,
कायस्याऽशुचिता विरागपदवी संवेगहेतुर्जरा,
सर्वत्यागमहोत्सवाय मरणं जातिः सुहृत्प्रीतये,
संपद्भिः परिपूरितं जगदिदं स्थानं विपत्तेः कुतः ? ॥३०॥

धीरेण वि मरिअव्वं, काउरिसेण वि अवस्स मरिअव्वं।
तम्हा अवस्स मरणे, वरं खु धीरत्तणे मरणं ॥३१॥

कर्णोऽपि लभते भूषाः, सोढछेदनवेदनः।
सोढदाहादिकष्टं च, स्वर्णमप्यश्नुते मणीन् ॥३२॥

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिल-प्रायोऽपि कष्टां दशा-
मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु गच्छत्स्वपि ।
मत्तेभेन्द्रविशालकुम्भदलनव्यापारबद्धस्पृहः,
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केशरी ॥३३॥

श्रियमनुभवन्ति धीरा, न भीरवः किमपि पश्य सञ्जातः ।
कर्णः स्वर्णालङ्कृति-रञ्जनरेखाङ्कितं चक्षुः ॥३४॥

पडिवन्नं दिणयरवासराणं, दोण्णं वि अखंडिअं होइ ।
सूरो न दिणेण विणा, दिणो अ नहु सूरविरहंमि ॥३५॥

अलसंतेण सज्जणेण जे, अक्खरा समुल्लविआ ।
ते पत्थरटंकुक्कीरिअव्वं, न अन्नहा हुंति ॥३६॥

लज्जा वारेइ मुहं, असंपया भणइ मग्गीरेमग्गी ।
दिन्नं मानकवाडं, देहीति न निग्गया वाणी ॥३७॥

उद्यमं साहसं धैर्यं, बलं बुद्धिः पराक्रमः ।
षडेते यस्य विद्यन्ते, तस्य दैवः पराङ्मुखः ॥३८॥

धीरैर्वीरैः समर्यादैः, सत्त्वं रक्ष्यं विवेकिभिः ।
समापन्ने निजप्राण-संशये सुमहत्यपि ॥३९॥

सत्त्वं चेदेकमप्यस्ति, किमन्यैर्बहुभिर्गुणैः ।
तदेव हन्त चेन्नास्ति, किमन्यैर्बहुभिर्गुणैः ॥४०॥

कार्यः संपदि नानन्दः, पूर्वपुण्यभिदे हि सा ।
नैवापदि विषादस्तु, सा हि प्राक् पापपिष्टये ॥४१॥

दुष्टस्य दण्डं सुजनस्य पूजा, न्यायेन कोशस्य च संप्रवृद्धिः ।
अपक्षपातो रिपुराष्ट्रचिन्ता, पञ्चैव यज्ञाः कथिता नृपाणाम् ॥

धन्नाण वि ते धन्ना, पुरिसा निस्सीमसत्तसंजुत्ता ।
जे विसमसंकडेसु, पडिया वि चयन्ति नो धम्मं ॥४३॥

किं जातैर्बहुभिः करोति हरिणी पुत्रैरकार्यक्षमैः,
पूर्णंचात्र वनान्तरे च ज्वलिते यैः सार्द्धमुत्पश्यति ।
एकेनाऽपि करीन्द्रकुम्भदलनव्यापारसारात्मना,
सिंही दीर्घपराक्रमेण शिशुना पुत्रेण गुञ्जायते ॥४४॥

जइ मंडलेण भासियं, हत्थीं दट्ठुण रायमग्गंमि ।
ता किं गयस्स जुत्तं, सुणहेण समं कलिं काउं ॥४५॥

यदि काको गजेन्द्रस्य, विष्ठां कुर्वीत मूर्धनि ।
कुलानुरूपं तत्तस्य, यो गजो गज एव सः ॥४६॥

पाण्डवानां पदैर्यानि, पावनानि वनानि च ।
मह्यं तान्येव रोचन्ते, कृतं पितृगृहेण मे ॥४७॥

काननं सदनं तन्मे, द्रुमाः कल्पद्रुमाश्च ते ।
पादैर्यत्राऽऽर्यपुत्रस्य, प्रसादः क्रियते स्वयम् ॥४८॥

ताम्बुलं भूषणं पुष्पं, रक्तवस्त्रविलेपनम् ।
विकृतीः षट् च नाऽऽदास्ये, यावन्मिलति नो प्रियः ॥४९॥

सती यद्यस्मि चेज्जैन–शासनेऽस्मि दृढा रुजुः ।
वारिदा वारि वर्षन्तु, तस्मात् कुण्डकाद्बहिः ॥५०॥

नलेन सह तेऽद्यापि, भोग्यं कर्मास्ति तिष्ठ तत् ।
इति व्रतोद्यतां भैमीं, तदा सूरिरबोधयत् ॥५१॥

स्वर्गश्च सोऽपवर्गश्च, यस्य ख्याता फलद्वयी ।
आजन्म तन्मयोपात्तं, ब्रह्मचर्यमतः परम् ॥५२॥

चारणश्रमणैः पूर्वं, इति मे प्रतिपादितम् ।
प्रथमं च चतुर्थं च, व्रतेष्वनुपमे व्रते ॥५३॥

प्रतिपेदे मया पूर्वं, प्राणिनामभयव्रतम् ।
ब्रह्मव्रतमिदानीं तु, मम भाग्यमहो ! महत् ॥५४॥

## ८४ नीतिसमर्थकसूक्तानि

वरं बाल्ये मृत्युर्न तु विभवहीनं निवसनं,
वरं प्राणत्यागो न पुनरधमागारगमनम् ।
वरं वेश्या भार्या न पुनरविनीता कुलवधूः,
वरं वासोऽरण्ये न पुनरविवेकाधिपपुरे ॥१॥

असन्तुष्टा द्विजा नष्टाः, सन्तुष्टाश्च महीभुजः ।
सलज्जा गणिका नष्टा, निर्लज्जा च कुलाङ्गना ॥२॥

निर्विषेणाऽपि सर्पेण, कर्त्तव्या महती फणा ।
विषं भवतु वा माऽस्तु, स्फटाटोपो भयङ्करः ॥३॥

तुल्येऽपराधे स्वर्भानुर्भानुमन्तं चिरेण यत् ।
हिमांशुमाशु ग्रसते, तन् म्रदिम्नः स्फुटं फलम् ॥४॥

पादाहतं यदुत्थाय, मूर्धानमधिरोहति ।
स्वस्थादेवापमानेऽपि, देहिनस्तद्वरं रजः ॥५॥

धर्मार्थकाममोक्षाणां, यस्यैकोऽपि न विद्यते ।
अजागलस्तनस्येव, तस्य जन्म निरर्थकम् ॥६॥

आचारः कुलमाख्याति, देशमाख्याति भाषणम् ।
संभ्रमः स्नेहमाख्याति, रूपमाख्याति भोजनम् ॥७॥

स्वामिद्रोही कृतघ्नश्च, मित्रविश्वस्तवञ्चकौ ।
चत्वारो नरकं यान्ति, यावच्चन्द्रदिवाकरौ ॥८॥

आज्ञाभङ्गो नरेन्द्राणां, गुरुणां मानमर्दनम् ।
भर्तृकोपश्च नारीणा–मशस्त्रं वध उच्यते ॥९॥

गुरवो यत्र पूज्यन्ते, यत्र धान्यं सुसंस्कृतम् ।
अदन्तकलहो यत्र, तत्र शक्र ! वसाम्यहम् ॥१०॥

विभवो वीतसंगानां, वैदग्ध्यं कुलयोषिताम् ।
दाक्षिण्यं वणिजां प्रेम, वेश्यानाममृतं विषम् ॥११॥

श्रेयांसि बहुविघ्नानि, भवन्ति महतामपि ।
अश्रेयसि प्रवृत्तानां, क्वापि यान्ति विनायकाः ॥१२॥

ज्ञेया गोष्ठी दरिद्रस्य, भृत्यस्य प्रतिकूलता ।
वृद्धस्य तरुणी भार्या, कुलक्षयविधायिनी ॥१३॥

यदि वाञ्छसि मूर्खत्वं, वसेर्ग्रामे दिनत्रयम् ।
अपूर्वस्यागमो नास्ति, पूर्वाधीतं विनश्यति ॥१४॥

आद्ये वयसि नाधीतं, द्वितीये नार्जितं धनम् ।
तृतीये नार्जितो धर्मश्चतुर्थे किं करिष्यति ? ॥१५॥

मातुः स्तन्यं रजःक्रीडा, मन्मना वागलज्जता ।
शैशवे भान्ति निर्हेतु-हास्यं भोगः पितुः श्रियः ॥१६॥

अनाथो व्ययकर्ता चा-प्यनाथः कलहप्रियः ।
आतुरः सर्वभक्षी च, नरः शीघ्रं विनश्यति ॥१७॥

प्रसरयति यथा कीर्ति- र्दिक्षु क्षपाकरसोदरा-
भ्युदयजननी याति स्फातिं यथा गुणपद्धतिः ।
कलयति परां वृद्धिं, धर्मः कुकर्महतिक्षमः,
कुशलजनने न्याय्ये कार्ये तथा पथि वर्त्तनम् ॥१८॥

नास्त्यनङ्गाधितं यस्य, नास्ति भङ्गो रणाङ्गणात् ।
नास्तीति याचके नास्ति, तेन रत्नवती क्षितिः ॥१९॥

अजारजः खररजः, तथा सम्मार्जनीरजः ।
दीपखट्वकयोश्छाया, लक्ष्मीं हन्ति पुराकृताम् ॥२०॥

शतं विहाय भोक्तव्यं, सहस्रं स्नानमाचरेत् ।
लक्षं विहाय दातव्यं, कोटिं त्यक्त्वा हरिं भजेत् ॥२१॥

प्राक्शिरःशयने विद्या, धनमायुश्च दक्षिणे ।
पश्चिमे प्रबला चिन्ता, मृत्युर्हानिस्तथोत्तरे ॥२२॥

श्रीर्मङ्गलात्प्रभवति, प्रागल्भ्याच्च प्रवर्धते ।
दाक्ष्यात्तु कुरुते मूलं, संयमात्प्रतितिष्ठति ॥२३॥

सुभाषितेन गीतेन, युवतीनां च लीलया ।
मनो न भिद्यते यस्य, स योगी ह्यथवा पशुः ॥२४॥

यदीच्छेत् विपुलां प्रीतिं, तत्र त्रीणि निवारयेत् ।
विवादमर्थसंबन्धः, परोक्षे दारदर्शनम् ॥२५॥

मुर्खैरपक्वबोधैश्च, सहालापश्चतुष्फलः ।
वाचां व्ययो मनस्ताप–स्ताडनं दुष्प्रवादनम् ॥२६॥

अनुचितकार्यारम्भः, स्वजनविरोधो बलीयसा स्पर्द्धा ।
प्रमदाजनविश्वासो, मृत्युद्वाराणि चत्वारि ॥२७॥

पितरं सद्गुरुं मित्रं, सुतं शिष्यं च बान्धवम् ।
यस्येच्छेत् शीघ्रमावृत्तिं, न तं दूरमनुव्रजेत् ॥२८॥

## ८५ सामान्योपदेशसूक्तानि

शास्त्रैर्निष्प्रतिभस्य किं गतदृशो दीप्रैः प्रदीपैश्च किं ?,
किं क्लिबस्य वधूजनैः प्रहरणैः किं कातरस्योल्बणैः ? ।
किं वाद्यैर्बधिरस्य भूषणगणैर्लावण्यहीनस्य किं ?,
किं भोज्यैर्ज्वरजर्जरस्य विभवैः प्रोढैरदातुश्च किम् ? ॥१॥

विश्वासप्रतिपन्नानां, वञ्चने का विदग्धता ।
अङ्कमारुह्य सुप्तानां, हन्तुं किं नाम पौरुषम् ? ॥२॥

सेतुं गत्वा समुद्रस्य, गङ्गासागरसंगमे ।
ब्रह्महा मुच्यते पापैः, मित्रद्रोही न मुच्यते ॥३॥

मित्रद्रोही कृतघ्नश्च, स्वामिविश्वस्तवञ्चकौ ।
चत्वारो नरकं यान्ति, यावच्चन्द्रदिवाकरौ ॥४॥

विदेशेषु धनं विद्या, व्यसनेषु धनं मतिः ।
परलोके धनं धर्मः, शीलं तु निखिलं धनम् ॥५॥

पञ्चैतानि पवित्राणि, सर्वेषां धर्मचारिणाम् ।
अहिंसासत्यमस्तेयं, त्यागो मैथुनवर्जनम् ॥६॥

जवो हि सप्तेः परमं विभूषणं, त्रपाऽङ्गनायाः कृशता तपस्विनः ।
द्विजस्य विद्यैव मुनेरपि क्षमा, पराक्रमः शस्त्रबलोपजीविनः ॥७॥

लोभश्चेदतिपापकर्मजनको यद्यस्ति किं पातकैः ?,
सत्यं चेत्तपसापि किं शुचिमनो यद्यस्ति तीर्थेन किम् ? ।
सौजन्यं यदि किं निजैश्च महिमा यद्यस्ति किं मण्डनैः ?,
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ? ॥८॥

बालसखित्वमकारणहास्यं, गर्दभयानमसंस्कृतवाणी ।
स्त्रीषु विवादोऽसज्जनमैत्रिः, षड्भिर्नरो लघुतामुपयाति ॥९॥

काके शौचं द्यूतकारे च सत्यं, सर्पे क्षान्तिः स्त्रीषु कामोपशान्तिः ।
क्लीबे धैर्यं मद्यपे तत्त्वचिन्ता, राजा मित्रं केन दृष्टं श्रुतं वा ? ॥

मृत्युः शरीरगोप्तारं, रक्षितारं धनं धरा ।
दुश्चारिणीव हसति, स्वपतिं पुत्रवत्सलम् ॥११॥

धर्मार्थं यस्य वित्तेहा, तस्यानीहा गरीयसी ।
प्रक्षालनाद्धि पङ्कस्य, दूरादस्पर्शनं वरम् ॥१२॥

रूपं जरा सर्वसुखं च तृष्णा, याञ्चा महत्त्वं गुणमात्मशंसा ।
खलेषु सेवा पुरुषाभिमानं, चिन्ता बलं हन्ति दयां च लक्ष्मीः ॥

त्रिवर्गसंसाधनमन्तरेण, पशोरिवायुर्विफलं नरस्य ।
तत्राऽपि धर्मं प्रवरं वदन्ति, न तं विना यद्भवतोऽर्थकामौ ।१४।

पादं पवित्रं कुरु तीर्थगमनं, हृदयं पवित्रं कुरु ज्ञानसारम् ।
मुखं पवित्रं जिनराजनाम, हस्तं पवित्रं कुरु दानपुण्यम् ॥१५॥

कामातुराणां न भयं न लज्जा, अर्थातुराणां न च बन्धुमित्रम् ।
क्षुधातुराणां न बलं न तेजो, चिन्तातुराणां न सुखं न निद्रा ॥

यत्नानुसारिणी विद्या, लक्ष्मीः पुण्यानुसारिणी ।
दानानुसारिणी कीर्ति–र्बुद्धिः कर्मानुसारिणी ॥१७॥

वैद्यराज ! नमस्तुभ्यं, यमराजसहोदर ! ।
यमस्तु हरति प्राणान्, वैद्यः प्राणधनानि च ॥१८॥

अतिवृष्टिरनावृष्टि–र्मूषकाः शलभाः शुकाः ।
अत्यासन्नाश्च राजानः, षडेता ईतयः स्मृताः ॥१९॥

अत्यागसहनो बन्धुः, सदैवानुमतः सुहृद् ।
एकक्रियं भवेन्मित्रं, समप्राणः सखा मतः ॥२०॥

जीर्णे भोजनमात्रेयः, कपिलः प्राणिनां दया ।
बृहस्पतिरविश्वासः, पाञ्चालः स्त्रीषु मार्दवम् ॥२१॥

आर्त्ता देवान् नमस्यन्ति, तपः कुर्वन्ति रोगिणः ।
निर्धना दानमिच्छन्ति, वृद्धा वेश्या पतिव्रता ॥२२॥

धर्मनिन्दी पङ्क्तिभेदी, निद्राछेदी निरन्तरम् ।
कथाभङ्गी वृथापाकी, पञ्चैतेऽत्यन्तपापिनः ॥२३॥

आदौ तावन्मधुरं, मध्ये तीक्ष्णं ततस्ततः कटुकम् ।
दुर्जनमैत्रीसदृशं, भोजनमिच्छन्ति नीतिज्ञाः ॥२४॥

राज्ञि राष्ट्रकृतं पापं, राज्ञः पापं पुरोहिते ।
भर्त्तरि स्त्रीकृतं पापं, शिष्यपापं गुरावपि ॥२५॥

एकरात्र्युषितस्यापि, या गतिर्ब्रह्मचारिणः ।
न सा क्रतुसहस्रेण, वक्तुं शक्या युधिष्ठिर ! ॥२६॥

आयव्ययमनालोच्य, यस्तु वैश्रमणायते ।
अचिरेणैव कालेन, सोऽत्र वै श्रमणायते ॥२७॥

कुलादपि वरं शीलं, वरं दारिद्र्यमामयात् ।
राज्यादपि वरं विद्या, तपसोऽपि वरं क्षमा ॥२८॥

कृतज्ञस्वामिसंसर्ग–मुत्तमस्त्रीपरिग्रहम् ।
कुर्वन् मित्रमलोभं च, नरो नैवाऽवसीदति ॥२९॥

उद्यमे नास्ति दारिद्र्यं, पठने नास्ति मुर्खता ।
मौनेन कलहो नास्ति, नास्ति जागरतो भयम् ॥३०॥

पापान्निवारयति योजयते हिताय,
गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले,
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥३१॥

नारीणां पितुरावासे, नराणां श्वसुरालये ।
एकस्थाने यतीनां च, वासो न श्रेयसे भवेत् ॥३२॥

स्मर्तव्योऽहं त्वया मित्र ! न स्मरिष्याम्यहं पुनः ।
स्मरणं चेतसो धर्मः, तच्चेतस्तु त्वया हृतम् ॥३३॥

त्यजेदेकं कुलस्यार्थे, ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे, आत्मार्थे पृथिवीं त्यजेत् ॥३४॥

यौवनं धनसंपत्तिः, प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय, किं पुनस्तच्चतुष्टयम् ? ॥३५॥

नात्यन्तसरलैर्भाव्यं, गत्वा पश्य वनस्पतिम् ।
सरलास्तत्र छिद्यन्ते, कुब्जास्तिष्ठन्ति पादपाः ॥३६॥

नैर्गुण्यमेव साधीयो, धिगस्तु गुणगौरवम् ।
शाखिनोऽन्ये विराजन्ते, खण्ड्यन्ते चन्दनद्रुमाः ॥३७॥

न निमित्तद्विषां क्षेमो, नायुर्वैद्यकविद्विषाम् ।
न श्रीर्नीतिद्विषामेकमपि धर्मद्विषां न हि ॥३८॥

## ८६ सम्पकुसुम्पयोः सूक्तानि

परस्परस्य छिद्राणि, ये न रक्षन्ति जन्तवः ।
त एव निधनं यान्ति, वल्मीकोदरसर्पवत् ॥१॥

सर्वेऽपि यत्र नेतारः, सर्वे पण्डितमानिनः ।
सर्वे महत्त्वमिच्छन्ति, तद्वृन्दमवसीदति ॥२॥

बहूनामल्पसाराणां, समवायो हि दुर्जयः ।
तृणैर्विधीयते रज्जु–र्बध्यन्ते दन्तिनस्तया ॥३॥

एते शतं वयं पञ्च, यावद्वैरं परस्परम् ।
परैस्तु परिभूता हि, वयं पञ्चोत्तरं शतम् ॥४॥

## ८७ शासनप्रभावकानां महिमसूचकसूक्तानि

त एव धन्या यशसां निकेतनं, तैरेव रत्नप्रसवा वसुन्धरा ।
बलेन वीर्येण धिया ह्रिया श्रिया, कुर्वन्ति ये श्रीजिनशासनोन्नतिम्

साहम्मियवच्छल्लम्मि, उज्जुया उज्जुया य सज्झाए ।
चरणकरणेसु य रया, तित्थस्स पभावगा हुंति ॥२॥

विश्वामित्रपराशरप्रभृतयो ये चाम्बुपत्राशनाः,
तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।
आहारं सघृतं पयोदधियुतं ये भुञ्जते मानवाः,
तेषामिन्द्रियनिग्रहो वत कथं दम्भः समालोक्यताम् ॥३॥

तच्छ्रुत्वा सूरयोऽवोचन्, क्रमोऽयमविवेकिनाम् ।
किन्तु सत्त्ववतां राजन् !, ह्युत्तमानामयं क्रमः ॥४॥

सिंहो बली द्विरदसाम्बरमांसभोजी,
संवत्सरेण कुरुते रतमेकवारम् ।
पारापतः खरशिलाकणभोजनोऽपि,
कामी भवत्यनुदिनं ननु कोऽत्र हेतुः ? ॥५॥

यूकालिक्षशतावलीविलविलच्चोलश्चलत्कम्बलो,
दन्तानां मलमण्डलीपरिचयाद् दुर्गन्धरुद्धाननः ।
नाशावंशविरोधनाद् गिणगिणत्पाठप्रतिष्ठाविधिः,
सोऽयं हेमडसेवडः पिलपिलत्खल्लिः समागच्छति ॥६॥

वाक्यं तत्परुषाक्षरं मुनिपतिः श्रुत्वा न कोपं दधौ,
किञ्चित् तं स्मितधौतदन्तवसनः प्रोचे क्षमावानिति ।
किं पद्ये प्रथमं विशेषणमिहाधीतं न धीवारिधे !,
सोऽयं सेवडहेमडेति विदुषा वाच्यं त्वयाऽतः परम् ॥७॥

पूर्वं वीरजिनेश्वरेऽपि भगवत्याख्याति धर्मं स्वयं,
प्रज्ञावत्यभयेऽपि मन्त्रिणि न यां कर्त्तुं क्षमः श्रेणिकः ।
अक्लेशेन कुमारपालनृपतिस्तां जीवरक्षां व्यधाद्,
यस्याऽऽस्वाद्य वचःसुधां स जयतु श्रीहेमचन्द्रो गुरुः ॥८॥

मया क्लेशसहस्रेण, रससिद्धिर्व्यधीयत ।
अमीषां नु स्वभावेन, स्ववपुःस्थैव विद्यते ॥९॥

क्वटरे तपसः शक्ति–र्नूपुरे भाग्यवैभवम् ।
स्वर्णपुंवद् यदीयेयं, तनुः सर्वाऽपि रैमयी ॥१०॥

ठाणट्ठिएहिं गुरुहिं, जाणूवरि अंगुलिं भमंतेहिं ।
पीडा हरिया रन्नो, पढिया केणावि तो गाहा ॥११॥

जह जह पएसिणिं जाणुयम्मि पालित्तओ भमाडेइ ।
तह तह मुरुंडरायस्स, सीसवियणा परिफिडइ ॥१२॥

दिदृक्षुर्भिक्षुरेकोऽस्ति, वारितो द्वारि तिष्ठति ।
हस्तन्यस्तचतुः श्लोको, किं वाऽऽगच्छतु गच्छतु ॥१३॥

दीयतां दशलक्षाणि, शासनानि चतुर्दश ।
हस्तन्यस्तचतुः श्लोको, यद्वाऽऽगच्छतु गच्छतु ॥१४॥

अपूर्वेयं धनुर्विद्या, भवता शिक्षिता कुतः ।
मार्गणौघः समभ्येति, गुणो याति दिगन्तरम् ॥१५॥

सर्वदा सर्वदोऽसीति, मिथ्या संस्तूयसे बुधैः ।
नाऽरयो लेभिरे पृष्ठं, न वक्षुः परयोषितः ॥१६॥

आहते तव निःस्वाने, स्फुटितं रिपुहृद्घटैः,
गलिते तत्प्रियानेत्रे, राजन् ! चित्रमिदं महत् ॥१७॥

सरस्वती स्थिता वक्त्रे, लक्ष्मीः करसरोरुहे ।
कीर्तिः किं कुपिता राजन् !, येन देशान्तरं गता ॥१८॥

भूरिभारभराक्रान्तः, स्कन्धोऽयं तव बाधति ।
न तथा बाधते स्कन्धो, यथा बाधति बाधते ॥१९॥

स्फुरन्ति वादिखद्योताः, सांप्रतं दक्षिणापथे ।
नूनमस्तं गतो वादी, सिद्धसेनो दिवाकरः ॥२०॥

वादविद्यावतोऽद्यापि, लेखशालामनुज्झता ।
देवसूरिप्रभोः साम्यं कथं स्याद्देवसूरिणा ॥२१॥

यदि नाम कुमुदचन्द्रं, नाजेष्यद्देवसूरिरहिमरुचिः ।
कटिपरिधानमधास्यत, कतमः श्वेताम्बरो जगति ॥२२॥

श्री आर्यसुहस्तिसूरि

कोसंबीए जेणं दमगो, पव्वाविओ जो जाओ ।
उज्जेणीए संपइराया, सो नंदउ सुहत्थी ॥२३॥

दशपूर्वधरने जिनकल्प आदरवानो निषेध

सम्पूर्णो दशपूर्वधरो हि अमोघवचनत्वाद्धर्मोपदेशनया भव्योपकारित्वेन तीर्थवृद्धिकारित्वात्प्रतिमाकल्पं न प्रतिपद्यते।

श्री हेमचंद्रसूरिना जन्म वखते थयेल देववाणी

तदा वागशरीर्यासीद्, व्योम्नि भाव्येष तत्त्ववित् ।
जिनवज्जिनधर्मस्य, स्थापकः सूरिशेखरः ॥२४॥

कुमारपाळ संबंधी भविष्यवाणी

अन्यदा वज्रशाखायां, मुनिचन्द्रकुलोद्भवम् ।
आचार्यं हेमचन्द्रं स, द्रक्ष्यति क्षितिनायकः ॥२५॥

"प्राणित्राणं महत्पुण्यं, मिथ्यावादस्त्वयं लघुः ॥श्लोकार्धः॥"

हिंसानिषेधके तस्मिन्, दूरेऽस्तु मृगयादिकम् ।
अपि मत्कुणयूकादि, नान्त्यजोपि हनिष्यति ॥२६॥

जलचर-स्थलचर-खेचराणां सदेहिनाम् ।
रक्षिष्यति सदामारिं, शासने पाकशासनः ॥२७॥

तस्मिन्निषिद्धपापर्द्धी-वरण्ये मृगजातयः ।
सदाप्यविघ्नरोमन्था, भाविन्यो गोष्ठधेनुवत् ॥२८॥

ये चाजन्मापि मांसादा-स्ते मांसस्य कथामपि ।
दुःस्वप्नमिव तस्याज्ञा-वशान्नेष्यन्ति विस्मृतिम् ॥२९॥

श्री कुमारपालराजानी भावना

वणिजस्ते वरं मत्तः, प्राप्तराज्यान्महीतले ।
येषां वित्तं समायाति, यतिकार्ये निरन्तरम् ॥३०॥
"यतिदानविहीनेना-नेन राज्येन किं मम ॥ श्लोकार्धः॥"

श्री हेमचन्द्राचार्यनो उत्तर

तमूचिरे ते चरणैकचित्ताः, समग्रसिद्धान्तविचारवित्ताः ।
प्रतिग्रहो भूमिपतेर्यतीनां,राजन्निषिद्धोऽस्ति जिनेश्वरेण ॥३१॥
कथं जिनाज्ञां त्रिदशेशमान्यां, विराधयन्तीह मुमुक्षवोऽमी ।
या मानिता यच्छति मुक्तिसौख्यं, विमानिता संसृतिवासमुच्चैः ॥

श्री कुमारपालनी प्रभुप्रत्ये प्रार्थना

प्राप्तस्त्वं बहुभिः शुभैस्त्रिजगतश्चूडामणिदेवता,
निर्वाणप्रतिभूरसावपि गुरुः श्रीहेमचन्द्रप्रभुः ।
तन्नातः परमस्ति वस्तु किमपि स्वामिन् यदभ्यर्थये,
किन्तु त्वद्वचनादरः प्रतिभवं स्याद्वर्धमानो मम ॥३३॥
"प्रत्यहं मया सौवर्णकमलैः गुरुपादौ पूजनीयौ,"

कुमारपालने हेमचंद्राचार्ये कहेलुं भविष्य

भो कुमार ! गुणाधार !, नवाङ्केश्वरवत्सरे (११९९) ।
चतुर्थ्यां मार्गशीर्षस्य, श्यामायां रविवासरे ॥३४॥
पुष्यर्क्षेऽपराह्ने चेत्, तव राज्यं न जायते ।
निमित्तालोकसंन्यास-स्तर्हितः परमस्तु नः ॥३५॥ युग्मम् ॥

मतांतर

" श्रीविक्रमाच्छरदां नवनवत्यधिकेषु कार्तिकमासे। हस्तार्के द्वितीयायां गतेष्वेकादशशतेषु ॥ कुमारपालो नृपो भविष्यति ॥ "

जाता दिग्विजयाः कुमारनृपतेः पञ्चायुती स्यन्दना,
जग्मुर्जङ्गमपर्वता इव शतान्येकादशेभेष्वराः ।
रेवन्तप्रतिमा हयाः पृथुरया लक्षाणि त्वेकादश,
प्रख्याताः पदिकाः समीपरसिका लक्षास्तथाऽष्टादश ॥३६॥

## ८८ उपदेशवैफल्यसूचकसूक्तानि

उपदेशो हि मूर्खाणां, प्रकोपाय न शान्तये ।
पयःपानं भुजङ्गानां, केवलं विषवर्द्धनम् ॥१॥

द्वौ हस्तौ द्वौ च पादौ च, दृश्यसे पुरुषाकृतिः ।
रे रे वानर ! मूर्खस्त्वं, गृहं किं न करोष्यपि ! ॥२॥

शुचिमुखि ! दुराचारि !, रण्डे ! पण्डितमानिनि ! ।
असमर्थो गृहारम्भे, समर्थो गृहभञ्जने ॥३॥

किं करिष्यन्ति वक्तारः, श्रोता यत्र न विद्यते ।
नग्नक्षपणके देशे, रजकः किं करिष्यति ॥४॥

प्रायः संप्रति कोपाय, सन्मार्गस्योपदर्शनम् ।
विलूननासिकस्येव, विशुद्धादर्शदर्शनम् ॥५॥

लोक व्यवहारने नही जाणनार पंडित पण मूर्ख

काव्यं करोतु परिजल्पतु संस्कृतं वा,
सर्वाः कलाः समधिगच्छतु वाच्यमानाः ।
लोकस्थितिं यदि न वेत्ति यथानुरूपां,
सर्वस्य मूर्खनिकरस्य स चक्रवर्ती ॥६॥

अल्पबुद्धि तथा दुर्विदग्धने तात्त्विक उपदेश हितकारी नथी

जनानामल्पबुद्धीनां, नैतत्तत्त्वं हितावहम् ।
निर्बलानां क्षुधार्तानां, भोजनं चक्रिणो यथा ॥७॥

ज्ञानांशदुर्विदग्धानां, तत्त्वमेतदनर्थकृत् ।
अशुद्धमन्त्रपाठस्य, फणिरत्नग्रहो यथा ॥८॥

## ८९ आदरमानसूचकसूक्तानि

अधमा धनमिच्छन्ति, धनमाने हि मध्यमाः ।
उत्तमा मानमिच्छन्ति, मानं हि महतां धनम् ॥१॥

वदनं नैव सानन्द-मासनं न च भाषणम् ।
न कार्यवादपृष्टव्यं, तस्य पार्श्वे गतेन किम् ? ॥२॥
वदनं यस्य सानन्द-मासनं चैव भाषणम् ।
प्रष्टव्यं कार्यवादस्य, गम्यते तस्य सन्निधौ ॥३ ।

मा गा इत्यपमङ्गलं व्रज इति स्नेहेन हीनं वच-
स्तिष्ठेति प्रभुता यथारुचि कुरुष्वेत्यप्युदासीनता ।
किं ते साम्प्रतमाचराम उचितं तत्सोपचारं वचः,
स्मर्तव्या वयमेव मित्र ! भवता यावत्पुनर्दर्शनम् ॥४॥

आटलानो विश्वास करतो नहीं,

ये कुलाचारतो भ्रष्टाः, परलोकादभीरवः ।
तेषां कुर्वीत विश्वासं, न कथञ्चन मानवः ॥५॥

नारी–नदी–नरेन्द्राणां, नाग–नीच–नियोगिनाम् ।
नखिनाञ्च न विश्वासः, कर्तव्यो हितकाङ्क्षिणा ॥६॥

वेश्याक्षकुक्कुराश्चौर–नीर–मार्जार–मर्कटाः ।
जातवेदाः कलादश्च, न विश्वस्या इमे क्वचित् ॥७॥

व्याघ्र–वानर–सर्पाणां, यन्मया न कृतं वचः ।
तेनाहं दुर्विनीतेन, कलादेन विनाशितः ॥८॥

नदीनां च नखिनां च, श्रृंगिणां शस्त्रपाणिनाम् ।
विश्वासो नैव कर्तव्यः, स्त्रीषु राजकुलेषु च ॥९॥

कार्मणादिकथी पतिने वश करवो ते पतिद्रोह थाय छे

" मन्त्रमूलबलात्प्रीतिः पतिद्रोहोऽभिधीयते । श्लोकार्धः ।"

कुळवान कन्याने परणीने तेने समदृष्टिथी न देखनार पापी छे

विवाहयित्वा यः कन्यां, कुलजां शीलधारिणीम् ।
समदृष्ट्या न पश्येत, स पापिष्ठतमो मतः ॥१०॥

## ९० अविश्वासप्रतिपादकसूक्तानि

ये वञ्चिता धूर्तजनेन लोकाः, ते साधुसंगेन न विश्वसन्ति ।
उष्णेन दग्धाः किल पायसेन, पिबन्ति फूत्कृत्य दधीनि तक्रम्॥

वैरवैश्वानरव्याधि-र्वादव्यसनलक्षणाः ।
महानर्थाय जायन्ते, वकारा पञ्चवर्धिताः ॥२॥

अणथोवं वणथोवं, अग्गीथोवं कसायथोवं च ।
न हु भे विससिअव्वं, थोवं वि हु तं वहु होइ ॥३॥

दासत्तं देइ अणं, अचिरा मरणं वणो वि सम्पन्नो ।
सव्वस्स दाहमग्गि, देइ कसाया भवमणन्तं ॥४॥

शास्त्रं सुनिश्चलधिया परिभावनीयं,
आराधितेऽपि नृपतौ परिशङ्कनीयम् ।
आत्मीकृतापि युवतिः परिरक्षणीया,
शास्त्रे नृपे च युवतौ च कुतः स्थिरत्वम् ? ॥५॥

दुर्जनानां नरेन्द्राणां, नारीणां विलसज्जनाम् ।
विश्वासो नैव कर्त्तव्यः, कुगुरूणां विवेकिना ॥६॥

स्त्रीणां गुह्यं न वक्तव्यं, प्राणैः कण्ठगतैरपि ।
नीयते पक्षिराजेन, पुण्डरीको यथा फणी ॥७॥

## ९१ मूर्खताप्रतिपादकसूक्तानि

शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो,
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ ।
व्याधिर्भैषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं,
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥१॥

मूर्खत्वं सुलभं भजस्व सुमते ! मूर्खस्य चाष्टौ गुणा,
निश्चिन्तो बहुभोजनोऽतिमुखरो रात्रिंदिवा स्वप्नभाक् ।
कार्याकार्यविचारणान्धबधिरो मानापमाने समः,
प्रायेणामयवर्जितो दृढवपुर्मूर्खः सुखं जीवति ॥२॥

श्रोतव्ये च कृतौ कर्णौ, वाग्बुद्धिश्च विचारणे ।
यः श्रुतं न विचारेत, स कार्यं विन्दते कथम् ? ॥३॥

हितमहितमुचितमनुचितमवस्तुवस्तुस्वयं यो न वेत्ति ।
स पशुः शृङ्गविहीनः, संसारवने परिभ्रमति ॥४॥

येषां न विद्या न तपो न दानं, ज्ञानं न शीलं न गुणो न धर्मः ।
ते मृत्युलोके भुवि भारभूताः, मनुष्यरूपेण मृगाश्चरन्ति ॥५॥

साहित्यसंगीतकलाविहीनः, साक्षात्पशुः पुच्छविषाणहीनः ।
तृणं न खादन्नपि जीवमानः, तद्भागधेयं परमं पशूनाम् ॥६॥

खादन्न गच्छामि हसन्न जल्पे,
गतं न शोचामि कृतं न मन्ये ।
द्वाभ्यां तृतीयो न भवामि राजन् !,
किं कारणं भोज ! भवामि मूर्खः ॥७॥

पठितेनाऽपि मर्तव्यं, शठेनाऽपि तथैव च ।
उभयोर्मरणं द्रष्ट्वा, कण्ठशोषं करोति कः ? ॥८॥

अजातमृतमूर्खेभ्यो, मृताऽजातौ सुतौ वरम् ।
यतस्तौ स्वल्पदुःखाय, यावज्जीवं जडः पुनः ॥९॥

नमन्ति फलिता वृक्षा, नमन्ति कुशला नराः ।
शुष्कं काष्ठं च मूर्खाश्च, भज्यन्ते न नमन्ति च ॥१०॥

स्वयं मूर्खोऽलसो यश्च, परवागविचारकः ।
स दुःखी स्याद्यथा शीत–पीडितो जटिलः पुरा ॥११॥

रुदितमिदमरण्ये खण्डनं यत्तृणानां,
वियति नियतमेते, निष्ठुरा मुष्टिघाताः ।
मृतकवपुषि पूजा मण्डनं चान्धवक्त्रे,
यदविबुधजनानामग्रतो धर्मवादः ॥१२॥

गीतकाव्यविनोदेन, कालो गच्छति धीमताम् ।
व्यसनेन हि मूर्खाणां, निद्रया कलहेन वा ॥१३॥

पण्डितेषु गुणाः सर्वे, मूर्खे दोषास्तु केवलम् ।
तस्मान् मूर्खसहस्रेण, प्राज्ञ एको न लभ्यते ॥१४॥

## ९२ कन्यादानसूक्तानि

मूर्खनिर्धनदूरस्थ–शूरमोक्षाभिकाङ्क्षिणाम् ।
त्रिगुणाधिकवर्षाणामेषां कन्या न दीयते ॥१॥

कुलं च शीलं च सनाथता च, विद्या च वित्तं च वपुर्वयश्च ।
वरे गुणाःसप्त विलोकनीया, अतः परं भाग्यवशा हि कन्या ॥२॥

जातेति चिन्ता महतीति शोकः,कस्य प्रदेयेति महान् विकल्पः।
दत्ता सुखं स्थास्यति वा न वेति,कन्यापितृत्वं किल हन्त कष्टम् ॥

### आटलाने कन्या न आपवी

अत्यद्भूतधनाढयस्य, अतिशीतस्य रोषिणः ।
सरोग्यंगवैकल्यस्य, तेषां कन्या न दीयते ॥४॥

बधिर-क्लीब-मूकानां, खंजांध जड-चेतसाम् ।
पितृ-मातृवियोगिनां, तेषां कन्या न दीयते ॥५॥

कुल-जातिविहीनानां, गेहिनी-पुत्रयुक्तानाम् ।
सहसा घातकर्तृणां, तेषां कन्या न दीयते ॥६॥

कुशील-चौर्ययुक्तानां, द्यूत-मद्य-पलाशिनाम् ।
वैदेशिक-स्वगोत्रिणां, तेषां कन्या न दीयते ॥७॥

सदैवोत्पन्नभक्षिणा-मालस्यहतचेतसाम् ।
बहुवैरापवादानां, तेषां कन्या न दीयते ॥८॥

दूरस्थानामविद्यानां, मोक्ष-दीक्षाभिकाङ्क्षिणाम् ।
शूराणां निर्धनानां च, तेषां कन्या न दीयते ॥९॥

### अगम्य स्त्रीओ

अस्पृश्या[१] गोत्रजा[२] वर्षाधिका[३] प्रव्रजिता[४] तथा ।
नाष्टौ गम्या कुमारी[५] च मित्र[६]-राज[७]-गुरुस्त्रियः[८] ॥१०॥

### त्याग करवा योग्य स्त्रीओ,

कुदेहां विगतस्नेहां, लज्जा-शील-कुलोज्झिताम् ।
अतिप्रचण्डां दुस्तुण्डां, गृहिणीं परिवर्जयेत् ॥११॥

## ९३ बुद्धिप्रकारसूक्तानि

बुद्धिः स्मृतिश्च प्रज्ञाश्च, मतिः पर्यायवाचकाः ।
श्रीसद्भिः पुनरेतासां, पृथग्भेदाः प्रकीर्तिताः ॥१॥

भविष्यत्कालविषया, मतिस्तावत्प्रकीर्तिता ।
बुद्धिश्च वर्तमाने स्या-दतीते च स्मृतिर्भवेत् ॥२॥

कालत्रये च विज्ञेया, प्रज्ञा सा च चतुर्विधा ।
क्षयं गते भवेज्जन्तो-र्मत्यावरणकर्मणि ॥३॥

औत्पातिकी वैनयिकी, कार्मिकी पारिणामिकी ।
चतुर्भेदा भवेद्बुद्धिः, पञ्चमी नोपलभ्यते ॥४॥

अदृष्टाश्रुतपूर्वे या, वस्तुन्युत्पद्यते क्षणात् ।
बुद्धिरौत्पातिकी नाम, सा बुधैः परिकीर्तिता ॥५॥

स्थितोऽनलगिरौ मेण्ठीभूते त्वयि शिवाङ्कगः ।
अहं विशाम्यग्निभीरुरथदारुकृताञ्चिताम् ॥६॥

अरण्यमेतत्सवितास्तमागतो, न चाधुना संभवतीह मानवः ।
प्रायस्तदेतेन खगादिभाजा, भाव्यं स्मरारातिसमाननाम्ना ॥७॥

## ९४ इन्द्रियदुष्टताख्यापकानि सूक्तानि

आपदां कथितः पन्था, इन्द्रियाणामसंयमः ।
तज्जयः संपदां मार्गो, यः श्रेष्ठस्तत्र गम्यताम् ॥१॥

विवेकद्विपहर्यक्षैः, समाधिधनतस्करैः ।
इन्द्रियैर्न जितो योऽसौ, धीराणां धुरि गण्यते ॥२॥

कुरङ्गमातङ्गपतङ्गभृङ्ग-मीना हता पञ्चभिरेव पञ्च ।
एकः प्रमादी स कथं न हन्यते, यः सेव्यते पञ्चभिरेव पञ्च ॥३॥

प्रसज्यते यौवन एव जन्तो, रेकैकरूपे विषये दृगादिः ।
लोलाऽतिलोला तु वयस्त्रयेऽपि, रसे च वाक्ये च कृतप्रसक्तिः ४

यदिह नरकतिर्यग्मानवस्वर्गिषु स्यात्,
किमपि विषयदुःखं देहजं मानसं स्यात् ।
तदजितकरणानां जृम्भितं विद्ध्यशेषं,
सुखमपि यत्कार्यं सर्वमेतज्जयस्य ॥५॥

आत्मभूपतिरयं सनातनः, पीतमोहमदिराविमोहितः ।
किङ्करस्य मनसोऽपि किङ्करै-रिन्द्रियैरहह किङ्करीकृतः ॥६॥

दुद्धदहीविगईओ, आहारेइ अभिक्खणं ।
अरए अ तवोकम्मे, पावसमणु त्ति वुच्चइ ॥७॥

जहा दवग्गी पउरेंधणे वणे, समारुओ नोवसमं उवेइ ।
एविंदियग्गीवि पगामभोइणो, न बंभयारिस्स हिताय कप्पइ ॥८॥

तेनागमानाममृतं निपीतं, शुश्रूपिताः सद्गुरवश्च तेन ।
पञ्चेन्द्रियार्थाश्चतुरः कषाया,-नेकैकवीरानपि यो जिगाय ॥९॥

## २५ कलियुगसूक्तानि

कालः संप्रति वर्तते कलियुगः सन्तो नरा दुर्लभाः,
देशाश्च प्रलयं गताः करभरैर्लोभं गता पार्थिवाः ।

नानाचौरगणा मुषन्ति पृथिवीमार्यो जनः क्षीयते
पुत्रस्याऽपि न विश्वसन्ति पितरः कष्टं युगं वर्त्तते ॥१॥

सीदन्ति सन्तो विलसन्त्यसन्तः,
पुत्रा म्रियन्ते जनकश्चिरायुः ।
परेषु तोषः स्वजनेषु रोषः,
पश्यन्तु लोकाः कलिकेलितानि ॥२॥

अनृतपटुता चौर्ये चित्तं सतामपमानता,
मतिरविनये शाठ्यं धर्मे गुरुष्वपि वञ्चना ।
ललितमधुरा वाक्प्रत्यक्षे परोक्षविभाषिता,
कलियुगमहाराजस्यैताः स्फुरन्ति विभूतयः ॥३॥

## १६ लौकिकधर्मशास्त्राभिप्रायप्रतिपादकसूक्तानि

मद्यमांसाशनं रात्रौ, भोजनं कन्दभक्षणम् ।
ये कुर्वन्ति वृथा तेषां, तीर्थयात्रा जपस्तपः ॥१॥

वृथा चैकादशी प्रोक्ता, वृथा जागरणं हरेः ।
वृथा पौष्करीया यात्रा, वृथा चान्द्रायणं तपः ॥युग्मम्॥२॥

यस्मिन्गृहे सदाऽन्नार्थं, मूलकः पच्यते जनैः ।
श्मशानतुल्यं तद्वेश्म, पितृभिः परिवर्जितम् ॥३॥

मूलकेन समं चान्नं, भुङ्क्ते यस्तु नराधमः ।
तस्य शुद्धिर्न विद्येत, चान्द्रायणशतैरपि ॥युग्मम्॥४॥

चित्तं रागादिभिः क्लिष्ट–मलीकवचनैर्मुखम् ।
जीवहिंसादिभिः कायो, गङ्गा तस्य पराङ्मुखी ॥५॥

परद्रव्यपरद्रोह–परनारीपराङ्मुखः ।
गङ्गाप्याह कदाऽऽगत्य, मामयं पावयिष्यति ॥६॥

यूपं छित्त्वा पशून् हत्वा, कृत्वा रुधिरकर्दमम् ।
यद्येवं गम्यते स्वर्गे, नरके केन गम्यते ? ॥७॥

परस्त्रिपरद्रव्येषु, जीवहिंसासु यो मतिम् ।
न करोति पुमान् भूप !, तोष्यते तेन केशवः ॥८॥

यस्य रागादिदोषेण, न दुष्टं नृप ! मानसम् ।
विशुद्धचेतसा तेन विष्णु–स्तोष्यते सर्वदा ॥९॥

कृते वर्षसहस्रेण, त्रेतायां हायनेन च ।
द्वापरे यच्च मासेन, ह्यहोरात्रेण तत्कलौ ॥१०॥

अस्तंगते दिवानाथे, आपो रुधिरमुच्यते ।
अन्नं मांससमं प्रोक्तं, मार्कण्डेन महर्षिणा ॥११॥

त्वया सर्वमिदं व्याप्तं, ध्येयोऽसि जगतां रवे ! ।
त्वयि चास्तमिते देव !, चाऽऽपो रुधिरमुच्यते ॥१२॥

पयोदपटलैश्छन्ने, नाश्नन्ति रविमण्डले ।
अस्तंगते तु भुञ्जाना, अहो ! भानोः सुसेवकाः ॥१३॥

यथात्मनि च पुत्रे च, सर्वभूतेषु यस्तथा ।
हितकामो हरिस्तेन, सर्वदा तोष्यते सुखम् ॥१४॥

न चलति निजवर्णधर्मतो यः,
सममतिरात्मसुहृद्विपक्षपक्षे ।
न हरति न च हन्ति किञ्चिदुच्चैः,
स्थिरमनसं तमवेहि विष्णुभक्तम् ॥१५॥
विमलमतिरमत्सरः प्रशान्तः,
शुचिचरितोऽखिलसत्त्वमित्रभूतः ।
प्रियहितवचनोऽसमानमायो,
वसति सदा हृदि तस्य वासुदेवः ॥१६॥
अयोध्या मथुरा माया, काशी काञ्ची अवन्तिका ।
पुरी द्वारवती चैव, सप्तैता मोक्षदायिका ॥१७॥

पौराणिक मते गाजर अने मुला मांस अने मदिरा समान छे

रक्तमूलकमित्याहु–स्तुल्यं, गोमांसभक्षणम् ।
श्वेतं तद्विद्धि कौन्तेय ! मूलकं मदिरोपमम् ॥१८॥

रींगणां कालिंगा अने मूला खानार अन्तकाले परमात्माने याद करी शकतो नथी

यस्तु वृन्ताककालिङ्ग–मूलकानां च भक्षकः ।
अन्तकाले स मूढात्मा, न स्मरिष्यति मां प्रिये ॥१९॥

## ९७ शकुनसूक्तानि

गोकन्याशङ्खवाद्यं दधिफलकुसुमं पावकं दीप्यमानं,
यानं वा विप्रयुग्मं हयगजवृषभं पूर्णकुम्भं ध्वजं वा ।

उत्खाता चैव भूमिर्जलचरयुगलं सिद्धमन्नं शवं वा,
वेश्यास्त्री मांसपिण्डं प्रियहितवचनं मङ्गलं प्रस्थितानाम् ॥१॥

प्रस्तावोचितवाक्येन, कटुवागपि मन्यते ।
प्रस्थितैर्वामतः कूजन्, यत् काकः कीर्त्यतेऽनघः ॥ २ ॥

दुग्धं पीत्वा रतं कृत्वा, तथा हत्वा गृहस्त्रियम् ।
स्नात्वा वान्त्वा च निष्ठीव्य, श्रुत्वा दुःशब्दमुल्बणम् ॥ ३ ॥

कारयित्वा नरः क्षौरं, अश्रुमोक्षं विधाय च ।
गच्छेद् ग्रामान्तरे नैव, शकुनापाटवेन च ॥ ४ ॥

नाप्रस्तावे वदन्वाक्यं, मान्यते मञ्जुगीरपि ।
गर्जन्नम्भोधरश्चारु, रोहिण्यां श्लाघ्यते न यत् ॥ ५ ॥

विनायकखरोष्ट्राणां, दुर्गादेसरवाजिनाम् ।
वृषसारसफेरूणां, वामे शब्दोऽभवत्तदा ॥ ६ ॥

अवदत् दक्षिणे पार्श्वे, पक्षी वृद्धविनायकः ।
अग्रे हस्ती पुनः पृष्ठे, गृद्धस्तस्य महात्मनः ॥ ७ ॥

कृष्णसारः सारमेयः, काकश्च मधुरस्वरः ।
अभूवन् दक्षिणात् पार्श्वात्, तस्य वामगता अमी ॥ ८ ॥

भ्रमरा हरिणा दुर्गा–नकुलौ चाषखञ्जनौ ।
वामभागादमी तस्य, दक्षिणं भागमैयरुः ॥ ९ ॥

पितरं सद्गुरुं मित्रं, सुतं शिष्यं च बान्धवम् ।
यस्येच्छेत् शीघ्रमावृत्तिं, न तं दूरमनुव्रजेत् ॥ १० ॥

जम्बू चासमऊरे, भारद्दाए तहेव नउले अ ।
दंसणमेव पसत्थं, पयाहिणे सव्वसंपत्ती ॥ ११ ॥

नकुलाजमयूराणां, चापखञ्जनयोरपि ।
दर्शनं कीर्तनं शब्दः, सर्वसिद्धिकरं नृणाम् ! ॥ १२ ॥

"दक्षिणात् वामगमनं प्रशस्तं श्व शृगाल्योः । [श्लोकार्ध]"
"लग्नं यस्मान्निमित्तानां, शकुनो दण्डनायकः । [श्लोकार्ध]"

## १८ उपदेशसप्ततिः

तित्थंकराणं चरणारविंदं नमित्तु, नीसेससुहाण कंदं ।
मूढोवि भासेमि हिओवएसं, सुणेह भव्वा ! सुकयप्पवेसं ॥१॥

सेविज्ज सव्वन्नुमयं विसालं, पालिज्ज सीलं पुण सव्वकालं ।
न दिज्जए कस्स वि कूडआलं, छिंदिज्ज एवं भवदुक्खजालं॥२॥

पयासियव्वं न परस्स छिद्दं, कम्मं करिज्जा न कया वि रुद्दं ।
मित्तेण तुल्लं च गणिज्ज खुद्दं, जेणं भविज्जा तुह जीव! भद्दं॥३॥

रोगेहिं सोगेहिं न जाव देहं, पीडिज्जए वाहिसहस्सगेहं ।
ताउज्जया ! धम्मपहे रमेह, बुहा ! मुहा मा दियहे ममेह ॥४॥

जया उदिण्णो नणु को वि वाही, तया पणट्ठा मणसो समाही ।
तीए विणा धम्ममइ वसिज्जा, चित्ते कहं दुक्खभरं तरिज्जा ॥५॥

विरत्तचित्तस्स सया वि सुक्खं, रागाणुरत्तस्स अईव दुक्खं ।
एवं मुणित्ता परमं हि तत्तं, नीरागमग्गम्मि धरेह चित्तं ॥ ६ ॥

परिग्गहारंभभरं करंति, अदत्तमन्नस्स धणं हरंति ।
धम्मं जिणुत्तं न समायरंति, भवण्णवं ते कहमुत्तरंति ॥ ७ ॥

आणं जिणाणं सिरसा वहंति, घोरोवसग्गाइ तहा सहंति ।
धम्मस्स मग्गं पयडं कहंति, संसारपारं नणु ते लहंति ॥ ८ ॥

भासिज्जए नेव असच्चभासा, न किज्जए भोगसुहे पिवासा ।
खंडिज्जए नेव परस्स आसा, धम्मो य कित्ती इय सप्पयासा ॥

दुरंतमिच्छत्तमहंधयारे, परिप्फुरंतम्मि सुदुन्निवारे ।
न सुद्धमग्गाउ चलंति जे य, सलाहणिज्जा तिजयम्मि ते य ॥ १० ॥

असारसंसारसुहाण कज्जे, जो रज्जइ पावमई अवज्जे ।
अप्पाणमेसो खिवइ किलेसे, सग्गापवग्गाण कहं मुहं से ॥ ११ ॥

नरिंददेवेसरपूइयाणं, पूयं कुणंतो जिणचेइयाणं ।
दव्वेण भावेण सुहं चिणेइ, मिच्छत्तमोहं तह निज्जिणेइ ॥ १२ ॥

दुक्खं सुतिक्खं नरए सहित्ता, पंचिंदियत्तं पुण जो लहित्ता ।
पमायसेवाई गमिज्ज कालं, सो लंघिही नो गुरुमोहजालं ॥ १३ ॥

तवोवहाणाइ करित्तु पुव्वं, कया गुरूणं च पणामपुव्वं ।
सुत्तं च अत्थं बहुरस्सरेणं, अहं पढिस्सं महयायरेणं ॥ १४ ॥

कम्मट्ठवाहिहरणोसहाणि, सामाइयाविस्सयपोसहाणि ।
सिद्धान्तपन्नत्तविहाणपुव्वं, अहं करिस्सं विणयाइ सव्वं ॥ १५ ॥

आणं गुरूणं सिरसा वहिस्सं, सुत्तत्थसिक्खं विउलं लहिस्सं ।
कोहं विरोहं सयलं चइस्सं, कया अहं मद्दवमायरिस्सं ॥ १६ ॥

सम्मत्तमूलाणि अणुव्वयाणि, अहं धरिस्सामि सुहावहाणि ।
तओ पुणो पंचमहव्वयाणं, भरं वहिस्सामि सुदुव्वहाणं ॥१७॥

एवं कुणंताण मणोरहाणि, धम्मस्स निव्वाणपहे रहाणि ।
पुन्नज्जणं होइ सुसावयाणं, साहूण वा तत्तवियारयाणं ॥ १८ ॥

हवंति जे सुत्तविरुद्धभासगा, न ते वरं सुट्ठु वि कट्ठकारगा ।
सच्छंदचारी समए परूविया, तद्दंसणिच्छा वि अईव पाविया ॥

अइक्कमित्ता जिणरायआणं, तवंति तिव्वं तवमप्पमाणं ।
पढंति नाणं तह दिंति दाणं, सव्वं पि तेसिं कयमप्पमाणं ॥२०॥

जिणाण जे आगरया सया वि, न लग्गई पावमई कया वि ।
तेसिं तवेणंपि विणा विसुद्धी, कम्मक्खएणं च हविज्ज सिद्धी॥

बहुस्सुयाणं सरणं गुरूणं, आगम्म निच्चं गुणसागराणं ।
पुच्छिज्ज अत्थं तह सुक्खमग्गं, धम्मं वियाणित्ता चरिज्ज जुग्गं॥

तुमं अणीयत्थनिसेवणेणं, भो जीव ! भद्दं सुण निच्छएणं ।
संसारमाहिंडसि घोरदुक्खं, कया वि पावेसि न मोक्खसुक्खं॥

कुमग्गसंसग्गविलुत्तबुद्धी, जो बुज्झई सुद्धमई न सिद्धी ।
तस्सेव एसो परमो अलाहो, अंगीकओ जेण जणप्पवाहो ॥२४॥

छज्जीवकाए परिरक्खिऊणं, सम्मं च मिच्छं सुपरिक्खिऊणं ।
सिद्धंतअत्थं पुण सिक्खिऊणं, सुही जइ होइ जयम्मि नूणं ॥२५॥

इमे चइज्जंति जया कसाया, तया गया चित्तगया विसाया ।
पसंतभावं खु लहिज्ज चित्तं, तत्तो भवे धम्मपहे थिरत्तं ॥२६॥

धणं च धन्नं च बहुप्पयारं, कुडुंबमेयं पि धुवं असारं।
जाणित्तु धम्मं कुरु सव्ववारं, जओ लहिज्जा लहु दुक्खपारं॥

असासएसु विसएसु सज्जो, जो मुज्झइ मिच्छपहे अणज्जो।
सो चंदणं रक्खकए दहिज्जा, चिंतामणिं कायकए गमिज्जा॥

पूया जिणाणं सुगुरूण सेवणं, धम्मक्खराणं सवणं वियारणं।
तवोविहाणं तह दानदापणं, सुसावयाणं बहुपुन्नभायणं॥२९॥

कोहाइया सोलस जे कसाया, पच्चक्खरूवा नणु ते पिसाया।
छलंति ते लोयमिमं समग्गं, दुक्खं समप्पंति तहा उदग्गं॥३०॥

परोपहासं न कहिं पि कुज्जा, लहुत्तणं जेण जणो लहिज्जा।
परस्स दोसेसु मणं न दिज्जा, धीमं नरो धम्मधुरं धरिज्जा॥३१॥

जिणिंदसिद्धारियचेइयाणं, संघस्स धम्मस्स तहा गुरूणं।
सुयस्सुवज्झायसुदंसणेसु, दसण्हमेसिं विणयं करेसु॥३२॥

मणे मणागं पिहु तिव्वरोसो, न धारियव्वो कयपावपोसो।
जओ भवे पुन्नजलस्स सोसो, संपज्जए कस्स वि नेव तोसो॥३३॥

महारिसीणं अरिणा समाणो, न आणियव्वो हिययम्मि माणो।
धम्मं अहम्मं च वियाणमाणो, हुज्जा जणो जेण जडोवमाणो॥

सुसाहुवग्गस्स मणे अमाया, निसेहियव्वा सययं पि माया।
समग्गलोयाण वि जा विमाया–समा समुप्पाइयसुप्पमाया॥३५॥

जेणं भवे बंधुजणे विरोहो, विवड्ढए रज्जधणम्मि मोहो।
जो जंपिओ पावतरुप्परोहो, न सेवियव्वो विसमो स लोहो॥३६॥

जणो सुणित्ता नणु जाइ दुक्खं, तं जंपियव्वं वयणं न तिक्खं ।
इहं परत्थावि य जं विरुद्धं, न किज्जए तं पि कया निसिद्धं ॥
दव्वाणुरूवं विरइज्ज वेसं, कुज्जा न अन्नस्स घरे पवेसं ।
साहूणऽसाहूण तहा विसेसं, जाणिज्ज जंपिज्ज न दोसलेसं ।३८।
भत्तीगुरूणं हियए धरित्ता, सिक्खिज्ज नाणं विणयं करित्ता ।
अत्थं वियारिज्ज मईइ सम्मं, मुणी मुणिज्जा दसभेयधम्मं ।३९।
हासाइछक्कं परिवज्जियव्वं, छक्कं वयाणं तह सज्जियव्वं ।
पंचप्पमाया न हु सेवियव्वा, पंचंतराया वि निवारियव्वा ।४०।
साहम्मियाण बहुमाणदाणं, भत्तीइ अप्पिज्ज तहऽन्नपाणं ।
वज्जिज्ज रिद्धीइ तहा निहाणं, एयं चरित्तं सुकयस्स ठाणं ॥
अहिंसणं सव्वजियाण धम्मो, तेसिं विणासो परमो अहम्मो ।
मुणित्तु एवं बहुपाणिघाऊ, विवज्जियव्वो कयपच्चवाऊ ॥४२॥
कोहेण लोहेण तहा भयेणं, हासेण रागेण य मच्छरेणं ।
भासं मुसं नेव उदाहरिज्जा, जा पच्चयं लोयगयं हरिज्जा ।४३।
असाहुलोएण य जं पवन्नं, बुहो न गिण्हिज्ज धणं अदिन्नं ।
अंगीकए जम्मि इहेव दुक्खं, लहइ लहुं नेव कयाइ सुक्खं ।४४।
समायरं वा अवरस्स जायं, मन्निज्ज छिंदिज्ज जणाववायं ।
जे अन्नकंतासु नरा पसत्ता, ते झत्ति दुक्खाइ इहेव पत्ता ॥४५॥
जे पावकारीणि परिग्गहाणि, मेलंति अच्चंतदुहावहाणि ।
तेसिं कहं हुंति जए सुहाणि, सया भविस्संति महादुहाणि ॥

सद्दं सुणित्ता महुरं अणट्ठं, करिज्ज चित्तं न हु तुट्ठरुट्ठं ।
रसम्मि गीयस्स सया सरंगो, अकालमच्चु लहई कुरंगो ॥४७॥

पासित्तु रूवं रमणीण रम्मं, मणम्मि कुज्जा न कयावि पिम्मं।
पईवमज्झे पडई पयंगो, रूवाणुरत्तो हवई अणंगो ॥४८॥

जलम्मि मीणो रसणारसेणं, विमोहिओ नोगहिओ भएणं।
पावाओ पावेइ स तालुवेहं, रसाणुराओ इय दुक्खगेहं ॥४९॥

गइंदकुंभत्थलगंधलुद्धो, इंदिंदिरो वाणरसेण गिद्धो ।
हहा मुहा मच्चुमुहं उवेई, को गंधगिद्धिं हियए वहेई ॥५०॥

फासिंदियं जो नहु निग्गहेई, सो बंधणं मुद्धमई लहेइ ।
दप्पुद्धुरंगो जह सो करिंदो, खिवेइ अप्पं वसणम्मि मंदो ॥५१॥

इक्कोवि इक्को विसओ उदिन्नो, दुक्खं असंखं दलई पवन्नो।
जे सव्वहा पंचसु तेसु लुद्धा, मुद्धाण तेसिं सुगई निसिद्धा॥५२॥

अईव दुट्ठा विसया विसाओ, पच्छा भवे जेहि महाविसाओ।
जेहिं पया हुंति परव्वसाओ, न सेवणिज्जा खलु ते रसाओ॥

तित्थंकराणं निउणा पमाणं, कुणंति जे उज्झिय चित्तमाणं।
सव्वं पि तेसिं किरियाविहाणं, संजायइ दुक्खसहस्सताणं ॥५४॥

अच्चंतपावोदयसंभवाओ, जे भीरुणो भव्वगणा भवाओ।
तेसिं सुहाणं सुलहो उवाओ, नो संभविज्जा भवसंनिवाओ॥५५॥

धणं च धन्नं रयणं सुवन्नं, तारुण्णरूवाइ जहित्थ अन्नं ।
विज्जु व्व सव्वं चवलं खु एयं, धरेह भव्वा हियए विवेयं॥

पुत्ता कलत्ताणि य बंधुमित्ता, कुडुंबिणो चेव इहेगचित्ता ।
आउक्खए पाववसा समेए, न रक्खणत्थं पभवंति एए ॥५७॥

जेसिं मणे पावमई निविट्ठा, निव्वाहवित्ती पुण संकिलिट्ठा ।
कयावि ते हुंति न हिट्ठतुट्ठा, सव्वत्थ पावंति दुहाइ दुट्ठा॥५८॥

वन्नं वयंता जिणचेइयाणं, संघस्स धम्मायरियाइयाणं ।
कुणंति भव्वा सुलहं सुबोहिं, अवन्नवाएण पुणो अबोहिं ॥५९॥

अन्नाणया दोसवसाणुभावा, मुणंति तत्तं न हु किंपि पावा ।
भवंति ते दुक्खदरिद्ददीणा, परम्मि लोए सुहविप्पहीणा॥६०॥

पुण्णोदएणं नणु कोइ जीवो, भिसं समुज्जोइयनाणदीवो ।
मोहंधयारप्पसरं दलिज्जा, पिच्छेइ निव्वाणपहं पइत्ता ॥६१॥

इत्थंतराया बहवे पसिद्धा, कोहाइणो वेरिगणा समिद्धा ।
हरंति ते धम्मधणं छलेणं, को निज्जिणेई नणु ते बलेणं॥६२॥

पावाइ पावा परिसेवमाणा, धम्मं जिणुद्दिट्ठमयाणमाणा ।
अन्नाणकट्ठेहि कयाभिमाणा, खिवंति अप्पं नरए अयाणा॥६३॥

न जाइगव्वं हिययम्मि कुज्जा, कुलाभिमाणं पुण नो वहिज्जा ।
रूवं नवं इस्सरियं अउव्वं, लद्धुं सुबुद्धी न धरिज्ज गव्वं ॥६४॥

अहं खु लोए बलवं तवस्सी, सुयाहिओ वा अहयं जसंसी ।
लाभे वि संते मुइओ न हुज्जा, तहऽप्पणो उक्करिसं न कुज्जा ॥

वालग्गमित्तो वि न सो पएसो, जत्थोववन्नो भुवणम्मि नेसो ।
जीवो समावज्जियपावलेसो, न पाविओ कत्थ य सुक्खलेसो॥

सुदुल्लहं पाविय माणुसत्तं, कुलं पवित्तं तह अज्जखित्तं ।
तत्तं सुणित्ता सुगुरूहि वुत्तं, तुज्झ पमायायरणं न जुत्तं ॥६७॥

बालत्तणं खिड्डुपरो गमेई, तारुण्णए भोगसुखे रमेई ।
थेरत्तणे कायबलं वमेई, मूढो मुहा कालमइक्कमेइ ॥ ६८ ॥

लहुत्तणाओ वि न जेण पुन्नं, समज्जियं सव्वगुणोहपुन्नं ।
थेरत्तणे तस्स य नावयासो, धम्मस्स जत्थऽत्थि जरापयासो॥

पुव्विं कयं जं सुकयं उदारं, पत्तं नरत्तं नणु तेण सारं ।
करेसि नो इत्थ जया सुकम्मं, कहं सुहं जीव ! लहेसि रम्मं॥७०॥

तवेण पक्खालियकम्मलेवो, अन्नो जिणिंदाउ न कोइ देवो।
गुरु सुसाहू जिणरायवुत्तं, तत्तं च सम्मत्तमिमं निरुत्तं ॥७१॥

पसत्थलेसं पकरंति चित्तं, जे सत्तखित्तेसु ववंति वित्तं ।
छिंदंति निम्मोहमणा ममत्तं, कुणंति ते जम्ममिमं पवित्तं ।७२।

पढित्तु एयं उवएससत्तरिं, मुणंति चित्ते परमत्थवित्थरं ।
तरित्तु ते दुक्खभरं सुदुत्तरं, खेमेण पावंति सुहं अणुत्तरं ॥७३॥

## ९९ प्रकीर्णविषयसूक्तानि

देवता वाचकाः शब्दा, ये च भद्रादिवाचकाः ।
ते सर्वे नैव निन्द्याः स्युः, लिपितोऽपि गणतोऽपि च ॥१॥

गृहे हित्वा बालां सकलसुखसौभाग्यकलितां,
विदेशं ते यान्ति प्रचुरधनलुब्धाः सुगुणिनः ।

यदि द्रव्यप्राप्तिर्न च तरुणतायाः सुखमपि,
न देयं पाण्डित्यं कथमपि नृणां हंसगमने ॥२॥

एकाक्षरप्रदातारं, यो गुरुं नाभिमन्यते ।
श्वानयोनिशतं गत्वा, चाण्डालेष्वभिजायते ॥३॥
तडबुजं कलिङ्गं च, भोज्यं शीतं च वातुलम् ।
कपित्थं बदरीजम्बू–फलानि घ्नन्ति धीषणाम् ॥४॥

मुञ्च मुञ्च पतत्येको, मा मुञ्च पतितो यदि ।
उभौ तौ पतितौ दृष्ट्वा, मौनं सर्वार्थसाधनम् ॥५॥

शून्ये दधिघटीं दृष्ट्वा, काकः स्थगनवर्जिताम् ।
लब्ध्वाऽऽस्वादोऽपि तां मुक्त्वा, कथमन्यत्र गच्छति ॥६॥

तद्वाक्यमुखरूपाक्षि–जिता इव ययुर्ध्रुवम् ।
सुधा पातालमिन्दुः खे, दिवि रम्भा जलेऽम्बुजम् ॥७॥

जानीयात् प्रेषणे भृत्यान्, बान्धवान् व्यसनागमे ।
मित्रमापत्तिकाले च, भार्यां च विभवक्षये ॥८॥
निर्धना धनवन्तश्च, नृपास्तदधिकारिणः ।
प्रवासिनश्च वेश्याश्च, न स्वपन्ति कदाचन ॥९॥
दुर्भिक्षोद्यमन्नसंग्रहपरः पत्युर्वधं बन्धकी,
ध्यायत्यर्थपतेर्भिषग् गदगणोत्पत्तिं कलिं नारदः ।
दोषग्राहिजनश्च पश्यति परच्छिद्रं छलं शाकिनीं,
निष्पुत्रं म्रियमाणमाढ्यमवनीपालो हहा ! वाञ्छति ॥१०॥

कुङ्कुमागरुकस्तूरीकर्पूरं चन्दनं तथा ।
महासुगन्धमित्युक्तं, नामतो यक्षकर्दमम् ॥११॥

## १०० छन्दोलक्षणसूक्तानि

यस्याः प्रथमे पादे, द्वादश मात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये, चतुर्थके पञ्चदश साऽऽर्या ॥१॥

अगुरुचतुष्कं, भवति गुरू द्वौ
घनकुचयुग्मे !, शशिवदनाऽसौ ॥२॥

सर्वे वर्णा दीर्घा यस्यां, विश्रामः स्याद्वेदैर्वेदैः
विद्वद्वृन्दैर्वीणावाणि !, व्याख्याता सा विद्युन्माला ॥३॥

ह्रस्वो वर्णो जायते यत्र षष्ठः,
कम्बुग्रीवे ! तद्वदेवाष्टमान्त्यः ।
विश्रामः स्यात्तन्वि ! वेदैस्तुरङ्गै-
स्तां भाषन्ते शालिनीं छान्दसीयाः ॥४॥

चत्वारः प्राक्सुतनु ! गुरवो द्वौ दशैकादशो चेद्,
मुग्धे ! वर्णौ तदनु कुमुदामोदिनि ! द्वादशान्त्यौ ।
तद्वच्चान्त्यौ युगरसहयैर्यत्र कान्ते ! विरामो,
मन्दाक्रान्तां प्रवरकवयस्तन्वि ! तां संगिरन्ते ॥ ५ ॥

आद्यचतुर्थमहीननितम्बे !, सप्तमकं दशमं च तथान्त्यम् ।
यत्र गुरु प्रकटस्मरसारे !, तत्कथितं ननु दोधकवृत्तम् ॥६॥

यस्यां त्रिषट्सप्तममक्षरं स्यात्, ह्रस्वं सुजङ्घे ! नवमं च तद्वत् ।
गत्या विलज्जीकृतहंसकान्ते !, तामिन्द्रवज्रां ब्रुवते कवीन्द्राः ।७।

यदीन्द्रवज्राचरणेषु पूर्वे, भवन्ति वर्णा लघवः सुवर्णे ! ।
अमन्दमायन्मदने ! तदानी–मुपेन्द्रवज्रा कथिता कवीन्द्रैः ॥८॥

यत्र द्वयोरप्यनयोस्तु पादा, भवन्ति सीमन्तिनि ! चन्द्रकान्ते ! ।
विद्वद्भिराद्यैः परिकीर्तिता सा, प्रयुज्यतामित्युपजातिरेषा ।९।

स तृतीयकषष्ठमनङ्गरते !, नवमं विरतिप्रभवं गुरु चेत् ।
घनपीनपयोधरभारनते !, ननु त्रोटकवृत्तमिदं कथितम् ॥१०॥

यदाद्यं चतुर्थं तथा सप्तमं चे–त्तथैवाक्षरं ह्रस्वमेकादशाद्यम् ।
शरच्चन्द्रविद्वेषिवक्त्रारविन्दे !, तदुक्तं कवीन्द्रैर्भुजङ्गप्रयातम् ॥

अयि ! कृशोदरि ! यत्र चतुर्थकं, गुरु च सप्तमकं दशमं तथा ।
विरतिजं च तथैव विचक्षणे–द्रुतविलम्बितमित्युपदिश्यते ।१२।

आद्यं द्वितीयमपि चेद्गुरु तच्चतुर्थं,
यत्राष्टमं च दशमान्त्यमुपान्त्यमन्त्यम् ।
कामाङ्कुशाङ्कुशितकामिमतङ्गजेन्द्रे !,
कान्ते ! वसन्ततिलकां किल तां वदन्ति ॥१३॥

प्रथममगुरुषट्कं विद्यते यत्र कान्ते !,
तदनु च दशमं चेदक्षरं द्वादशान्त्यम् ।
गिरिभिरथ तुरङ्गैर्यत्र कान्ते ! विरामः,
सुकविजनमनोज्ञा मालिनी सा प्रसिद्धा ॥१४॥

सुमुखि ! लघवः पञ्च प्राच्यास्ततो दशमान्तिकं,
तदनु ललितालापे ! वर्णौ यदि त्रिचतुर्दशौ ।
प्रभवति पुनर्यत्रोपान्त्यः स्फुरत्करकङ्कणे !,
यतिरपि रसैर्वेदैरश्वैः स्मृता हरिणीति सा ॥१५॥

यदा पूर्वो ह्रस्वः कमलनयने ! षष्ठकपराः,
ततो वर्णाः पञ्च प्रकृतिसुकुमाराङ्गि ! लघवः ।
त्रयोऽन्ये चोपान्त्या सुतनुजघनाभोगसुभगे !,
रसै रुद्रैर्यस्यां भवति विरतिः सा शिखरिणी ॥१६॥

आद्याश्चेद्गुरवस्त्रयः प्रियतमे ! षष्ठस्तथा चाष्टमो,
नन्वेकादशतस्त्रयस्तदनु चेदष्टादशाद्यौ ततः ।
मार्तण्डैर्मुनिभिश्च यत्र विरतिः पूर्णेन्दुबिम्बानने !,
तद्वृत्तं प्रवदन्ति काव्यरसिकाः शार्दूलविक्रीडितम् ॥१७॥

श्लोके षष्ठं गुरु ज्ञेयं, सर्वत्र लघु पञ्चमम् ।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥१८॥

चत्वारो यत्र वर्णाः प्रथमलघवः षष्ठतः सप्तमोऽपि,
द्वौ तद्वत्षोडशाद्यौ मृगमदमुदिते षोडशान्त्यौ तथान्त्यौ ।
रम्भास्तम्भोरुकान्ते ! मुनिमुनिमुनिभिर्दृश्यते चेद्विरामो,
बाले ! वन्द्यैः कवीन्द्रैः सुतनु ! निगदिता स्रग्धरा सा प्रसिद्धा ।

## १०१ कविचातुर्यसूक्तानि

गोविन्दनन्दनतया च वपुश्रिया च,
माऽस्मिन् नृपे कुरुत कामधियं तरुण्यः ।
अस्त्रीकरोति जगतां विजये स्मरः स्त्रीः,
अस्त्रीजनः पुनरनेन विधीयते स्त्रीः ॥१॥

### शाब्दी प्रहेलिका

पयस्विनिनां धेनूनां ब्राह्मणः प्राप्य विंशतिम् ।
ताभ्योऽष्टादश विक्रीय गृहीत्वैकां गृहं गतः ॥२॥

### आर्थी प्रहेलिका

जइ सासुआइ भणिआ पियवासघरंमि दीवय देसु ।
ता कीस मुद्धडमुही हिअयंमि निवेसये दिट्ठि ॥३॥

लक्ष्मि ! प्रेयसि ! केयमास्यशितिमा वैकुण्ठ ! कुण्ठोऽसि किं?,
नो जानासि पितुर्विनाशमसमं संघोत्थितैः पांशुभिः ।
मा भीर्भीरु ! गमीर एव भविताम्भोधिश्चिरं नन्दतात्,
संघेशो ललितापतिर्जिनपतेः स्नात्राम्बुकुल्यां सृजन् ॥४॥

किं भूषणं सुन्दर ! सुन्दरीणां, किं दूषणं पान्थजनस्य नित्यम् ।
कस्मिन् विधात्रा लिखितं जनानां, सिन्दूरबिन्दुर्विधवा ललाटे ॥

रामाभिषेके मदविह्वलायाः, हस्तात् च्युतो हेमघटस्तरुण्याः ।
सोपानमासाद्य करोति शब्दं, टटं टटण्टं टटटं टटण्टः ॥६॥

कर कंपावेइ सिर धुणेइ बुड्ढी कहा कहेइ ।
हक्कारंतां यमभडां नंनंकार करेइ ॥७॥

किं नन्दिः ? किं मुरारिः ? किमु रतिरमणः ?
किं नलः ? किं कुवेरः ?
किं वा विद्याधरोऽसौ ? किमथ सुरपतिः ?
किं विधुः ? किं विधाता ?
नाऽयं नाऽयं न चाऽयं न खलु न हि न वा नाऽपि नाऽसौ न चैषः,
क्रीडां कर्तुं प्रवृत्तो यदिह महीतले भूपतिर्भोजदेवः ॥ ८ ॥

का त्वं ? पातकपुत्रिकाऽस्म्यकमला पौत्री तथाऽहं कलेः,
कस्माद्रोदिषि ? बान्धवस्य निधनात् को बान्धवोऽयं तव ।
दारिद्र्यं किमजायताऽस्य निहतः सोऽयं तमोवैरिणा,
श्रीमच्छ्रीकुमरेण कस्य शरणं यद्यासि तद्द्वेषिणाम् ॥ ९ ॥

यस्मिन् महीं शासति वाणिनीनां, निद्रां विहारोर्ध्वपथे गतानाम्।
वातोऽपि नाऽस्रंस्सिदंशुकानि, को लम्बयेदाहरणाय हस्तम्॥

काऽप्येवमेवोपगता प्रसिद्धिः, रुणद्धि को नाम मुखं जनानाम्।
जन्मैव येषां श्रवसा विहीनं, तान् भोगिनः कुण्डलिनो वदन्ति॥

काव्यं करोमि न हि चारुतरं करोमि,
यत्नात्करोमि नहि सिध्यति किं करोमि ।
भूपालमौलिमणिचुम्बितपादपीठ !,
श्रीसाहसाङ्क ! कथयामि च यामि यामि ॥१२॥

बाल्ये सुतानां सुरतेऽङ्गनानां, स्तुतौ कवीनां समरे भटानाम् ।
त्वङ्कारयुक्ता हि गिरः प्रशस्ताः,कस्ते प्रभो ! मोहभरः स्मर त्वम्॥

नपुंसकमिति ज्ञात्वा, प्रियायै प्रेषितं मनः ।
तत्तु तत्रैव रमते, हता पाणिनिना वयम् ॥ १४ ॥

भोमाराममभादन्दो, हयागदलनम्भपाः ।
एते यस्य य विद्यन्ते, तं देवं प्रणमाम्यहम् ॥१५॥

मुद्गदाली गदव्याली, कवीन्द्रा वितुषा कथम् ।
अन्धोवल्लभसंगेन, जाता विगतकञ्चुका ॥ १६ ॥

कियन्मात्रं जलं विप्र ! जानुदघ्नं नराधिप ! ।
ईदृशी किमवस्था ते, न हि सर्वे भवादृशाः ॥ १७ ॥

तिमिरारिस्तमो हन्ति भीतिशङ्कितमानसाः ।
वयं काका वयं काका, इति जल्पन्ति वायसाः ॥१८॥

सीमन्तिनीषु का कान्ता, राजा कोऽभूत् गुणोत्तमः ।
विद्वद्भिः का सदा वन्द्या, अत्रैवोत्तरमीक्षताम् ॥ १९ ॥

न लगेत् नागनारङ्गे, निम्बस्तुम्बे पुनर्लगेत् ।
लगेत्युक्ते लगेन्नैव, मा मेत्युक्ते भृशं लगेत् ॥२०॥

लक्ष्मीखेदनिषेधार्थ—ब्रह्मचक्राङ्गशर्मणाम् ।
के शब्दा वाचकाः खान्तं, ब्रूहि किं णान्तमिच्छसि ॥२१॥

अर्थिनां का सदा चित्ते, का दग्धा कपिना पुरा ।
इक्षुयष्टेः किमिच्छन्ति, किं च हंसस्य सुन्दरम् ॥२२॥

सुकवीनां वचः कीदृक्, शुकेन विषमे कृते।
इति प्रश्ने यदा राज्ञी नाऽवदत् मूढमानसा ॥ २३ ॥
[ अत्रोत्तरं ईदृालङ्कारसंगतम् ]

तातेन कथितं पुत्र ! लेखं लिख ममाज्ञया।
नतेन लिखितो लेखः, पितुराज्ञा न लोपिता ॥ २४ ॥

आगताः पाण्डवाः सर्वे, दुर्योधनसमीहया।
रत्नानि च सुवर्णानि, तस्मै वस्त्राणि भूरिशः ॥ २५ ॥

तुम्ह पिया मह पिउणो, धारेइ सय सहस्सं।
जइ सुयपुव्वं दिज्जइ, अह न सुयं खोरेयं देमु ॥ २६ ॥

द्वन्द्वोऽहं द्विगुरपि, चाऽहं मद्गेहे नित्यमव्ययीभावः।
तत्पुरुष ! कर्मधारय ! येनाऽहं स्यां बहुव्रीहिः ॥ २७ ॥

कान्तया कान्तसंयोगे, किमकारि नवोढया।
अत्रापि चोत्तरं वक्तुं, अवधिर्ब्रह्मणो वयः ॥ २८ ॥

ललाटः तिलकोपेतः, कृष्णः कमललोचनः।
गोकुले च क्रियां वक्तुं, मर्यादा दशवार्षिकी ॥ २९ ॥

निर्वाता न कुटी न चाग्नि–शकटी नापि द्वितीया पटी,
वृत्तिर्भारभटी न तुन्दिलपुटी, भूमौ च घृष्टा कटी।
तुष्टिर्नैव घटी प्रिया न वधूटी, तेनाऽप्यहं संकटी,
श्रीमद्भोज ! तव प्रसादकरटी भङ्क्तां ममापत्तटी ॥ ३० ॥

अनिस्सरन्तीमपि देहगर्भात्, कीर्तिं परेषामसतीं वदन्ति।
स्वैरं भ्रमन्तीमपि च त्रिलोक्यां, त्वत्कीर्त्तिमाहुः कवयः सतीं तु॥

चन्द्रगता पद्मगुणान् न भुङ्क्ते,
पद्माश्रिता चान्द्रमसीमभिख्याम् ।
उमामुखं तु प्रतिपद्य लोला,
द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ॥ ३२ ॥

भकारः कुम्भकर्णे च, भकारश्च बिभीषणे ।
तयोर्ज्येष्ठः कुलश्रेष्ठो, भकारः किं न विद्यते ॥ ३३ ॥

असारे खलु संसारे, सारं श्वशुरमन्दिरम् ।
हरः शेते हिमगिरौ, हरिः शेते पयोनिधौ ॥ ३४ ॥

असारे खलु संसारे, सारं सारङ्गलोचना ।
यस्याः कुक्षेः समुत्पन्नाः, भोजराज ! भवादृशाः ॥ ३५ ॥

काचिन् मृगाक्षी प्रियविप्रयोगे, गन्तुं निशापारमपारयन्ती ।
उद्गातुमादाय करेण वीणां, एणाङ्कमालोक्य शनैरहासीत् ॥ ३६ ॥

विहिता निर्विषा नागा, देवाः शक्तिविवर्जिताः ।
निश्चेष्टाश्च यया सिंहाः, सा बालैर्ध्रियते करे ॥ ३७ ॥

सत्यभ्रमेण कृतकानि गृहेषु हत्वा,
हन्तव्यरूपशतकानि विशीर्णदन्तः ।
सत्यान्यपि प्रतिभयेन न तानि हन्ति,
संप्राप्तधर्म इव यत्र बिडालकोऽपि ॥ ३८ ॥

असन्तोऽस्यै न रोचन्ते, सद्भ्यो नेयं च रोचते ।
इत्यप्राप्तवराऽद्यापि, कुमारी कीर्तिकन्यका ॥ ३९ ॥

स्थानाभावान् महामात्य ! कुत्रोपविश्यते मया ।
कथं नास्तीत्यवग् मन्त्री, भट्टोऽप्याचष्ट कौतुकी ॥ ४० ॥

अन्नदानैः पयःपानैर्धर्मस्थानैश्च भूतलम् ।
यशसा वस्तुपालेन, रुद्धं आकाशमण्डलम् ॥ ४१ ॥

## १०२ श्वशुरालयनिवासदुष्टतानिवेदकसूक्तानि

क्षणे रुष्टः क्षणे तुष्टः, नानापूजां च वाञ्छति ।
कन्याराशिस्थितो नित्यं, जामाता दशमो ग्रहः ॥ १ ॥
श्वशुरगृहनिवासः, स्वर्गतुल्यो नराणां,
यदि वसति विवेकी, वासराणि त्रिपञ्च ।
दधिमधुघृतलोभात् मासयुग्मं वसेत् चेत्,
स भवति खरतुल्यो मानवो मानहीनः ॥ २ ॥
वज्रकूटे विजयरामः, तिलतैलेन माधवः ।
भूमिशय्या मणिरामो, धकाधुमेन केशवः ॥ ३ ॥
उपस्थितायां विपदि, मरणं शरणं वरम् ।
मानैकशालिनां पुंसां, न पुनः श्वशुरालयः ॥ ४ ॥
प्रयाणपटहः किं वो-त्तमत्वस्य विवेकिनाम् ।
अधमत्वप्रवेशादि-मङ्गलं श्वशुरालयः ॥ ५ ॥
उत्तमाः स्वगुणैः ख्याता, मध्यमाश्च पितुर्गुणैः ।
अधमा मातुलैः ख्याताः, श्वशुरैश्चाधमाधमाः ॥ ६ ॥

## १०३ गुणगुणिसमादरसूक्तानि

सत्रे क्रोडमृगाधिपौ च मिलितौ ब्रूते हरिं शूकरो,
वादं त्वं वद रे मया सह हरे ! नो चेन्मया हारितः ।

श्रुत्वा तद्वचनं हरिश्च गदति त्वं याहि रे शूकर !,
लोकान् ब्रूहि मया जितो मृगपतिर्जानन्ति मे ज्ञा बलम् ॥१॥

गता ये पूज्यत्वं प्रकृतिपुरुषा एव खलु ते,
जना ! दोषत्यागे जनयत समुत्साहमतुलम् ।
न साधूनां क्षेत्रं न च भवति नैसर्गिकमिदं,
गुणान् यो यो धत्ते स स भवति साधुर्भजत तान् ॥ २ ॥

वक्त्रे वल्गाप्रकर्षः समरभुवि तव प्राणरक्षाऽपि दैवात्,
स्वेच्छाचारो न चाऽऽस्ते न हि भवति तथा भारवाहो नितान्तम् ।
इत्युक्तोऽश्वः खरेण प्रहसितवदनो मूक एवाऽवतस्थे,
तस्माज्जात्या महान्तोऽधमजनविषये मौनमेवाश्रयन्ते ॥ ३ ॥

हंसो न भाति बलिभोजकवृन्दमध्ये,
गोमायुमण्डलगतो न विभाति सिंहः ।
जात्यो न भाति तुरगः खरयूथमध्ये,
विद्वान्न भाति पुरुषेषु निरक्षरेषु ॥ ४ ॥

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ति न वेत्ति निर्बलः ।
पिको वसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलं न मूषकः ॥ ५ ॥

गुणेष्वनादरं भ्रातः !, पूर्णश्रीरपि मा कृथाः ।
संपूर्णोऽपि घटः कूपे, गुणच्छेदात्पतत्यधः ॥ ६ ॥

नागुणी गुणिनं वेत्ति, गुणी गुणिषु मत्सरी ।
गुणी च गुणरागी च, विरलः सरलो जनः ॥ ७ ॥

आस्तां च गुणिनस्तावद्, भूषिताशेषभूतलाः ।
येषां गुणानुरागोऽस्ति, सांप्रतं तेऽपि दुर्लभाः ॥ ८ ॥

अद्भुतमुदयं दद्यु–र्वृत्तवन्तः पुरस्कृताः ।
बिन्दुरग्रे कृतोऽङ्कानां, दत्ते दशगुणोन्नतिम् ॥ ९ ॥

गुणाः सर्वत्र पूज्यन्ते, पितृवंशो निरर्थकः ।
वसुदेवं परित्यज्य, वासुदेवो नमस्यते ॥ १० ॥

पृथिव्यां त्रीणि रत्नानि, जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु, रत्नसंज्ञाऽभिधीयते ॥ ११ ॥

शैले शैले न माणिक्यं, मौक्तिकं न गजे गजे ।
साधवो न हि सर्वत्र, चन्दनं न वने वने ॥ १२ ॥

साधूनां दर्शनं पुण्यं, तीर्थभूता हि साधवः ।
कालेन फलति तीर्थं, सद्यः साधुसमागमः ॥ १३ ॥

शतेषु जायते शूरः, सहस्रेषु च पण्डितः ।
वक्ता दशसहस्रेषु, दाता भवति वा न वा ॥ १४ ॥

न रणे निर्जिते शूरो, विद्यया न च पण्डितः ।
न वक्ता वाक्पटुत्वेन, न दाता धनदायकः ॥ १५ ॥

इन्द्रियाणां जये शूरो, धर्मं चरति पण्डितः ।
सत्यवादी भवेद्वक्ता, दाता भीताभयप्रदः ॥ १६ ॥

प्रत्यक्षे गुरवः स्तुत्याः, परोक्षे मित्रबान्धवाः ।
कर्मान्ते दासभृत्याश्च, पुत्रा नैव मृताः स्त्रियः ॥ १७ ॥

यदेकः स्थविरो वेत्ति, न तत्तरुणकोटयः ।
यो नृपं लत्तया हन्ति, वृद्धवाक्यात् स पूज्यते ॥ १८ ॥

निर्गुणेनाऽपि सत्त्वेन, कर्तव्यो गुणसंगमः ।
शशाङ्कसंगतो मूर्ध्नि, धृतो रुद्रेण वातमी ॥ १९ ॥

बालादपि हितं ग्राह्य-ममेध्यादपि काञ्चनम् ।
नीचादप्युत्तमां विद्यां, स्त्रीरत्नं दुष्कुलादपि ॥ २० ॥

किं कृतेन हि यत्र त्वं, यत्र त्वं किमसौ कलिः ।
कलौ चेद्भवतो जन्म, कलिरस्तु कृतेन किम् ॥ २१ ॥

टङ्कच्छेदे न मे दुःखं, न दाहे न च घर्षणे ।
एतदेव महद्दुःखं, गुञ्जया सह तोलनम् ॥ २२ ॥

गुञ्जे ! गर्वं मुधा मा धा-स्तुल्येऽहं भवत्या समम् ।
निर्गम्यतेऽनले स्नात्वा, प्रमाणं ज्ञायते तदा ॥ २३ ॥

श्रुत्वेति निर्ममे गुञ्जा, श्यामं स्वास्यं तथा किल ।
तज्जातिषु तथाऽद्यापि, मुखेषु श्यामता स्थिता ॥ २४ ॥

गुणानुरागिणो स्वल्प-स्तेभ्योऽपि गुणशालिनः ।
गुणिनो गुणरक्ताश्च, तेभ्यः स्वागुणप्रेक्षिणः ॥ २५ ॥

विद्वानेव हि जानाति, विद्वज्जनपरिश्रमम् ।
न हि वन्ध्या विजानाति, गुर्वीप्रसववेदनाम् ॥ २६ ॥

मनोरथोऽपि नो मन्द–भाग्यानां जायते महान् ।
पिक्या एव न वायस्या, वाञ्छाप्याम्रद्रुमे भवेत्॥ २७॥

सेवितव्यो महावृक्षः, फलच्छायासमन्वितः ।
दैवाद्यदि फलं नास्ति, छाया केन निवार्यते ॥ २८॥

शैत्यं नाम गुणस्तवैव भवतः स्वाभाविकी स्वच्छता,
किं ब्रूमः शुचितां व्रजन्त्यशुचयः संगेन यस्यापरे ।
किं चातः परमस्ति ते स्तुतिपदं, त्वं जीवितं देहिनां,
त्वं चेन्नीचपथेन गच्छसि पयः! कस्त्वां निरोद्धुं क्षमः ॥२९॥

उत्तमगुणानुराओ, निवसइ हिययंमि जस्स पुरिसस्स ।
आतित्थयरपयाओ, न दुलहा तस्स रिद्धिओ ॥ ३०॥

विसृज्य सूर्पवद्दोषान्, गुणान् गृह्णन्ति साधवः ।
दोषरागी गुणत्यागी, चालनीव हि दुर्जनः ॥ ३१॥

दोषाणां मिश्रता यत्र, स गुणो नैव भाति मे ।
दोषाभावेन नैर्मल्यं, स एव स्याद्गुणो यदि ॥ ३२॥

कोऽप्यधिकगुणो यस्मात्, स गुणित्वं लभते कथम् ।
स एव स्याद् गुणी यस्मात्, नाधिकोऽस्ति यतः परम् ॥३३॥

न हि अप्पणो वि गुरुया, गुणे पयासंति अप्पणा चेव ।
एमेव पत्तभूयं, सरिआओ सरंति सरिनाहं ॥ ३४॥

का गुणगुरूण हाणी, बहु मन्निज्जंति जइ न इयरेहिं ।
किं झिज्जइ रविणो, जइ न बहुमओ सो उलूयस्स ॥ ३५॥

वण्णाइमेत्ततुल्लो, असरिच्छो सेससारधम्मेहिं ।
मरगयमणिमाहप्पं, कायमणी पावए किह णु ॥ ३६ ॥
गुणजीवितनिर्मुक्तो, यः स्वत एवार्थतो मृतः प्राणी ।
सोऽत्र कथं बुद्धिमतां, विकत्थनीयः सतां भवति ॥ ३७ ॥
बहुदोससंकुले गुणलवम्मि को होज्ज गव्विओ इहइं ।
सोऊण विगयदोसं, गुणनिवहं पुव्वपुरिसाणं ॥ ३८ ॥
न म्लापितान्यखिलधामवतां मुखानि,
नाऽस्तं तमो न च कृता भुवनोपकाराः ।
सूर्यात्मजोऽहमिति केन गुणेन लोकान्,
प्रत्याययिष्यसि शने ! शपथैर्विना त्वम् ॥ ३९ ॥
जननी जनकः स्वामी, गुरुश्चापि विशेषतः ।
यतो दुष्प्रतिकार्याणि, चत्वार्येतानि सर्वथा ॥ ४० ॥
द्रष्टुं स्वदोषान् लोकानां, नैकमप्यस्ति लोचनम् ।
सन्ति लोचनलक्षाणि, परदोषविलोकने ॥ ४१ ॥

स्त्रीश्रेष्ठता

कार्ये दासी रतौ रम्भा, भोजने जननीसमा ।
विपत्तौ बुद्धिदात्री च, सा भार्या भुवि दुर्लभा ॥ ४२ ॥

विद्याप्राप्ति क्यारे थाय ?

नानुद्योगवता न च प्रसवता नात्मानमुत्कर्षता,
नालस्योपहतेन नान्यमनसा नाचार्यविद्वेषिणा ।
न भ्रूभङ्गविलासविस्मितमुखीं सीमन्तिनीं ध्यायता,
लोके ख्यातिकरः सतामभिमतो विद्यागुणः प्राप्यते ॥ ४३ ॥

दानं दरिद्रस्य विभोः प्रशान्तिः,
यूनां तपो ज्ञानवतां च मौनम् ।
इच्छानिवृत्तिश्च सुखोचितानां,
दया च भूतेषु दिवं नयन्ति ॥ ४४ ॥

स्त्रीरूपापि क्षमैवैका, क्रोधयोधं जयत्यमुम् ।
गुणाः परे तु तं जेतुं, पुंरूपा अपि न क्षमाः ॥ ४५ ॥

ये मज्जंति निमज्जयन्ति च परांस्ते प्रस्तरा दुस्तरे,
वार्द्धौ वीर ! तरन्ति वानरभरान् संस्तारयन्तेऽपि च ।
नैते ग्रावगुणा न वारिधिगुणा नो वानराणां गुणाः,
श्रीमद्दाशरथेः प्रतापमहिमा सोऽयं समुज्जृम्भते ॥ ४६ ॥

स्त्रीश्रेष्ठता

पङ्गुमन्धं च कुब्जं च, कुण्ठितं व्याधिपीडितम् ।
निस्स्वमापद्गतं नाथं, न त्यजेत् सा महासती ॥ ४७ ॥

जन्मस्थानं न खलु विमलं वर्णनीयो न वर्णो,
दूरे शोभा वपुषि निहिता पङ्कशङ्कां तनोति ।
यद्यप्येवं निखिलसुरभिद्रव्यदर्पापहारी,
नो जानीमः परिमलगुणः कोऽस्तु कस्तूरिकायाः ॥ ४८ ॥

स्वश्लाघा परनिन्दा च, लक्षणं निर्गुणात्मनाम् ।
परश्लाघा स्वनिन्दा च, लक्षणं सद्गुणात्मनाम् ॥ ४९ ॥

वरं ज्वालाकुले तीव्रे, ज्वलने ज्वालितं वपुः ।
न पुनर्गुणगौराङ्गे, मत्सरोऽल्पोऽपि निर्मितः ॥ ५० ॥

मीयन्ते तद्गुणाः सम्यक्, तत्तुल्यैरेव नापरैः ।
व्योममानं धरा वेत्ति, धरामानं मरुत्पथः ॥ ५१ ॥

अभणंता वि हु नज्जंति, सुपुरिसा गुणगणेहिं नियएहिं ।
किं बोल्लंति मणीओ, जाओ लक्खेहिं घिप्पन्ति ॥ ५२ ॥

## १०४ जननीगौरवख्यापकसूक्तानि

माता पशूनां सुतसत्तयैव, धनार्जनैस्तुष्यति मध्यमानाम् ।
वीरावदातैः पुनरुत्तमानां, लोकोत्तमानां चरणैः पवित्रैः ॥१॥

आस्तन्यपानाज्जननी पशूना-मादारलाभाच्च नराधमानाम् ।
आगेहकृत्याच्च विमध्यमाना-माजीवितात्तीर्थमिवोत्तमानाम् ॥२॥

राज्ञः पत्नी गुरोः पत्नी, पत्नी च सुहृदस्तथा ।
पत्नीमाता स्वमाता च, पञ्चैता मातरः स्मृताः ॥ ३ ॥

व्यूढो गर्भः प्रसवसमये, सोढमत्युग्रशूलम्,
पथ्याहारैः स्नपनविधिभिः स्तन्यपानप्रयत्नैः ।
विष्ठामूत्रप्रभृतिमलिनैः कष्टमासाद्य सद्यः,
त्रातः पुत्रः कथमपि यया, स्तूयते सैव माता ॥ ४ ॥

## १०५ वणिक्स्वरूपप्रदर्शकसूक्तानि

स्थाने सिंहसमा वने मृगसमा देशान्तरे जम्बूकाः,
आहारे बकभीमसेनसदृशाः श्वानोपमा मैथुने ।

रूपं मरकटवत् पिशाचलिपिकृत् चान्येऽपि ते निर्गुणाः,
कार्यार्थे कटकाः परार्थलटका एते गुणा वाणिजः ॥ १ ॥

देशाधीशो ग्राममेकं ददाति, ग्रामाधीशः क्षेत्रमेकं ददाति।
क्षेत्राधीशः प्रस्थमेकं ददाति, नन्दस्तुष्टो हस्ततालिं ददाति॥२॥

वणिजा चोदरस्थेन, मातुर्मांसं न भक्ष्यते।
न तत्र करुणा हेतु-स्तत्र हेतुरदन्तता ॥ ३ ॥

अधीते यत् किञ्चित् तदपि मुषितुं ग्राहकजनं,
मृदु ब्रुते यद्वा तदपि विवशीकर्त्तुमपरम् ।
प्रदत्ते यत्किञ्चित्तदपि समुपादातुमधिकं,
प्रपञ्चोऽयं वृत्तेरहह गहनः कोऽपि वणिजाम् ॥४॥

आजानुलम्बितमलीमससाटकानां,
मित्रादपि प्रथमयाचितभाटकानाम् ।
प्राणादपि प्रियतमैकवराटकानां,
वज्रं दिवः पततु मूर्ध्नि किराटकानाम् ॥५॥

## १०६ वस्तुनः स्वयोग्यकार्याकरणतो निष्फलतानिवेदकसूक्तानि

किं पाणिना परवधुस्तनलम्पटेन,
किं पाणिना शरणमागतघातकेन ।
किं पाणिना परधनग्रहणोद्यतेन,
किं पाणिना गलग्रहीतकनीपकेन ॥१॥

अर्थेन किं कृपणहस्तमुपागतेन,
शास्त्रेण किं बहुशठाचरणाश्रितेन ।
रूपेण किं गुणपराक्रमवर्जितेन,
मित्रेण किं व्यसनकालमनागतेन ॥२॥

अप्रगल्भस्य या विद्या, कृपणस्य च यद् धनम् ।
यच्च बाहुबलं भीरोः, व्यर्थमेतत्त्रयं भुवि ॥३॥

धनेन किं यो न ददाति नाश्नुते,
बलेन किं यश्च रिपून्न बाधते ।
श्रुतेन किं यो न च धर्ममाचरेत्,
किमात्मना यो न जितेन्द्रियो भवेत् ॥४॥

अपात्रे रमते नारी, गिरौ वर्षति माधवः ।
नीचमाश्रयते लक्ष्मीः, प्राज्ञः प्रायेण निर्धनः ॥५॥

धर्मे दार्ढ्यं फलं वृक्षे, जलं नद्यां बलं भटे ।
खलेऽसत्यं जले शैत्यं, घृतं भोज्ये च जीवितम् ॥६॥

तुम्बे विनष्टे किमरैः, राज्ञि नष्टे च किं भटैः ? ।
मूले दग्धे प्रतानैः किं, पुण्ये क्षीणे किमौषधैः ॥७॥

श्रोत्रं श्रुतेनैव न कुण्डलेन, दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः करुणापराणां, परोपकारेण न चन्दनेन ॥८॥

या लोभाद्या परद्रोहाद्यः पात्राद्यः परार्थतः ।
मैत्री लक्ष्मी व्ययः क्लेशः, सा किं सा किं स किं स किम् ?

## १०७ क्षुधाया बलवत्तरतासूचकसूक्तम्

या सद्रूपविनाशिनी स्मृतिहरी पञ्चेन्द्रियाकर्षिणी,
चक्षुःश्रोत्रललाटदैन्यकरणी वैराग्यमुत्पादिनी।
बन्धूनां त्यजनी विदेशगमनी चारित्रविध्वंसिनी,
सेयं धावति भूतपञ्चदमनी प्राणापहर्त्री क्षुधा ॥१॥

## १०८ मृत्युभयनिवेदकसूक्तानि

परिहरति न मृत्युः पण्डितं श्रोत्रियं वा,
धनकनकसमृद्धं बाहुवीर्यं नृपं वा।
तपसि निरतमेतं सुस्थितं दुस्थितं वा,
वनगत इव वह्निः सर्वभक्षी कृतान्तः ॥१॥

गर्भस्थं जायमानं शयनतलगतं मातुरुत्संगसंस्थं,
बालं वृद्धं युवानं परिणतवयसं विश्वमार्यं खलं वा।
वृक्षाग्रे शैलशृङ्गे नभसि पथि जले कोटरे पञ्जरे वा,
पाताले वा प्रविष्टं हरति च सततं दुर्निवार्यः कृतान्तः ॥२॥

दिव्यज्ञानयुता जगत्रयनुता येऽनन्तवीर्या जिना,
देवेन्द्राः सुरवृन्दवन्द्यचरणाः सद्विक्रमाश्चक्रिणो।
वैकुण्ठा बलशालिनो हलधरा ये रावणाद्याः परे,
ते कीनाशमुखं विशन्त्यशरणा यद्वा न लङ्घ्यो विधिः ॥३॥

ये पातालनिवासिनो सुरगणा ये स्वैरिणो व्यन्तरा,
ये ज्योतिष्कविमानवासिविबुधास्तारान्तचन्द्रादयः।

सौधर्मादिसुरालयेषु सुखिनो ये चाऽपि वैमानिका,
स्ते सर्वेऽपि कृतान्तवासमवशा गच्छति किं शोच्यते ॥४॥

बद्धा येन दिनाधिपप्रभृतयो मञ्चस्य पादे ग्रहाः,
सर्वे येन कृताः कृताञ्जलिपुटाः शक्रादिदिक्पालकाः ।
लङ्का यस्य पुरी समुद्रपरिखा सोऽप्यायुषः संक्षये,
कष्टं विष्टपकण्टको दशमुखो दैवाद्गतः पञ्चताम् ॥५॥

नो विद्या न च भेषजं न च पिता नो बान्धवा नो सुता,
नाभीष्टा कुलदेवता न जननी स्नेहानुबन्धान्विता ।
नार्थो न स्वजनो न वा परिजनः शारीरिकं नो बलं,
नो शक्ताः सततं सुरासुरवराः सन्धान्तुमायुः क्षमाः ॥६॥

आः कष्टं प्रतिपालय त्रिजगतीनाथ ! प्रसद्य क्षणं,
यत्तीर्थं न विबाध्यते तव दृशा निस्तेजको भस्मकः ।
इत्युक्ते हरिणा जगाद य इदं कस्याऽपि नैतद्भवेत्,
स श्रीवीरजिनः प्रणष्टवृजिनः पुष्णातु वः संपदम् ॥७॥

हंहो ! शक्र ! सुरालयश्चलति चेत् प्राचीं परित्यज्य चे-
दादित्योऽप्युदयं प्रयाति जलधिः सीमां च चेन्मुञ्चति ।
आयुर्न त्रुटितं तथापि भुवने सन्धातुमत्र क्षमः,
कोऽप्येवं क्षणमेकमाह भगवान् श्रीवर्द्धमानः प्रभुः ॥८॥

लङ्केशः क्व स केशवः क्व स नलः क्वाऽसौ च ते पाण्डवाः,
क्वाऽसौ दाशरथिः क्व तत्कुरुशतं ते शक्रचक्रायुधाः ।

नाभेयप्रमुखाः क्व ते जिनवरास्तत्सर्वसाधारणं,
नन्वेतन्मरणं न तत्र शरणं कश्चित् क्वचित् कस्यचित् ॥९॥

वयं जाता येभ्यश्चिरमुपगता एव खलु ते,
समं यैः संवृद्धाः मरणपदवीं तेऽपि च गताः ।
इदानीमेते स्मः प्रतिदिनसमासन्नविगमा,
गतास्तुल्यावस्थां सिकतिलनदीतीरतरुभिः ॥१०॥

न काप्यवस्था न च कोऽपि कालो,
न कोऽपि देशो न च कोऽपि जीवः ।
न वस्तु किञ्चित् तदिहाऽस्ति लोके,
जीयेत यैरेष रिपुः कृतान्तः ॥११॥

मृत्योर्बिभेषि किं बाल !, स जातं नैव मुञ्चति ।
अजातं नैव गृह्णाति, कुरु यत्नमजन्मनि ॥१२॥

मस्तकस्थायिनं मृत्युं, यदि पश्येदयं जनः ।
आहारोऽपि न रोचेत, किमुताऽकृत्यकारिता ॥१३॥

स कोऽपि नास्ति संसारे, मृत्युना यो न पीडितः ।
सिद्धमार्गममुं ज्ञात्वा, कः शोकं कुरुते सुधीः ॥१४॥

यस्य यमेन मैत्रिः स्यात्, ज्ञानं वा भुवनाद्भुतम् ।
स एवं वदति कल्येऽदः, करिष्याम्यपरः कथम् ॥१५॥

तेऽहङ्कृतिनिग्रहं मृदुतया पश्चात्करिष्याम्यहं,
प्रोद्यन्मारविकारकन्दकदनं पञ्चेन्द्रियाणां जयात् ।

व्यामोहप्रसरावसो धनविधिं सद्ध्यानतो लीलया,
नो जानाति हरिष्यतीह हतकः कालोऽन्तराले किल ॥१६॥

बद्धा येन दशाननेन नितरां खट्वैकदेशे जरा,
द्रोणाद्रिश्च समुद्धृतो हनुमता येन स्वदोर्लीलया।
श्रीरामेण च येन राक्षसपतिस्त्रैलोक्यवीरो हतः,
सर्वे तेऽपि गताः क्षयं विधिवशात्काऽन्येषु तद्भो! कथा ॥

सर्वभक्षी कृतान्तोऽयं, सत्यं लोके निगद्यते।
रामदेवादयो धीराः, सर्वे क्वाऽप्यन्यथा गताः ॥१८॥

करिष्यामि करिष्यामि करिष्यामीति चिन्तनात्।
मरिष्यामि मरिष्यामि मरिष्यामीति विस्मृतम् ॥१९॥

छायामिषेण कालो, सव्वजियाण छलं गवेसंतो!
पासं कह वि न मुंचइ, ता धम्मे उज्जमं कुणह ॥२०॥

## १०९ धर्मदृढतासूचकसूक्तानि

गर्दभदन्त! भदन्त!, नमस्ते,
[1]मर्कटकास्य! वयस्य! सुखं ते।
कस्य गृहे वसतिस्तव साधो!,
यस्य रुचिर्वसतिर्मम तत्र ॥ १ ॥

अकण्ठस्य कण्ठे कथं पुष्पमाला,
विना नासिकायाः कथं गन्धधूपः।

अकर्णस्य कर्णे कथं गीतनादाः,
अपादस्य पादे कथं मे प्रणामः ॥ २ ॥

प्रशमरसनिमग्नं दृष्टियुग्मं प्रसन्नं,
वदनकमलमङ्कः कामिनीसंगशून्यः ।
करयुगमपि यत्ते शस्त्रसम्बन्धवन्ध्यं,
तदसि जगति देवो वीतरागस्त्वमेव ॥ ३ ॥

नाऽहं स्वर्गफलोपभोगरसिको, नाभ्यर्थितस्त्वं मया,
संतुष्टस्तृणभक्षणेन सततं, साधो ! न युक्तं तव ।
स्वर्गे यान्ति यदि त्वया विनिहता यज्ञे ध्रुवं प्राणिनो,
यज्ञं किं न करोषि मातृपितृभिः, पुत्रैस्तथा बान्धवैः ॥४॥

एषा तडागमिषतो बत दानशाला,
मत्स्यादयो रसवती प्रगुणा सदैव ।
पात्राणि यत्र बकसारसचक्रवाकाः,
पुण्यं कियद्भवति तत्र वयं न विद्मः ॥५॥

पापपंकमां लेपायेलने जैनधर्म रुचतो नथी

हिंसा त्याज्या नरकपदवी सत्यमाभाषणीयं,
स्तेयं हेयं विषयविरतिः सर्वसङ्गान्निवृत्तिः ।
जैनो धर्मो यदि न रुचितः पापपङ्कावृतेभ्यः,
सर्पिर्दुष्टं किमिदमियता यत्प्रमेयी न भुङ्क्ते ॥६॥

---

१ "कपिवृषणास्य ! वयस्य सुखं ते । कुत्र भवेद्भवदीय-निवासो यत्र भवेद्भवदीयनिवासः" इति पदत्रयं पाठान्तरम् ।

श्री जिन दर्शनादिथी रहित स्थानमां पैसा मले तो पण शुं?

जत्थ न दीसंति जिणा, न य भवणं नेव संघमुखकमलं।
न य सुव्वइ जिणवयणं, किं ताए अत्थ भूईए ॥७॥

धर्मकर्मनो मनोरथ भाग्यविना थतो नथी

भवन्ति भूरिभाग्यानां, धर्मकर्ममनोरथाः।
फलन्ति पुनः केषाञ्चि–त्ततोऽपि भाग्यानन्तता ॥८॥

भवन्ति भूरिभिर्भाग्यै–र्धर्मकर्ममनोरथाः।
फलन्ति यत्पुनः तेऽपि, तत्सुवर्णस्य सौरभम् ॥९॥

## ११० सुपुत्रसूक्तानि

एकेनाऽपि सुवृक्षेण पुष्पितेन सुगन्धिना।
वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा ॥१॥

एकेनाऽपि सुपुत्रेण सिंही स्वपिति निर्भयम्।
सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ॥२॥

सुपुत्र–कुपुत्रनी ओळखाण

सौरभाय भवन्त्येके, चन्दना इव नन्दनाः।
कुलच्छित्त्यै भवन्त्येके, वालका इव बालकाः ॥३॥

शर्वरीदीपकश्चन्द्रः, प्रभाते दीपको रविः।
त्रैलोक्यदीपको धर्मः, सुपुत्रः कुलदीपकः ॥४॥

कुलं पवित्रं जननी कृतार्था, वसुन्धरा भाग्यवती च तेन।
अबाह्यमार्गे श्रुतसिन्धुमग्नं, लग्नं परब्रह्मणि यस्य चेतः ॥५॥

कलङ्कं कुरुते कश्चित्, कुलेऽपि विमले सुतः ।
धननाशकरः कश्चि-द्व्यसनैः पुण्यनाशकैः ॥६॥

पित्रोः संतापकः कश्चिद्, यौवने प्रेयसीमुखः ।
बाल्येऽपि म्रियते कोऽपि, स्यात् कोऽपि विकलेन्द्रियः ॥७॥

यथा वृष्टिं विना सस्यं, यथा मूलं विना तरुः ।
यथा गुरुं विना विद्या, यथा धर्मो दयां विना ॥८॥

यथा ज्ञानं विना तत्त्वं, यथा नीतिं विना धनम् ।
तथैधते विना पुत्रं, न कुलं चन्द्रनिर्मलम् (युग्मम्) ॥९॥

कस्यापि मानसे राज-हंसीव विशदा सदा ।
विलासं तनुते मात-पितृभक्तिर्महात्मनः ॥१०॥

सुपुत्रत्वाभिमानं हि, कथंकारं करोतु सः ।
शक्तोपि न पूरयति, यो मातुः सन्मनोरथान ॥११॥

## १११ भिन्नभिन्नविषयकसूक्तानि

भगोऽर्कज्ञानमाहात्म्य-यशोवैराग्यमुक्तिषु ।
रूपवीर्यप्रयत्नेच्छाश्रीधर्मैश्वर्ययोनिषु ॥१॥

महागिरिः सुहस्ती च सूरि श्रीगुणसुन्दरः ।
श्यामार्यः स्कन्दिलाचार्यो रेवतीमित्रसूरिराट् ।
श्रीधर्मो भद्रगुप्तश्च, श्रीगुप्तो वज्रसूरिराट् ।
युगप्रधानप्रवरा दशैते दशपूर्विणः ॥२॥

गजो वृषो हरिः श्रीः स्रक् शशी भानुर्ध्वजो घटः ।
सरो वार्धिर्विमानं च, रत्नौघोऽग्निर्बुधैर्मताः ॥४॥

स्वाम्यमात्यश्च राष्ट्रं च, दुर्गः कोशो बलं सुहृत् ।
राज्यं सप्ताङ्गमप्येतत् सद्गुणैरेव धार्यते ॥५॥

चक्रचर्मछत्रदण्डाः कृपाणः काकिणिर्मणिः ।
गजाश्वगृहसेनानीपुरोधःस्थपतिस्त्रियः ॥६॥

दर्पणो वर्द्धमानश्च, कलशो मीनयोर्युगम् ।
श्रीवत्सः स्वस्तिको नन्दा–वर्त्तभद्रासने इति ॥७॥

अर्हच्चैत्यं तथा बिम्बं सिद्धान्तादेस्तु पुस्तकम् ।
संघश्चतुर्विधश्चेति सप्तक्षेत्री जिनोदिता ॥८॥

चक्किदुगं हरिपणगं, पणगं चक्कीण केसवो चक्की ।
केसवचक्की केसव, दुचक्की केसी अ चक्की अ ॥९॥

श्रीवर्द्धमाननिर्वाणात्, षोडशाब्दशती तथा ।
एकोनसप्तत्यधिका व्यतीता यावता तदा ॥१०॥
"कुमारपालभूपालोऽभवत्तत्र महामतिः॥ (इति श्लोकार्धः)"

त्वया सत्यव्रतं राजन्निदं आजन्मपालितम् ।
ब्राह्मणस्याऽस्य वृद्धस्य, केवलं मृत्यवे गुरोः ॥११॥

विश्वावसोस्तु बृहती, तुम्बरोस्तु कलावती।
महती नारदस्य स्यात्, सरस्वत्यास्तु कच्छपी ॥१२॥

अल्पाक्षरमसंदिग्धं सारवद् विश्वतोमुखम्।
अस्तोभमनवद्यं च, सूत्रं सूत्रविदो विदुः ॥१३॥

संहितैकपदे नित्या, नित्या धातूपसर्गयोः।
नित्या समासे वाक्ये तु, सा विवक्षामपेक्षते ॥१४॥

संकप्पो संरम्भो परितावकरो भवे समारम्भो।
आरम्भो उद्दवओ सव्वनयाणं विसुद्धाणं ॥१५॥

शक्रस्य चक्रिणो राज्ञः, स्थानेशस्य गुरोरपि।
पञ्चधाऽवग्रहो भावात् पञ्चानामपि पुण्यकृत् ॥१६॥

पत्तनं शकटैर्गम्यं, घोटकैर्नौभिरेव च।
नौभिरेव तु यद्गम्यं पट्टनं तत्प्रचक्षते ॥१७॥

आस्व दासौ मृगौ हंसौ, मातङ्गावमरौ तथा।
एषा नौ पष्ठिका जातिः, अन्योऽन्याभ्यां वियुक्तयोः ॥१८॥

रत्नैः सुवर्णैर्बीजैर्वा, रचिता जपमालिका।
सर्वजापेषु सर्वाणि, वाञ्छितानि प्रयच्छतु ॥१९॥

करकंडू कलिङ्गेसु, पंचालेसु अ दुम्मुहो।
नमीराया विदेहेसु, गंधारेसु अ नग्गई ॥२०॥

ऐश्वर्यस्य समग्रस्य, रूपस्य यशसः श्रियः।
धर्मस्याऽथ प्रयत्नस्य, षण्णां भग इतीङ्गना ॥२१॥

पशुः पण्यं धनं गोष्ठी, भोगधर्मजिनालया ।
क्रमशो भूमयः सप्त, सप्तभूमिनिकेतने ॥२२॥

[१]चक्रिको [२]मोचिको [३]लोह–कारो [४]रजक[५]गंच्छिकौ ।
[६]माच्छिकः [७]शूचिको [८]भिल्लो [९]जालिकः कारवो नव ॥२३॥

[१]स्वर्णकृ[२]न्नापितः [३]कान्द–विकः [४]कौटुम्बिकस्तथा ।
[५]मालिकः [६]काछिकश्चापि, [७]ताम्बूलिकश्च सप्तमः ॥
[८]गन्धर्वः [९]कुम्भकारः स्या–देते च नव नारवः ॥२४॥

सद्गमनसन्निरीक्षण–सज्जल्पनमिति वदन्ति लावण्यम् ।
ईश्वरता सुस्वरता, सुन्दरता चेति सौभाग्यम् ॥२५॥

गजे शङ्खे हरौ छत्रे, चन्द्रे पद्मे जिनालये ।
मौक्तिके विद्रुमे स्वर्णे, या नित्या परमेश्वरी ॥२६॥
इदमस्तु संनिकृष्टे, समीपतरवर्ति चैतदो रूपम् ।
अदसस्तु विप्रकृष्टे, तदिति परोक्षे विजानीयात् ॥२७॥

मणपरमोहिपुलाए, आहारगखवगउवसमे कप्पे ।
संजमतियकेवलसि–ज्झणा य जम्बुमि वुच्छिन्ना ॥२८॥
ग्रामो वृत्यावृतः स्यात्, नगरमुरुचतुर्गोपुरोद्भासिशोभं,
खेटं नद्यद्रिवेष्टं परिवृतमभितः कर्बटं पर्वतेन ।
ग्रामैर्युक्तं मडम्बं दलितदशशतैः पत्तनं रत्नयोनिः,
द्रोणाख्यं सिन्धुवेलावलयितमथ सम्बाधनं चाद्रिशृङ्गे ॥२९॥

बौद्धं नैयायिकं सांख्यं, जैनं वैशेषिकं तथा ।
जैमिनीयं च नामानि, दर्शनानाममून्यहो ॥३०॥

हयकासरयोरजवानरयो–र्नकुलोरगयोः करिकेशरिणोः ।
वृषदंशविनायकवाहनयोः, सहजं भुवि वैरमिह प्रथितम् ॥३१॥

यदाऽत्र भरतक्षेत्रे, राजा दशरथोऽभवत् ।
तदा सीमन्धरस्वामी, विदेहे व्रतमग्रहीत् ॥३२॥

दानपुण्यकृता कीर्त्तिः, पराक्रमकृतं यशः ।
एकदिग्गामिनी कीर्त्तिः, सर्वदिग्गामुकं यशः ॥३३॥

"शिक्षाकल्पो व्याकरणं,छन्दोज्योतिर्निरुक्तयः। इति षडङ्गानि।"
तत्राद्यैष्ट षडङ्गानि, वेदांश्चतुर एव च ।
पुराणं धर्मशास्त्रं च, मीमांसा न्यायविस्तरम् ॥३४॥

रणे शूरः नते सोमः, वक्रो वक्रे बुधो बुधे ।
वाण्यां वाचस्पतिः काव्ये, कविर्मन्दोऽक्रियासु यः ॥३५॥

चक्रं खड्गो धनुः शङ्खो, वनमाला गजो मणिः ।
सप्रभावाणि सप्तास्या–ऽमूनि रत्नानि जज्ञिरे ॥ ३६ ॥

अहङ्कारोऽपि बोधाय, रागोऽपि गुरुभक्तये ।
विषादः केवलायाभूत्, चित्रं श्रीगौतमप्रभोः ॥ ३७ ॥

## ११२ उत्सूत्रवचनदुष्टताख्यापकसूक्तानि

अविहिकया वरमकयं, उस्सुयवयणं वयंति सव्वन्नू ।
जम्हा पायच्छित्तं, अकए गुरुअं कए लहुअं ॥ १ ॥

उस्सुत्तभासगाणं,-बोहिनासो अणन्तसंसारो ।
पाणच्चाए वि धीरा, उस्सुत्तं तो न भासंति ॥ २ ॥

आणाभंगं दट्ठुं, मज्झत्था ठिंति जे तुसिणिआ य ।
अविहिअणुमोयणाए, तेसिं पि य होइ वयलोवो ॥ ३ ॥

## ११३ चातुर्यसूचकसूक्ते

दीसइ विविहच्चरियं, जाणिज्जइ सुयणदुज्जणविसेसो ।
अप्पाणं च कलिज्जइ, हिंडिज्जइ तेण पुहवीए ॥ १ ॥

देशाटनं पण्डितमित्रता च, वाराङ्गना राजसभाप्रवेशः ।
अनेकशास्त्रार्थविलोकनं च, चातुर्यमूलानि भवन्ति पञ्च ॥ २ ॥

## ११४ अनर्थदण्डसूक्तम्

आर्त्तं रौद्रमपध्यानं, पापकर्मोपदेशिता ।
हिंस्रोपकारि दानं च, प्रमादाचरणं तथा ॥ १ ॥

## ११५ आरोग्यसूचकसूक्तानि

अगन्धं अव्यक्तरसं, शीतलं च तृषापहम् ।
अच्छं लघु च पथ्यं च, तोयं गुणवदुच्यते ॥ १ ॥

अत्यम्बुपानान्न विपच्यतेऽन्नं, निरम्बुपानाच्च स एव दोषः ।
तस्मान्नरो वह्निविवर्धनाय, मुहुर्मुहुर्वारि पिबेदभूरि ॥ २ ॥

व्यातिदलैलामधुमातुलिङ्ग—पत्रैः शिलाजिद्युतपीप्पलीकैः ।
कृतोऽवलेहः कुरुते नराणां, कण्ठध्वनिं किन्नरनादतुल्यम् ॥३॥

बलावरोधि निर्दिष्टं ज्वरादौ लङ्घनं हितम् ।
ऋतेऽनिलश्रमक्रोध–शोककामक्षतज्वरान् ॥ ४ ॥

औषधेन विना व्याधिः, पथ्यादेव निवर्त्तते ।
न तु पथ्यविहीनस्य, औषधानां शतैरपि ॥ ५ ॥

शरदि यज्जलं पीतं, यद्भुक्तं पौषमाघयोः ।
ज्येष्ठाषाढे च यत्सुप्तं, तेन जीवन्ति मानवाः ॥ ६ ॥

पानाहारादयो यस्या–ऽविरुद्धाः प्रकृतेरपि ।
सुखित्वायावलोक्यन्ते, तत्सात्म्यमिति गीयते ॥ ७ ॥

उभे मूत्रपुरीषे च, दिवा कुर्यादुदङ्मुखः ।
रात्रौ दक्षिणतश्चैव, तस्य आयुर्न हीयते ॥ ८ ॥

प्रवालपंचामृत

प्रवाल–मुक्ताफल–शंखशुक्ति–कपर्दिकानां समांशमानम् ।
प्रवालमात्रं द्विगुणं प्रयोज्यं, सर्वैः समांशं रविदुग्धमेव ॥ ९ ॥
"प्रवालपञ्चामृतनामधेयो, योगोत्तमः सर्वगदापहारी।श्लोकार्धः।"

भोजन क्यारे करवुं ?

याममध्ये न भोक्तव्यं, यामयुग्मं न लङ्घयेत् ।
याममध्ये रसोत्पत्ति–र्यामयुग्मे बलक्षयः ॥ १० ॥

अति खावा-बोलवानुं भयंकर परिणाम

जीहे जाणइ पमाणं, जिमिअव्वे तहा जंपिअव्वे ।
अइजिमिय–जंपियाणं, परिणामो दारूणो होइ ॥ ११ ॥

रोगोथी बचवाना उपाय

हित-मित-पथ्यभोजी, वामशायी नित्यं चंक्रमणशीलः ।
उज्झितमूत्रपुरीषः, स्त्रीषु जितात्मा जयति रोगान् ॥१२॥

भोजनादौ विषतुल्यं, भोजनान्ते शिलोपमम् ।
मध्ये पीयूषसादृश्यं, वारिपानं भवेदहो ॥ १३ ॥

## ११६ सप्तव्यसनदुष्टत्वख्यापकानि सूक्तानि

द्यूतं च मांसं च सुरा च वेश्या, पापर्धिचौर्ये परदारसेवा ।
एतानि सप्तव्यसनानि लोके, घोरातिघोरं नरकं नयन्ति ॥१॥

पित्वा पित्वा पुनः पित्वा, पतित्वा च महीतले ।
पुनरुत्थाय च पित्वा, पुनर्जन्म न विद्यते ॥२॥

द्यूताद्राज्यविनाशनं नलनृपः, प्राप्तोऽथवा पाण्डवाः,
मद्यात्कृष्णनृपश्च राघवपिता, पापर्द्धितो दूषितः ।
मांसाच्छ्रेणिकभूपतिश्च नरके, चौर्याद्विनष्टा न के ?,
वेश्यातः कृतपुण्यको गतधनोऽन्यस्त्रीमृतो रावणः ॥३॥

या विचित्रविटकोटिनिघृष्टा, मद्यमांसनिरतातिनिकृष्टा ।
कोमला वचसि चेतसि दुष्टा, तां भजन्ति गणिकां न विशिष्टाः

जुगारनी भयंकरता

प्रभवन्ति भृशं रोगाः शीघ्रं कुप्यन्ति देवताः ।
भ्रश्यन्ति सर्वकार्याणि, द्यूतासक्तस्य देहिनः ॥५॥

स्वजना दूरतो यान्ति, न विश्वसिति कोपि हि ।
लक्ष्मीर्विलयते शीघ्रं, द्यूतव्यसनशालिनः ॥६॥
वरं हालाहलं भुक्तं, भृगुपातः कृतो वरम् ।
वरं वह्निप्रवेशो वा, न तु द्यूतं निषेवितुम् ॥७॥

वेश्यानी ओळख

नटविटभटभुक्तां सत्यशौचादिमुक्तां,
कपटशतनिधानं शिष्टनिन्दानिदानम् ।
धननिधनविधानं सद्गुणानां पिधानं,
पराभवपदव्येकां कः पणस्त्रीं भजेत ॥८॥
अभ्रच्छाया तृणादग्निः, खले प्रीतिः स्थले जलम् ।
वेश्याप्रेम दुर्जनमैत्रिः, षडेते बुद्बुदोपमाः ॥९॥

## ११७ पुनरुक्तेरदोषत्वख्यापकानि सूक्तानि

वक्ता हर्षभयादिभिराक्षिप्तमनाः स्तुवंस्तथा निन्दन् ।
यत्पदमसकृद् ब्रूते, तत्पुनरुक्तं न दोषाय ॥१॥
सज्झायझाणतवओसहेसु, उवएसथुइपयाणेसु ।
सन्तगुणकित्तणेसु य, न हुन्ति पुनरुत्तदोसा ॥२॥
ये तीर्थकृत्प्रणीता, भावास्तदनन्तरैश्च परिकथिताः ।
तेषां बहुशोऽप्यनुकी-र्त्तनं, भवति पुष्टिकरमेव ॥३॥

## ११८ जातिस्वभावसूक्तानि

स्त्रीजातौ दाम्भिकता, भीरूकता भूयसी वणिज्जातौ ।
रोषः क्षत्रियजातौ, द्विजातिजातौ पुनर्लोभः ॥१॥

वायससाणखराई- निवारिया वि हु हवन्ति असुइरई ।
हंसकरिसीहपमुहा, न कयावि पणुल्लिआवि पुणो ॥२॥

धर्मरागो दुराधानः, पापरागस्तु नाङ्गिनि ।
सुरज्या हि यथा नीली, मञ्जिष्ठा न तथांशुके ॥३॥

जातापत्या पतिं द्वेष्टि, कृतदारस्तु मातरम् ।
कृतार्थः स्वामिनं द्वेष्टि, जितरोगश्चिकित्सकम् ॥४॥

पूर्व भवना अभ्यासथी प्राप्त थती वस्तुओ

रागदोसकसायाऽऽहारभयरूम्रमेहुन्नं ।
पुव्वभवब्भासाओ लब्भइ असुअं अदिट्ठंपि ॥५॥

## ११९ प्रेमाप्रेमसूक्ते

योजनानां सहस्राणि, विना प्रेमपदान्तरम् ।
अनुरागवतां पुंसां, लङ्काऽपि स्याद्गृहाङ्गणम् ॥१॥

दूरस्थोऽप्यब्जिनीनाथो, विकासयति पद्मिनीम् ।
एकस्थानस्थितमपि, कर्णं पश्यति नेक्षणम् ॥२॥

## १२० ऋषभस्वामिवंशमहिम्नः सूक्तानि

भरतादनुसन्ताने, सर्वे भरतवंशजाः ।
अजितस्वामिनं याव–दनुत्तरशिवालयाः ॥१॥

सर्वेऽपि संघपतयः, सर्वेऽर्हच्चैत्यकारकाः ।
तीर्थोद्धारकराः सर्वे, सर्वेऽखण्डप्रतापिनः ॥२॥

राया आइच्चजसे, महाजसे अइबले य बलभद्दे ।
बलविरिय कित्तिविरिय, जलविरिय दंडविरिए य ॥३॥
एएहिं अद्धभरहं, सयलं भुत्तं सिरेण धरिओ य ।
जिणसंतिओ य मउडो, सेसेहिं न चाइओ वोढुं ॥४॥

[इति ऋषिमण्डलप्रकरणे]

## १२१ दार्शनिकानां प्रमाणमन्तव्यसूक्तम्

चार्वाकोऽध्यक्षमेकं सुगतकणभुजौ सानुमानं सशाब्दं,
तद्वैतं पारमर्षः सहितमुपमया तत्त्रयं चाक्षपादः ।
अर्थापत्त्या प्रभाकृद् वदति तदखिलं मन्यते भट्ट एतत्,
साभावं द्वे प्रमाणे जिनपतिसमये स्पष्टतोऽस्पष्टतश्च ॥१॥

## १२२ गीतार्थस्थानसूक्तानि

त्यक्तबाह्येतरग्रन्थाः, निःस्पृहा भवचारके ।
संतुष्टा ध्यानयोगेन, प्रशमामृतपायिनः ॥१॥
गीयं भण्णइ सुत्तं, अत्थो तस्सेव होइ वक्खाणं ।
उभएण य संजुत्तो, सो गीयत्थो मुणेयव्वो ॥२॥
संसारदुक्खमहणो, विबोहणो भवियपुंडरीयाणं ।
धम्मो जिणपण्णत्तो, पकप्पजइणा कहेयव्वो ॥३॥
अन्नाणी वक्खाणं, करेइ जो तस्स होइ पावफलं ।
नाणी वि जो न भासइ, सो लहइ नाणविग्घं तु ॥४॥

अवलंबिउण जं किंचि, समायरन्ति गीयत्था ।
थोवावराहबहुगुणं, सव्वेसिं तं पमाणं तु ॥५॥

नमोऽस्तु तुभ्यं भगवन् ! तपस्विने,
मयि त्वमुच्चैः करुणापरो भव ।
भवाम्बुधेर्मोहितरङ्गदुस्तरात्,
प्रसीद निस्तारय किङ्करं निजम् ॥६॥

जो हेउवायपक्खंमि हेउओ आगमम्मि आगमिओ ।
सो समयपन्नवओ सिद्धंतविराहगो अन्नो ॥७॥

आणागिज्झो अत्थो, आणाए चेव सो गहेयव्वो ।
दिट्ठंति उ दिट्ठंता, कहणविहिविराहणा इहरा ॥८॥

जे जत्तिया य हेऊ, भवस्स ते चेव तत्तिया मुक्खे ।
गणणाईया लोगा, दुण्ह वि पुण्णा भवे तुल्ला ॥९॥

जिहाए वि लिहन्तो, न भद्दओ जत्थ सारणा नत्थि ।
दंडेण वि ताडंतो, स भद्दओ सारणा जत्थ ॥१०॥

जह सीसाइं निकिंतइ, कोइ सरणागयाण जंतूणं ।
तह गच्छमसारन्तो, गुरू वि सुत्ते जओ भणिअं ॥११॥

जहिं नत्थि सारणवारणा य, चोयणापडिचोयणा व गच्छम्मि ।
सो अ अगच्छो गच्छो, संजमकामीहिं मोत्तव्वो ॥१२॥

गच्छं तु उवेहन्तो कुव्वइ दीहं भवं विहीए उ ।
पालंतो पुण सिज्झइ, तइयभवे भगवईसिद्धं ॥१३॥

सावज्जणवज्जाणं जो न जाणइ विसेसं ।
वोत्तुं पि तस्स न खमं, किमंग पुण देसणं काउं ॥१४॥

त्यक्तदाराः सदाचारा, मुक्तभोगा जितेन्द्रियाः ।
जायन्ते गुरवो लोके, सर्वभूताभयप्रदाः ॥ १५ ॥

निवर्त्तयत्यन्यजनं प्रमादतः, स्वयं च निष्पापपथे प्रवर्तते ।
गृणाति तत्त्वं हितमिच्छुरङ्गिनां, शिवार्थिनां यः स गुरुर्निगद्यते

वंदिज्जमाणा न समुक्कसंति, हीलीज्जमाणा न समुज्जलन्ति ।
दंतेण चित्तेण चरन्ति धीरा, मुणी समुग्घाइअरागदोसा ॥१७॥

अगीअत्थस्स वयणेणं, अमियं पि न घुंटए ।
गीयत्थस्स वयणेणं, विसं हालाहलं पिबे ॥ १८ ॥

वूढो गणहरसद्दो, गोयमाईहिं धीरपुरिसेहिं ।
जो तं ठवेइ अपत्ते, जाणंतो सो महापावो ॥ १९ ॥

नासेइ अगीयत्थो, चउरंगं सव्वलोअसारंगं ।
नट्ठंमि अ चउरंगे, न उ सुलहो होई चउरंगो ॥ २० ॥

तुमं अगीअत्थनिसेवणेणं, मा जीव भद्दं मुण निच्छएणं ।
संसारमाहिंडसि घोरदुक्खं, कया वि पावेसि न मोक्खसुक्खं ॥

अगीओ न वियाणइ, सोहिं चरणस्स देइ ऊणऽहियं ।
तो अप्पाणं आलो–यगं च पाडेइ संसारे ॥ २२ ॥

आगमश्चोपपत्तिश्च, संपूर्णं दृष्टिलक्षणम् ।
अतीन्द्रियाणामर्थानां, सद्भावप्रतिपत्तये ॥ २३ ॥

महल्लधम्मकज्जेसु, अववाओ वि देसिओ ।
न पुणो पावकज्जंमि, जिणधम्मंमि कत्थ वि ॥ २४ ॥

उस्सग्गे अववायं, आयरमाणो विराहओ होइ ।
अववाए पुण पत्ते, उस्सग्गनिसेवओ भइओ ॥ २५ ॥

उस्सग्गववायविऊ, गीयत्थो निस्सिओ य जो तस्स।
अनिगूहंतो विरियं, असढो सव्वत्थ चारित्ती ॥ २६ ॥

## १२३ शिष्यधर्मसूक्तानि

नेच्छइ य सारणाई, सारिज्जन्तो य कुप्पइ सपावो ।
उवएसं पि न अरिहइ, दूरे सीसत्तणं तस्स ॥ १ ॥

छन्देण गओ छन्देण आगओ चिट्ठिओ य छन्देण ।
छन्दम्मि अ वट्टमाणो, सीसो छन्देण मुत्तव्वो ॥ २ ॥

नाणस्स होइ भागी, थिरयरओ दंसणे चरित्ते य ।
धन्ना आवकहाए, गुरुकुलवासं न मुंचंति ॥ ३ ॥

पढमं चिय गुरुवयणं, मुम्मुरजलणु व्व दहइ भण्णंतं ।
परिणामे पुण तं चिय, मुणालदलसीयलं होइ ॥ ४ ॥

तह सेवन्ति सउण्णा, गुरुकुलवासं जहा गुरूणं पि ।
नित्थारकारणं चिय, पंथगसाहु व्व जायन्ति ॥ ५ ॥

गुरुमुले वि वसंता, जे गुरुपडिकुलया विवट्टंति ।
विहलं चिय तं तेसिं, अहव अणत्थफलं चेव ॥ ६ ॥

तो सेविज्ज गुरुं चिय, मोक्खत्थी मोक्खकारणं पढमं ।
आलोएज्जसु सम्मं, पमायखलिअं च तस्संतो ॥७॥

गुरोर्निवेदितात्मा यो, गुरुभावानुवर्त्तकः ।
मुक्त्यर्थं चेष्टतेऽत्यर्थं, स विनेयः प्रकीर्त्तितः ॥८॥

छट्ठट्ठमदसमदुवालसेहिं, मासद्धमासखमणेहिं ।
अकरिंतो गुरुवयणं, अणंतसंसारिओ होई ॥९॥

कुर्वाणोऽपि क्रियाकाण्डं, प्रकाण्डो गुणवत्स्वपि ।
न सिद्धिमश्नुते प्राणी, गुर्वाज्ञाराधनादृते ॥१०॥

वरं न राज्यं न कुराज्यराज्यं, वरं न दारा न कुदारदाराः ।
वरं न मित्रं न कुमित्रमित्रं, वरं न शिष्यो न कुशिष्यशिष्यः ॥११

प्रायश्चित्तं गुरूणां हि, वचांसि निखिलैनसाम् ।
नातिक्रान्तगुरूणां हि, क्रिया कापि फलेग्रहिः ॥१२॥

अधम-उत्तम शिष्योनी ओलखाण

अनासवा थूलवया कुसीला, मिउं पि चंडं पकरंति सीसा ।
चित्ताणुआ लहुदक्खोववेया, पसायए ते हु दुरासयं पि ॥१३॥

## १२४ देवद्रव्यभक्षणोपेक्षणदुष्टत्वनिवेदकसूक्तानि

चेइअदव्वं साहारणं च, जो मुसइ सयं व भक्खेइ ।
सइ सामत्थि उवेक्खेइ, जाणंतो सो महापावो ॥१॥

जम्मुवेहन्तो पावइ, साहू वि भवं दुहं च सोउणं ।
संकासमाइयाणं, को चेइयदव्वमवहरइ ॥२॥

देवद्रव्यं गुरुद्रव्यं, ये चाश्नन्ति दिने दिने ।
तेषां शुद्धिर्न विद्येत, सर्वतीर्थाश्रयैरपि ॥३॥
शुनोगर्दभचाण्डाल–मद्यभाण्डरजस्वलाः ।
स्पृष्ट्वा देवलकं चैव, सचेलं स्नानमाचरेत् ॥४॥

देवद्रव्यना उपभोग तथा उपेक्षानुं महाभयंकर परिणाम

चेइयदव्वविणासे, रिसिघाए पवयणस्स उड्डाहे ।
संजइचउत्थभंगे, मूलग्गी बोहिलाभस्स ॥५॥
ऋणमन्यदपि प्रायो, नृणां दुःखाय जायते ।
यद्देवस्य ऋणं तत्तु, महादुःखनिबन्धनम् ॥६॥
चैत्यद्रव्यहृतिः साध्वी–शीलभङ्गर्षिघातने ।
तथा प्रवचनोड्डाहो, मूलाग्निर्बोधिशाखिनः ॥७॥
भक्षितोपेक्षितत्वाभ्यां, देवद्रव्यविनाशकः ।
नानाविधामयं दीनो, प्राप्नोति नरकव्यथाम् ॥८॥
शिवस्य सुहृदा देव–प्रतिमायाः करस्थितम् ।
जगृहे परिपाकेणा–तीवरम्यं फलं महत् ॥९॥
शिवकेतुगुरोऽवादीद्, भृकुटीभङ्गभीषणः ।
कथमेतत् त्वया मूढ !, गृह्यते देवतार्पितम् ॥१०॥
उवाच केवली भद्र ! यः स्तोकं देवताधनम् ।
गृह्णाति हन्त भुङ्क्ते च, तस्य स्याद्दुर्गतिस्थितिः ॥११॥
स्तोकचैत्यधनेन स्या–दपारो भवसागरः ।
भवे भवे च दारिद्र्यं, संकाशस्येव जायते ॥१२॥

भोक्ता चैत्यधनस्यो–च्चैर्गन्ता दुर्गतिपत्तने ।
वृद्धिकृच्चैत्यवित्तस्य, निर्वाणपदजाङ्घिकः ॥१३॥

चैत्यवित्तविनाशेन, साध्व्या अभिगमेन च ।
कृतेन मुनिघातेन, बोधिलाभः सुदुर्लभः ॥१४॥

विज्ञातजिनधर्मोऽपि, देववित्तस्य भक्षणात् ।
ईदृग्विपाकस्तदभू–च्चतुर्गतिगतस्य ते ॥१५॥

हा ! मया देववित्तानि भक्षितानि कुबुद्धिना ।
तैरहं पातकाजीर्णे, पातितोऽस्मि सविस्तरम् ॥१६॥

देवने चडेल वस्तु वेचवानुं विधान

विक्रीय पत्रपूगादि, भान्त्वा सुबहु पत्तने ।
किं बहुना ? देवतास्वं, शुभभावादवीवृधत् ॥१७॥

## १२५ उपधानविषयसूक्ते

उपधानतपो विधिवद्, विधाय धन्यो निधाय निजकण्ठे ।
द्वेधाऽपि सूत्रमालां, द्वेधाऽपि शिवश्रियं श्रयति ॥१॥

मुक्तिकनीवरमाला, सुकृतजलाकर्षणे घटीमाला ।
साक्षादिव गुणमाला, माला परिधीयते धन्यैः ॥२॥

## १२६ उद्यापनविषयसूक्ते

लक्ष्मीः कृतार्था सफलं तपोऽपि, ध्यानं सदोच्चैर्जनबोधिलाभः ।
जिनस्य भक्तिर्जिनशासने श्रीः, गुणाः स्युरुद्यापनतो नराणाम् ॥

उद्यापनं यत्तपसः समर्थने, तच्चैत्यमौलौ कलशाधिरोपणम् ।
फलोपरोपोऽक्षतपात्रमस्तके, ताम्बुलदानं कृतभोजनोपरि ।२।

## १२७ श्रीनमस्कारमहामन्त्रमाहात्म्यसूक्तानि

ससिधवला अरिहंता, सिद्धा वरपम्मरागसंकासा ।
कणगाभा आयरिया, उवज्झाया पुण पियंगुनिहा ॥१॥
अंजणमणिप्पहा तह, लोए सव्वे वि साहुणो विविहा ।
इय परमेट्ठिपयाइं, पंच वि झाइज्जइ विहिणा ॥२॥
एयाण नमुक्कारो पंचण्हं होइ मंगलं पढमं ।
उड्ढमहोतिरियंमि वि, एसु च्चिय सासओ मंतो ॥३॥
एरवएहिं पंचहिं, भरहेहिं संपढिज्जई य ।
अईयअणागयकाले, एसो च्चिय जिणनमुक्कारो ॥ ४ ॥
सट्ठिसयं विजयाणं, पवराणं जत्थऽणाइजिणधम्मो ।
सासयकालो वट्टइ, तत्थ वि इमो चेव य नमुक्कारो ॥ ५ ॥
जम्मि वासरे पढिज्जइ, जेणिह जीयस्स होइ फलरिद्धी ।
अवसाणे वि पढिज्जइ जेण मओ सग्गइं जाइ ॥ ६ ॥
आवईहिंपि पढिज्जइ, जेण य लंघेइ आवइसयाइं ।
रिद्धीहिंपि पढिज्जइ, जेण य सा होइ वित्थिण्णा ॥ ७ ॥
जह अहिणा दट्ठाणं गारुडमंतो विसं पणासेइ ।
तह नवकारो मंतो, पावविसं नासइ असेसं ॥ ८ ॥

किं एस कामकुंभो, किं वा चिंतामणी हु य नवकारो ।
किं कप्पतरू, एसो न हु न हु ताणंपि अहिययरो ॥ ९ ॥
कामघडो देवमणी, सुररुक्खो एगजम्म सुहहेऊ ।
नवकारो पुण पवरो, सग्गऽपवग्गाण दायारो ॥ १० ॥
सत्तरिकोडाकोडी–सायरमाणे इमंमि ओहणीए ।
कोडाकोडीसेसे, नवकारो सुहज्जिओ होइ ॥ ११ ॥
जं किंपि परमतत्तं परमप्पयकारणं च जं किंचि ।
तत्थ इमो नवकारो, झाइज्जइ परमजोगीहिं ॥ १२ ॥
पणव–हरिया–रिहा(ॐ ह्रीं अर्हं)इह मंतहवीयाणि सप्पहावाणि ।
सव्वेसिं तेसिं मूलं, इक्को नवकारवरमंतो ॥ १३ ॥
जो गुणइ तित्थि (१५) लक्खं, पूएइ विहीइ जिणनमुक्कारं ।
तित्थयरनामगुत्तं, सो बंधइ नत्थि संदेहो ॥ १४ ॥
अट्ठेव य अट्ठसया, अट्ठसहस्सं च अट्ठकोडीओ ।
जो गुणइ भत्तिजुत्तो, सो तइयभवे लहइ सिद्धिं ॥ १५ ॥
करआवत्तिहिं जो, पंचमंगलं साहुपडिमसंखाए ।
नववारा आवत्तइ, छलंति नो तं पिसायाई ॥ १६ ॥
न य तस्स किंचि पहवइ, डाइणिवेयालरक्खमारिभयं ।
नवकारपहावेण य, नासंति असेसदुरियाइं ॥ १७ ॥
थंभेइ जलं जलणं, चिंतियमित्तो वि पंचनमुक्कारो ।
अरिमारिचोरराउल–घोरुवसग्गं पणासेई ॥ १८ ॥

अडविगिरिजलहिमज्झे, भयं पणासेइ चिंतिओ एसो ।
रक्खइ भवियसयाइं, माया जह पुत्तभंडाइं ॥ १९ ॥

अहिजरवाहितक्कर–हरिकरिसंगामविसहरभयाइं ।
नासंति तक्खणेणं जिणनवकारप्पहावेणं ॥ २० ॥

हिययगुहाए नवकार केसरी जाण संठिओ निच्चं ।
कम्मट्ठगंठिदोघट्टघट्टयं ताण परिणट्ठं ॥ २१ ॥

नवकारइक्कअक्खर पावं फेडेइ सत्तअयराणं ।
पन्नासं च पएणं, पणसयसागरसमग्गेणं ॥ २२ ॥

जे के वि गया मुक्खं, गच्छन्ति य केइ कम्ममलमुक्का ।
*ते सव्वे वि य जाणसु, जिणनवकारप्पहावेणं ॥२३॥*

जिणसासणस्स सारो, चउदसपुव्वाण जो समुद्धारो ।
जस्स मणे नवकारो, संसारो तस्स किं कुणइ ? ॥४॥

परमेट्ठिनमुक्कारो, पणतीसक्खरजुओ सया पवरो ।
एसो य महामंतो, तुट्ठो चिंतियफलं देई ॥२५॥

## १२८ यवराजर्षिप्रबन्धसूक्तानि

ओहावसि पहावसि, ममं चेव निरिक्खसि ।
लक्खिओ ते अभिप्पाओ, जवं पिच्छेसि गद्दहा ! ॥ १ ॥

अओगया तओगया, जोइजंती न दीसइ ।
अम्हे न दिट्ठा तुम्हे न दिट्ठा, अगडे छूढा अणुल्लिआ ॥ २ ॥

सुकुमालकोमलभद्दलया, तुम्हे रत्तिं हिंडणसीलणया।
अम्ह पओसा तुम्ह नत्थि, भयं दीहपिट्ठाओ तुम्ह भयं॥ ३॥

## १२९ केन कर्मोदयेन परीषहानामुदय इति प्रतिपादकसूक्तानि

दंसणमोहे दंसणपरीसहो, पन्ना अन्नाण पढमंमि।
चरिमेऽलाभपरीसह, सत्तेव चरित्तमोहंमि॥ १॥
अक्कोस अरइ इत्थी, निसीहिया अचेलजायणा चेव।
सक्कारपुरक्कारे, एक्कारस वेयणिज्जंमि॥ २॥
पंचेव आणुपुव्वी, चरिया सेज्जा तहेव जल्ले अ।
वहरोगतणफासा, सेसेसुं नत्थि अवयारो॥ ३॥

## १३० केवलिसमुद्घातसूक्तानि

दण्डं प्रथमे समये, कपाटमथ चोत्तरे तथा समये।
मन्थानमथ तृतीये, लोकव्यापि चतुर्थे तु॥ १॥
संहरति पञ्चमे, त्व–न्तराणि मन्थानमथ पुनः षष्ठे।
सप्तमके तु कपाटं, संहरति ततोऽष्टमे दण्डम्॥ २॥
समुद्घातस्य तस्याद्ये, चाष्टमे समये मुनिः।
औदारिकाङ्गयोगः स्याद्, द्विषट्सप्तमकेषु तु॥ ३॥
मिश्रौदारिकयोगी स्यात्, तृतीयाद्येषु तु त्रिषु।
समयष्वेककर्माङ्ग–धरोऽनाहारकश्च सः॥ ४॥

## १३१ सिद्धानां मोक्षगमनप्रक्रियासूचकसूक्तानि

पूर्वप्रयोगतोऽसंग-भावाद्बन्धविमोक्षतः ।
स्वभावपरिणामाच्च, सिद्धस्योर्ध्वगतिर्भवेत् ॥ १ ॥

कुलालचक्रदोलेषु-मुख्यानां हि यथा गतिः ।
पूर्वप्रयोगतः सिद्धा, सिद्धस्योर्ध्वगतिस्तथा ॥ २ ॥

मृल्लेपसंगनिर्मोक्षाद्, यथा दृष्टाप्स्वलाबुनः ।
कर्मसंगविनिर्मोक्षा-त्तथा सिद्धगतिः स्मृता ॥ ३ ॥

एरण्डफलबीजादे-र्बन्धच्छेदाद् यथा गतिः ।
कर्मबन्धनविच्छेदात्, सिद्धस्यापि तथेक्ष्यते ॥ ४ ॥

यथाऽधस्तिर्यगूर्ध्वं च, लेष्टुवाय्वग्निवीचयः ।
स्वभावतः प्रवर्तन्ते, तथोर्ध्वगतिरात्मनः ॥ ५ ॥

## १३२ देवानामुपलक्षणप्रतिपादकसूक्ते

केसट्ठिमंसनहरोम-रुहिरवसचम्ममुत्तपुरिसेहिं ।
रहिया निम्मलदेहा, सुगंधनीसासगयलेवा ॥ १ ॥

अणिमिसनयणा, मणकज्जसाहणा पुप्फदामअमिलाणा ।
चउरंगुलेण भूमिं, न छिवंति सुरा जिणा बिंति ॥ २ ॥

## १३३ नरकावासनामगोत्रसूचकसूक्ते

रयणप्पह सक्करपह, वालुयपह पंकपह य धूमपहा ।
तमपह तमतमपहा, कमेण पुढवीण गोत्ताइं ॥१॥

धम्मा वंसा सेला, अंजणा रिट्ठा मघा य माघवई ।
नामेहि पुढवीओ, छत्ताईच्छत्तसंठाणा ॥२॥

नारकीमां लेश्याओ,

काऊ दोसु तइयाए, मीसिया नीलिया चउत्थिए ।
पंचमियाए मीसा, कण्ह तत्तो परमकण्हा ॥३॥

नारकोमां नरकावासानी संख्या

तीसा य पणवीसा, पण्णरस दस चेव सयसहस्साइं ।
तिन्नि य पंचूणेगं, पंचेव अणुत्तरा निरया ॥४॥

## १३४ द्वादशदेवलोकाभिधानसूचकसूक्ते

कप्पोपगा बारसहा सोहमीसाणगा तहा ।
सणंकुमारा माहिंदा बंभलोगा य लंतगा ॥१॥

महासुक्का सहस्सारा, आणया पाणया तहा ।
आरणा अच्चुया चेव, इइ कप्पोवगा सुरा ॥२॥

नव लोकान्तिकना नाम

ते च [१]सारस्वता[२]दित्या, [३]वन्हयो [४]वरुणा अपि ।
[५]गर्दतोयाश्च [६]तुषिता[७]ऽव्याबाधा [८]वाम्च[९]रिष्टकाः ॥३॥

## १३५ मार्गानुसारिगुणसूक्तानि

न्यायसम्पन्नविभवः, शिष्टाचारप्रशंसकः ।
कुलशीलसमैः सार्द्धं, कृतोद्वाहोऽन्यगोत्रजैः ॥१॥

पापभीरुः प्रसिद्धं च, देशाचारं समाचरन् ।
अवर्णवादी न क्वापि, राजादिषु विशेषतः ॥२॥
अनतिव्यक्तगुप्ते च, स्थाने सुप्रातिवेश्मिके ।
अनेकनिर्गमद्वार–विवर्जितनिकेतनः ॥३॥
कृतसंगः सदाचारै–र्मातापित्रोश्च पूजकः ।
त्यजन्नुपप्लुतं स्थानमप्रवृत्तश्च गर्हिते ॥४॥
व्ययमायोचितं कुर्वन्, वेषं वित्तानुसारतः ।
अष्टभिर्धीगुणैर्युक्तः, शृण्वानो धर्ममन्वहम् ॥५॥
अजीर्णे भोजनत्यागी, काले भोक्ता च सात्म्यतः ।
अन्योन्याप्रतिबन्धेन, त्रिवर्गमपि साधयन् ॥६॥
*यथावदतिथौ साधौ, दीने च प्रतिपत्तिकृत् ।*
सदानभिनिविष्टश्च, पक्षपाती गुणेषु च ॥७॥
अदेशकालयोश्चर्यां, त्यजन् जानन् बलाबलम् ।
वृत्तस्थज्ञानवृद्धानां, पूजकः पोष्यपोषकः ॥८॥
दीर्घदर्शी विशेषज्ञः कृतज्ञो लोकवल्लभः ।
सलज्जः सदयः सौम्यः परोपकृतिकर्मठः ॥९॥
अन्तरङ्गारिषड्वर्ग–परिहारपरायणः ।
वशीकृतेन्द्रियग्रामो, गृहिधर्माय कल्पते ॥१०॥

## १३६ परीक्षासूक्तानि

परीक्षका यत्र न सन्ति देशे, नार्घन्ति रत्नानि समुद्रजानि ।
आभीरदेशे किल चन्द्रकान्तं,त्रिभिर्वराटैः प्रवदन्ति सन्तः ॥१॥

मणिर्लुठतु पादाग्रे, काचः शिरसि धार्यताम् ।
परीक्षककरप्राप्तः, काचः काचो मणिर्मणिः ॥२॥

क्षणादसारं सारं वा, वस्तु सूक्ष्मं परीक्षते ।
निश्चिनोति मरुत्तूर्णं, तुलोच्चयशिलोच्चयौ ॥३॥

कोनी परीक्षा क्यारे?

विणये सिस्सपरिक्खा, सुहडपरिक्खा य होइ संगामे ।
वसणे मित्तपरिक्खा, दाणपरिक्खा य दुब्भिक्खे ॥४॥

## १३७ प्रभावकान्तर्गतबप्पभट्टीसूरिवर-समस्यासूक्तानि

यामः स्वस्ति तवास्तु रोहणगिरे ! मत्तः स्थितिं प्रच्युता,
वर्तिष्यन्त इमेऽधुना कथमिति स्वप्नेऽपि मैवं कृथाः ।
श्रीमन्तो मणयो वयं यदि भवल्लब्धप्रतिष्ठास्तदा,
के शृङ्गारपरायणाः क्षितिभुजो मौलौ करिष्यन्ति नः ॥ १ ॥

विंझेण विणा वि गया नरिन्दभवणेसु हुंति गारविया ।
विज्झो न होइ एगओ, गएहिं बहुहिं वि गए ॥ २ ॥

माणसविणा सुहाइं, जह य न लभंति रायहंसेहिं ।
तह तस्स वि तेहिं विणा, तीरुच्छंगा न सोहन्ति ॥ ३ ॥

परिसेसियहंसउलं, पि माणसं न संदेहो ।
अन्नत्थ वि जत्थ गया, हंसा वि बगा न भणन्ति ॥ ४ ॥

इक्केण कोत्थुहेणं, विणा रयणायरु च्चिय समुद्दो ।
कोत्थुहरयणं पि उरे जस्स ठिअं सो वि हु महग्घो ॥ ५ ॥

पइमुकाह वि वरतरु, फिट्टइ पत्तत्तणं न पत्ताणं ।
तुह पुण छाया जइ होइ, तारिसी तेहिं पत्तेहिं ॥ ६ ॥

## १३८ ब्राह्मणत्वसूचकसूक्ते

ये तपस्यन्ति विद्वांसः सत्यशौचजितेन्द्रियाः ।
*तानहं ब्राह्मणान् मन्ये, शेषान् शूद्रान् युधिष्ठिर ! ॥ १ ॥*

क्षमा दया दमो दानं, सत्यं शीलं धृतिर्घृणा ।
विद्या विज्ञानमास्तिक्यं एतद्ब्राह्मणलक्षणम् ॥ २ ॥

ब्राह्मणे आटला दिवस ब्रह्मचर्य पालवुं जोइए

अमावास्यामष्टमीं च, पूर्णमासीं चतुर्दशीम्
ब्रह्मचारी भवेन्नित्य—मत्र च स्नातको द्विजः ॥ ३ ॥

## १३९ स्त्रीणां कार्याणि धर्माश्च

शय्योत्पाटनगेहमार्जनपयःपावित्र्यचुल्लीक्रिया—
स्थालीक्षालनधान्यपेषणकलागोदोहतन्मन्थनैः ।
पाकस्तत्परिवेषणैः समुचितैः, पात्रादिशौचक्रिया—
*श्वश्रूभर्तृननान्दृदेवृविनयैः कष्टं वधूर्जीवति ॥ १ ॥*

निर्व्याजा दयिते ननान्दृषु नता श्वश्रूषु भक्ता भव,
स्निग्धा बन्धुषु वत्सला परिजने स्मेरा सपत्नीष्वपि ।

पत्युर्मित्रजने अनर्मवचना खिन्ना च तद्द्वेषिषु,
स्त्रीणां संवननं नतभ्रुवि ! तदिदं वीतौषधं भर्तृषु ॥ २ ॥

अभ्युत्थानमुपागते गृहपतौ तद्भाषणे नम्रता,
तत्पादार्पितदृष्टिरासनविधौ तस्योपचर्या स्वयम् ।
सुप्ते तत्र शयीत तत्प्रथमतो जह्याच्च शय्यामिति,
प्राच्यैः पुत्रि ! निवेदिताः कुलवधूसिद्धान्तधर्मा अमी ॥ ३॥

कुलवान स्त्रीओए सासुससरानी सेवा करवी जोइए

कुलवध्वा विधातव्यं, श्वश्रूशुश्रूषणव्रतम् ।
दैवतं हि पतिः स्त्रीणां, माता तस्यापि दैवतम् ॥ ४ ॥

संसारना भारने उपाडवा स्त्रीनी भागीदारी

संसारभारनिर्वाहे, वामा वामाङ्गवाहिनी ।
प्रसादपात्रं मोहस्य, तेनैवालमलङ्कृता ॥ ५ ॥

घरना भूषणरूप स्त्री

सुशीला कोमलालापा, भक्ता चित्तानुवर्तिनी ।
मनोविश्रामभूमिर्या, गृहिणी गृहभूषणम् ॥ ६ ॥

नारी उपर अंकुश

नारी नियमिता तावद् भवेन्नेत्रप्रियङ्करी ।
चैत्यस्य स्वकुलस्येव, पताकेव विभूषणम् ॥ ७ ॥

मातानी पुत्री प्रत्ये शीखामण

मा भूः सुखे च दुःखे च, वत्से ! धर्मपराङ्मुखी ।
धर्म एव हि जन्तूनां, माता पिता सुहृत्प्रभुः ॥ ८ ॥

शीलमेवेह चारित्रं,-तपोऽपि च गुणा अपि ।
शीलं विना न चारित्रं, न तपो न गुणा अपि ॥ ९ ॥

मणिरत्नमयानीह, नानाऽलङ्करणान्यपि ।
सुप्रापाणि तु दुष्प्राप-मेकं शीलविभूषणम् ॥ १० ॥

विभूषिताऽप्यलङ्कारैः, शीलालङ्कारवर्जिता ।
गौरिवाशुचिशृङ्गा स्त्री, लोकमध्ये न शोभते ॥ ११ ॥

भक्तिः श्वशुरयोर्नित्यं, पत्यौ प्रीतिरकृत्रिमा ।
अनीर्ष्यता सपत्नीषु, ननान्दृषु विनीतता ॥ १२ ॥

बन्धुषु स्निग्धता सम्यग्, वात्सल्यं च परिच्छदे ।
कुकर्मविरतिः पुण्य-निरतिः प्रियवाक्यता ॥ १३ ॥

लज्जालुता यथौचित्यं, दानमित्यादयो गुणाः ।
स्त्रीणां वितन्वते श्रेष्ठां, प्रतिष्ठां श्वशुरालये ॥ १४ ॥

परमं मण्डनं शीलं, पालनीयं महोज्ज्वलम् ।
आमुष्मिकैहिकश्रीणां, निदानमिदमेव हि ॥ १५ ॥

*वक्तव्या* मधुरा भाषा, या च हितकरी भवेत् ।
सन्मान्या च सभैर्या स्या—न्न स्यान्निजभिमानता ॥ १६ ॥

नराग्रे सुन्दरीणां च, न प्रमाणं मनागपि ।
उपानद् रत्नसम्बद्धा, तथापि पादरक्षिका ॥ १७ ॥

कालागुरु सुगन्धाऽपि, स्यादग्निना महागुणा ।
तटिनी विषमाऽपि स्यात्, सागरे सरला सदा ॥ १८ ॥

कदापि न प्रतार्यः स्यात्, स्वपतिः सुकुलस्त्रिया ।
यथादिष्टेन सश्चर्यं, पेयश्च चरणोदकम् ॥ १९ ॥

स्वामिना यत्समादिष्टं, कर्तव्यं जायया सदा ।
मिष्टभाषणपूर्वं तं, भोजयित्वा च भोजनम् ॥ २० ॥

प्राणेशे जिम्हवृत्तिः स्यात्, पापकर्मप्रवर्धनी ।
सरलाभिरतो भाव्यं, प्राणेशगुणवृद्धये ॥ २१ ॥

अञ्चलबन्धनं येन, तेनैव जिम्हता कथम् ।
यस्मै समर्पितं सर्वं, तस्माद्भेदो न श्रेयसे ॥ २२ ॥

पक्षिण्यपि निजं नाथं, नित्यं स्यादनुगामिनी ।
मानुषी ज्ञानयुक्तापि, कथं स्वामिपराङ्मुखा ॥ २३ ॥

पद्मिनी न निशानाथं, दिनेशं न कुमुद्वती ।
आकाङ्क्षति लताप्येनं, किं पुनः कुलयोषितः ॥ २४ ॥

नीरङ्गीच्छन्नवदना, नित्यं नीचैर्विलोचना ।
वत्से ! कैरविणीव त्व-मसूर्यपश्यतां श्रये ॥ २५ ॥

गता पतिगृहं वत्से ! गुरूणां विनता भवेः ।
कुर्यास्त्वं भोजनं भुक्ते, निद्रां सुप्ते च भर्तरि ॥ २६ ॥

नीरङ्गीच्छन्नवदना, नित्यं नीचैर्विलोचना ।
पिकीव मधुरालापा, भवेस्त्वं श्वसुरालये ॥ २७ ॥

कुलस्त्रीणां पतिः पूज्यः, पतिर्देवः पतिर्गुरुः ।
तस्यादेशेन कर्तव्यं, सर्वकार्यं सदा शुभम् ॥ २८ ॥

### रत्नपाल राजानी राणी-श्रृन्गार सुंदरीए पतिना वियोगमां करेल तप

आचाम्लव्रतं भेजे, सा पत्युः सङ्गमावधिः। ( १२ वर्ष )
तेपेऽन्तरान्तरा षष्ठमष्टमं द्वादशं तपः।
सा पक्षक्षपणं मास-क्षपणादि च दुस्तपम् ॥ २९॥
नित्यं श्रीजिनमर्चन्ती, पौषधादिपरायणा।
समयं गमयामास, निःसङ्गा योगिनीव सा ॥ ३० ॥
पतिव्रतैकधर्मे सा, समासक्ता त्वहर्निशम्।
जानाति निजनाथाज्ञा-पालनं सुकृतं वरम् ॥ ३१॥

### पति परदेश होय त्यारे स्त्रीओनो धर्म

क्रीडां शरीरसंस्कारं, समाजोत्सवदर्शनम्।
हास्यं परगृहे यानं, त्यजेत् प्रोषितभर्तृका ॥३२॥
न दर्पणं पश्यति नाङ्गरागं, तनोति न स्नाति शरीरकान्त्यै।
वस्ते न शस्तं न दृशावनक्ति, पतिव्रता सा शयने न शेते ॥३३॥
दासीवन्नीचकृत्यानि, यद्वा मोहाद्वितन्यते।
नार्यः पतिगृहे नित्यं, हा धिक् तान् विषयानिति ॥३४॥
स्पष्टधाष्ट्यमिदं कर्म, दुष्करं मादृशामपि।
महाकुलप्रसूतानां, महिलानां न युज्यते ॥३५॥
तन्नूनमसती सेयं, सत्यो हि पतिदेवता।
पतिसेवां विना नान्य-ज्जानते क्वदृशं पुनः ॥३६॥

पतिना गुणावगुणनी विचारणा

गुणवान् गुणरागी चा–वियुक्तश्च सुधासमः ।
विपरीतः पुनर्ज्ञेयो, दयितः कालकूटवत् ॥३७॥

" विषमिश्रसुधातुल्यः, सुखदुःखमयः प्रियः ॥ श्लोकार्धः "

## १४० अशने विषपरीक्षासूक्तम्

दृष्ट्वान्नं सविषं चकोरविहगो धत्ते विरागं दृशोः,
हंसः कूजति सारिका च वमति क्रोशत्यजस्रं शुकः ।
विष्ठां मुञ्चति मर्कटः परभृतः प्राप्नोति मृत्युं क्षणात्,
क्रौञ्चो माद्यति हर्षवांश्च नकुलः प्रीतिं च धत्ते द्विकः ॥१॥

## १४१ ईर्यापथिकीविषयकसूक्तानि

देवच्चणं पवित्तं करेइ जह काउं वज्झतणुसुद्धिं ।
भावच्चणं पि हुज्जा, तह इरियाए विमलचित्ते ॥ १ ॥

हत्थसयादागंतुं च मुहुत्तगं जहिं चिट्ठे ।
पंथे वा भत्ते वा, न संतरणे पडिकमइ ॥ २ ॥

पडिलेहिउं पमज्जिय, भत्तं पाणं च वोसिरेऊण ।
वसहीकयवरमेव तु, नियमेण पडिक्कमे साहू ॥३॥

उच्चारं पासवणं, भूमीए वोसिरित्तु उवउत्तो ।
वोसिरिऊण य तत्तो, इरियावहियं पडिक्कमइ ॥४॥

मित्ति मिउमद्दवत्ते, छत्तिय दोसाण छायणे होइ
मित्ति य मेराइठिओ, दुत्ति दुगुंछामि अप्पाणं ॥५॥

कत्ति कडं मे पावं, दुत्ति य देवेमि तं उवसमेणं ।
एसो मिच्छामिदुक्कड–पयक्खरत्थो समासेणं ॥६॥

ईर्यापथो ध्यानमौनादिकं भिक्षुव्रतं तत्र भवा ईर्यापथिकीविराधना नद्युत्तरणशयनादिभिः प्राणातिपातादिका साध्वाचारातिक्रमरूपा तस्याः प्रतिक्रमितुं इच्छामीति योगः ॥ ७ ॥

इरियावहिया करवानां कारणो

गमणागमणविहारे, सुत्ते वा सुमिणदंसणे राओ ।
नावा–नइसंतारे, इरियावहिया पडिक्कमणं ॥८॥

गमणागमणविहारे, सायं वा पाओ य पुरिमचरिमाणं ।
नियमेण पडिक्कमणं, अइयारो होउ वा मा वा ॥९॥

अपडिक्कंताए इरियावहिआए, न कप्पइ चेव काउं
किंचिवि चिइवंदणसज्झायझाणाइआ ।

ईर्यापथप्रतिक्रमणमकृत्वा नान्यत् किमपि कुर्यात् तदशुद्धतापत्तेः ।

इरियावहिआईआ, जे चेव हवंति कम्मबन्धाय ।
अजयाण ते चेव उ, जयाण निव्वाणगमणाय ॥१०॥

## १४२ अनशनानशनिनां सूक्तानि

सव्वा वि य अज्जाओ सव्वे वि य पढमसंघयणवज्जा ।
सव्वे वि देसविरया पच्चक्खाणेण उ मरन्ति ॥१॥

अत्र प्रत्याख्यानशब्देन भक्तपरिज्ञा भणिता। इंगिनीमरणं तु विशिष्टतरधृतिसंहननवतामेव भवतीति आर्यिकादिः निषेधत एवावसीयते। पादपोपगमनं तु नाम्नैव विशिष्टतमधृतिमतां वज्रऋषभनाराचसंहननिनां एव भवति। उक्तं च–

पढमम्मि य संघयणे, वट्टंते सेलकुड्डसमाणा।
तेसिं पि य वोच्छेओ चोद्दसपुव्वीण वोच्छेए ॥२॥

तीर्थकरसेवितत्वाच्च पादपोपगमनस्य ज्येष्ठत्वं
तथा च "सव्वे सव्वद्धाए सव्वन्नू सव्वकम्मभूमीसु।
सव्वगुरू सव्वमहिया सव्वे मेरुम्मि अभिसित्ता ॥३॥

सव्वाहिं लद्धीहिं, सव्वे वि परिसहे पराजिता।
सव्वे वि य तित्थयरा, पाओवगयाउ सिद्धिगया ॥४॥

अवशेषा अनगारा, अतीतप्रत्युत्पन्नानागताः सर्वे।
केचित् पादपोपगता, प्रत्याख्यानिन इङ्गिनीनश्च केचित् ॥५॥

## १४३ जीवानां उत्पत्तिस्थानस्थापकसूक्तानि

एगिंदिय पंचिंदिय उड्ढे य अहे अ तिरियलोए य।
विगलिंदियजीवा पुण, तिरियलोए मुणेयव्वा ॥१॥

पुढवीआउवणस्सई, बारसकप्पेसु सत्तपुढवीसु।
पुढवी जा सिद्धशिला तेउ नरखित्त तिरिलोए ॥२॥

सुरलोए वाविमज्झे मच्छाई नत्थि जलयस जीवा।
गेविज्जे न हु वावी, वाविअभावे जलं नत्थि ॥३॥

### एक पुरुषथी एकवार भोगवायेली स्त्रीनी योनिमां जीवोनी उत्पत्ति

पंचिंदिया मणुस्सा, एगनरभुत्तनारीमज्झंमि ।
उक्कोसा नवलक्खा, जायंति एगहेलाए ॥४॥
नवलक्खाणं मज्झे, जावइ इक्कस्स दोहे व समत्ती ।
सेसा पुण एमेव य, विलयं वच्चंति तत्थेव ॥५॥
असंखया थीनरमेहुणाओ, मुच्छंति पंचिंदियमणुस्साओ ।
नीसेस अंगाण विभत्ति चंगे, भणइ जिणो पन्नवणा उवंगे ॥६

### काचा के पाका मांसमां सतत बेइन्द्रिय जीवोनी उत्पत्ति

आमासु य पक्कासु य, विपच्चमाणासु मंसपेसीसु ।
सययं वि उववाओ, भणिओ निगोयजीवाणं ॥७॥
निगोदशब्देन द्वीन्द्रिया जीवा अपि कथ्यन्ते । तत्र
द्वीन्द्रियजीवानामेवोत्पत्तिर्भवति नान्येषामिति भावः ।

### गर्भनी स्थिति अने गर्भनी कायस्थिति

गब्भट्ठिइ माणुस्सीणुक्किट्ठा, होइ वरिसबारसगं ।
गब्भस्स य कायट्ठिई, नराण चउवीसवरिसाइं ॥८॥
रिउसमयण्हायनारी, नरोवभोगेण गब्भसम्भूई ।
उक्कोसेण नवसय-नरभुत्तत्थीइ एगसुओ ॥९॥
सुयलक्खपुहुत्तं होइ, एगनरभुत्तनारीगब्भंमि ।
उक्कोसेण नवसय-नरभुत्तत्थीइ एगसुओ ॥१०॥

## १४४ अपर्याप्तपञ्चेन्द्रियमनुष्योत्पत्तिस्थानानि

कहण्णं भंते ! सम्मुच्छिममणुस्सा उप्पज्जंति ? गोयमा ! अन्तो मणुस्सखित्ते पणयालीसाइजोयणसयसहस्सेसु अड्ढाइज्जेसु दीवसमुद्देसु पन्नरससकम्मभूमीसु छप्पनाइ अन्तरदीवेसु गब्भवक्कंतियमणुसाणं चेव उच्चारेसु वा पासवणेसु वा खेलेसु वा सिंघाणेसु वा वंतेसु वा पित्तेसु वा सुक्केसु वा सोणिएसु वा सुक्कपुग्गलपरिसाडेसु वा गयजीवकलेवरेसु वा थीपुरिससंजोएसु वा नगरनिद्धमणेसु वा सव्वेसु चेव असुइठाणेसु समुच्छिममणुस्सा समुप्पज्जंति, अंगुलअसंखिज्जभागमेत्ताए ओगाहणाए असन्नी मिच्छदिट्ठी अन्नाणी सव्वाहिं पज्जत्तीहिं अपज्जत्तगा अन्तमुहुत्ताउआ चेव कालं पकरेन्ति ।

## १४५ मुनिवराणामेकाकिविहरणनिषेधकसूक्तानि

रागाद्यपायविषमे सन्मार्गे चरतां सताम् ।
रत्नत्रयजुषामैक्यं कुशलाय न जायते ॥१॥

नैकस्य सुकृतोल्लासो नैकस्यार्थोऽपि तादृशः ।
नैकस्य कामसंप्राप्तिर्नैको मोक्षाय कल्पते ॥२॥

श्लेष्मणे शर्करादानं, सज्वरे स्निग्धभोजनम् ।
एकाकित्वमगीतार्थे यतावश्चति नौचितीम् ॥३॥

जिनप्रत्येकबुद्धादि–दृष्टान्तान् नैकतां श्रयेत् ।
न चर्मचक्षुषां युक्तं स्पर्द्धितुं ज्ञानदृष्टिभिः ॥४॥

शाकिनीवदविरति-संज्ञा नाट्यप्रिया सदा ।
ग्रासाय यतते यस्य, स एकाकी कथं भवेत्? ॥५॥

पञ्चाग्निवदसंतुष्टं, यस्येन्द्रियकुटुम्बकम् ।
देहं दहत्यसंदेहं, स एकाकी कथं भवेत् ॥६॥

दायादा इव दुर्दान्ताः, कषायाः क्षणमप्यहो! ।
यद्विग्रहं न मुञ्चन्ति, कथं तस्यैकतासुखम्? ॥७॥

स्वमनोवाक्तनूत्थानाः कुव्यापाराः कुपुत्रवत् ।
भ्रंशाय यस्य यास्यन्ति, कथं तस्यैकतासुखम्? ॥८॥

यस्य प्रमादमिथ्यात्व-रागाद्याश्छलवीक्षिणः ।
कुप्रातिवेश्मिकायन्ते कथं तस्यैकतासुखम्? ॥९॥

सर्वमङ्गलमाङ्गल्यं
सर्वकल्याणकारणम्
प्रधानं सर्वधर्माणां
जैनं जयति शासनम्

## १ श्री वीतरागस्तुतिः

### मङ्गलाष्टकम्

मङ्गलं भगवान् वीरो, मङ्गलं गौतमः प्रभुः ।
मङ्गलं स्थूलभद्राद्या, जैनो धर्मोऽस्तु मङ्गलम् ॥१॥
नाभेयाद्या जिनाः सर्वे, भरताद्याश्च चक्रिणः ।
कुर्वन्तु मङ्गलं सर्वे, विष्णवः प्रतिविष्णवः ॥२॥
अचलाद्या बलाः सर्वे, मोक्षं स्वर्गं च गामिनः ।
धर्मं जिनोक्तं कुर्वाणा, मङ्गलाय भवन्तु मे ॥३॥
नाभिसिद्धार्थभूपाद्या, जिनानां पितरः समे ।
पालिताऽखण्डसाम्राज्या, यच्छन्तु मम मङ्गलम् ॥
मरुदेवात्रिशलाद्या, विख्याता जिनमातरः ।
त्रिजगज्जनितानन्दा, मङ्गलाय भवन्तु मे ॥५॥
श्रीपुण्डरीकेन्द्रभूति-प्रमुखा गणधारिणः ।
श्रुतकेवलिनोऽन्येपि, मङ्गलानि दिशन्तु मे ॥६॥
ब्राह्मीचन्दनबालाद्या, महासत्यो महत्तराः ।
अखण्डशीललीलाढ्या, यच्छन्तु मम मङ्गलम् ॥७॥
चक्रेश्वरीसिद्धायिका-मुख्याः शासनदेवताः ।
सम्यग्दृष्टिजीवानां, मङ्गलाय भवन्तु ताः ॥८॥
कपर्दिमातङ्गमुख्या, देवाः शासनरक्षकाः ।
जैनशासनविघ्नानि, नाशयन्तु क्षणे क्षणे ॥९॥

## परमात्मस्तुतिः

अद्य मे सफलं जन्म, पुण्यान्यद्योदितानि च ।
सफलं जीवितं चाद्य, पवित्रं च गृहाङ्गणम् ॥१०॥
यच्चिन्तामणिकल्पद्रु-निधिवत्त्वं समागतः । श्लोकार्धः
नामापि श्रुयते नाथ ! त्वदीयं सुकृतोदयात् ।
किं पुनर्दर्शनमिदं, दर्शनानन्ददायिनम् ॥११॥
तदसौ श्रीः परिजनो, ममेदं जीवितं वपुः ।
सर्वमेतत्त्वायत्त-मनुगृह्णातु मां प्रभुः ॥१२॥
नमामि त्वां भवाम्भोधि-निस्तारकशिरोमणिम् ।
निःशेषदोषरहितं, महितं सर्वदा गुणैः ॥१३॥
तेषां वृथा कृते नेत्रे, वञ्चितास्ते तपस्विनः ।
जगदेकेक्षितव्यस्त्वं, दृष्टो यैर्न जिनेश्वरः ॥१४॥
जानेऽहमद्य जातोऽस्मि, विवेकोऽद्य मयाऽर्जितः ।
प्रभूतपुण्यैर्जातोऽसि, यत्त्वं लोचनगोचरः ॥१५॥
प्रशान्ताय सुरूपाय, निर्विकाराय तायिने ।
चिन्तातीतप्रदायाऽऽद्य-देवदेवाय नमोस्तु ते ॥१६॥
सर्वज्ञः सर्वदर्शी सकलसुखकरः सर्वसंतापहर्त्ता,
पूज्यः सर्वेश्वराणामनणुगुणयुतः कर्मसाक्षीव भास्वान् ।
सोमः पञ्चेषुवीरो नरकविमथनो योगिभिर्ध्येयमूर्ति-
र्योऽनन्तो व्यक्तरूपो न निधनकलितो वीतरागः स पातु ॥१७॥

स्वामिन्! समुद्रविजयात्मज! विश्वनाथ!,
न प्रार्थयेऽन्यदिह किन्तु तव प्रसादात्।
एते मनोरथमयास्तरवो मदीया-
स्त्वद्दर्शनामृतरसेन सफलीभवन्तु ॥१८॥

मौलिं स्वं च जिनेश्वरस्य नमनात्कर्णौ गुणाकर्णना-
न्नेत्रे रूपनिरूपणेन रसनां स्तोत्रक्रमोपक्रमैः।
पाणी पूजनकर्मकर्मठतया चैत्यागमेन क्रमौ,
चित्तं संस्मरणात्करोति विमलं कश्चिद्विपश्चिन्नरः ॥१९॥

त्वन्मूर्तिर्यदि जागर्ति, रोगार्तिहरणक्षमा।
मम चित्ते जगन्नाथ! प्रार्थये किमतः परम् ॥२०॥

नागाशनपृष्ठस्थितेन पुंसा, प्रणामतत्तयो यस्मै विहिताः।
नागध्वजाय नागैर्नताय, नमश्च तस्मै जिनपुङ्गवाय (स्व.) ॥२१॥

यथा रथाङ्गी रजनौ रथाङ्गं, यथा मयूरी नववारिवाहम्।
यथा चकोरी शशिनं तवेश!, तथा जिनेश! त्वामुत्सहेऽहम् ॥

मोहमल्लबलमर्दनवीर!, पापपङ्कगमनामलनीर!।
कर्मरेणुहरणैकसमीर!, त्वं जिनेश्वरपते! जय वीर! ॥२३॥

विजानाति जिनेन्द्राणां, को निःशेषगुणोत्करम्।
त एव हि विजानन्ति, दिव्यज्ञानेन तं पुनः ॥ २४ ॥

गतरागद्वेषमोहः, प्रातिहार्यैर्युतोऽष्टभिः।
देवाधिदेवः सर्वज्ञो, देयान्मे दर्शनं जिनः ॥ २५ ॥

अजं अजस्य हन्तारमजानाञ्च प्रबोधकम् ।
अजजङ्गमजानन्तं, तं वन्दे श्रीजिनोत्तमम् ॥ २६ ॥ (स्वोपज्ञ)

गुणमाणिक्यकोटीरं, शान्तमुद्रासुधाकरम् ।
सुधाकराङ्कितं नौमि, जिनं तं नवमाग्रिमम् ॥ २७ ॥ (स्वोपज्ञ)

अद्य चिन्तामणिर्लब्धः, फलितोऽद्य सुरद्रुमः ।
अद्य कामगवी प्राप्ता, जिनेन्द्र ! तव दर्शनात् ॥ २८ ॥

धारणं दुरितवृन्दवारणं, कारणं सकलसौख्यसम्पदाम् ।
तारणं भवपयोधिमज्जने, श्रेयसेऽस्तु भवतां जिनेशितुः ॥२९॥

यदि त्रिलोकी गणनापरा स्यात्,
तस्याः समाप्तिर्यदि नायुषः स्यात् ।
पारे परार्ध्यं गणितं यदि स्याद्,
गणेयनिःशेषगुणोऽपि स स्यात् ॥ ३० ॥

नमो दुर्वाररागादि-वैरिवारनिवारणे ।
अर्हते योगिनाथाय, महावीराय तायिने ॥ ३१ ॥

प्रातिहार्याष्टकोपेतः, प्रास्तरागादिदूषणः ।
देयान्मे दर्शनं देवा-धिदेवोऽर्हन् त्रिकालविद् ॥ ३२ ॥

क्षयप्राप्तं मिथ्याज्ञानं, मिथ्यात्वदर्शनं तथा ।
दृष्टया पीयूषवृष्टयाभं, यत्प्राप्तं दर्शनं तव ॥ ३३ ॥

स्मृतः श्रुतः स्तुतो ध्यातो, दृष्टः स्पृष्टो नमस्कृतः ।
येन तेन प्रकारेण, स्वामिन् ! भवसि शर्मणे ॥ ३४ ॥

कलेव चन्द्रस्य कलङ्कमुक्ता, मुक्तावलीवोरुगुणप्रपन्ना ।
जगत्त्रयस्याभिमतं ददाना, जिनेश्वरी कल्पलतेव मूर्तिः ॥३५॥

राग-द्वेष-कषाय-मोहमथनो निर्दग्धकर्मेन्धनो,
लोकालोकविकासकेवलगुणो मुक्तायुधो निर्भयः ।
शापानुग्रहवर्जितो गदतृषा-क्षुक्तामनिद्राजरा-
क्रीडाहास्यविलासशोकरहितो देवाधिदेवो जिनः ॥३६॥

न कोपो न लोभो न मानो न माया,
न लास्यं न हास्यं न गीतं न कान्ता ।
न वै यस्य भीतिर्न शत्रुर्न मित्रं,
तमेकं प्रपद्ये जिनं देवदेवम् ॥ ३७ ॥

सर्वज्ञो जितरागादि-दोषस्त्रैलोक्यपूजितः ।
यथास्थितार्थवादी च, देवोऽर्हन् परमेश्वरः ॥ ३८ ॥

सद्धर्मबीजवपनानघकौशलस्य,
यल्लोकबान्धव ! तवापि खिलान्यभूवन् ।
तन्नाद्भुतं खगकुलेष्विह तामसेषु,
सूर्यांशवो मधुकरीचरणावदाताः ॥३९॥

वपुरेव तवाचष्टे, भगवन् ! वीतरागताम् ।
न हि कोटरसंस्थेऽग्नौ तरुर्भवति शाड्वलः ॥४०॥

जिनस्य विश्वत्रितय-भाषिनो ध्यायिनं जनम् ।
हन्तुमीष्टे नहीन्द्रोऽपि, तज्जनोऽयं बिभेति किम् ॥४१॥

केऽर्हन्तस्ते वीतरागाः, सर्वज्ञाः शक्रपूजिताः ।
धर्मदेशनया विश्व-विश्वस्योत्तारकाश्च ये ॥४२॥

सिद्धमरुयमणिन्दिय-मक्खयमणवज्जमच्चुयं वीरं ।
पणमामि सयलतिहुयण-मत्थयचूडामणिं सिरसा ॥४३॥

समवसरणमां वंदनविधि

अरिहंते वंदिता, चोद्दसपुव्वी तहेव दसपुव्वी ।
एक्कारसंगसुत्तत्थ-धारए सव्वसाहू य ॥४४॥

देवाधिदेवाय जग-त्तायिने परमात्मने ।
श्रीमते शान्तिनाथाय, षोडशायार्हते नमः ॥ ४५ ॥

श्रीशान्तिनाथभगवन् ! भवाम्भोनिधितारण ! ।
सर्वार्थसिद्धमन्त्राय, त्वन्नाम्नेऽपि नमो नमः ॥ ४६ ॥

ये तवाष्टविधां पूजां, कुर्वन्ति परमेश्वरः ।
अष्टापि सिद्धयस्तेषां, करस्था अणिमादयः ॥ ४७ ॥

धन्यान्यक्षीणि यान्ति त्वां, पश्यन्ति प्रतिवासरम् ।
तेभ्योऽपि धन्यं हृदयं, तद् दृष्टो येन धार्यसे ॥ ४८ ॥

देव ! त्वत्पादसंस्पर्शा-दपि स्यान्निर्मलो जनः ।
अयोऽपि हेमीभवति, स्पर्शवेधिरसान्न किम् ? ॥ ४९ ॥

त्वत्पादाब्जप्रणामेन, नित्यं भूलुण्ठनैः प्रभो ! ।
शृङ्गारतिलकीभूया-न्मम भाले कीरणावलिः ॥ ५० ॥

भूयो भूयः प्रार्थये त्वा-मिदमेव जगत्प्रभो ! ।
भगवन् ! भूयसी भूयात्, त्वयि भक्तिर्भवे भवे ॥ ५१ ॥

श्रीशान्तिजिने गर्भस्थेऽचिराराज्ञीस्नानवारिच्छटाभिर्मरकोपद्रवशान्तिर्जाता। सांप्रतकालेऽपि विधिनाऽष्टोत्तरशतस्नात्रेण भूतप्रेतशाकिनीग्रन्थिविकाराः क्षयं यान्ति ॥

तीर्थंकरोनुं ऐश्वर्य

रयरोयसेयरहिओ, देहो धवलाइं मंसरुहिराइं।
आहारा नीहारा, अदिस्सा सुरहिणो सासा ॥५२॥

देवा दैवीं नरा नारीं, शवराश्चापि शाबरीम्।
तिर्यञ्चोऽपि हि तैरश्चीं, मेनिरे भगवद्गिरम् ॥५३॥

सोउं णाउण गुणे, जिणाण जायाए सुद्धबुद्धिए।
किच्चमिणमणुयाणं, जम्मफलं एत्तियं चेव (चेह) ॥५४॥

गुणपगरिसो जिणा खलु, तेसिं बिंबस्स दंसणं पि सुहं।
कारावणेण तस्स उ, अणुग्गहो अत्तणो परमो ॥५५॥

मोक्खपहसामियाणं, मोक्खत्थं उज्जएण कुसलेणं।
तग्गुणबहुमाणादिसु, जइयव्वं सव्वजत्तेणं ॥५६॥

तग्गुणबहुमाणाओ, तह सुहभावेण बज्झंती णियमा।
कम्मं सुहाणुबन्धं, तस्सुदया सव्वसिद्धित्ति ॥५७॥

जीवाण बोहिलाहो, सम्मदिट्ठीण होइ पिअकरणं।
आणा जिणंदभत्ती, तित्थस्स पभावणा चेव ॥५८॥

इंदियविसयकसाये परिसहे वेयणा उवसग्गे।
एए अरिणो हंता, अरिहंता तेण वुच्चंति ॥५९॥

धराम्बरार्णवादीनां, यदि वास्तिससीमता ।
न पुनः संविदो विश्वदृश्वर्या हि भवादृशाम् ॥६०॥

वप्रत्रयं चारुचतुर्मुखाङ्गता, चैत्यद्रुमोऽधोवदनाश्च कण्टकाः ।
चतुर्विधाऽमर्त्यनिकायकोटि--र्जघन्यभावादपि पार्श्वदेशे ॥६१॥

अशोक वृक्षनुं वर्णन

उसभस्स तिन्नि गाउय, बत्तीस धणुणि वद्धमाणस्स ।
सेसजिणाणमसोओ, सरीरओ बारसगुणो अ ॥६२॥

कया तीर्थंकरे केटलां स्थानक आराध्यां

पुरिमेण पच्छिमेण य, एए सव्वेवि फासिया ठाणा ।
मज्झिमएहिं जिणेहिं, एगं दो तिन्नि सव्वे वा ॥६३॥

उपसर्गोनुं विधान

श्रीवीरनेतुर्भूयांसः, श्रीपार्श्वस्य च तेऽल्पकाः ।
द्वाविंशतेश्च शेषाणा--मुपसर्गा न जज्ञिरे ॥६४॥

आणा जस्स विलइया, सीसे सव्वेहिं हरिहरेहिं ।
सोवि तुह झाणजलणे, मयणो मयणं व पविलीणो ॥ ६५ ॥

# ३ सामान्यधर्मसूक्तानि

श्री वीरप्रभुनी उद्घोषणा

निकष--च्छेद--तापैश्च, सुवर्णमिव पण्डितैः ।
परीक्ष्य भिक्षवो ! ग्राह्यं, मद्वचो न तु गौरवात् ॥१॥

कष छेद अने तापथी शुद्ध ते ज धर्म

धर्मश्चारित्रधर्मः, श्रुतधर्मात् ततश्च नियमेन ।
कष--च्छेद--तापशुद्धः, स एव कनकमिव विज्ञेयः ॥२॥

कष छेद अने तापनी समजण

प्राणवधादिकानां, पापस्थानानां यस्तु प्रतिषेधः ।
ध्यानाध्ययनादीनां, यश्च विधिरेष धर्मकषः ॥३॥

बाह्यानुष्ठानेन येन, न बाध्यते तन्नियमात् ।
सम्भवति च परिशुद्धं, स पुनर्धर्मच्छेद इति ॥४॥

जीवादिभाववादो, बन्धादिप्रसाधक इह तापः ।
एतैः सुपरिशुद्धो, धर्मो धर्मत्वमुपैति ॥५॥

धर्मनी महत्ता

धर्मो मङ्गलमुत्तमं नरसुरश्रीभुक्तिमुक्तिप्रदो,
धर्मः स्निह्यति बन्धुवद् दिशति वा कल्पद्रुवद्वाञ्छितम् ।
धर्मः सद्गुणसङ्गमे गुरुरिव स्वाभावराज्यप्रदो,
धर्मः पाति पितेव वत्सलतया मातेव पुष्णाति यः ॥६॥

'कला हि सफला सैव, या धर्मस्योपयोगिनी ॥ श्लोकार्धः'

दान-शील-तप-भावनां उदाहरणो

दानं धनदवद्देयं, शीलं सीतेव निर्मलम् ।
सुन्दरीवत्तपः कार्यं, भावना भरतेशवत् ॥७॥

धर्म विना सुख नथी

*"विना धर्मं सुखं न स्यात्, स्यात् ? सर्वेषां तदा न किम् ॥श्लोकार्धः"

संसारमां सर्व वस्तु प्राप्य छे पण धर्मज दुर्लभ छे

लब्भंति विउला भोगा, लब्भंति सुरसंपया ।
लब्भंति पुत्तमित्ताणि, एगो धम्मो न लब्भइ ॥८॥

माता-पिता अने मित्र धर्मज छे,

धर्मो महामङ्गलमङ्गभाजां, धर्मः पिता पूरितसर्वकामः ।
धर्मो जनन्युद्दलिताखिलार्ति-र्धर्मः सुहृद्वर्धितनित्यहर्षः ॥९॥

धर्म विना मनुष्य शोभतो नथी

काया हंसविना नदी जलविना दात्रा विना याचको-
भ्राता स्नेहविना फलं ऋतुविना धेनुश्च दुग्धं विना ।
भार्या स्नेहविना पुरं विभुविना वृक्षं च पत्रं विना,
दीपः तैलविना निशा शशिविना धर्मं विना मानवः ॥१०॥

धर्मथीज बधुंय मले छे

धम्मेण कुलप्पसुई, धम्मेण य दिव्वरूवसंपत्ति ।
धम्मेण धणसमिद्धि, धम्मेण सुवित्थडा कीत्ति ॥११॥

धर्म विना इच्छित मले तो संसारमां दुःखी कोण होइ शके ?

धम्मेण विना जइ चिन्तियाइं, लब्भन्ति जीव ! सुक्खाइं ।
ता तिहुयणंमि सयले, कोवि न हु दुक्खिओ हुज्जा ॥१२॥

धर्म माटे चार अयोग्य अने मध्यस्थ योग्य

रत्तो दुट्ठो मूढो, पूव्वं वुग्गाहिओ अ चत्तारि ।
एए धम्माणरिहा, अरिहो पुण होइ मज्झत्थो ॥१३॥
"तस्माज्ज्ञानमयः शुद्धः, तपस्वी भावनिर्जरः । श्लोकार्धः"

धर्मने सारी बुद्धिवालाज जाणी शके

प्रतिपच्चन्द्रं सुरभि-र्नकुलीं नकुलः पयश्च कलहंसः ।
चित्रकवल्लीं पक्षी, सूक्ष्मं धर्मं सुधीर्वेत्ति ॥१४॥

जगतना हितने माटे धर्मोपदेशक दुर्लभ

वाङ्मात्रसाराः परमार्थवाह्या, न दुर्लभाश्चित्रकरा मनुष्याः ।
ते दुर्लभा ये जगतो हिताय, धर्मे स्थिता धर्ममुदाहरन्ति ॥१५॥

समोसरणमां तीर्थंकर चार मुखथी देशना आपे छे

"समवसरणे चतूरूपः तीर्थंकरो धर्मदेशनां करोतीति गम्यम् ।"
दानशीलतपोभाव-भेदाद्धर्मं चतुर्विधम् ।
मन्ये युगपदाख्यातुं, चतुर्वक्त्रोऽभवद् भवान् ॥१६॥

पापने शोधनार दया अने दम छे

चर्म-वल्कल-चीवराणि, कूर्च-मुण्ड-शिखा-जटाः ।
न व्यपोहन्ति पापानि, शोधकौ तु दया-दमौ ॥१७॥

पोताना हितने इच्छनारे धर्ममां सतत प्रयत्न करवो.

रूपायुरारोग्यबलादिसंप-दुपेतमासाद्य मनुष्यजन्म ।
धर्मे प्रयत्नः सततं सुधीभि-र्विधीयतां स्वात्महितैककामैः ॥१८॥

धर्मनी महत्ता

धर्मो वपुर्वैभवबान्धवेभ्यो. विशिष्टतां स्पष्टमुरीकरोति ।
यतोऽयमेकान्तहितः परत्र, सहानुगामी न पुनस्तथाऽमी ॥१९॥

कल्पद्रुम-स्वर्मणि-कामकुम्भ-प्रायाः पदार्थाः प्रथितप्रभावाः ।
नियोगिता धर्ममहानृपस्य, राज्ये वितन्वन्ति तदेकगृह्याः ॥२०॥

उपार्ज्यते प्राज्यमनेन राज्यं, गुणव्रजेनैव यशोविशालम् ।
परश्वधेनेव वनं समूल-मुन्मूल्यते चाखिलदुःखजालम् ॥२१॥

मलीमसं वास इवोदकेन, धर्मेण नैर्मल्यमहो क्षणेन ।
आनीयतेऽनन्तभवोपनित-प्रभूतपापमलिनोऽपि जीवः ॥२२॥

कुलं रूपं कलाभ्यासो, विद्या लक्ष्मीर्वराङ्गना ।
ऐश्वर्यं सुप्रभुत्वं च, धर्मेणैव प्रजायते ॥२३॥

राज्ञः प्रसादो दिव्यास्त्रं, वाणिज्यं हस्ति-रत्नयोः ।
जैनधर्मस्तथैकोऽपि, महालाभाय जायते ॥२४॥

निर्दन्तः करटी हयो गतजवश्चन्द्रं विना शर्वरी,
निर्गन्धं कुसुमं सरो गतजलं छायाविहीनस्तरुः ।
रूपं निर्लवणं सुतो गतगुणश्चारित्रहीनो यति-
र्निर्देवं भवनं न राजति तथा धर्मं विना मानवः ॥२५॥

श्रुत्वा धर्मं विजानाति, श्रुत्वा त्यजति दुर्मतिम् ।
श्रुत्वा ज्ञानमवाप्नोति, श्रुत्वा मोक्षं च गच्छति ॥२६॥

धर्मः श्रुतोपि दृष्टोपि, कृतो वा कारितोपि वा ।
अनुमोदितोपि राजेन्द्र ! पुनात्यासप्तमं कुलम् ॥२७॥

सर्वधर्मसम्मत पांच व्रतो

पञ्चैतानि पवित्राणि, सर्वेषां धर्मचारिणाम् ।
अहिंसा सत्यमस्तेयं, त्यागो मैथुनवर्जनम् ॥२८॥

धर्मकर्मनो संकल्प पण निष्फल जतो नथी

यत्नः कामार्थयशसां, कृतोपि विफलो भवेत् ।
धर्मकर्मसमारंभ-संकल्पोपि न निष्फलः ॥२९॥

## सर्वशक्तिमान धर्म

सर्वज्ञैः कोऽप्यहो धर्मः, स्वाख्यातः सुखसाधनः ।
कृच्छ्रं विनापि संसार–पारं प्राप्येत यद्बलात् ॥३०॥
परमात्मास्वरूपोऽर्हन्, परमाचारवान् गुरुः ।
धर्मश्च सर्वपरमः, क्वापि जैनमतस्थितिः ॥३१॥
द्रविणप्राणपुत्रादि, सुलभं हि भवे भवे ।
स्यादनन्तैरपि, भवै–र्जैनधर्मस्तु दुर्लभः ॥ ३२ ॥
सर्वस्य प्राण–पुत्रादे–र्नाशे किमपि तद् भवे ।
दुःखं भवेष्वनन्तेषु, धर्मध्वंसे तु दुःसहम् ॥३३॥
अबन्धूनामसौ बन्धु–रसखीनामसौ सखा ।
अनाथानामसौ नाथो, धर्मो विश्वैकवत्सलः ॥३४॥
धर्मो नरकपाताल–पातादवति देहिनः ।
धर्मो निरुपमं यच्छ–त्यपि सर्वज्ञवैभवम् ॥३५॥
सेवितः किल संपूर्णः, संपूर्णं तनुते फलम् ।
जिनधर्मोऽपि खण्डितः तनोति खण्डितं फलम् ॥३६॥

व्यसनशतगतानां क्लेशरोगातुराणां
मरणभयहतानां दुःखशोकार्दितानाम् ।
जगति बहुविधानां व्याकुलानां जनानां,
शरणमशरणानां नित्यमेको हि धर्मः ॥३७॥

दानं सुपात्रे विशदं च शीलं, तपो विचित्रं शुभभावना च ।
भवार्णवोत्तारणयानपात्रं, धर्मश्चतुर्द्धा मुनयो वदन्ति ॥३८॥

# ५ दानसूक्तानि

### अभयदान

विना प्रयोजनं प्राज्ञः, प्राणिषु स्थावरेष्वपि ।
वधं न जातु कुर्वीत, गुर्वीमिच्छुः सुखश्रियम् ॥१॥

प्राज्येनापि न राज्येन,प्रीयन्ते प्राणिनस्तथा ।
यथा जीवितदानेन, मृत्यावन्तिकवर्तिनि ॥२॥

आकीटादानरेन्द्रश्च, सर्वे जीवितमिच्छवः ।
अतस्तद्दानतो नान्यो, मान्यो धर्मः सचेतसाम् ॥३॥

सङ्कल्पात्त्रसजन्तूना-ममन्तूनामघातनम् ।
द्वैधत्रैधादिभेदैर्यत्तु देशाभयं भवेत् ॥४॥

### सुपात्रदानथी अभयदाननी विशेषता

विशिष्टं किमुपष्टम्भ-प्रदानाभयदानयोः ? ।
ऊचे भगवता दान-मभयस्य विशिष्यते ॥५॥

स्याज्ज्ञानी ज्ञानदानेन, सुखी सत्पात्रदानतः ।
दीर्घायुरभयदाना-द्दीने दानाच्च भोगभाक् ॥६॥

### दाननी महत्ता

दानधर्मः श्रियां पात्रं, दानधर्मः शुभास्पदम् ।
दानधर्मो यशोमूलं, दानधर्मो गुणाऽवनिः ॥७॥

ग्रासाद् गलितसिक्थेन, किं न्यूनं करिणो भवेत्
जीवत्येव पुनस्तेन, कीटिकानां कुटुम्बकम् ॥८॥

सत्पात्रं महती श्रद्धा, काले देयं यथोचितम् ।
धर्मसाधनसामग्री, बहुपुण्यैरवाप्यते ॥९॥

कीर्तिः प्रतिष्ठा जगतोऽप्यभीष्टता,
कलङ्कलुप्तिर्द्विषतोऽपि मित्रता,
नृपादिमान्यत्वमलङ्घ्यता गिरा-
मिहापि दानस्य फलानि देहिनाम् ॥१०॥

सौभाग्यमारोग्यमखण्डिताज्ञा, सुदीर्घजीवित्वमभङ्गभोगिता।
ऐश्वर्यलीलाः सुरलोकसम्पदः, फलानि दानस्य परत्र जन्मिनाम्

धनाङ्गपरिवाराद्यं, सर्वं वस्तु विनश्यति ।
दानेन जनिता लोके, कीर्तिरेकैव निश्चला ॥१२॥

न्यायोपात्तं समुचितगुणं कल्पनीयं यतीनां,
वस्त्रं पात्रं परममशनं भेषजं रोगहारि ।
दत्तं भक्त्या विपुलमनसा श्रावकेण प्रकामं,
धत्ते मुक्तिं सुरनरभवे का कथा यत्र लभ्ये ॥१३॥

व्याजे स्याद् द्विगुणं वित्तं, व्यवसाये चतुर्गुणम् ।
क्षेत्रे शतगुणं प्रोक्तं, पात्रेऽनन्तगुणं पुनः ॥१४॥

जले तैलं खले गुह्यं, पात्रे दानं मनागपि ।
प्राज्ञे शास्त्रं सतां प्रीति-र्विस्तारं यात्यनेकधा १५॥

अन्न दाननी महत्ता

तुरगशतसहस्रं गोकुलं भूमिदानं,
कनकरजतपूर्णा मेदिनी सागरान्ता ।

सुरपतिरतिदानं कोटिकन्याप्रदानं,
न हि भवति समानमन्नदानं प्रधानम् ॥१६॥

धननी गति दान अथवा विपत्ति

आयासशतलब्धस्य, प्राणेभ्योऽपि गरीयसः ।
गतिरेकैव वित्तस्य, दानमन्या विपत्तयः ॥१७॥

दाननी महत्ता

एते एव पुनर्दान–मर्हन्ति जगदर्हिताः ।
यदनन्तगुणं तेभ्यो, वितीर्णमुपतिष्ठते ॥१८॥

दानं मानवदानवेन्द्रपदवीविस्तारणे प्रत्यलं,
दानं वासवसुन्दरीसरभसक्रीडाकलाकौशलम् ।
दानं मोक्षकपाटपाटनविधौ स्फूर्जत्सुरेन्द्रायुधं,
दानं विष्टपजन्तुजातनिवहप्रासादसिंहध्वजः ॥१९॥

यत्सौभाग्यमभङ्गुरं यदसमं साम्राज्यमूर्जस्वलं,
यन्माहात्म्यमनश्वरं प्रसृमरा यत्कीर्तिरात्यन्तिकी ।
यद्दीर्घायुरसङ्ख्यसौख्यसुभगं यत्संपदोऽनापदः,
सोऽयं पात्रसुदत्तवित्तमहिमा निर्दम्भमुज्जृम्भते ॥२०॥

दानेन वैराण्युपयान्ति नाशं, दानेन भूतानि वशीभवन्ति ।
दानेन कीर्तिर्भवतीन्दुशुभ्रा, दानात्परं नो वरमस्ति वस्तु ॥२१॥

दीयते दायकेनापि, मुनीन्द्रेभ्यो मनस्विना ।
जिनाज्ञां मन्यमानेन, सर्वं हि विधिपूर्वकम् ॥२२॥

फलातिशयसिद्ध्यै हि, दानं सर्वविदाज्ञया ।
शस्याय जायते बीजं, न सुप्तं विधिना विना ॥२३॥
ततो विवेकिना देयं, सर्वज्ञाज्ञानुसारतः ।
स्वातितोयमिवावश्यं, कल्पते मौक्तिकश्रिये ॥२४॥
विधत्तेऽनेषणीयं हि, दत्तं पात्रेपि भक्तितः ।
दातुर्दानफलप्राप्तौ, स्वल्पायुष्टादिदौष्ठवम् ॥२५॥

दान स्वहस्ते ज आपवुं

पश्चाद्दत्तं परैर्दत्तं, लभ्यते वा न वा खलु ।
स्वहस्तेनैव यद्दत्तं, तद्दत्तमुपलभ्यते ॥२६॥

दानना दूषणो

ददानं यस्तु दुर्बुद्धि-रपरं प्रतिषिध्यति ।
अतिभद्रवदुन्निद्रं, दारिद्र्यं तस्य जायते ॥२७॥
यैः पुरा विघ्नितं दानं, भिक्षन्ते ते गृहे गृहे ।
परत्र कणमात्राय, देहि देहीति वादिनः ॥२८॥
दरिद्रता दुर्भगता सरोगता, कलङ्किता दुर्गतिरल्पजीविता ।
भुजिष्यता द्वेषिजनप्रधृष्यता, विराद्धदानस्य भवे भवेऽङ्गिनः
क्षिप्तकालं कृतावज्ञं, सानुतापं विकत्थितम् ।
हीयमानमनौचित्यं, दानमाहुर्मलीमसम् ॥३०॥
क्षिप्तकाले भवेन्नारी, निर्धना पतिवर्जिता ।
अपुत्रा च कृतावज्ञे, सानुतापे च दुर्भगा ॥३१॥

विकत्थे स्यादल्पायुर्हीयमाने च हीनता ।
अनौचिते भवेद्व्याधिः, षट् त्यागाश्च मलीमसाः ॥३२॥

दानमादरनिर्मुक्तं, विद्या विनयवर्जिता ।
तपः शमविनाभूतं, त्रयं क्लेशाय केवलम् ॥३३॥

यदस्तमिते सूर्ये, न दत्तं धनमर्थिनाम् ।
तद्धनं नैव पश्यामि, प्रातः कस्य भविष्यति ॥३४॥

दानना प्रकार त्रण

दाणं तत्थ तिविहं, नाणपयाणं च अभयदाणं च ।
धम्मोवग्गहदाणं, सुहबीयं जिणवरुद्दिट्ठं ॥ ३६ ॥

उचितदान

गेहागयाणमुचिअं, वसणावडिआण तह समुद्धरणं ।
दुहियाण दया एसो, सव्वेसिं सम्मओ धम्मो ॥ ३६ ॥

"मार्गणादीनां दानं कीर्तिमात्रहेतुत्वेन निष्फलं न, तेषामपि देवगुरुसङ्घगुणोद्घोषितया दीयमानस्य दानस्य बहुफलत्वात्"

करचुलुअपाणिएण य अवसरदिन्नेण मुच्छिओ जीयइ ।
पच्छा मुआण सुन्दरी !, घडसयदिन्नेण किं तेण ॥ ३७ ॥

जिनेश्वरोए दयादाननो निषेध करेल नथी

सव्वेहिं पि जिणेहिं, दुज्जयजियरागदोषमोहेहिं ।
सत्ताणुकंपणट्ठा, दाणं न कहं पि पडिसिद्धं ॥ ३८ ॥

इयं मोक्षफले दाने, पात्रापात्रविचारणा ।
दयादानं तु सर्वज्ञै-र्न क्वापि प्रतिषिध्यते ॥ ३९ ॥

देयं सर्वत्र दीनादौ, दयादानं तु तैरपि ।
सार्वैः सर्वजनीनैर्य-न्निषिद्धं नहि तत् क्वचित् ॥ ४० ॥

दानं तथोत्तमं पात्र-वित्तभावानुमोदनैः ।
विफलं मध्यमं वा स्याद्, व्यपायेऽन्यतरस्य तु ॥ ४१ ॥

श्रीविक्रमादित्यनुं दान

अष्टौ हाटककोटयो द्विनवतिर्मुक्ताफलानां तुला,
पञ्चाशन्मदमत्तगन्धमधुपक्रोधोद्धुराः सिन्धुराः ।
[1]तारुण्योपचयप्रपञ्चितदृशां वाराङ्गनानां शतं,
दण्डे पाण्डयनृपेण ढौकितमिदं वैतालियस्यार्पितम् ॥ ४२ ॥

विक्रमराजाना दाननुं वर्णन

सर्वत्रेच्छानुमानेन, दीयन्ते कुञ्जरा हयाः ।
रथाऽऽभरणवस्त्राणि, रत्नानां राशयस्तथा ॥४३॥

करभा वेशराश्चापि, नगराणि गुरुण्यपि ।
ग्रामाऽऽकरा वराऽऽरामा, यथाकामं धनादयः ॥४४॥

स्वेच्छया याचमानेभ्यो, गृहाच्च वस्तु दीयते ।
पल्यङ्काऽऽसनयानादि, संख्यातुं शक्यते न तत् ॥४५॥

याचकनी स्थिति

गतिभङ्गो स्वरो दीनो, गात्रस्वेदो महद्भयम् ।
मरणे यानि चिन्हानि, तानि चिन्हानि याचके ॥४६॥

---

१ अश्वानामयुतं प्रपञ्चचतुरं

## ६ सुपात्रदानसूक्तानि

जो मागेलुं मळतुं होय तो आटलुं मळजो

रिसहेसरसम्मं पत्तं, निरवज्जं इक्खुरससमं दाणं।
सेयंससमो भावो, हविज्ज जइ मग्गियं हुज्जा ॥ १ ॥

श्री जिनेश्वर देवने पेलुं पारणुं करावनार तेज भवमां अथवा त्रीजा भवे मोक्षमां जाय

तस्मिन्नेव तृतीये वा, भवे सिद्धिर्भवेन्नृणाम् ।
अन्नदानानुभावेन, जिनेन्द्रादिमपारणे ॥ २ ॥

करण करावण अने अनुमोदननुं सरखुं फल

अप्पहियमायरंतो, अणुमोयंतो य सुग्गइं लहइ ।
रहकारदाण अणुमो-यगो मिगो जह य बलदेवो ॥ ३ ॥
रामो तवप्पभावा, सुपत्तदाणाउ झत्ति रहकारो ।
अणुमोअणाइ हरिणो, संपत्ता बंभलोगम्मि ॥ ४ ॥

भगवानने रेवतीश्राविकाए वहोरावेलो बीजोरा पाक

भगवानाह भो भद्र !, रेवत्या व्रज मन्दिरम् ।
तत्र कुष्माण्डपाकोऽस्ति, महातापापनोदकृत् ॥ ५ ॥
कल्प्याकल्प्यविधिं सर्वं, जानन्त्यापि मदुक्तितः ।
धर्मरागेण रेवत्या, मत्कृते विहितोऽधुना ॥ ६ ॥
अनेकद्रव्यसंस्कारा-मोदिकुष्माण्डपाककः ।
सिंहर्षे ! न त्वयाऽऽनेयो, दीयमानोऽप्यादरात् ॥ ७ ॥

इतरो बीजपूरस्य, पाकश्चात्मकृते कृतः ।
स शुद्धत्वात् त्वया ग्राह्य-स्तनुतापः शमिष्यति ॥ ८ ॥

रेवतीश्राविकाए वीरप्रभुने वहोरावेल पाकथी तीर्थंकर नाम बांध्युं

श्रूयते रेवती नाम, श्रमणोपासिकाग्रणी ।
गोशालक विनिर्मुक्त-तेजोलेश्यातिसारिणः ॥ ९ ॥

श्रीमद्वीरस्य कौष्माण्ड-पाकदानप्रभावतः ।
जिनः सप्तदशो भावि-समये भविता ध्रुवम् ॥१०॥ (युग्मम्)

न वीतरागपरोऽस्ति देवो, न ब्रह्मचर्यादपरं चरित्रम् ।
नाऽभीतिदानात् परमस्ति दानं, चारित्रिणो नापरमस्ति पात्रम्॥

सर्वथी श्रेष्ठ सुपात्रदान

वसुधाभरणं पुरुषः, पुरुषाभरणं प्रधानतरा लक्ष्मीः ।
लक्ष्म्याभरणं दानं, दानाभरणं सुपात्रञ्च ॥ १२ ॥

सात क्षेत्रोज सुपात्र

भवनं जिनराजानां, प्रतिमा पुस्तकस्तथा ।
सङ्घश्चतुर्विधश्चेति, पात्रं सप्तविधं विदुः ॥ १३ ॥

जिनभवन-बिंब-पुत्थय-संघसरूवाइं सत्तखित्ताइं ।
जिण्णोद्धारो पोसह-साला साहारणं चेव ॥ १४ ॥

सुपात्रने आपवा योग्य वस्तुओ

१ २ ३ ४ ५ ६ ७ ८
वसही-सयणासण-भत्त-पाण-भेसज्ज-वत्थ-पत्ताई ॥

महाभाग्यशाली आत्माज सुपात्रमां श्रद्धा पूर्वक दान आपे

प्रायः शुद्धैस्त्रिविधविधिना प्रासुकैरेषणीयैः,
कल्पप्रायैः स्वयमुपहितैर्वस्तुभिः पानकाद्यैः ।
काले प्राप्तान् सदनमसकृच्छ्रद्धया साधुवर्गान् ,
धन्याः केचित्परभवहिता हन्त सन्मानयन्ति ॥ १५ ॥

अशनमखिलं खाद्यं स्वाद्यं भवेदथ पानकं,
यतिजनहितं वस्त्रं पात्रं सकंबलप्रोञ्छनम् ।
वसतिफलकप्रख्यं मुख्यं चारित्रविवर्धनं,
निजकमनसः प्रीत्याधायि प्रदेयमुपासकैः ॥ १६ ॥

सुपात्रदानथी थयेला लाभो

श्रीनाभेयजिनेश्वरो धनभवे श्रेयःश्रियामाश्रयः,
श्रेयांसः स च मूलदेवनृपतिः श्रीचन्दना नन्दना ।
धन्योऽयं कृतपुण्यकः शुभमनाः श्रीशालिभद्रादयः,
सर्वेऽप्युत्तमपात्रदानविधिना जाता जगद्विश्रुताः ॥ १७ ॥

सुपात्रने पोते आपे अने अपावे

ततो भव्याः ! सुपात्रादौ, यथासम्पत्ति दीयताम् ।
यच्छतां पुनरुत्साह—माधातुमवधीयताम् ॥ १७ ॥

सुपात्रदाननी महत्ता

फलाय महते पात्रे, दत्तं स्वल्पमपि ध्रुवम् ।
संयमोत्सर्पणाकारि, किं पुनः प्रासुकौषधम् ॥ १८ ॥

असारमपि पात्रे हि, दत्तं लाभाय भूयसे ।
मुक्ताफलकृते शुक्तौ, भवेन्मेघोदकं यथा ॥ १९ ॥

पात्रदानस्य माहात्म्यं, स्तोतुं शक्तिं व्यनक्ति कः ।
यस्य दास्यं श्रिताश्चिन्ता–मणिकल्पद्रुमादयः ॥ २० ॥

सुपात्रदाननो विधि

नायागयाणं कप्पणिज्जाणं अण्णपाणाइदव्वाणं पराए भत्तीए।
अप्पाणुग्गहबुद्धीए संजयाणं अतिहिसंविभागो मुक्खफलो॥

जगतमां मुधादाई अने मुधाजीवी दुर्लभ छे

दुल्लहा उ मुहादाई, मुहाजीवीवि दुल्लहा।
मुहादाई मुहाजीवी, दोवि गच्छंति सुग्गइं ॥ २२ ॥

ऐहिकप्रत्युपकारलिप्सया, यतीश्वरेभ्यो न देयमुत्तमैः ।
नैवोपकृत्याऽऽददते यतीश्वरा-स्तेभ्यः सदाभ्यस्तजिनोदितागमाः

धर्मोपदेश दाननी महत्ता

जिणभवण बिंबपूया, दाण–दया–तव–सुतित्थजत्ताणं ।
धम्मोवएसदाणं, अहियं भणियं जिणिंदेहिं ॥ २४ ॥

एगं वि जो पबोहइ, पावासत्तं जिणधम्मंमि ।
सव्वजियाण विदिन्नं, अभयमहादाणमिह तेण ॥ २५ ॥

धम्मोवएसदाणं, जिणेहिं भणियं इमं महादाणं ।
सम्मत्तदायगाणं, पडिउवयारो जओ नत्थि ॥ २६ ॥

### वसतिदान अने तेनुं फल

जो देइ उवस्सयं मुनिवराणं, तव–नियम–जोगजुत्ताणं ।
तेण दिन्ना वत्थन्न–पाण–सयणासणविगप्पा ॥ २७ ॥

तव–संजम–सज्झाओ, नाणभ्भासो जणोवयारो य ।
जो साहूणं मवगाहकारी सिज्झायरो तस्स ॥ २८ ॥

पावइ सुरनररिद्धि, सुकुलुप्पत्ती य भोगसमिद्धि ।
नित्थरइ भवमगारी, सिज्जादाणेण साहूणं ॥ २९ ॥

जस्सासमम्मि मुणिणो, मुहुत्तमेत्तं पि विस्समंति सो ।
कयकिच्चो तेण च्चिय, किमन्नपुन्नेण किर तस्स ॥ ३० ॥

धन्नो तेसिं जम्मो, कुलं च धन्नं सयं पि ते धन्ना ।
पक्खालियपावमला, सुसाहुणो जाण ठंति गिहे ॥ ३१ ॥

जयन्ती–वङ्कचूलाद्याः, कोशा चाश्रयदानतः ।
अवन्तिसुकुमालश्च, तीर्णाः संसारसागरम् ॥ ३२ ॥

### सुपुत्रनुं दान

सर्वाङ्गसुन्दरः किन्तु, ज्ञानवान् गुणनीरधिः ।
श्रीजिनेन्द्रपथाध्वन्यः, प्राप्यते पुण्यतः सुतः ॥ ३३ ॥

धनधान्यस्य दातारः, सन्ति क्वचित्केचन ।
पुत्रभिक्षाप्रदः कोऽपि, दुर्लभः पुण्यवान्पुमान् ॥ ३४ ॥

धनधान्यादिपात्रेषु, महालाभाय जायते ।
पुत्रभिक्षाप्रदातारो, भद्रादेवीसमाः क्वचित् ॥ ३५ ॥

देव-गुरु-चैत्यनी भक्तिना लाभो

साहूण वंदणेण, नासंति पावं असंकिया भावा ।
फासुयदाणेण निज्जर, उवग्गहो नाणमाईणं ॥ ३६ ॥

मिच्छदंसणमहणं, सम्मदंसणविसुद्धिहेउं च ।
चिइवंदणाइविहिणा पन्नत्तं वीयरागेहिं ॥ ३७ ॥

## ९ शीलधर्मसूक्तानि

शीलनी महत्ता

शीलं नाम नृणां कुलोन्नतिकरं शीलं परं भूषणं,
शीलं ह्यप्रतिपाति चित्तदमनं शीलं सुगत्यावहम् ।
शीलं दुर्गतिनाशनं सुविपुलं शीलं यशः पावनं,
शीलं निर्वृतिहेतुरेव परमं शीलं तु कल्पद्रुमम् ॥१॥

तावद्व्यालबलं च केसरिकुलं तावत्क्षुधाव्याकुलं,
तावद्रोगिभयं जलं च जलधेस्तावद्भृशं भीषणम् ।
तावच्चामय-चौर-बन्ध-रणभीस्तावल्लसन्त्यग्नयो,
यावन्नैति जगज्जयी हृदि महान् श्रीशीलमन्त्राधिपः ॥२॥

क्वापि कुलं शीलं क्वापि, क्वापि वित्तं तु केवलम् ।
कुल-शील-वित्तवन्तः स्तोका एवाङ्गिनः कलौ ॥३॥

यासां मनोगृहे नैव, लीनः कामपिशाचकः ।
आबाल्याद्धृतशीलाभ्यः, श्रमणीभ्यो नमो नमः ॥४॥

सीलं उत्तमं वित्तं, सीलं आरोग्गकारणं परमं ।
सीलं भोगनिहाणं, सीलं ठाणं गुणगणाणं ॥५॥

कुलं यातु बलं यातु, यातु वित्तं तु सर्वथा ।
एकं शीलं तु मा यातु, मूलं सुगतिशाखिनः ॥६॥

ब्रह्मचारीने महाभयो

विभूसा इत्थीसंसग्गो, पणीयं रसभोयणं ।
नरस्स अत्तगवेसिस्स, विसं तालउडं जहा ॥७॥

हत्थ-पायपडिच्छिन्नं, कन्नं नासवि कत्तियं ।
अवि वाससयं नारीं, बंभयारी विवज्जए ॥८॥

द्रव्यथी पण शीलव्रत पालनारने धन्य छे

अतिवाहितमतिगहनं, विनापवादेन यौवनं येन ।
दोषनिधाने जन्मनि, किं न प्राप्तं फलं तेन ॥९॥

ये न स्खलन्ति ते दक्षाः, कृष्णकेशतमोभरे ।
वार्द्धके तु सदोद्योतः, शिरस्थपलितेन्दुना ॥१०॥

न य किंचि अणुन्नायं, पडिसिद्धं वावि जिणवरिंदेहिं ।
मोत्तु मेहुणभावं, न तं विणा रागदोसेहिं ॥११॥

मात्रा स्वस्रा दुहित्रा वा, ना विविक्तासनो भवेत् ।
बलवानिन्द्रियग्रामः, पण्डितोपि च मुह्यति ॥१२॥

"(बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥) पाठान्तरं"

धन्यास्ते पुण्यभाजस्ते, ये रामां वीक्ष्य चक्षुषा ।
धाराहतोक्षवद् यान्ति, वीक्षमाणाः क्षितेस्तलम् ॥१३॥

यस्य वेदलक्षणानां चारित्रावरणीयानां क्षयोपशम, तस्य मैथुनविरतिलक्षणं केवलब्रह्मचर्यवासितत्वं, नान्यस्य ॥१४॥

सव्वं विलवियं गीअं, सव्वनट्टं विडंबिअम् ।
सव्वे आहरणा भारा, सव्वे कामा दुहावहा ॥१५॥

सिंहलसिंहकुमारनी चार राणीओनुं शीलदार्ढ्य

नो शृङ्गारमयी नो कौतुकमयी नो हास्यकेलीमयी,
नो संगीतमयी नो मण्डनमयी नो कामलीलामयी ।
नो संग्राममयी नो विस्मयमयी नो काव्यकेलीमयी,
ताः संभाषयितुं कोऽभवदलं स्थैर्यं ह्यमूषामहो ॥१६॥

माताना व्यभिचारथी संतति पण व्यभिचारी बने

जं छन्नं आयरियं, तइया, जणणीइ जुव्वणे समये ।
तं पयडिज्जइ इण्हि, सुएहिं सीलं चयंतेहिं ॥१७॥

दुःशीला स्त्रीनी दुर्दशा

स्त्री स्यात्तिर्यक्षु दुःशीला, खर्युष्ट्री तुरगी मृगी ।
शूकर्यजापि वा भार–वाहनाद्युग्रदुःखभाग् ॥१८॥
कथञ्चिन्नृभवेऽप्याप्ते, वन्ध्या निन्दुर्गरांगना ।
बालरण्डा कुरण्डा वा, दुर्गन्धा दुर्भगाथवा ॥१९॥

कुरूपा–कुड्वाग्योनि–रोगा कुष्ठादिरोगिणी ।
हीनाङ्गी निष्कलाऽवीरा दुष्कुला–ऽभिभवास्पदम् ॥२०॥

दुर्जीवाऽल्पायुरिष्टैः स्वैः, पुत्राद्यैश्च वियोगिनी ।
स्त्रीदौःशील्यादिभिर्दीर्घ–दुःखान्यनुभवेदिति ॥२१॥

## ११ श्रीभावधर्मसूक्तानि

### संवेगविनानो गयेलो क्षणो व्यर्थ

सुचिरं वि तवो तवियं, चिण्णं चरणं सुयं पि बहुपढियं ।
जइ नो संवेगरसो, ता तं तुसखंडणं सव्वं ॥ १ ॥

तह संवेगरसो जइ, खणं पि न समुच्छलेज्ज दिवसंतो ।
ता विहलेण किमिमिणा, बज्झाणुट्ठाणकट्ठेण ॥ २ ॥

पक्खंतो मासंतो, छमासंतो वच्छरंतो वा ।
जस्स न स होइ, तं जाण दूरभव्वं अभव्वं वा ॥ ३ ॥

### शालिभद्रादिने संवेगनां कारणो

शालिभद्रोऽपि मेऽधीशः, स्थूलभद्रः, पितुर्मृतौ ।
विरक्तः कार्तिको दूनो, मेतार्यस्तु विगोपितः ॥ ४ ॥

### शरीरादि पवित्र करवानां साधन

वपुः पवित्रीकुरु तीर्थयात्रया, चित्तं पवित्रीकुरु धर्मवाञ्छया ।
वित्तं पवित्रीकुरु पात्रदानतः, कुलं पवित्रीकुरु सच्चरित्रतः ॥४॥

### देव-गुरु-दान-शील-तप अने भावना आराधकोनां नाम

देवं श्रेणिकवत्प्रपूजय गुरुं वन्दस्व गोविन्दव–
द्दानं शीलतपः प्रसङ्गसुभगां चाभ्यस्य सद्भावनाम् ।

श्रेयांसश्च सुदर्शनश्च भगवानाद्यः स चक्री यथा,
धर्मे कर्मणि कामदेववदहो चेतश्चिरं स्थापय ॥ ४ ॥

सामायिकना पांच महागुणो

उदासीणया[१]-मज्झत्थ[२]-संकिलेसविसुद्धिओ[३] ।
अणाउलत्तं[४] असंगत्तं[५], एए पंच गुणा इह ॥ ५ ॥

उदासीनता

जेहिं तेहिं जह तह, भोयण-सयणाइएहिं चित्तस्स ।
जो संतोसो जायति, सा हु उदासीणया वुत्ता ॥ ६ ॥

मध्यस्थता

सामाइय पढमंगं, एसा य विसुद्धिकारणत्तेण ।
भणिया जिणेहिं संपइ, भन्नइ मज्झत्थवित्ती उ ॥ ७ ॥

एस सयणो परो वा, इयबुद्धी पयइतुच्छचित्ताणं ।
पयइए विउलचित्ताण पुण, इमं जयमवि कुडुंबं ॥ ८ ॥

जम्हा अणाइनिहणे, संसारमहासरे सरंताणं ।
बहुभवसयअज्जियकम्म-रासिवसगाणसत्ताणं ॥ ९ ॥

अन्नोन्नमणेगविहो, कस्सेह न केण को न संबंधो ।
संजाओ इय चिंता, जा सा मज्झत्थवित्ती उ ॥ १० ॥

संक्लेश विशुद्धि

अह संकिलेसविसुद्धी, भन्नइ जेहिं सह ताणं ।
अन्नाणं च दुन्नय-दंसणेवि जमणक्खपरिहरणं ॥ ११ ॥

अनाकुलता

ठाणगमण–सुयणंजागर–लाभालाभाइएसु सव्वत्थ ।
जो हरिस–वेमणस्सा–भावो सो पुण अणाउलया ॥ १२ ॥

असंगपणुं

अह कणय–कयवरेसु, मित्तामित्तेसु सोक्ख–दुक्खेसु ।
बीभच्छ–पेच्छणिज्जेसु, तह य थुइवाय–निंदासु ॥ १३ ॥
अन्नत्थ य विविहमणो–वियारकारणसमागमे वि सया ।
समचित्तत्तं जं तं, असंगयं बिंति जगपहुणो ॥ १४ ॥

एयाणं समुदायो, पञ्चन्ह गुणाण परमसामइयं ।
अह य उदासत्तं चिय, एक्कं तक्कारणं परमं ॥ १५ ॥
किं बहुणा–सावज्जजोगवज्जण, निरवज्जजोगसेवणारूवं ।
सामाइयमित्तरियं, गिहिणो परमगुणठाणं ॥ १६ ॥

भावधर्मनी मुख्यता

प्रातः श्रियः सकलकामदुघास्ततः किं,
दत्तं पदं शिरसि विद्विषतां ततः किम् ।
कल्पं स्थितं तनुमतां तनुभिः ततः किं,
चेद्धर्मसाधनविधौ न रतोऽयमात्मा ॥ १७ ॥
धर्म एव सदा येषां, दर्शनं प्रतिभूरभूत् ।
क्वचित्त्यजति किं नाम, येषां मन्दिरमिन्दिरा ॥ १८ ॥

आत्मभावना

गतं मम मुधा जन्म, जिनचन्द्रो नाभ्यर्चितः ।
कारितानि न चैत्यानि, दत्तं पात्रेषु न मया ॥ १९ ॥

नो दृष्टं भवनं शशाङ्कसदृशं शुभ्रं जिनेन्द्रालयं,
नो शास्त्रं विदितं प्रबोधजनकं भव्याम्बुजानां प्रियम् ।
नो दत्तं मुनिपुङ्गवाय सततं दानं मया भक्तितः,
कालोऽयं खलु याति पापमनसां नो साधितं किञ्चन ॥२०॥

नार्जिता कमला नैव, चक्रे भर्तव्यपोषणम् ।
न सुपात्रे दत्तं दानं, तस्य जन्म निरर्थकम् ॥ २१ ॥

नापकृतं नोपकृतं, न सत्कृतं किं कृतं तेन ।
प्राप्य चलानधिकारान्, शत्रुषु मित्रेषु बन्धुवर्गेषु ॥ २२ ॥

किं तया क्रियते लक्ष्म्या, विदेशगतया ननु ।
अरयो यां न पश्यन्ति, बन्धुभिर्या न भुज्यते ॥ २३ ॥

न कयं जिणस्स भवणं, न य बंभं न पूइया साहू ।
दुद्धरवयं न धरियं, जम्मो परिहारिओ तेहिं ॥ २४ ॥

आप्तं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः,
सोढा दुस्सहशीतवाततपन-क्लेशा न तप्तं तपः ।
ध्यातं वित्तमहर्निशं नियमितप्राणैर्न मुक्तेः पदं,
तत् तत् कर्म कृतं यदेव मुनिभिस्तैस्तैः फलैर्वञ्चिताः ॥२५॥

स्नान-दान ज्ञान अने ध्याननी व्याख्या

स्नानं मनोमलत्यागो, दानं चाभयदक्षिणा ।
ज्ञानं तत्त्वार्थसम्बोधो, ध्यानं निर्विषयं मनः ॥ २६ ॥

दश प्रकार यतिधर्म

संयमः सूनृतं शौचं, ब्रह्माऽऽकिञ्चनता तपः ।
क्षान्ति-मार्दव-ऋजुता, मुक्तिश्च दशधा स तु ॥ २७ ॥

लालसा पज दुःख छे.

वाञ्छा चेन्न सुखं जन्तो-स्तदभावे परं सुखम् ।
न भूतानि न भावीनि, सुखानि सह वाञ्छया ॥ २८ ॥

महाभाग्यशालिनी भावना

अधुना योऽसौ मे रागः, शासने वरिवर्तते ।
तेन तत्रैव रागः स्या-दाकालं जिनशासने ॥ २८ ॥

जिनबिम्बमुनीन्द्रेषु जैनागमेषु या मम ।
वर्तते भक्तिरल्पापि, मया सैवाऽऽभवं भव ॥ ३० ॥

आत्मभावना

ब्राह्मे मुहूर्त उत्तिष्ठेत्, परमेष्ठिस्तुतिं पठन् ।
किं धर्मा किं कुलश्चास्मि, किं व्रतोऽस्मीति स्मरन् ॥ ३१ ॥

कर्मनाशनो उपाय

अभिगमण-वंदण-नमंसणेण पडिपुच्छणेणसाहूणं ।
चिरसंचिअं पि कम्मं, खणेण विरलत्तणमुवेइ ॥ ३२ ॥

जैनमुनिओने निमंत्रण विधि

इच्छकारि भगवन् ! पसाउकरी फासुएण एसणिज्जेण असन-पाण-खाइम-साइमेणं वत्थ-पडिग्गह-कंबल-पायपुच्छणेण पाडिहारिअ पीठ-फलग-सिज्जासंथारेणं ओसह-भेसज्जेणं भयवं अणुग्गहो कायव्वो ॥

### आत्मा समजाय अने जिताय तो दुःखोनो नाश थाय

उद्धरेदाऽऽत्मनाऽऽत्मानं, नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धु–रात्मैव रिपुरात्मनः ॥ ३३ ॥

बन्धुरात्माऽऽत्मनः तस्य, येनात्मैवाऽऽत्मना जितः ।
अनात्मनस्तु शत्रुत्वे, वर्तेतात्मैव शत्रुवत् ॥ ३४ ॥

जीवोऽयं यां पराधीनः, सहते दुःखसंहतिम् ।
तामेतामात्मतन्त्रश्चेत्, किं न मुच्येत बन्धनात् ॥ ३५ ॥

यदि शत्रुजये वाञ्छा, तदात्मानं विनिर्जय ।
अयमात्मा जितो येन, तेन सर्वे द्विषो जिताः ॥ ३६ ॥

### दुर्लभमनुष्यपणाने तेणे गुमाव्युं

इन्द्रियाणि न गुप्तानि लालितानि न स्वेच्छया ।
मानुष्यं दुर्लभं प्राप्य, न भुक्तं नापि शोषितम् ॥ ३७ ॥

जं जं करेइ तं तं, न सोहए जोव्वणे अइक्कंते ।
पुरिसस्स महिलिया इव, इक्कं धम्मे पमुत्तूणम् ॥ ३८ ॥

### भावनाथी महाहिंसकवाघण पण देव थई

केवलज्ञानिमुखा–दवाप्य पञ्चनमस्कृतिम् ।
मृत्वा व्याघ्री सुरो जज्ञे, सौधर्मे प्रणिधानतः ॥ ३९ ॥

ततो मुनिगिराऽकार्षी–दाहारत्यागमंजसा ।
दिनानि त्रीणि यावत्सा, जिजीवाऽद्भुतभावना ॥ ४० ॥

धनपालश्रावकनी भावना

कतिपयपुरस्वामी कायव्ययैरपि दुर्ग्रहो,
मितवितरता मोहेनाहो ! मयाऽनुसृतः पुरा ।
त्रिभुवनपतिर्बुद्ध्याराध्योऽधुना स्वपदप्रदः
प्रभुरधिगतस्तत्प्राचीनो दुनोति दिनव्ययः ॥ ४१ ॥

हरिबलमच्छीनी भावना

कत्थाहं निंदणिज्जो, कत्थेमा निवसुआ धणं कत्थ ।
पुण्णेण इमो जोगो, जइ जाओ लेमि लच्छिफलं ॥ ४२ ॥

इय चिंतिऊण विउलं, दिणाणाहाण दुत्थियजणाणं ।
अणवरयं सुहजणयं, वियरइ सो हरिबलो दाणं ॥ ४३ ॥

## १२ श्रीमुनिधर्मसूक्तानि

### जैनमुनिओनो आचार

पढमं पोरिसिं सज्झायं, बीयं झाणं झियायई ।
तइयाए भिक्खायरियं, पुणो चउत्थी य सज्झायं ॥१॥

गच्छवासिनस्तत्र स्मशाने तावत्स्थानादिकं न कल्पते प्रमादस्खलितादौ व्यन्तराद्युपद्रवात् ।

तथा जिनकल्पिकादौ, सत्त्वभावनां भावयतोऽपि न पितृवनमध्ये निवासोऽनुज्ञातः ।

प्रतिमाप्रतिपन्नस्य तु यत्रैव सूर्योऽस्तमुपयाति तत्रैव स्थानं जिनकल्पिकस्य वा तदपेक्षया स्मशानसूत्रम् ।

छज्जीवणिया पढमे, बीए चरिमे य सव्वदव्वाइं ।
सेसा महव्वया खलु, तदेकदेसेण दव्वेणं ॥२॥

"छज्जीवणिया पढमे = दव्वओणं पाणाइवाए छसु जीवनिकायेसु ।"

"बीए चरिमे य सव्वदव्वाइं = दव्वओणं मुसावाए सव्वदव्वेसु, दव्वओणं परिग्गहे सचित्ताचित्तमीसेसु दव्वेसु ।"

चारित्र धर्म सर्व भवोना पापनो नाशक

दीक्षा क्षणमपि प्रायः, सम्यक्परिणता हृदि ।
पुंसां क्षपयति क्षिप्रं, पापं नैकभवार्जितम् ॥३॥

अत एव क्षणेनापि, प्राग् यः प्रव्रजितो यतिः ।
सामान्यमपि तं सार्व–भौमसाधुर्नमस्यति ॥४॥

आबालभावओ जे, गुरुपायमूलाउ लद्धसिक्खदुगा ।
णिच्छयववहारविऊ, ते वड्ढावंति तित्थठिइं ॥५॥

बालकालमां ज दीक्षा लेनारा आत्माओ विद्वान थाय छे. आचार्य थाय छे. वीतरागदेवोनुं तीर्थ टकावी राखे छे. परंपरा चालु रहे छे.

अभिनंदनीय बालदीक्षा

धन्ना हु बालमुणिणो, कुमारवासंमि जे पव्वइया ।
निज्जिणिऊण अणंगं, दुहावहं सव्वलोआणं ॥६॥

ते धन्ना सुप्पुरिसा, पवित्तिअं तेहिं धरणिवलयमिणं ।
निम्महियमोहपसरा, जिणदिक्खं जे पवज्जंति ॥७॥

मुनिओनो आचार

केशोत्तारणमल्पमल्पमशनं निर्व्यञ्जनं भोजनं,
निद्रावर्जनमर्ह्नि मज्जनविधित्यागश्च भोगश्च न ।
पानं संस्कृतपाथसामविरतं येषां किलेत्थं क्रिया,
तेषां कर्ममलामयः स्फुटमयं स्पृष्टोऽपि हि क्षीयते ॥८॥

"वीर्याचाराधनार्थं च भिक्षाटनं, नाहारार्थमेव अतो न शोचेत् ।"

क्षितितलशयनं वा प्रान्तभिक्षाशनं वा,
सहजपरिभवो वा नीचदुर्भाषितं वा ।
महति फलविशेषे नित्यमभ्युद्यतानां,
न मनसि न शरीरे दुःखमुत्पादयन्ति ॥९॥

मुनिओना सुखनी आगळ चक्रीना सुखनी तुच्छता

तणसंथारनिषण्णो त्ति, मुणिवरो भट्ठराग-मय-मोहो ।
जं पावइ मुत्तिसुहं, तं कत्तो चक्कवट्टी वि ॥१०॥

मोक्षनो उपाय

जन्तूनामवनं जिनेशमहनं भक्त्यागमाकर्णनं,
साधूनां नमनं मदापनयनं सम्यग्गुरोर्माननम् ।
मायाया हननं क्रुधश्च शमनं लोभद्रुमोन्मूलनं,
चेतः शोधनमिन्द्रियाश्वदमनं यत्तच्छिवोपायनम् ॥ ११ ॥

मनज बंध अने मोक्षनुं कारण छे.

मन एव मनुष्याणां, कारणं बन्धमोक्षयोः ।
बन्धाय विषयासक्तं, मुक्त्यै निर्विषयं स्मृतम् ॥ १२ ॥

पाट वापरवा माटे लक्ष्मीधरशेठनी पृच्छा अने आचार्य-
महाराजनो उत्तर

अथ लक्ष्मीधरोऽपृच्छ-द्देशनान्ते गुरून् प्रति ।
पूज्यपादा भवादृक्षां, न पट्टे कथमासते ॥ १३ ॥

तत्पृष्टा गुरवः प्राहुः, सर्वज्ञोक्तानुसारिभिः ।
न प्रावृषं विना काष्ट-मयमासनमादृतम् ॥ १४ ॥

ऋतुवद्धकाले पाट वापरनार साधु ओसन्नो कहेवाय

अस्माभिरप्यतो भद्र !, न पट्टे स्थीयतेऽधुना ।
यः पट्टे सर्वदैवास्ते, सोऽवसन्नः प्रकीर्तितः ॥ १५ ॥

ओसन्नाना भेद

ओसन्नो वि य दुविहो, सव्वे देसे य तत्थ सव्वंमि ।
उउबद्धपीठफलगो, ठविअगभोई अ नायव्वो ॥ १६ ॥

आसन-पाट-पाटला क्यारे वपराय ?

परं दारुमयं जन्तु-दयायै शयनासनम् ।
वर्षास्वेव मुमुक्षुणा-मुपादिक्षन् जिनेश्वराः ॥१७॥

अष्टासु परिशिष्टेषु, मासेषु पुनरौर्णिकम् ।
अमूढलक्षाः सर्वज्ञा, भाषन्ते हि हितावहम् ॥१८॥

मुनिओने जमीन उपर न बेसाय

केवले भूतले सूक्ष्म-नानाजन्तुकुलाकुले ।
नानुजानन्ति सर्वज्ञा, मुनिनामुपवेशनम् ॥१९॥

वर्षाकालमां पाट अने शेषकालमां ऊनना आसननुं विधान

ततो दारुमये वर्षा–समये प्रासुकासने ।
आस्यते मुनिभिः शेष–समये पुनरौर्णिके ॥ २० ॥

वर्षाकाल वगर पाट-पाटला वापरनारनी चारित्रहीनता

वर्षाकालं विना प्राज्ञा, ये पट्टाद्युपभुञ्जते ।
न ते चारित्रिणो ज्ञेया–स्त्यक्ताचारा हि ते स्मृताः ॥ २१ ॥

अशुद्ध आहारीने थता दोष

जिनाज्ञाभङ्ग–मिथ्यात्व–प्रमुखा दुःखलक्षदाः ।
यतीनां प्रत्यपायाः स्यु–रशुद्धाहारभोजिनाम् ॥ २२ ॥

अंतो मासस्स तओ, दगलेवे करेमाणे सबले ।
अंतो संवच्छरस्स, दश दगलेवे करेमाणे सबले ॥ २३ ॥

सारणा वारणा चोयणा अने पडिचोयणानी समजण

पम्हुठे सारणा वुत्ता, अणायारस्स वारणा ।
चुक्काणं चोयणा भुज्जो, निठ्ठुरं पडिचोयाणा ॥ २४ ॥

जैन मुनिओनां त्रण जातनां पात्र

निग्गंथो वा निग्गंथी वा, तउ पायाइं धारित्तए वा, परिहरित्तए वा, तं जहा–लाउअपाए, दारुपाए, मट्टिआपाए ॥

लौकिक मते पात्र राखवानुं विधान

अलाबु दारुपात्रं च, मृन्मयं विदलं तथा ।
एतानि यतिपात्राणि, मुनिः स्वायम्भुवोऽब्रवीत् ॥ २५ ॥

समणाणं सउणाणं, भमरकुलाणं च गोउलाणं च ।
अनियाओ वसहीओ, सारइआणं च मेहाणं ॥ २६ ॥

कारणे पण स्त्रीकरस्पर्श, साधुना मूलगुणनो नाशक

जत्थित्थीकरफरिसं, करंति अणिहावि कारणे जाए।
तं निच्छयओ गोयम ! जाणिज्जा मूलगुणहाणि ॥ २७ ॥

यत्र गच्छे नीरागसाधुरपि आन्तरिककारणे उत्पन्ने स्त्रीकरस्पर्शं करोति तस्य साधोर्मूलगुणहानिः स्यात्।

राग-द्वेषमुक्त मुनिवरनो सर्ववस्तु उपर समभाव

जो चंदणेण बाहुं आलिंपइ, वासिणा वा तच्छेति।
संथुणइ जो अ णिंदति, महेसिणो तत्थ समभावा ॥ २८ ॥

शमसुखशीलितमनसा-मशनमपि द्वेषमेति किमु कामः।
स्थलमपि दहति झषानां, किमङ्ग ! पुनरुज्वलो वह्निः ॥२९॥

शत्रौ मित्रे तृणे स्त्रैणे, स्वर्णेऽश्मनि मणौ मृदि।
इहाऽमुत्र सुखे दुःखे, भवे मोक्षे समाशयः ॥ ३० ॥

जैन मुनिए कृपा विधि-निषेध विगेरेना मौन रहेवुं

सत्यं कूपेषु शीतं शशिकरधवलं वारि पीत्वा प्रकामं,
व्युच्छिन्नाशेषतृष्णा प्रमुदितमनसः प्राणिसार्था भवन्ति।
शोषं नीते जलौघे दिनकरकिरणैर्यान्त्यनन्ता विनाशं
तेनौदासीन्यभावं व्रजति मुनिगणः कूपवाप्यादिकार्ये ॥ ३१ ॥

विधिनिषेधमां मौन

तस्मादवदतदादि-विधिप्रतिषेधव्युदासेन।
यथावस्थितं दानं, शुद्धं प्ररूपयेदसावाद्यानुष्ठानं वा ॥ ३२ ॥

(आचारांग दीपिका टीका. पृ. १८३)

इत्येवं कुर्वन्नुभयदोषपरिहारी जन्तूनामाश्वासभूमिर्भवति ॥

( आ. दी. टी. पृ. १८९ )

माहणेण मइमया जामा तिन्नि उदाहिया ॥

( आ. दी. टी. पृ. १८९ )

## चारित्रनां उपकरणो

पत्तं पत्ताबंधो, पायठवणं पायकेसरिया ।
पडलाइ रयत्ताणं, गुच्छउ पायनिज्जोगो ॥ ३३॥

तिन्नेव य पच्छागा, रयहरणं चेव होइ मुहपत्ती ।
एसो दुवालसविहो, उवही जिणकप्पियाणं तु ॥ ३४ ॥

एए चेव दुवालस, मत्तग अइरेग चोलपट्टो अ ।
एसो उ चउदसविहो, उवही पुण थेरकप्पंमि ॥ ३५ ॥

जिणा बारस रूवाणि, थेरा चउदस रूविणो ।
अज्जाणं पणवीसं तु, अउड्ढं उवग्गहो ॥ ३६ ॥

मुहपोत्ति[1] चोलपट्टो[2], कप्पतिगं[5] दो निसिज्जा[7] रयहरणं[8] ।
संथारुत्तरपट्टो[9,10], दसपेहा उग्गए सूरे ॥ ३७॥

अन्ने भणंति एक्कारसमो दंड इति ।

## पल्ला संबंधी त्रण मतो

गिम्हासु तिन्नि पडला, चउरो हेमंते पंच वासासु ।
गिम्हासु होन्ति चउरो, पंच य हेमंते छच्च वासासु ।
गिम्हासु पंच पडला, छप्पुण हेमंते सत्त वासासु ॥

पल्ला राखवाना कारणो

पुप्फ-फलोदय-रय-रेणु-सउणपरिहारपायरक्खट्ठा ।
लिंगस्स य संवरणे, वेदोदयरक्खणे पडला ॥ ३८ ॥

अस्थगिते पात्रे पुष्पं निपतति तत्संरक्षणार्थं पटलानि गृह्यन्ते, तथा फलपातरक्षणार्थं उदकपातरक्षणार्थं च पटलग्रहणं, तथा रजः सचित्तपृथिवीकायः तत्संपातरक्षणार्थं च रेणुः धूलिः तत् संपातरक्षणार्थं शकुनपरिहारः शकुनपुरीषं तत् कदाचिदाकाशात् निपतति तत्पातसंरक्षणार्थं, लिंगसंवरणार्थं लिंगस्थानं च तैस्तद् गृहीतैर्भवति, तथा पुरुषवेदोदये सति तस्यैव स्तब्धता भवति तत्संरक्षणं स्थगनं तदर्थं च पटलानि भवन्ति इति ।

उपशमश्रेणिथी पडतानुं स्थान तथा संसारमान

उवसामगसेढीए, पट्ठवओ अप्पमत्तविरओ उ ।
पज्जवसाणे सो वा, होइ पमत्तो अविरओ वा ॥ ३९ ॥

तम्मि भवे निव्वाणं, न लहइ उक्कोसओ वि संसारं ।
पोग्गलपरियट्टद्धं, देसूण कोइ हिंडेज्जा ॥ ४० ॥

तीर्थोमां मुनिदाननुं माहात्म्य

अस्मिन् शत्रुञ्जये तीर्थे, यतयः पूजिता न यैः ।
तेषां जन्म च वित्तं च, जीवितं च निरर्थकम् ॥ ४१ ॥

जिनतीर्थेषु यात्रायां, जिनपर्वसु ये जनाः ।
पूजयन्ति यतीन् ते स्यु-स्त्रैलोक्यैश्वर्यभाजनम् ॥ ४२ ॥

यतिः पूज्यो यतिः सेव्यो, यतिर्मान्यो मनीषिभिः ।
यतेराराधनाद्यात्रा, सफला निष्फलान्यथा ॥ ४३ ॥

निदानं वीतरागत्वे, प्राग्भवे गुरुवाग्यतः ।
देवतत्त्वादपि ततो, गुरुत्तत्त्वं महद्विदुः ॥ ४४ ॥

अन्नैः पानैश्च वस्त्रैश्चा-लयैश्चासनपानकैः ।
ये यतीन् पूजयन्तीह, जयन्ति ते श्रिया सुरान् ॥ ४५ ॥

अन्नवस्त्रादिभिः सौख्य-सम्पन्नो गुरुमर्चयन् ।
भवे तृतीये शुद्धात्मा, मुक्तिमाप्नोति तत्त्वतः ॥ ४६ ॥

श्लाघ्यं तदेव वित्तं स्यात् , तत् तत्त्वं सा च पुण्यश्रीः ।
चारित्रिणो जगत्पूज्याः, पूज्यन्ते यत् सुभक्तितः ॥ ४७ ॥

संविग्नपाक्षिकसाधुओनुं लक्षण

सुद्धं सुसाहुधम्मं, कहेइ निंदइ य नियमायारं ।
सुतवसिआणं पुरओ, होई स वोमरायणीओ ॥ ४८ ॥

वंदइ नवि वंदावेइ, किइकम्मं कुणइ कारए नेव ।
अत्तट्ठा नवि दिक्खइ, देइ सुसाहूणं बोहेउं ॥ ४९ ॥

संविग्गोऽगुणवएसं न देइ, दुब्भासियं कडुविवागं जाणंतो ।

आ दुषमकालमां चारित्र नथी एम बोलनारनुं दर्शन पण पाप माटे छे.

अन्नाणदोसा पुण जे भणंति, न दुस्समाए चरणं खु अत्थि ।
निसामिअव्वं वयणं न तेसिं, पावाय तेसिं खलु दंसणं पि ।५०।

आरंभिणो कामगुणेसु गिद्धा, चारित्तभारुव्वहणाऽसमत्था ।
पेच्छन्ति साहूण असंतदोसे, गुणे न संतेवि महातमंधा ॥५१॥

सावद्यमुक्ताः किल शीलरक्ता–श्चारित्रिणो ये बहुलब्धियुक्ताः ।
श्राद्धर्षिवच्छुद्धतराःस्युरत्रो–त्सर्गापवादानपि सेवमानाः ॥५२॥

आहार वापरनारा मुनिओ सदा उपवासी कहेवाय.

निरवज्जाहारेणं, साहूणं निच्चमेव उववासो ।
उत्तरगुणवुड्ढिकये, तहवि हु उववासमिच्छंति ॥ ५३ ॥

अकृताकारितं शुद्ध–माहारं धर्महेतवे ।
अश्नतो हि मुनेर्नित्यो–पवासफलमुच्यते ॥ ५४ ॥

आचार्य भगवंत

वैरंगिकानामुपकारकाणां, वचस्विनां कीर्तिमतां कवीनाम् ।
अध्यापकानां सुधियां च मध्ये, दधुः सदा ये प्रथमत्वमेव ।५५।

आचार्यनी आधीनता सर्वअनर्थ नाश करनार छे

जाए सद्धाए निक्खंतो, परिआयट्ठाणमुत्तमं ।
तमेव अणुपालिज्जा, गुणे आयरियसंमये ॥ ५६ ॥

*आचार्यपराधीनता–निखिलानर्थनिबन्धनवैरताप्रतिपन्थिनी ।*

चारित्रना उत्तरगुणो

पिंडस्स जा विसोही, समिइओ भावणा तवो दुविहो ।
पडिमा अभिग्गहावि य, उत्तरगुणमो वियाणाहि ॥ ५७ ॥

अवि राया चए रज्जं, न य दुच्चरियं कहे ॥ श्लोकार्धः

पिंडने नहि शोधनार मुनि अचारित्री छे

पिंडं असोहयंतो, अचरित्ति एत्थ संसयो नत्थि ।
चरित्तम्मि असंते, सव्वा दिक्खा निरत्थयत्ति ॥ ५८ ॥

जंमि निसेविजंते, अइआरो होज्ज कस्सइ कयाइ ।
तेणेव य तस्स पुणो, कयाइ सोही हवेज्जाहि ॥ ५९ ॥

२-४-५ मुं चारित्र बावीस तीर्थंकरना तथा महाविदेहना साधुओने होय.

तिन्नि य चरित्ताइं, बावीसजिणाण एरवए भरहे ।
तह पंचविदेहेसु, बीयं तइयं च नवि होइ ॥ ६० ॥

चारित्रनी बराबर कोइ वस्तु नथी

मुनिरुचे चारित्रस्या-ऽसाध्यमस्ति न किञ्चन ।
कल्पद्रुकामधुक्चिन्ता-रत्नातीतप्रभावतः ॥ ६१ ॥

चारित्ररत्नान्न परं हि रत्नं, चारित्रलाभान्न परो हि लाभः ।
चारित्रवित्तान्नपरं हि वित्तं, चारित्रयोगान्न परो हि योगः॥६२॥

उत्तम पुरुषोना सहवासथी पापबुद्धि नष्ट थाय

धन्यास्ते त्रिजगत्पूज्यास्तीर्थेशा मुनयोऽपि च ।
येषां सन्निधौ प्राणिनां, पापबुद्धिः पलायते ॥ ६३ ॥

स्वर्ग अने मोक्षनुं कारण

तत्त्वतस्तु प्रशस्तरागस्यैव स्वर्गहेतुत्वाच्चारित्रस्य तु मोक्ष-हेतुत्वात् । मोक्षहेतोः संसारहेतुत्वायोगादिति सूक्ष्ममीक्षणीयम् ।

दीक्षानी योग्यता

यस्य वीर्यान्तरायचारित्रमोहभेदानां धर्मान्तरायाणां क्षयोपशमः तस्यैवाऽगारत्यागलक्षणा प्रव्रज्या नान्यस्य ॥

ग्रहण-आसेवन शिक्षा

गहणासेवणतदुभय-भेएहिं सा भवे तिहा तत्थ ।
नाणऽभाससरूवा, सिक्खा वुच्चति गहणसिक्खा ॥ ६४ ॥

सा य जहन्नेण जइ-स्स सावगस्स पडुच्च सुत्तत्थे ।
अट्ठउ पवयणमाया, जाव भवे तुच्छमइणो वि ॥ ६५ ॥

उक्कोसेण साहुस्स, सुत्तओ अत्थओ य होति इमा ।
पवयणमायाइ-बिंदुसारपुव्वावसाणं ति ॥ ६६ ॥

जाव छज्जीवणियं, उक्कोसा सुत्तओ गिहत्थस्स ।
अत्थं पडुच्च पिंडेसणावसाणा सा किर जेण ॥ ६७ ॥

पवयणमायाहिगमं, विणा वि सामाइयं कह करेज्जा ।
छज्जीवणियानाणं, विणा य कह रक्खइ जीवे ॥ ६८ ॥

पिंडेसणत्थविन्नाण-विरहिओ कह व देज्जा समणाणं ।
फासुयएसणियाइं, पाणासणवत्थपत्ताइं ॥ ६९ ॥

साधुधर्म माटेनी योग्यता

कुल-जातिबलोपेतः, शान्तो दान्तो जितेन्द्रियः ।
श्रद्धालुर्गुरुभक्तश्च, क्षमावान् विनयी नयी ॥ ७० ॥

अमर्मवादी निर्मायः, पराऽपायप्ररक्षकः ।
इत्यादिगुणसम्पन्नो, यतिधर्माय कल्पते ॥ ७१ ॥ (युग्मम्)

सर्वव्यसनीने पण सामान्य एकाद नियम पण लाभदायक छे

मज्जासी मंसरओ, इक्केणवि चेव गंठिसहिएण ।
सोहं तु तंतुवाओ, सुसाहुवाओ सुरो जाओ ॥ ७२ ॥
एकोऽपि नियमो येन गृहीतो गृहमेधिना ।
जिनाज्ञा पालिता तेन भवाकूपारपारदा ॥ ७३ ॥

आत्मकल्याणना त्रणमार्ग तथा संसारना त्रणमार्ग

सावज्जजोगपरिव-ज्जणाओ, सव्वुत्तमो जइधम्मो ।
बीओ सावगधम्मो, तइओ संविग्गपक्खपहो ॥ ७४ ॥
सेसा मिच्छदिट्ठि, गिहिलिङ्ग-कुलिङ्ग-दव्वलिङ्गेहिं ।
जह तिन्निओ मुक्खपहा, संसारपहा तहा तिन्नि ॥ ७६ ॥

पूर्वपुरुषो साथे स्पर्धा करवी नकामी छे

पूर्वपुरुषसिंहानां, विज्ञानातिशयसागरानन्त्यम् ।
श्रुत्वा साम्प्रतपुरुषाः, कथं स्वबुद्ध्या मदं यान्ति ॥ ७७ ॥

मुनिओ प्रासुकपाणीथी स्नान करे तो शुं दोष?
प्रश्न अने उत्तर

अर्हद्भिर्भाषितो धर्मो, ऽनवद्यः सकलो पि हि ।
स्नायेत प्रासुकाम्भोभिश्चेद् दोषः स्यात् तदा हि कः ॥७८॥
स्नानं मदर्पकरं, कामाङ्गं प्रथमं स्थितम् ।
तस्मात् कामं परित्यज्य, नैव स्नान्ति दमे रताः ॥ ७९ ॥

निर्विकृतिकस्यैव, प्रत्याख्यानतया विधानेपि । विकृति-परिमाणप्रत्याख्यानमपि न दुष्टमप्रमादवृद्धिहेतुत्वात् ॥

"थूलगं पाणाइवायं संकप्पओ पच्चखामि" जावज्जीवाए दुविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि तस्स भंते ! पडिक्कमामि निन्दामि, गरिहामि अप्पाणं वोसिरामि ॥

वीतरागशासनना पांच व्यवहारो

आगम--सुअ--आणा--धारणा अ जीए अ होइ बोधव्वे ।
एएसिं पंचण्हं, पत्तेय परूवणं वुच्छं ॥८०॥

वीतरागशासननो अपवाद

ननु आलम्बनसहितउत्तरगुणप्रतिसेवी अपि वन्दनीयः अर्थादापन्नं, सूरिराह--न केवलं उत्तरगुणप्रतिसेवी मूलगुणसेवी अपि आलम्बनसेवी पूज्यः ॥

पंचमकाळना साधुओनी दुर्बोधता

मिच्छत्तभावियाणं, दुवियड्ढमतीण वामसीलाणं ।
आइक्खिउं विभइउं, उवणेउं वावि दुक्खं ॥ ८१ ॥

ये तु चरमतीर्थकरसाधवः ते प्रायेण मिथ्यात्वभाविता दुर्विदग्धमतयो वामशीलाश्च ततः तेषामपि वस्तुतत्त्वमाख्यातुं विभक्तुमुपनेतुं वा दुःखं दुःखतरम् ॥

तीर्थंकरादिनी आशातना करनार अनंतसंसारी

तित्थयर--पवयण--सुअं, आयरियं गणहरं महड्ढीअं ।
आसायंतो बहुसो, अणंतसंसारियो होइ ॥ ८२ ॥

मुनिओना अचेलकत्वनो विचार

अचेल एव पराक्रमेदचेलतया शीतादिस्पर्शं सम्यगधिसहेत ।
(आ. दी. टीका पृ, २१०)

स्वेदार्द्रीभूतसर्वाङ्ग–मललिप्तांशुकद्वयः ।
तृष्णार्तोऽचिन्तयदिति, चारित्रावरणोदयात् ॥ ८३ ॥
(पर्व १०, सर्ग-१ श्लोक-२२)

सर्वेमी मुनयश्चोल–पट्टं परिदधत्यमी ।
स्थविरत्वात्तु युष्माकं, शाटकोऽप्यनुमन्यते ॥ ८४ ॥

साधुधर्मनुं काठिन्यपणुं

आगासे गंगसोउव्व, पडिसोउव्व दुत्तरो ।
बाहाहिं चेव गंभीरो, तरिअव्वो महोअही ॥ ८५ ॥

वालुगाकवलो चेव, निरासाए हु संजमो ।
जवा लोहमया चेव, चावेयव्वा सुदुक्करं ॥ ८६ ॥

कषायथी देशोनपूर्वक्रोडवर्षनुं चारित्र नष्ट थाय

जं अज्जियं चरित्तं, देसूणावि पुव्वकोडीए ।
तं पि य कसायमत्तो, हारेइ नरो मुहुत्तेण ॥ ८७ ॥

ज्ञान-दर्शन अने चारित्रना योगने साधक होय तेज कार्य
बाकी अकार्य

कज्जंपि नाण-दंसण–चरित्त–जोगाण साहगं जं तु ।
जइणो सेसमकज्जं, ण तत्थ आवस्सिया सुद्धा ॥ ८८ ॥

### संयमनो सार निर्वाण

लोगस्स सारो धम्मो, धम्मं पि नाणं सारियं बिंति ।
नाणं संजमसारं, संजमसारं च निव्वाणं ॥ ८९ ॥

### संयमनी समजण

यस्य च चारित्रविशेषविषयवीर्यान्तरायलक्षणानां यतनाऽऽवरणीयानां कर्मणां क्षयोपशमः तस्य प्रतिपन्नचारित्रातिचारपरिहारार्थयतनाविशेषलक्षणः संयमो नान्यस्य ॥

### सामुद्रिकने कहे ते साधु न कहेवाय

जे लक्खणं च सुविणं च, अंगविज्जं च पउंज्जंति ।
न हु ते समणा वुच्चंति, एवं आयरिएहिं अक्खायं ॥ ९० ॥

### वेशविडंबक

दगपाणं पुप्फफलं, अणेसणिज्जं गिहत्थकिच्चाइं ।
अजया पडिसेवंती, जइ वेसविडंबगा नवरं ॥ ९१ ॥

### प्रासुक एषणीय अने कल्पनीय आहारज साधुने कल्पे

एषणीयं कल्पनीयं, प्रासुकं च जगत्पत्तिः ।
आदत्तेऽन्नादि तन्मुग्धा, भवन्तो न हि जानते ॥ ९२ ॥

### सात मांडलीनां नाम

१ २ ३ ४ ५ ६
सुत्ते अत्थे भोयण–काले आवस्सये य सज्झाए ।
७
संथारए वि अ तहा, सत्तेया मंडली हुंति ॥ ९३ ॥

### मुनिओनी सर्वचेष्टा संयम माटेज होय

जा चिट्ठा सा सव्वा, संजमहेउं ति होति समणाणं ।
संसत्तुवस्सए पुण, पच्चक्खमसंजमकरी ॥ ९४ ॥

### मुनि छकारणे आहार करे

[१] वेयण[२] वेयावच्चे, [३] इरियट्ठाए य [४] संजमट्ठाए ।
तह [५] पाणवत्तियाए, छट्ठं पुण [६] धम्मचिंताए ॥ ९५ ॥

छुह[१] वेअण[२] वेआवच्चे, [३] संजम[४] ज्झाण[५] पाणरक्खणठाए ।
[६] इरियं च विसोहेउं, भुंजइ नो रूवरसहेउं ॥ ९६ ॥

### साधु सर्वमां समभावी होय

लाभालाभे सुखे दुःखे, जीविते मरणे तथा ।
स्तुतिनिन्दाविधाने च, साधवः समचेतसः ॥ ९७ ॥

वीतरागो वसु ज्ञेयो, जिनो वा संयतोऽथवा ।
सरागोऽनुवसु प्रोक्तः, स्थविरः श्रावकोऽपि वा ॥ ९८ ॥

### संनिधिनी समजण

जे सिया सन्निहिं कामे गिही पव्वइए न से–यः स्याद्यः कदाचित्संनिधिं कामयते सेवते भावतोऽसौ गृहस्थ एव न प्रव्रजितः न साधुः ‘संनिधीयते नरकादिषु आत्मा अनया इति संनिधिः’ ॥

# १५ श्रीसम्यग्दर्शनसूक्तानि

### सम्यक्त्वनुं लक्षण

अरिहं देवो गुरुणो, सुसाहुणो जिणमयं महपमाणं ।
इच्चाइ सुहो भावो, सम्मत्तं बिंति जगगुरुणो ॥ १ ॥

### शक्यने करनार अने अशक्यनी सद्दहणा राखनार मोक्षमां जाय

जं सक्कइ तं कीरइ, जं च न सक्कइ तयंमि सद्दहणा ।
सद्दहमाणो जीवो, वच्चइ अयरामरं ठाणं ॥ २ ॥

### सम्यक्त्वना प्रकार

एगविह दुविह तिविहं, चउविहं पंचविहं दसविहं सम्मं ।
होइ जिणणायगेहिं, इह भणियं णंतनाणीहिं ॥ ३ ॥

### समकितज धर्मनुं मूळ छे

सम्मत्तमेव मूलं, निद्दिट्ठं जिणवरेहिं धम्मस्स ।
एगं पि धम्मकिच्चं, न तं विना सोहए नियमा ॥ ४ ॥

### सम्यक्त्वनी महत्ता

जह गिरिराण मेरू, सुराण इंदो गहाण जह चंदो ।
देवाण य जिणिंदो, तह सम्मत्तं धम्माणं ॥ ५ ॥

सम्मत्तं परमो देवो, सम्मत्तं परमो गुरू ।
सम्मत्तं परमं मित्तं, सम्मत्तं परमं पयं ॥ ६ ॥
सम्मत्तं परमं झाणं, सम्मत्तं वरसारही ।
सम्मत्तं परमो बन्धू, सम्मत्तं सुहभूसणं ॥ ७ ॥

सम्मत्तं परमं दाणं, सम्मत्तं परमं तव ।
सम्मत्तं परमं सीलं, सम्मत्तं वरभावणा ॥ ८ ॥

पिधानं दुर्गतिद्वारे, निधानं सर्वसम्पदाम् ।
निदानं मोक्षसौख्यानां, पुण्यैः सम्यक्त्वमाप्यते ॥ ९ ॥

कुदृष्टिरुदितर्द्धिरप्यधिपतिर्न मुक्तिश्रियाम् ।
अनृद्धिरपि संपदां, पदमुपैति सद्दर्शनः ॥ १० ॥

दीपकदर्शननुं लक्षण

मिथ्यादृष्टिरभव्यो वा, स्वयं धर्मकथादिभिः ।
परेषां बोधयत्येव, दीपकं दर्शनं भवेत् ॥ ११ ॥

समकितीनी ओळखाण

सव्वत्थ उचियकरणं, गुणाणुराओ रई अ जिणवयणे ।
अगुणेसु अ मज्झत्थो, सम्मदिट्ठिस्स लिंगाइं ॥ १२ ॥

सम्यक्त्वनुं लक्षण

वीतरागप्रभुर्देवः, सुसाधुः परमो गुरुः ।
कृपामूलस्तु सद्धर्मः, सम्यक्त्वमभिधीयते ॥ १३ ॥

सर्वधर्मनो आधार समकित

चिन्तामणिमरुद्धेनु–कल्पवृक्षाधिकप्रदम् ।
आधारः सर्वधर्माणां, सम्यक्त्वमुदितं जिनैः ॥ १४ ॥

सम्यक्त्वरहित सर्वधर्म नकामा

ध्यानं दुःखनिधानमेव तपसां संतापमात्रं फलं,
स्वाध्यायोऽपि वन्ध्य एव कुधियां तेऽभिग्रहाः कुग्रहाः ।

अश्लीला खलु दानशीलतुलना तीर्थादियात्रा वृथा,
सम्यक्त्वेन विहीनमन्यदपि यत्तत्सर्वमन्तर्गडुः ॥ १५ ॥

इणमेव निग्गंथे पावयणे अट्ठे परमट्ठे सेसे अणट्ठे ।

जं संमंति पासह, तं मोणंति पासह ।
जं मोणंति पासह, तं संमंति पासह ॥ १६ ॥

बन्धं अविरइहेउं, जाणंतो राग–दोस–दुक्खं च ।
विरइसुहं इच्छंतो, विरइ काउं च असमत्थो ॥ १७ ॥

एस असंजमधम्मो, निंदंतो पावकम्मकरणं च ।
अहिगयजीवाजीवो, अचलियदिट्ठि छलियमोहो ॥ १८ ॥

बोधिशब्दना अर्थो

बोधिः जिनप्रणीतधर्मप्राप्तिः, इयं पुनः यथाप्रवृत्तिकरण-अपूर्वकरण-अनिवृत्तिकरणत्रयव्यापाराभिव्यङ्ग्यमभिन्नपूर्वग्रन्थिभेदतः पश्चानुपूर्व्या प्रशमसंवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिलक्षणं तत्त्वार्थश्रद्धानं सम्यग्दर्शनं विज्ञप्तिः इत्यर्थः ॥

सुलभबोधिः–परभवे जैनधर्मप्राप्तिर्यस्य स सुलभबोधिः । तस्य भावः सुलभबोधित्वम् ॥

वरः प्रधानोऽप्रतिपातित्वाद्बोधिलाभः सम्यग्दर्शनावाप्तिर्यस्य स वरबोधिलाभः ।

बोधिनी दुर्लभता

राज्यं वा चक्रभृत्त्वं वा, शक्रत्वं वा न दुर्लभम् ।
यथा जिनप्रवचने, बोधिरत्यंतदुर्लभा ॥ १९ ॥

सर्वे भावाः सर्वजीवैः, प्राप्तपूर्वा अनन्तशः ।
बोधिर्न जातुचित्प्राप्ता, भवभ्रमणदर्शनात् ॥ २० ॥

बोधिना शत्रुओ

कुशास्त्रश्रवणं सङ्गो, मिथ्यादृग्भिः कुवासना ।
प्रमादशीलता चेति, स्युर्बोधिपरिपंथिनः ॥ २१ ॥

छक्कायदयावन्तो वि, संजओ दुल्लहं कुणइ बोहिं ।
आहारे नीहारे, दुगंछिए पिंडगहणे य ॥ २२ ॥

ताराचंद्र राजाना प्रधान कुरुचंद्रनो प्रसंग
दानप्रदीप प्र. चोथो श्लो ३७१ थी

इति धर्मानुरागेण, बोधिबीजं स चार्जिजत् ।
स परं भाग्यहीनत्वाद्धर्मं न प्रतिपन्नवान् ॥ २३ ॥

विपद्य पर्वते क्वापि, कपित्वेनोदपद्यत ।
जिनधर्मविहीनानां, स्थानं दुर्गतिरेव हि ॥ २४ ॥

एवं विचिन्त्य कृत्यज्ञः, सत्यसम्यक्त्ववासितः ।
विधिनानशनं पूर्व—वैराग्यादग्रहीदयम् ॥ २५ ॥

वालीनो रावणदूतने उत्तर

देवं सर्वज्ञमर्हन्तं, साधुं च सुगुरुं विना ।
सेव्यमन्यं न जानीमो, मोहः कः स्वामिनस्तव ॥ २६ ॥

समकितधारी चोरनी भावना

दध्यौ च हा दुरात्मायं, निर्माता मे सधर्मणः ।
प्रातः श्रीवज्रकर्णस्य बन्धनाद्या विडम्बनाः ॥ २७ ॥

इदानीमेव तद्गत्वा, तं नृपं ज्ञापयाम्यदः ।
यथा निश्येव निर्विघ्नं, स प्रयाति निजं पुरम् ॥ २८ ॥

सीताजीनुं राम प्रत्ये नम्र वचन

यथा खलगिरा त्याक्षीः, स्वामिन्नेकपदेऽपि माम् ।
तथा मिथ्यादृशां वाचा, मा धर्मं जिनभाषितम् ॥ २९ ॥

## १६ मिथ्यात्वसूक्तानि

मिथ्यात्वनी तीव्रता

साग्रं पैशून्यमुन्मार्ग–देशनाऽलिकवादिता ।
अत्यन्तविषयासक्ति–र्मिथ्यात्वैकान्तनिष्ठता ॥ १ ॥
अवज्ञार्हतधर्मस्यो–पहासश्च सुसाधुषु ।
महामोहस्य चेमानि, लिङ्गान्याहुर्मनस्विनः ॥ २ ॥
जन्म–मृत्यु–जरा–व्याधि–रोग–शोकाऽद्युपद्रुतम् ।
वीक्षमाणा अपि भवं, नोद्विजन्तेऽतिमोहतः ॥ ३ ॥

अजैनोनी मान्यता याने मिथ्यात्व

श्रुतौ यदुक्तं हत्वापि, विश्वमेतच्चराचरम् ।
यस्य नो लिप्यते बुद्धि–र्न स पापेन लिप्यते ॥ ४ ॥
सर्वधर्मान् परित्यज्य, मामेकं शरणं व्रज ।
अहं त्वां सर्वपापेभ्यो, मोक्षयिष्यामि मा शुचः ॥ ५ ॥

कुलिंगीओवडे लुटातुं जगत

स्वेच्छाविरचितशास्त्रैः, प्रव्रज्यावेशधारिभिः क्षुद्रैः ।
नानाविधैरुपायै–रनाथवन्मुष्यते लोकः ॥ ६ ॥

### मिथ्यात्वनी निशानी

जीवादिशेति पुनरुक्तमुदीरयन्तः,
कुर्वन्ति दास्यमपि बण्ठजनोचितं ये ।
तेष्वेव यद्गुरुधियं धनिनो विदध्युः,
सोयं विभूतिमदपानभवो विकारः ॥ ७ ॥

### निन्हवोनुं मिथ्यात्व

व्रतानि चीर्णानि तपोऽपि तप्तं, कृताऽपि यत्नेन च पिण्डशुद्धिः ।
अभूत् फलं यत्तु न निन्हवाना–मसद्ग्रहस्यैव हि सोऽपराधः ॥८॥
श्रुतशासनसम्यक्त्व–प्रत्यनीकत्वपापजम् ।
दुःखं तत्र चिरं भुक्त्वा, मत्स्यः सोऽब्धाविहाभवत् ॥ ९ ॥

### माता केवी होय?

मिथ्याशास्त्र भणेल आर्यरक्षित पुत्रने मातानी शिखामण

अथ तं रुद्रसोमाख्यत्, किमेभिः स्वान्यनाशकैः ।
हिंसोपदेशकैः शास्त्रै–रधीतैर्नरकप्रदैः ॥ १० ॥
एतेषां च प्रभावेण, त्वां घोरे दुःखसागरे ।
पतिष्यन्तं प्रपश्यन्त्याः, स्यादानन्दः कथं मम ॥ ११ ॥

### अभिग्रहिक मिथ्यात्वना छ भेद

नत्थि न निच्चो न कुणइ, कयं न वेएइ नत्थि निव्वाणं ।
नत्थि य मोक्खोवाओ, छव्विह मिच्छत्तभिग्गहियं ॥ १२ ॥

### मोक्ष माटे बौद्धदर्शननी मान्यता

मृद्वी शय्या प्रातरुत्थाय पेया, भक्तं मध्ये पानकं चापराह्णे ।
द्राक्षाखण्डं शर्करा चार्द्धरात्रे, मोक्षश्चान्ते शाक्यसिंहेन दृष्टः ।१३।

मणुण्णं भोयणं भुच्चा, मणुण्णं सयणासणं ।
मणुण्णंमि अगारम्मि, मणुण्णं ज्झायए मुणी ॥ १४ ॥

बौद्धनी मान्यता

ज्ञानिनो धर्मतीर्थस्य, कर्तारः परमं पदम् ।
ऽऽगत्वा-गच्छन्ति भूयोऽपि, भवं तीर्थनिकारतः ॥ १५ ॥

वैशेषिक मान्यता

तस्मादनुष्ठानगतं, ज्ञानमस्य विचार्यताम् ।
प्रमाणं दूरदर्शी चे-देते गृध्रानुपास्महे ॥ १६ ॥

पुत्रथी जो स्वर्ग मले तो दुली गोधा विगेरेने पण मलवो जोइए

यदि पुत्राद्भवेत्स्वर्गः, सर्वे धर्मा निरर्थकाः ।
बहुपुत्रा दुली-गोधा-ताम्रचूडी तथैव च ॥ १७ ॥
यदि पुत्रैर्भवेत् स्वर्ग-स्तन्नागी शूकरी शुनी ।
कुक्कुटी-खर्यजाद्याश्च, जीवाः प्राग् यान्ति धामनि ॥ १८ ॥

## १७ सम्यग्ज्ञानसूक्तानि

ज्ञानना भेद अने तेनी व्याख्या

तज्ज्ञानं द्विविधं मिथ्या-सम्यग्भेदद्वयेन च ।
रागद्वेषकरं यच्च, मिथ्याज्ञानं तदुच्यते ॥ १ ॥
आयुर्वेदो धनुर्वेदो, नीतयो गणितानि च ।
ज्योतिर्विवादशास्त्रं च, गजाश्वनरलक्षणम् ॥ २ ॥
विभङ्गज्ञानिनो येऽत्र, बभुवुः परमर्षयः ।
एवमादीनि शास्त्राणि, तत्प्रणीतानि तानि च ॥ ३ ॥

मिथ्याज्ञानं समस्तं तत्, इह लोकोपयोगि यत् ।
राग-द्वेषादयो यस्मात्, प्रवर्धन्ते शरीरिणाम् ॥ ४ ॥

सम्यग्ज्ञान अने तेनी महत्ता

सर्वज्ञेन जिनेनाप्ते-नागमो भणितोऽत्र यः ।
सम्यग्ज्ञानं भवेत् तच्च, परलोकैकसाधनम् ॥ ५ ॥

जीवाजीवौ तथा पुण्यं, पापं चाश्रव-संवरौ ।
निर्जरा बन्ध-मोक्षौ च, सम्यग्ज्ञानेन बुध्यते ॥ ६ ॥

सम्यग्ज्ञानस्य विषया, अनन्ताः परिकीर्तिताः ।
समस्तैस्तैः परिज्ञातै-र्यान्ति रागादयः क्षयम् ॥ ७ ॥

तज्ज्ञानमपि नैव स्याद्, येन रागादिपोषणम् ।
तिमिरौघं न यो हन्ति, सः सूरः कथमुच्यते ॥ ८ ॥

सम्यग्ज्ञानं नरैणैतद्, दातव्यं निजशक्तितः ।
ज्ञानवान् ज्ञानदानेन, देही भवति निश्चितम् ॥ ९ ॥

अज्ञानी नैव जानाति, जीवाजीवौ कथञ्चन ।
तदज्ञाता च जीवानां, कथं रक्षां करिष्यति ॥ १० ॥

जीवा ज्ञानेन जानन्ति, पुण्यं पापं तथैव च ।
तत्कारणानि सर्वाणि, मोक्षोपायमपि स्फुटम् ॥ ११ ॥

सम्यग्ज्ञानेन संयुक्तं, मोक्षमार्गस्य साधकम् ।
धर्मानुष्ठानमाख्यातं, सर्वं तत्त्वार्थवेदिभिः ॥ १२ ॥

सम्यग्ज्ञानविहीनं यत्, क्रियाकाण्डं विधीयते ।
तदनर्थाय पूर्वाहे, यथाऽन्धस्य पलायनम् ॥ १३ ॥

ज्ञानेन ज्ञायते जीवा–ऽजीवादितत्त्वसञ्चयः ।
जीवरक्षापरं धर्मा–नुष्ठानं सफलं हि तत् ॥ १४ ॥

यावज्जीवनिकाया षड्, न ज्ञाता जिनशासनात् ।
करोति तावदज्ञानी, जीवानां रक्षणं कथम् ॥ १५ ॥

तथा श्रवणं श्रुतमभिलापप्लावितार्थग्रहणहेतुः,
उपलब्धिविशेषः=प्लावितशब्दार्थः ॥

तथा वल्कसमं मतिज्ञानं कारणत्वात्,
शुंबसमं श्रुतज्ञानं तत्कार्यत्वात् ॥

कर्मतापकरं ज्ञानं, तपः तन्नैव वेत्ति यः ।
प्राप्नोतु स हतस्वान्तो, विपुलां निर्जरां कथम् ॥ १६ ॥

ज्ञानयोगस्तपः शुद्ध–मित्याहुर्मुनिपुङ्गवाः ।
तस्मान्निकाचितस्यापि, कर्मणो युज्यते क्षयः ॥ १७ ॥

आत्माज्ञानभवं दुःख–मात्मज्ञानेन हन्यते ।
तपसाप्यात्मविज्ञान–हीनैश्छेत्तुं न शक्यते ॥ १८ ॥

नाणं सद्दहणं गहणं, पालणा विरतिवुड्ढि चेव त्ति ।
होइ इहरा उ मोहा, विवज्जओ भणियभावाणं ॥ १९ ॥

सम्यग्ज्ञानं सुदुष्प्रापं, यस्मै येन वितीर्यते ।
स्वर्गापवर्गसौख्यानि, तस्मै तेन वितेनिरे ॥ २० ॥

कृतानेककुकर्माणं, चिलातिपुत्रमप्यहो ।
श्रमणस्त्रिपदीं दत्त्वा, दिव्यां सम्पदमापिपत् ॥ २१ ॥

वेत्ति पुण्यं च पापं च, सम्यग्ज्ञानेन मानवः ।
तत्प्रवृत्तिनिमित्ताभ्यां, मुक्तिमाप्नोति च क्रमात् ॥ २२ ॥

तज्ज्ञेयं ज्ञानदानं तु, येन दत्तेन देहिनः ।
जानन्त्युपायं बन्धस्य, मोक्षस्य च शिवप्रदम् ॥ २३ ॥

नाणं पयासयं सो–हओ तवो संजमो य गुत्तियरो ।
तिण्णं पि समाओगे, मोक्खो जिणसासणे भणिओ ॥ २४ ॥

पांच सकार जेनी पासे होय ते संसारमां न पडे.

सम्मत्तं सामाइअं, संतोसो संजमो अ सज्झायं ।
पंच सयारा जस्स, न पयारो तस्स संसारे ॥ २५ ॥

संसारना हेतुओने उलटावीए तो ते मोक्षना हेतु बने

यथाप्रकारा यावन्तः, संसारावेशहेतवः ।
तावन्तस्तद्विपर्याया, निर्वाणसुखहेतवः ॥ २६ ॥

संसारना कारणरूप चौद अभ्यंतर ग्रंथी

मिच्छत्तं वेयतिगं, हासाइछक्कगं च नायव्वं ।
कोहाइण चउक्कं, चउदस अब्भंतरा गंठी ॥ २७ ॥

पुस्तक लखाववानुं महत्व

तैरात्मा सुपवित्रितो निजकुलं तैर्निर्मलं निर्मितं,
तैः संसारमहान्धकूपपततां हस्तावलम्बो ददे ।
दत्तं तैरिह सर्वसौख्यजननं सज्ज्ञानदानं नृणां,
श्रीसर्वज्ञचरित्रपुस्तकमहो ये लेखयन्त्यादरात् ॥ २८ ॥

विचारणा अधमने उत्तम बनावे छे

उवसम–विवेग-संवर–पयचिन्तवणवज्जदलियपावगिरी ।
सोहुवसग्गो पत्तो, चिलाइपुत्तो सहस्सारे ॥ २९ ॥

विचारणा ज्ञान-जैनीदृष्टि

नूतनजलधररूचये, देववधूटीनेत्रमुकुराय ।
तस्मै पार्श्वाय नमः, संसारमहीरूहकुठाराय ॥ ३० ॥

मिथ्यादृष्टि

नूतनजलधररूचये, गोपवधूटीदूकुलचौराय ।
तस्मै कृष्णाय नमः संसारमहीरूहबीजाय ॥ ३१ ॥

पांच पकार जेनी पासे होय ते संसारमां न पडे

पूआ पच्चक्खाण, पडिक्कमणं पोसहो परूवयारो ।
पंच पयारा जस्स उ, न पयारो तस्स संसारे ॥ ३२ ॥

ज्ञानीओनुं सकाममरण

सञ्चिततपोधनानां, नित्यं व्रत–नियम–संयमरतानाम् ।
उत्सवभूतं मन्ये, मरणमनपराधवृत्तीनाम् ॥ ३३ ॥

ननु परमार्थतः तेषां मरणं प्रति सकामत्वं, मरणाभिलाषस्य निषिद्धत्वात् , उक्तं हि—

मा मा हु विचिंतेज्जा, जीवामि चिरं मरामि अ लहुंति ।
जइ इच्छसि तरिउं जे, संसारमहोअहिपारं ॥ ३४ ॥

अवधिज्ञानविना पण मनःपर्यवज्ञान होई शके

अवधिज्ञानमन्तरेण मनःपर्यवज्ञानस्य संभवात् , सिद्धप्राभृतादौ तथाऽनेकशोऽभिधानात् ॥

एक मुनिनो सत्कार अने निंदा-सर्वमुनिप्रत्ये
थाय छे एम जाणवुं

भरहेरवयविदेहे, पन्नरसवि कम्मभूमिगा साहू ।
इक्कंमि हीलियंमि, सव्वे ते हीलिया होंति ॥ ३५ ॥

भरहेरवयविदेहे, पन्नरसवि कम्मभूमिगा साहू ।
इक्कंमि पूइयंमि, सव्वे ते पूइया होंति ॥ ३६ ॥

## १९ श्रीजिनाज्ञासूक्तानि

आचार्य भगवंतो केवा होय छे ?

तित्थयरसमो सूरी, सम्मं जो जिणमयं पयासेइ ।
आणं अइक्कमंतो, सो काउरिसो न सप्पुरिसो ॥ १ ॥

एकांतवादमां मिथ्यात्व अने अनेकांतमां जिनाज्ञा

एगत्तं मिच्छत्तं, जिणाण आणा अणेगत्तं ।

पंडितोए पापरोगना नाश माटे धर्मऔषधनुं सेवन करवुं

सर्वज्ञभिषगादिष्टं, कोष्टशुद्धिविधायकम् ।
शोकावेशरुजः शान्त्यै, कार्यं धर्मौषधं बुधैः ॥ २ ॥

गुरुकुलवासनो त्याग न करवो

एसा य परा आणा, पयडा जं गुरुकुलं न मोत्तव्वं ॥ श्लोकार्धः

मिथ्याश्रुतने जे न प्रयुंजे ते साधु

मिथ्याश्रुतं साधुना न प्रयुज्यन्ते ते श्रमणा उच्यंते ।
एवमाचार्यैराख्यातम् ।

भावाचार्य तीर्थंकर समान छे

तित्थयरसमा भावा–यरिया भणिया महाणिसीहम्मि ।
तित्थयरसमो सूरि, सम्मं जो जिणमयं पयासेइ ॥ ३ ॥

वीतरागदेवोनी आज्ञानो भंग महापाप छे

जं केवलिणा भणियं, केवलनाणेण तत्तओ नाउं ।
तस्सऽन्नहाविधाने, आणाभंगो तहा पावं (पावो) ॥ ४ ॥

पंचमहव्वयभेयो, छक्कायवहो अ तेणऽणुन्नाओ ।
सुहसीलविअत्ताणं, कहेइ जो पवयणरहस्सं ॥ ५ ॥

भवसयसहस्स लद्धं, जिणवयणं भावउ जहं तस्स ।
जस्स न जायं दुक्खं, तस्स न दुक्खं परे दुहिए ॥ ६ ॥

संसारविरत्तस्स उ, आणाभंगे महब्भयं होइ ।
गारवरसिअस्स पुणो, जिणआणाभंजणं कीला ॥ ७ ॥

आणाए अवट्टंतं, जो उववूहेइ मोहदोसेण ।
सो आणा–अणवत्थ–मिच्छत्त–विराहणं पावे ॥ ८ ॥

जोइस–निमित्त–अक्खर–कोउआएस–भूइकम्मेहिं ।
करणाणुमोअणाहि अ साहुस्स तवक्खओ होइ ॥ ९ ॥

ज्योति–निमित्ताक्षर–मन्त्र–कार्मण–
प्रतिक्रिया–कौतुक–शान्तिकादिकम् ।
प्रयुञ्जते ये यतयः स्वजीवने,
ते दुर्गतिं यान्ति विराधितव्रताः ॥ १० ॥

सती पत्युः प्रभोः पत्तिः, गुरोः शिष्यः पितुः सुतः ।
आदेशे संशयं कुर्वन्, खण्डयत्यात्मनो व्रतम् ॥ ११ ॥

## २० श्री जैनसिद्धांतसूक्तानि

### जैन सिद्धान्त

अश्रुतागमस्य ज्ञानाभावेन व्रतप्रतिपत्तिर्न सम्यगिति तत्प्रतिषेधो दर्शितः ॥

जस्स नो इमं उवगयं भवइ इमे जीवा इमे अजीवा इमे तसा इमे थावरा तस्स नो सुपच्चखायं भवति, दुपच्चखायं भवति से, दुप्पच्चखाइ मोसं भासं भासति नो सच्चं भासं भासइ त्ति ॥

छद्मस्थैरिह षड्जीव-निकाययतनापरैः ।
सम्यक् प्राणिदया कर्तुं, शक्येत कथमन्यथा ॥ १ ॥

आवस्सियाए जस्स य जोगो=शब्दार्थों जं जं संजमस्स उवगारे वट्टइ तं तं गिण्हिस्सामि ॥

जीवाण गई कम्माण, परिणई पुग्गलाण परियट्टं ।
मुत्तूण जिणं जिणवरं-मयं च को जाणिउं तरइ ॥ २ ॥

गतिं कर्म परिणामं, निर्वक्तुमिह देहिनाम् ।
आवर्त्तं च पुद्गलानां, शक्तः को वा विना जिनम् ॥ ३ ॥

जे एगे जाणइ, से सव्वं जाणइ । जे सव्वं जाणइ, से एगं जाणइ ॥

जो जाणइ अरिहंते, दव्व–गुण–पज्जवंतेहिं ।
सो जाणइ अप्पाणं, मोहो खलु जाहि तस्स ॥ ४ ॥

एको भावः सर्वथा येन दृष्टः, सर्वे भावाः सर्वथा तेन दृष्टाः ।
सर्वे भावाः सर्वथा येन दृष्टा, एको भावः सर्वथा तेन दृष्टः ॥ ५ ॥

विगला लभिज्ज विरइं, सम्मं पि न तेउ–वाउचुआ । श्लोकार्धः

हेतुवादोपदेशेनापि न संज्ञिनः, अभिसंधारणपूर्विकायाः करणशक्तेरभावाद् ॥

स्याद्वाद

अप्रयुक्तोऽपि सर्वत्र, स्यात्कारोऽर्थात्प्रतीयते ।
विधौ निषेधेऽन्यत्रापि, कुशलश्चेत्प्रयोजकः ।

पडिलेहणमां बोलनार साधु छए कायनो विराधक छे

पडिलेहणं कुणंतो, मिहो कहं कुणइ जणवयकहं वा ।
देइ व पच्चक्खाणं, वायइ सयं पडिच्छइ वा ॥ ७ ॥
पुढवी–आउकाये, तेऊ–वाऊ–वणस्सइ तसाणं ।
पडिलेहणापमत्तो, छण्हंपि विराहऊ होइ ॥ ८ ॥

पडिलेहण पूजाआदिमां मौन रहेवुं जोइए

प्रतिलेखनां कुर्वाणो मिथः कथां करोति जनपदकथां वा ।
ददाति वा प्रत्याख्यानं वाचयति स्वयं प्रतीच्छति वा ॥ ९ ॥
पृथ्व्यप्काय–वायु–तेजो–वनस्पति-त्रसानां ।
प्रतिलेखनाप्रमत्तो, विराधको भणितः ॥ १० ॥

पडिलेहपूअभोअण–विआरभूमि–पडिक्कमणकाले ।
मग्गे गच्छंतेण, मुणिणा मोणं विहेयव्वं ॥ ११ ॥

कालिक–उत्कालिक सूत्रोनी आगाढ अणागाढ समजण

कालिकमागाढयोगाराध्यमुत्कालिकमनागाढयोगाराध्यमिति। अत्रार्थे श्रीनिशीथचूर्णिर्निभालनीया। आगाढानागाढयोगस्वरूपं शुद्धसम्प्रदायादवसेयम् ॥

गणधर नामकर्म

तदा चारुप्रभृतीनां, गणभृन्नामकर्मणाम् ।
स्वाम्युदिदेश त्रिपदीं, स्थित्युत्पादव्ययात्मिकाम् ॥ १२ ॥

गणधरोना प्रश्नोनुं समर्थन.

खेदच्छेदो जिनेन्द्रस्य, शिष्यौघे गुणदीपनम् ।
सभायां प्रत्ययो द्वाभ्यां, गणभृत्कथने गुणः ॥ १३ ॥

बारपर्षदा बेसवानो विचार.

साधु–स्वर्गिवधू–साध्वी–सभा दिशि विभावसोः ।
नैऋत्यां शश्वत् भुवन–वन–ज्योतिष्कयोषितः ॥ १४ ॥

वायव्यां भवनपति–ज्योतिष्क–व्यन्तरामराः ।
ऐश्यां वैमानिका देवा, मानवा मानवीयुताः ॥ १५ ॥

अरिहंतो अर्थ प्रकाशे छे. गणधरो सूत्र रचे छे.

अत्थं भासइ अरहा, सुत्तं गंथंति गणहरा निउणं ।
सासणस्स हियट्ठाए, तओ सुत्तं पवत्तेइ ॥ १६ ॥

अरहा अत्थं भासति, तमेव सुत्तीकरेंति गणहारी ।
अत्थेण विणा सुत्तं, अणिस्सियं केरिसं होति ॥ १७ ॥

तीर्थंकरदेवने न माननार कोईने प्रमाण नथी

तित्थयरे भगवंते, जगजीववियाणये तिलोकगुरु ।
जो ण करेइ पमाणं, न सो पमाणं सुअहराणं ॥ १८ ॥

केवळीभगवाननी गोचरीजवानी विधि.

यदि तु स्वयं एकाकी भवति तदा स्वज्ञानबलेन यथायोग्यं शुद्धमेव गृह्णाति ॥

तीर्थंकरोनुं अनुकरण करवानो निषेध.

सव्वे वि एगदूसेण, निग्गया जिणवरा चउव्वीसं ।
न य नाम अन्नलिंगे, नो गिहिलिंगे कुलिंगे वा ॥ १९ ॥
तेण अरिहा रहिआ, सलिंग–परलिंग–अगारलिंगेहिं ।
तस्सऽणुरूवं रूवं, धरिउं सम्मं न साहूणं ॥ २० ॥

केवली शिष्यने छद्मस्थ गुरु वंदन करे छे

इओ य तस्य केवलिणो, गुरुजसभद्दो नाम तत्थागओ ।
सोवि केवलिणं नमिऊण, निसण्णो कया केवलिणा धम्मदेसणा ॥ २१ ॥

आगाद्यशोभद्रसूरिः, तदा तस्य मुनेर्गुरुः ।
तं च केवलिनं ज्ञात्वा, वन्दित्वा न्यषदत्पुरः ॥ २२ ॥

त्रणेलोकमां शाश्वत प्रतिमानी संख्या

देवेसु कोडिसयं, कोडिबावन्नलक्खचउणउई ।
सहसा चउआलीसं, सत्तसयासट्ठी अब्भहिया ॥ २३ ॥

तेरेसकोडिसयाइं, गुणनवइकोडिसहीलक्खाइं ।
भुवणवइणं मज्झे, जोइसवणेसु य असंखा ॥ २४ ॥

लक्खतिगं इगनवई--सहस्स वीसा य हुंति तिन्नि सया ।
जोइस--वणवज्जिआणं, तिरियं जिणबिंबसंखा इमा ॥ २५ ॥

श्रावकने दशवैकालिकसूत्र चारअध्ययनसार्थ अने पांचमुं अर्थमात्र भणाय.

यदागमः—सावगस्स जहन्नेण अट्ठपवयणमायाओ उक्कोसेण छज्जीवणिया सुत्तओवि अत्थओवि पिंडेसणाज्झयणं न सुत्तओ अत्थओ पुण उल्लावेण सुणइ ।

देवोनी विकुर्वणा अने कृतिनी विशेषता

देवैर्विकुर्वितं पक्ष—मेवोत्कर्षेण तिष्ठति ।
कृतं तु चिरमप्यर्ह—न्मूर्तिवद्देवतोपरि ॥ २६ ॥

विदलमां क्यारे अने दहीमां क्यारे जीवउत्पत्ति थाय ?

मुग्गमासाइपमुहं, विदलं कच्चंमि गोरसे पडइ ।
ता तसु जीवुप्पत्ती, भणंति दहीए दीणुवरि ॥ २७ ॥

उत्सर्ग अने अपवाद

सालंबणो पडंतो वि, अप्पयं दुग्गमेवि धारेइ ।
इय सालंबणसेवी, धारेइ जइ असढभावम् ॥ २८ ॥

जीतव्यवहारनुं लक्षण

एवं विहाण वि इहं, चरणं दिट्ठं तिलोगनाहेहिं ।
जोगाणं सुहो भावो, जम्हा एएसिं सुद्धो उ ॥ २९ ॥

जं जीअं सावज्जं, न तेण जीएण होइ ववहारो ।
जं जीअमसावज्जं, तेण उ जीएण ववहारो ॥ ३० ॥

साधुनी वसतिमां स्त्रीओने न आववानु प्रमाण

अट्ठमीपक्खिए मोत्तुं, वायणाकालमेव य ।
सेसकालंमि इंतीओ, नेआउ अकालचारीओ ॥ ३१ ॥

श्रावकने फासुकपाणी चार जातनुं कल्पे छे

सावगेण चाउलोदगं[१] जवोदगं[२] तुसोदगं[३] उसिणोदगं[४] वा पेयं ॥

अग्यारमा रूद्र सत्यकि विद्याधर अग्यारमा तीर्थंकर थशे

महादेव इति ख्यातो, रूद्र एकादशः स च ।
एकादशो जिनो भावि, सत्यकिः सुव्रताभिधः ॥ ३२ ॥

कार्तिकशेठ-आवती चउवीसीना पांचमा जिनवर

द्वादशाब्दीं व्रतं कृत्वा, द्वादशांगविशारदः ।
मृत्वा सौधर्मकल्पेऽभूत्, कार्तिकस्त्रिदशेश्वरः ॥ ३३ ॥
ततः श्च्युत्वा सुराधीशो, भारतेऽमुत्र विश्रुते ।
आगामिन्यां चतुर्विंश-तौ जिनेन्द्रो भविष्यति ॥ ३४ ॥
सर्वानुभूतिरित्याख्यो, महाभूतिविभूषितः ।
सम्यक्त्वं पालितं शुद्ध-मार्हत्याय प्रगल्भते ॥ ३५ ॥

इति मुनिसुव्रतस्वामिचरित्र श्लो. २३।३१।३२ सर्ग-८

अप्कायमां छए कायनी संभावना

*अप्कायस्य समारम्भे, षण्णामपि विराधना ।*
पञ्चानामन्यकायानां, यस्मादम्भसि सम्भवः ॥ ३६ ॥

जत्थ जलं तत्थ वणं, जत्थ वणं तत्थ निच्छओ अग्गी ।
तेऊवाउसहगया, तसा य पच्चक्खया चेव ॥ ३७ ॥

वनस्पतिकायमां जीवनुं लक्षण

पतंति पुप्फंति फलं ददंति, कालं वियाणंति तहिं दियत्थे ।
जाइ य वुड्ढी य जरा य तेसिं, कहं न जीवा उ हवंति ते उ ॥३८॥

मग-कांगडुं अने गळो काष्टनी योनि नाश पामती नथी

अविनष्टा योनिः स्यात्, गडूची-कङ्कटुक-मुद्गादीनाम् । तथाहि-गडूची शुष्कापि सती जलसेकात् तादात्म्यं भजन्ती दृश्यते एवं कङ्कटुकमुद्गादिरपि ।

नारकी देव संबंधी पंचसंग्रहनो मत

सहसारंतियदेवा, नारयनेहेण जंति तइयभुवं ।
निज्जंति अच्चुयं जा, अच्चुयदेवेण इयरसुरा ॥ ३९ ॥

नारकीना निकळेला जीवोने गुणप्राप्तिनी समजण

तिसु तित्थं, चउसु केवलं, पंचमीए सामन्नं, छट्ठीए विरयाविरइ, सत्तमपुढवीए संमत्तं ॥

मिथ्यादृष्टि त्रीजे-चोथे जाय. मिश्र पेले-चोथे जाय-पण सम्यक्त्वी मिश्रे न जाय

मिच्छत्ता संकंती, अविरुद्धा होइ सम्ममीसेसु ।
मीसाओ वा दोसु, सम्मा मिच्छं न उ मीसंती ॥ ४० ॥

आगम व्यवहारी ६

केवल-मणपज्जवनाणिणो अ, तत्तो अ ओहिनाणजिणा ।
चउदश-दश-नवपूव्वी, आगमववहारिणो धीरा ॥ ४१ ॥

दशपूर्वधर निश्चे समकिती. बाकीनामां भजना

यस्य दशपूर्वाणि श्रुतं स्यात्तस्मिन्नियमा सम्यक्त्वं भवति, शेषे किञ्चिदूनदशपूर्वादौ सम्यक्त्वस्य भजना।

चउदस-दस य अभिन्ने, नियमा सम्मं तु सेसए भयणा।

द्रव्योनुं प्रमाण

भणियं च-जीवा पोग्गल समया, दव्वपदेसा य।
पज्जवा चेव। थोवा-ऽणंताणंता, विसेसमहिया दुवेणंता॥४२॥

लब्धि अने निवृत्तिनी समजण

तदत्र सत्यां लब्धौ निर्वृत्युपकरणोपयोगाः सत्यां च। निवृत्तौ उपकरणोपयोगौ सत्युपकरण उपयोग इति॥

कायस्थिति

कायस्थितिरपि भूत्वाऽसंख्येय लोकाकाशप्रदेशपरिमाणं कालं, तत्र तत्रोत्पद्यन्ते इति॥

छेला संघयणवालानी ऊर्ध्व-अधोगति

यः सेवार्त्तसंहननी जघन्यबलो जीवस्तस्य परिणामोऽपि शुभोऽशुभो वा मन्द एव भवति, न तीव्रः, ततः शुभाशुभ-कर्मबन्धोऽपि तस्य स्वल्पतर एव। अत एवास्योर्ध्वगतौ कल्पचतुष्टयादूर्ध्वमधोगतौ नरकपृथ्वीद्वयादध उपपातो न भवतीति प्रवचने प्रतिपाद्यते।

छेवट्ठेण उ गम्मइ चउरो जा कप्प दोपढमपुढवीगमणं छेवट्ठे।

### तिर्यंचमां निकाचित जिननामकर्म न होय

जमिह निकाइयतित्थं, तिरियभवे तं निसेहियं संतं।
इयरंमि नत्थि दोसो, उवट्टोवट्टणा सज्झे ॥ ४३ ॥

### शरीर अने गुणनुं अंतर

शरीरस्य गुणानां च, दूरमत्यन्तमंतरम् ।
शरीरं क्षणविध्वंसि, गुणा भवान्तर्यायिनः ॥ ४४ ॥

### आसन्नसिद्ध-अपुनर्बन्धक-भवाभिनंदी-दुर्भव्य अने आसन्न-भव्योनां लक्षणो

आसन्नसिद्धियाणं, लिंगमिणं जिणवरेण पन्नतं।
संघंमि चेव पूया, सामण्णेणं गुणणिहिम्मि ॥ ४५ ॥

तत्र ये तावदेतां विधिना सेवन्ते, तिद्विधिं वा श्रद्दधति ते आसन्नभव्याः। ये तु तां न विद्विष्यन्ति तेऽपि आसन्ना एव।

पावं न तिव्वभावा, कुणइ न बहुमन्नइ भवं घोरं ।
उच्चियठिइं च सेवइ, सव्वत्थवि अपुणबंधो त्ति ॥ ४६ ॥

क्षुद्रो लोभरतिर्दीनो, मत्सरी भयवान् शठः ।
अज्ञो भवाभिनन्दी स्या-न्निष्फलारम्भसङ्गतः ॥ ४७ ॥

तत्रार्द्धपुद्गलपरावर्ताधिकसंसारवर्तिनो ये जीवास्ते दूरभव्या उच्यन्ते ॥

ये तु किञ्चिदूनार्द्धपुद्गलपरावर्तमध्यवर्तिनो जीवास्ते आसन्नभव्या उच्यन्ते ॥

संसारनी अनंतता अने मनुष्यपणानी दुर्लभता

अव्ववहारनिओएसु, चिट्ठंति जंतुणो सव्वे ।
पढमं अणंतपोग्गल-परियट्टा थावरत्तेण ॥ ४८ ॥

तत्तो विणिग्गया विहु, ववहारवणस्सइम्मि निवसंति ।
कालमणंतपमाणं, अणंतकायाइभावेणं ॥ ४९ ॥

तत्तो वि समुव्वट्टा, पुढविजलानलसमीरमज्झंमि ।
अस्संखोसप्पिणिओ-सप्पिणी निवसंति पत्तेयं ॥ ५० ॥

संखिज्जं पुणकालं, वसंति विगलिंदिएसु पत्तेयं ।
एवं पुणो पुणो च्चिय, भमंति ववहाररासिम्मि ॥ ५१ ॥

इय केइ भमिऊणं, पणिंदितिरियत्तणं पि पावंति ।
तत्तो कहमवि मणुय-त्तणं पि इय दुलहं एयं ॥ ५२ ॥

आत्माने स्वयं समजवा चेतवणी

सक्खं (सत्थं) जिणिंदभणियं, इमं तिपयं च गणहरेण पुणो ।
तस्सीसेण य एयं, चोद्दसदसपुव्विणा य इमं ॥ ५३ ॥

पत्तेयबुद्धपमुहेहिं, भासियं पुव्वजिणवरेहिं ।
इमं भणियं इच्चाइ, परपच्चायणवयणचिंतणओ ॥ ५४ ॥

हे चित्त ! सिज्जसिच्चिय, सयं रसाणुभवसुन्नमेव तुमं ।
दव्विव्व दिव्वभोयण-बहुविहरसपयडणपरावि ॥ ५५ ॥

अहवा वासिज्जई, भिज्जइ य, दव्वीरसेण न पुण तुमं ।
जिणवयणमणुसरंतं पि, मूढ हे ! हियय ! कहमिहरा ॥ ५६ ॥

पुव्वरिसिसुभासिआइं, अणेगसो पढसि सुणसि तह निच्चं।
भावसि य अइनिउणं, तप्परमत्थं च बुज्झसि य ॥ ५७ ॥

न उण अणुभवसि पसमं, न य संवेगं न यावि निव्वेयं।
न मुहुत्तमेत्तमवि तह, तब्भावत्थेण परिणम ॥ ५८ ॥

पदवीधारीओने विचारवा योग्य

बहुश्रुतो जनैः सङ्घे-र्मान्योप्यनुभवं विना।
ख्यातोऽर्हच्छासनस्यायं, वैरी सूरिस्तथा तथा ॥ ५९ ॥

जह जह बहुस्सुओ, संमओ य सीसगणसंपरिवुडो य।
अविणिच्छिओ य समये, तह तह सिद्धंतपडिणीयो ॥ ६० ॥

तीताऽणागतकाले, केई होहिंति गोयमा !।
सूरी जेसिं नाम-ग्गहणे वि हुज्ज णियमेण पच्छितं ॥ ६१ ॥

योग्यायोग्यने आचार्यपदवी आपवाथी थता गुणदोष

योग्यस्यैव विनेयस्य, प्रदेया गणधारिता।
अयोग्यस्य तु तद्दाने, दातुर्दोषो भवेन्महान् ॥ ६३ ॥

तदाचार्यपदं देयं, योग्यस्यैव विवेकिना।
अयोग्यस्तु न तस्यार्हः, पायसस्येव वायसः ॥ ६४ ॥

सूक्ष्मपरमाणु केवो होय ?

कारणमेव तदन्त्यं, सूक्ष्मो नित्यश्च भवति परमाणुः।
एकरसवर्णगन्धो, द्विस्पर्शश्च कार्यलिङ्गश्च ॥ ६५ ॥

पूर्वकालनुं प्रमाण

पुव्वस्स य परिणामं, सयरिं खलु हुंति कोडिलक्खाउ।
छप्पन्नं च सहस्सा, बोद्धव्वा वासकोडीणं ॥ ६६ ॥

कालथकी पण क्षेत्र अणुं सूक्ष्म छे

खित्तं सुहुमं कालाओ, जेण अंगुलपएसमेत्तीए।
समयपएसवहारे, असंखउस्सप्पिणी हुंति ॥ ६७ ॥

मोक्षमां जनार भव्यज होय

नैतद्वयं वदामो य–द्भव्यः सर्वोऽपि सिद्धयति।
यस्तु सिद्धयति सोऽवश्यं, भव्य एवेति नो मतम् ॥ ६८ ॥

अल्पबहुत्व

बहवोऽविरता जीवा–स्तेभ्यः स्वल्पाः सुदृष्टयः।
ततः स्वल्पतराः श्राद्धाः, साधवोऽल्पतरास्ततः ॥ ६९ ॥

उत्सर्पिणीना छेल्ला तीर्थंकरना तीर्थनी काळमर्यादा

आगमेस्सिाणं चरमतित्थयरस्स केवइयं कालं तित्थे अणु सिज्जस्सइ? गोयमा! जावइं एण उसभस्स अरहओ कोसलियस्स जिणपरियाए।

श्री भगवतीसूत्र शतक २० मुं उद्देशो आठमो

जिणपरियाए त्ति केवलिपर्यायः स च वर्षसहस्रन्यूनं पूर्वलक्षम्।

पुष्पवती स्त्रीओए सात दिवस देरासरमां न जवुं

तह जिणभवणे गमणं, जिणपडिमाणच्चणं च सज्झायं।
पुप्फवइइत्थियाणं, पडिसिद्धं जाव सत्तदिणं ॥ ७० ॥

घणा वखतथी ग्रहण करी राखेल फलकंदादिकनुं अचित्तपणुं

चिरकालगृहीतं वा, कल्पते नः फलादिकम् ।
श्रुत्वेति तादृशैः कंदा-दिभिस्तान् प्रत्यलाभयन् ॥ ७१ ॥

पर्व-९-सर्ग ४ श्लो-४७

पडिमाधारी श्रावकने भिक्षा लेवा जतां बोलवानी रीत

तस्स णं गाहावइकुलं पिंडवाय-पडियाए अणुपविट्ठस्स कप्पति एवं वदित्तए, समणोवासगस्स पडिमापडिवन्नस्स भिक्खं दलयह । तस्य गाथापतिकुलं पिण्डपातप्रतिज्ञया अनुप्रविष्टस्य कल्पते एवं वदितुम् । श्रमणोपासकाय प्रतिमाप्रतिपन्नाय भिक्षां प्रयच्छत ॥

नरकना भातास्वरुप अने अनेकजीवोयुक्त मांस कोण खाय ?

सद्यः संमूर्च्छितानन्त-जन्तुसंतानदूषितम् ।
नरकाध्वनि पाथेयं, कोऽश्नीयात् पिशितं सुधीः ॥ ७२ ॥

मांखणमां अत्यंतसूक्ष्म जीवोनी उत्पत्ति

अन्तर्मुहूर्तात् परतः, सुसूक्ष्मा जन्तुराशयः ।
यत्र मूर्च्छन्ति तन्नाद्यं, नवनीतं विवेकिभिः ॥ ७३ ॥

बावीश अभक्ष्यनां नामो

पंचुंबरी-चउविगइ-हिम-विस-करगेय सव्वमट्टी य ।
राइभोयणगं चिय, बहुबीयाणंतसंधाणं ॥ ७४ ॥

घोलवडा-वायंगण, अमुणियनामाणि फुल्लफलयाणि ।
तुच्छफलं, चलियरसं, वज्जह वज्जाणि बावीसं ॥ ७५ ॥

जिनस्नात्रमां कुंभनी संख्या अने विविधता

आदेशादच्युतेन्द्रस्या-नीततीर्थांभसः सुराः ।
कुम्भानष्टोत्तरान्यष्ट-सहस्राण्यष्टधा व्यधुः ॥ ७६ ॥
सौवर्णान् राजतान् रात्नान्, स्वर्णरूप्यमयानपि ।
स्वर्णरत्नमयान् रूप्य-रत्नजांस्तत्त्रयीमयान् ॥ ७७ ॥
भौमांश्चापूरयन् वारा-धनसारादिसंयुतान् ॥ श्लोकार्धः

अग्निशर्मानो संसार अने थोडी गुणनी ओळखाण

अहो महानुभावोयं, न चक्रे रुचिरं मया ।
ध्यात्वेति गिरिसेनोऽपि पुण्यबीजी ततो ययौ ॥ ७८ ॥
पुद्गलानां परावर्तेष्वसङ्ख्येषु गतेष्वथ ।
नृपशार्दूलशार्दूलसेनस्याश्वो भविष्यति ॥ ७९ ॥

महानिशीथनो पाठ-गौतमस्वामीनो नंदिषेण संबंधी प्रश्न

प्रश्न–भयवं ! जो रत्तिंदिअहं, सिद्धंतं पढइ सुणे वक्खाणे
चिन्तए सययं, सो किं अणायारमायरे ? ॥
उत्तर–सिद्धंतगयमेगंपि, अक्खरं जो वियाणइ सो गोयम !
मरणंते वि, अणायारं न समायरे ॥
प्रश्न–भयवं ! ता कीस दसपुव्वी णंदिसेण महायसे पव्वज्जं
चिच्चा गणिकाए गेहं पविट्ठो पमुव्वइ ॥
उत्तर-तस्स पविट्ठं भोगफलं, खलियकारणं भवभयभीओ तहावि,
दुअं सो पवज्जमुवागओ ॥

श्री जिनेश्वरदेव थनार आत्माना बोधिबीजनी प्राप्ति पछी
असामान्य गुणप्राप्ति

एते आकालं परार्थव्यसनीन उपसर्जनीकृतस्वार्था उचित-कृपावन्तोऽदीनभावाः सफलारम्भिणोऽदृष्टानुशयाः कृतज्ञता-पतयोऽनुपहतचित्ता देवगुरुबहुमानिनस्तथा गम्भीराशयाः ॥

अपूर्वकरण गुणठाणानुं कार्य

अपूर्वाणां स्थितिघात-रसघात-गुणश्रेणि-गुणसंक्रमाऽ-पूर्वस्थितिबन्धलक्षणानां पञ्चानां अर्थानां प्राग्गुणस्थानेषु अप्राप्तानां करणं यत्र तदपूर्वकरणं अष्टमगुणस्थानकम् ॥

गुणप्राप्तिनी समजण

यस्य यदावरणं विच्छन्नं, तस्य स एव गुणो भवति,
न तु सर्वगुणसंपूर्णता, तस्याः सर्वचारित्रावरणक्षयाधीनत्वात् ।
जस्स जयावरणिज्जं, वुच्छिन्नं होइ तस्स सो उ गुणो ।
समसिद्धा किरिया पुण, तित्थस्स पभावगा हुंति ॥ ८० ॥

रत्नसारग्रन्थमां पदनी समजणनो खुलासो

पदानि च विशिष्टसंप्रदायगम्यानि । पदस्य तथा-विधाम्नायाभावात्प्रमाणं न ज्ञायते ॥

एकावन्नं कोडिओ लक्खा अट्ठेव सहस्सा चुलसि सयच्छक्क साढा एकवीस पयगंथा ॥

संसारी जीवनी स्थिति

लोकाकाशसमप्रदेशनिचयः कर्त्तोपभोक्ता स्वयं,
सङ्कोचप्रविकाशधर्मसदनं कायप्रमाणस्तथा ।

चैतन्यान्वितवीर्यलब्धिकलितो भोगोपभोगैर्युतो
भेदच्छेदवियुक्तसर्वगतिको जीवोऽत्र संसारगः ॥ ८१ ॥

सर्व अतिचार संज्वलनकषायना उदयथी थाय छे

सव्वेविय अइयारा, संजलणाणं तु उदयओ होंति ।
मूलच्छेज्जं पुण होइ, बारसण्हं कसायाणं ॥ ८२ ॥

छेयस्स जाव दाणं, ताव अइक्कमइ नेव एगंपि ।
एगं अइक्कमंतो, अइक्कमे पंच मूलेण ॥ ८३ ॥

प्रायश्चित्तनां नाम-अर्थ अने अवश्यकरणीयता

[1]आलोयण[2]पडिक्कमणे [3]मीस[4]विवेगे तहावि [5]उस्सग्गे ।
[6]तव[7]च्छे-य[8]मूल अणवट्ठया य पारंचियं चेव ॥ ८४ ॥

पावं छिंदंति जम्हा, पायच्छित्तंति भणइ तेण ।
पायेण वावि चित्तं, सोहयती तेण पच्छित्तं ॥ ८५ ॥

आलोयणपरिणओ, सम्मं काऊण सुविहिओ कालं ।
उक्कोसं तिण्णि भवे, गंतूण लभेज्ज निव्वाणं ॥ ८६ ॥

छत्तीसगुणसमन्ना-गएण, तेणवि अवस्स कायव्वा ।
परसक्खिया विसोही, सुट्ठुवि ववहारकुसलेण ॥ ८७ ॥

नवि तं सत्थं व विसं, दुप्पउत्तो व कुणति वेतालो ।
जं तं दुप्पउत्तं, सप्प व पमादिओ कुद्धो ॥ ८८ ॥

जं कुणइ भावसल्लं, अणुद्धित्तं उत्तिमट्ठकालम्मि ।
दुल्लहबोहीयत्तं, अणंतसंसारियत्तं च ॥ ८९ ॥

सव्वं पि य पच्छितं, पच्चक्खाणस्स तइअ वत्थुमि ।
तत्तो चिअ निज्जूढा, पकप्प–कप्पो य ववहारो ॥ ९० ॥

## ३२ श्रीज्ञानक्रियासूक्तानि

### संपूर्ण क्रिया पण भावविना फलती नथी

संपुण्णा वि हि किरिया, भावेण विणा ण होन्ति किरियत्ति ।
णियफलविगलत्तणओ, गेविज्जुववायणाएणं ॥ १ ॥

एगमेगस्स णं भंते, मणूसस्स गेवेज्जगदेवत्ते ।
केवइया दव्विंदिया अइया ? गोयमा ! अणंत त्ति ॥ २ ॥

ता णंतसो वि पत्ता, एसा ण य दंसणं पि सिद्धंति ।
एवमसग्गहजुत्ता, एसा ण बुहाण इट्ठत्ति ॥ ३ ॥

संवच्छरचाउम्मासएसु, अट्ठाहियासु य तिहीसु ।
सव्वायरेण लग्गइ, जिणवरपूयातवगुणेसु ॥ ४ ॥

विसयपगरिसभावे, किरियामेत्तंपि बहुफलं होइ ।
सकिरियावि हु न तहा, इयरम्मि अवीयरागिव्व ॥ ५ ॥

### ज्ञानसहित क्रिया संपूर्णफल आपे छे

संपुण्णफलं देइय, जिणिंदमग्गंमि देसिआ किरिया ।
समत्तनाणसहिया, इयरा अन्नाणकट्ठफला ॥ ६ ॥

### लघुकर्मी आत्माने क्रिया संपूर्ण फळे छे

क्रियाः फलन्ति सर्वास्ताः, प्राणिनां लघुकर्मणाम् ।
कूपोद्यमः सिराभूम्यां, कृतः साफल्यमश्नुते ॥ ७ ॥

स्वातौ शुक्तिगतं वारि, मुक्ताभं ताम्रपर्णिगम् ।
तदेव वारि चित्रायां, सर्वनाशकरं स्मृतम् ॥ ८ ॥

ज्ञानविनानी क्रिया अने क्रिया विनानुं ज्ञान नकामुं छे

हयं नाणं क्रियाहीणं, हया अन्नाणओ क्रिया ।
पासंतो पंगुलो दड्ढो, धावमाणो अ अंधओ ॥ ९ ॥

विषयासक्त जीवो धर्मना फलनो नाश करे छे

विसयासत्ता जीवा, लहंति तिरि-निरयतिव्वदुक्खाइं ।
विसयविसमोहियाणं, नासइ धम्मफलं सव्वं ॥ १० ॥
एकम्मिवि पाणिवहंमि, देसियं सुमहदंतरं समये ।
एमेव निज्जरफला, परिणामवसा बहुविहीआ ॥ ११ ॥

सायणादिकनो अर्थ

पमत्ते सायणा वुत्ता, अणायारस्स वायणा ।
चुक्काणं चोयणा भुज्जो, निट्ठुरं पडिचोयणा ॥ १२ ॥

चारज्ञानयुक्त तीर्थंकरो पण सर्वशक्तिथी तपस्यादिकमां उद्यम करे छे तो बीजाओए केम न करवो ?

तित्थयरो चउनाणी, सुरमहिओ सिज्झियव्वयधुवंमि ।
अणिगूहियबलविरिओ, सव्वथामेसु उज्जमइ ॥ १३ ॥
किं पुण अवसेसेहिं, दुक्खक्खयकारणा सुविहिएहिं ।
होंति न उज्जमिअव्वं, सपच्चवायंमि माणुसे ॥ १४ ॥
जियकोह-माण-माया, जियलोह-परिसहा य जे धीरा ।
विड्ढावासेवि ठिया, खवंति चिरसंचियं कम्मं ॥ १५ ॥

पंचसमिया तिगुत्ता, उज्जुत्ता संजमे तवे चरणे ।
वाससयंपि वसंता, मुणिणो आराहगा भणिआ ॥ १६ ॥

तम्हा सव्वाणुन्ना, सव्वनिसेहो य पवयणे नत्थि ।
आयं वयं तुलिज्जा, लाहाकंखिव्व वाणिओ ॥ १७ ॥

क्रियानी महत्ता

नाणं चरित्तहीणं, लिंगग्गहणं दंसणविहीणं ।
संजमहीणं च तवं, जो चरइ निरत्थयं तस्स ॥ १८ ॥

दानमादरनिर्मुक्तं, विद्या विनयवर्जिता ।
तपः शमविनाभूतं, त्रयं क्लेशाय केवलम् ॥ १९ ॥

सुबहुंपि सुअमहीअं, किं काही चरणविप्पमुक्कस्स ।
अंधस्स जह पलित्ता, दीवसयसहस्सकोडीवि ॥ २० ॥

ज्ञानक्रियादि गुणोमां स्वयं तैयार थइ पछी दीक्षा-
दानमां प्रवर्तवुं

ज्ञानक्रियागुणेषु हि स्वयं पूर्वं निष्पद्यते ततः पश्चाद्दीक्षादाने प्रवर्तते ॥

आज्ञानुं उल्लंघन करवुं नहीं

गीयस्स ण उस्सुत्ता, तज्जुत्तस्सेयरस्स वि ।
तहेव णियमेण चरिअव्वं जं ण जाउ आणं विलंघेइ ॥ २१ ॥

ज्ञान-क्रियायुक्तज स्वयं तरे अने बीजाने तारे

ज्ञानी क्रियापरः शान्तो, भावितात्मा जितेन्द्रियः ।
स्वयं तीर्णो भवाम्भोधेः, परांस्तारयितुं क्षमः ॥ २२ ॥

कृतयोगी, गीतार्थः, अशेषसमयवर्तमानश्रुतेन ॥

सद्ध्यान प्राप्तिनो उपाय-अर्थात् आवश्यकनी कर्त्तव्यता

यावत्प्रमादसंयुक्त-स्तावत्तस्य न तिष्ठति ।
धर्मध्यानं निरालम्ब-मित्युचुर्जिनभास्कराः ॥ २३ ॥
प्रमाद्यावश्यकत्यागा-न्निश्चलं ध्यानमाश्रयेत् ।
योऽसौ नैवागमं जैनं, वेत्ति मिथ्यात्वमोहितः ॥ २४ ॥
तस्मादावश्यकैः कुर्यात्, प्राप्तदोषनिकृन्तनम् ।
यावन्नाप्नोति सद्ध्यान--मप्रमत्तगुणाश्रितम् ॥ २५ ॥

जे कषायथी मुक्त छे तेज परम योगी छे

न यस्य मित्रं न च कोपि शत्रु--र्निजः परो वापि न कश्चनास्ते।
न चेन्द्रियार्थेषु रमेत चेतः, कषायमुक्तं परमः स योगी ॥ २६॥

मोहाधीन आत्मानी अवदशा

आत्मभूपतिरयं सनातनः, पीतमोहमदिरविमोहितः ।
किङ्करस्य मनसोपि किङ्करै--रिन्द्रियैरहह किङ्करीकृतः ॥ २७ ॥
मधुरं रसमाप्य स्यन्दते, रसनायां रसलोभिनां जलम् ।
परिभाव्य विपाकसाध्वसं, विरतानां तु ततो दृशि जलम् ॥ २८॥

आशंसा रहित सर्वक्रिया करवी

आशंसया विनिर्मुक्तो--ऽनुष्ठानं सर्वमाचरेत् ।
मोक्षे भवे च सर्वत्र, निःस्पृहो मुनिसत्तमः ॥ २९ ॥
सदनुष्ठानरागेण, तद्धेतुमार्गगामिनाम् ।
एतच्च चरमावर्तेऽनाभोगादेर्विना भवेत् ॥ ३० ॥
धर्मयौवनकालोऽयं....इत्यादि.

# ५६ श्रीविनयसूक्तानि

## विनय-अविनयथी थता गुण-दोष

जो परिभवइ अविणया, धम्मगुरुं जत्थ सिक्खए विज्जं ।
सा सुगहियावि विज्जा, दुक्खेण तस्स देइ फलं ॥ १ ॥

सव्वत्थ लभेज्जा नरो, वीसंभं पच्चयं च बुद्धिं च ।
जइ गुरुणोवइट्ठं, विणयं भावेण गिण्हेज्जा ॥ २ ॥

विणओ सिरीणं मूलं, विणओ मूलं समत्थसोक्खाणं ।
विणओ हु धम्ममूलं, विणओ कल्लाणमूलंति ॥ ३ ॥

विणएण विहीणस्स उ, सव्वं पि निरत्थयं अणुट्ठाणं ।
तं चेव विणयसारं, सयलं सहलत्तणमुवेति ॥ ४ ॥

तह विणयविहीणम्मि, सिक्खावि निरत्थिया भवे सव्वा ।
विणओ सिक्खाए फलं, विणयफलं सव्वपाहन्नं ॥ ५ ॥

दोसा वि गुणा विणया उ होंति, दोसा गुणावि अविणीए ।
सज्जणजणमणरंजण--जणणी मेत्ती, विणयाओ ॥ ६ ॥

विणयपरम्मि गुरुत्तं, सम्मदंसंति जणणीजणयावि ।
विणयविहीणे पुण ते वि, अहह सत्तुं विसेसंति ॥ ७ ॥

विणयोवयारकरणा, अदिस्सरूवावि दिंति दरिसावं ।
अविणयजणियाणक्खा, फिडंति पासट्ठिआवि लहु ॥ ८ ॥

विणयाओ विस्साओ, विणयाउ सयलअत्थसिद्धीओ ।
विणयाओ च्चिय फलदा-- इणी उ सव्वाउ विज्जाउ ॥ ९ ॥

अविणीयस्स पणस्सइ, जइ न पणस्सइ न जुज्जइ गुणेहिं ।
विज्जा सुसिक्खियावि हु, गुरुपरिभवबुद्धिदोसेण ॥ १० ॥

अविणीयस्स उ विज्जं, गुरू वि दिंतो लहेज्ज वयणिज्जं ।
हारेज्ज सकज्जं पि हु, पावेज्ज ततो विणासं पि ॥ ११ ॥

विज्जावि होंति बलिया, गहिया पुरिसेण विणयवंतेण ।
सुकुलपसूया कुलबा-लियव्व पवरं पइं पत्ता ॥ १२ ॥

संकमइ दुव्विणीए, गुरुपरिभवकारए य नो विज्जा ।
सेणियनिव्वेव तत्थेव, संकम्मेज्जाउ विवरीए ॥ १३ ॥

इय जइ इहलोइयतु--च्छकज्जविज्जावि भावसारेण ।
पाविज्जइ हीणस्सवि, गुरुणो अच्चंतविणएण ॥ १४ ॥

### विनयना बावन प्रकार

तित्थयर (१) - सिद्ध (२) - कुल (३) - गण (४) - संघ (५) - किरिया (६) - धम्म (७) ।
नाण (८) नाणीणं (९) आयरिय (१०) - थेरु (११) - वज्झाय (१२) - गणीणं (१३) ॥ १५ ॥

अणासायणा (१) य भत्ती (२), बहुमाणो (३) तह वण्णसंजलणा (४) ।
तित्थयरादि तेरस चउग्गुणा होंति बावन्ना ॥ १६ ॥

### श्रोताना गुण

निद्दाविगहापरिवज्जिएहिं, गुत्तेहिं पंजलिउडेहिं ।
भत्तिबहुमाणपूव्वं, उवउत्तेहिं सुणेयव्वं ॥ १७ ॥

माता पिता अने मोटाभाई पासे वंदन न करावाय

मायरं पियरं वावि, जेट्ठगं वावि भायरं।
किइकम्मं न कारेज्जा, सव्वे राइणिए तहा ॥ १८ ॥

गुरुनो विनय करवानी समजण

गुरोरुच्चासनं पाद–शौचं संवाहनादि च ।
स्वस्य नीचासनाद्यश्च, विनयोऽनेकधा स्मृतः ॥ १९ ॥

एतद्वन्तोऽत एवेह, विपर्यासपरा नराः ।
*हिताहितविवेकान्धाः, खिद्यन्ते साम्प्रतेक्षिणः ॥ २० ॥*
अनात्मोत्कर्षप्रधानत्वाद्विनयादेरायतार्थाः ॥

विनययुक्त क्षमानुं फल

सिरिचंडरुद्दगुरुणा, ताडिज्जंतो वि दंडघाएहिं ।
तक्कालं तस्सीसो, सुहलेसो केवली जाओ ॥ २१ ॥

## ६६ विषयविडंबनासूक्तानि

कामनी दश अवस्था

प्रथमे जायते चिन्ता, द्वितीये द्रष्टुमिच्छति ।
तृतीये दीर्घनिःश्वास–श्चतुर्थे ज्वरमादिशेत् ॥ १ ॥

पञ्चमे दह्यते गात्रं, षष्ठे भक्तं न रोचते ।
सप्तमे च भवेत्कम्प–मुन्मादश्चाष्टमे तथा ॥ २ ॥

नवमे प्राणसंदेहो, दशमे जीवितं त्यजेत् ।
कामिनां मदनोद्वेगा, दश सञ्जायते दशाः ॥ ३ ॥

### ब्रह्मचर्य भंगथी थती दुर्दशा

वरं ज्वलदयःस्तम्भ-परिरम्भो विधीयते ।
न पुनर्नरकद्वारं, रामाजघनसेवनम् ॥ ४ ॥
नपुंसकत्वं तिर्यक्त्वं, दौर्भाग्यञ्च भवे भवे ।
भवेन्नराणां स्त्रीणाञ्चा--न्यकान्तासक्तचेतसाम् ॥ ५ ॥

### कामाभिलाष अनर्थोनी खाण

खणमित्तसुक्खा बहुकालदुक्खा, पगामदुक्खा अणिकामसुक्खा ।
संसारसुक्खस्स विपक्खभूया, खाणी अणत्थाण य कामभोगा ।६।

### स्त्रीमां नवग्रहोनी कल्पना

भास्वान् वेषः कलावान् तव वचनविधिर्भ्रूविलासोऽपि वक्रः,
सौम्यस्पर्शो गुरुश्च स्तनकलशभरस्ते रतान्तः स शुक्रः ।
मन्दो हासस्तमः श्रीघनचिकुरचयः सुभ्रुवत्वञ्च केतुः
सेवामेवं ग्रहास्ते विदधति दयिते ! रक्ष कामं ग्रहान्माम् ॥ ७ ॥

### कामान्धनी स्थिति

दृश्यं वस्तु परं न पश्यति जगत्यन्धः पुरोऽवस्थितं,
रागान्धस्तु यदस्ति तत्परिहरन् यन्नास्ति तत्पश्यति ।
कुन्देन्दीवरपूर्णचन्द्रकलशश्रीमल्लतापल्लवा-
नारोप्याशुचिराशिषु प्रियतमागात्रेषु यन्मोदते ॥ ८ ॥
अपि चण्डानिलोद्भूत--तरङ्गस्य महोदधेः ।
शक्यते प्रसरो रोद्धुं, नानुरक्तस्य चेतसः ॥ ९ ॥
बाह्येन्द्रियाणि संयम्य, य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान् विमूढात्मा, मिथ्याचारः स उच्यते ॥ १० ॥

## ६९ हिंसाप्रतिकारसूक्तानि

हिंसानी भयंकरता:

भेषजेऽपि हि यो मांस-भक्षणानुमतिप्रदः ।
सोऽपि मांसाशिनः पृष्ठ-लग्नो गच्छति दुर्गतिम् ॥ १ ॥

मांसाशिनो नरस्य, खलु परत्रायुश्च परिहीयते ।
परिवर्धते दौर्भाग्यं, दुस्सहदुःखं च निरयेषु ॥ २ ॥

भवेत्कुरूपो निर्भाग्यो, दुर्भगो नित्यदुःखितः ।
पङ्गुः कुष्ठी कुणिः क्लीबो, जीवो हिंस्रोऽन्यजन्मनि ॥ ३ ॥

दौर्भाग्यमङ्गवैगुण्यं, दुर्गती रोगितादि च ।
हिंसायाः फलमालोक्य, कः सुधीर्विदधीत ताम् ॥ ४ ॥

हिंसैव सर्वपापानां, मिथ्यात्वमिव कर्मणाम् ।
राजयक्ष्मेव रोगाणां, लोभः सर्वांहसां गुरुः ॥ ५ ॥

जननमरणदुःखं क्षुण्णदेहैरजस्रं,
भव इह यदनन्तो भ्रान्तपूर्वोऽसुमद्भिः ।
अभिदधति मुनीन्द्रास्तत्र नैवान्यहेतुः
प्रकटनरकवर्त्म प्राणिहिंसां विहाय ॥ ६ ॥

एकांशेनापि हिंसा स्या-त्पाप्मनि विहिता जनैः ।
दामन्नकोदाहरण-मत्र शृणुत भावतः ॥ ७ ॥

हत्वा यः प्राणिसङ्घातं, कुरुते मांसभक्षणम् ।
तिलमात्रं सुखं तस्य, दुःखं मेरुसमं भवेत् ॥ ८ ॥

एकस्य स्यात् क्षणं तृप्ति-रन्यस्य जनुषः क्षयः।
तत्कथं मार्यते प्राणि-गणः क्षणिकतृप्तये ॥ ९ ॥

वराका वञ्चिता नूनं, परलोकसुखेन ते।
जन्मापि निष्फलं तेषां, येषां मांसाशने म (र) तिः ॥ १० ॥

अशाश्वतस्य तुच्छस्य, शरीरस्यास्य हेतवे।
मारयन्तीह ये जीवान्, किं ते जगति शाश्वताः ॥ ११ ॥

हंतूण परप्पाणे, अप्पाणं करेइ सप्पाणं।
अप्पाणं दिवसाणं, कए विणासेइ अप्पाणं ॥ १२ ॥

रसातलं यातु यदत्र पौरुषं, कुनीतिरेषाऽशरणो ह्यदोषवान्।
निहन्यते यद्बलिनापि निर्बलो, हहा महाकष्टमराजकं जगत्॥
हिंसा कदापि न कर्तव्या।

घातकादि पांचेने प्राणिवधनुं पाप लागे

घातकश्चानुमन्ताश्च, भक्षकः क्रय-विक्रयौ।
लिप्यन्ते प्राणिघातेन, पञ्चाप्येते युधिष्ठिर ! ॥ १४ ॥

हन्ता पलस्य विक्रेता, संस्कर्ता भक्षकस्तथा।
क्रेतानुमन्ता दाता च, घातकाः सर्व एव च ॥ १५ ॥

पौराणिकमते पर्वोनां नाम अने तेमां मांसादि द्वारा
नरक विधान

चतुर्दश्यष्टमी चैत्रा-मावास्या चैव पूर्णिमा।
पर्वाण्येतानि राजेन्द्र ! रविसंक्रातिरेव च ॥ १६ ॥

तैल–स्त्री–मांससंभोगी, पर्वस्वेतेषु यः पुमान् ।
विण्मूत्रं भोजनं नाम, प्रयाति नरकं मृतः ॥ १७ ॥

मनसापि हते जन्तौ, हन्तुर्मृत्युरनेकशः ।
परस्य दत्तं यद्दुःख–मनेकश आत्मनो भवेत् ॥ १८ ॥

तीर्थे स्नानानि दानानि, दीक्षा शिक्षा च सद्गुरोः ।
अमांसभक्षणस्तुल्या–न्येतानि न कदाचन ॥ १९ ॥

( मांसभक्षणकारिणो, न फलंति कदाचन ॥ ) पाठांतर

त्रिविक्रमराजाए मारी नाखेला पक्षीना भवो

विहगः शबरो सिंहो, द्विपी सिंहः फणी द्विजः ।
येनामी निहताः कोपात्, स कथं भाविता हहा ॥ २० ॥

## ७० अहिंसासमर्थकसूक्तानि

अहिंसानी सर्वोपरिता

दया यस्य तपस्तस्य, शीलं सर्वगुणा अपि ।
दयाहीनस्य नो शीलं, न तपो न गुणा अपि ॥ १ ॥

यः करोत्यर्थदानेना–दारिद्र्यमखिलं जगत् ।
एकं हिनस्ति जीवं च, सर्वं तस्य निरर्थकम् ॥ २ ॥

सर्वधर्मक्रियामूलं, सर्वसौख्यैककारणम् ।
सर्वजीवाभयदानं, सर्वदर्शनसम्मतम् ॥ ३ ॥

तद्ध्येयं मनसा तच्च, वाच्यं वाचा मनस्विभिः ।
चेष्टितव्यं तदङ्गेन, येन कोऽपि न पीड्यते ॥ ४ ॥

तम्हा सया विसुद्धं, परिणामं इच्छया सुविहियेणं ।
हिंसाययणा सव्वे, वज्जेयव्वा पयत्तेण ॥ ५ ॥
अहिंसा प्रथमो धर्मः, सर्वशास्त्रेषु विश्रुतः ।
यत्र जीवदया नास्ति, तत्सर्वं परिवर्जयेत् ॥ ६ ॥
क्षमातुल्यं तपो नास्ति, न संतोषात्परं सुखम् ।
न मैत्रीसदृशं दानं, न धर्मोऽस्ति दयासमः ॥ ७ ॥
दीयते मार्यमाणस्य, द्रव्यकोटिं वा जीवितम् ।
द्रव्यकोटिं परित्यज्य, सर्वो जीवितुमिच्छति ॥ ८ ॥
जननी सुखकोटीनां, दलनी दुष्टकर्मणाम् ।
मथनी सर्वपापानां, शोधनी शिवकर्मणाम् ॥ ९ ॥
जिनशासनसर्वस्वं, वश्या विद्यागमस्य या ।
जीयाज्जीवदया जीव-जीवातुः सर्वदेहिनाम् ॥ १० ॥
अहिंसा धर्मकल्पद्रोः, सुमेरुगिरिकन्दरा ।
अहिंसा जिनतत्त्वेषु, सारं परमतत्त्ववत् ॥ ११ ॥
न ये प्रागुपकारिभ्यः, प्रीत्या प्रत्युपकारकाः ।
पुरुषाः परुषास्तेभ्यो, धन्यान्मन्यामहे पशून् ॥ १२ ॥
धर्मद्रोश्च कृपामूलं, शास्त्राणां जीवितं कृपा ।
कृपा मुक्त्यङ्गनादूती, धन्यैरासेव्यते ह्यसौ ॥ १३ ॥

मांस खावा करतां झेर खावुं सारुं

मयोचेऽम्य । तपो-ज्ञान-दान-ध्यानविघातिनः ।
वरं मांसाद्विषं यस्मा-देकदा जायते मृतिः ॥ १४ ॥

एकपण जीवने जैनधर्म पमाडे तेणे अमारी प्रवर्तावी

सकलेऽपि जीवलोके, तेनात्रामारिघोषणोद्घुष्टः ।
एकमपि दुःखितं यः, सत्त्वं बोधयति जिनधर्मे ॥ १५ ॥

बधाने समान माने ते श्रमण

जह मम न पियं दुक्खं, जाणिय एमेव सव्वजीवाणं ।
न हणइ न हणावेइ, य सममणइ तेण सो समणो ॥ १६ ॥

नत्थि जस्स कोइ वेसो, पिओ व सव्वेसु चेव जीवेसु ।
एएण होइ समणो, एसो अन्नो वि पज्जाओ ॥ १७ ॥

पाणाइवायं अईअं निंदामि पडुपन्नं संवरेमि अणागयं पच्चक्खामि जावजीवाए अणिसिओहं नेव सयं पाणे अइवाईज्जा नेवन्नेहिं पाणे अइवायाविज्जा पाणे अइवायंते वि, अन्ने न समणुजाणिज्जा ॥

## ८३ सात्त्विकभावसूक्तानि

सत्त्वनी महत्ता

सत्त्वैकतानवृत्तीनां, प्रतिज्ञातार्थकारिणाम् ।
प्रभविष्णुर्न देवोपि, किं पुनः प्राकृतो जनः ॥ १ ॥

अखण्डितचारित्रस्य, मृत्युरप्यस्तु मे वरम् ।
लभ्यते यदनाचारात्, साम्राज्येनापि तेन किम् ॥ २ ॥

सत्त्वं सर्वगुणौघमस्तकमणिः सत्त्वं जयश्रीप्रदम्,
सत्त्वं सर्वपदार्थसिद्धिविषये लोकोत्तरा कामधुक् ।

द्वात्रिंशद्वरलक्षणाधिकमिदं ख्यातं च सल्लक्षणम्,
सत्त्वं सत्त्ववति प्रतिष्ठिततमा सर्वा पुमर्थस्थितिः ॥ ३ ॥

सिंहस्य केसराः सत्याः, शीलं फणिपतेर्मणिः ।
प्राणेषु सत्सु नो हर्तुं, शक्यन्ते किन्तु केनचित् ॥ ४ ॥

अवगच्छति मूढचेतनः, प्रियनाशं हृदि शल्यमर्पितम् ।
स्थिरधीस्तु तदेव मन्यते, कुशलद्वारतया समुद्धृतम् ॥ ५ ॥

न पृथग्जनवच्छुचो वशं, वशिनामुत्तम ! गन्तुमर्हसि ।
द्रुमसानुमतां किमन्तरं, यदि वायौ द्वितयेऽपि तेऽचलाः ॥६॥

कुवलयप्रभ उर्फे सावद्याचार्यनी सात्विकभाषानुं फळ

"जे जिणालये ते सव्वे सावज्जे" सावद्यमिदं नाहं वदामि। तदा एवं भणता तेन जिननामकर्मार्जितं एकभवावशेषीकृत भवोदधिः ॥

त्रण पुरुषोज पृथ्वीने शोभावनार छे

विहलं अवलंबइ, आवइपडीयं च जो समुद्धरइ ।
सरणागयं च रक्खइ, तिहिं तेसु अलंकिया पुहवी ॥ ७ ॥

## ८५ सामान्योपदेशसूक्तानि

ममतानी भयंकरता

विषयैः किं परित्यक्तै-र्जागर्ति ममता यदि ।
त्यागात्कञ्चुकमात्रस्य, भुजगो नैव निर्विषः ॥ १ ॥

कष्टेन हि गुणग्रामं,-प्रकटीकुरुते मुनिः ।
ममता राक्षसी सर्वं भक्षयत्येकलीलया ॥ २ ॥

लोभः सर्वस्वनाशनः, तत्त्वतः त्रयाणामपि तद्भावभावित्वात् ।

अनुप्रेक्षाकाले मनोयोगं, अध्ययनकाले वाग्योगं, प्रत्युपेक्षणाकाले काययोगम् ।

आटलांनो स्पर्श थवाथी वस्त्रसहित स्नान करवुं

शूनो गर्दभ—चाण्डाल—मद्यभाण्ड—रजस्वला ।
स्पृष्ट्वा देवलकं चैव, सचेलं स्नानमाचरेत् ॥ ३ ॥

छ ठेकाणे मौन रहेवुं

उच्चारे मैथुने चैव, प्रस्रावे दन्तधावने ।
स्नाने भोजनकाले च, षट्सु मौनं समाचरेत् ॥ ४ ॥

मननी परीक्षा

आकारैरिङ्गितैर्गत्या, चेष्टया भाषणेन च ।
नेत्र—वक्त्र—विकारैश्च, गृह्यतेऽन्तर्गतं मनः ॥ ५ ॥

चार वयोनां काम

प्रथमे वयसि ज्ञानं, द्वितीये च धनार्जनम् ।
तृतीये धर्मलाभश्च, चतुर्थे मोक्ष (?) लभ्यते ॥ ६ ॥

पंडितो शरीरमांथी धर्मसार लइने तेने तजे छे

इक्षो रसं यथादाय, कूर्चकस्त्यज्यते जनैः ।
धर्मसारं तथादाय, देहं त्यजति पण्डितः ॥ ७ ॥

जीभने शिखामण

जिव्हे प्रमाणं जानीहि, भोजने वचने तथा।
अतिभुक्तमतीवोक्तं, प्राणीनां मरणप्रदम् ॥ ८ ॥

आ वस्तु तात्कालिक दुःखदायी अने परिणामे सुखकारी

तैलाभ्यङ्गमृणच्छेदं, कन्यावरणमेव च।
एतानि सद्यो दुःखानि, परिणामे सुखानि च ॥ ९ ॥

मूढ माणस दरेकनी अवज्ञा करे छे

विद्या-शील-वयोवृद्धान्, बुद्धिवृद्धांश्च भारत ?।
धनाभिजातवृद्धांश्च, नित्यं मूढोऽवमन्यते ॥ १० ॥

माता-पितादिनो तिरस्कार करनार पोताना सुकृतनोज तिरस्कार करे छे

माता पिता कलादाता, भीतित्राता तथा प्रभुः (गुरुः)।
येनैते न्यकृतास्तेन, सुकृतं न्यकृतं निजम् ॥ ११ ॥

स्वजातिनो त्याग करीने परजातिमां रक्त रहेनार विनाश पामे छे

स्वजातिं ये परित्यज्य, परजातिषु ये रताः।
ते नरा निधनं यान्ति, यथा राजा कुकर्दमः ॥ १२ ॥

नही आचरवा योग्य शिखामणो

न चासीतासने भिन्ने, भिन्नपात्रं च वर्जयेत्।
मुक्तकेशैर्न भोक्तव्य-मनग्नस्नानमाचरेत् ॥ १३ ॥

स्वप्तव्यं नैव नग्नेन, न चोच्छिष्टश्च संवसेत्।
उच्छिष्टो न स्पृशेच्छीर्षं, सर्वप्राणाः तदाश्रयाः ॥ १४ ॥

न पाणिभ्यामुभाभ्यां तु, कण्डुयेज्जातु वै शिरः ।
न चाभीक्ष्णं शिरःस्नानं, कार्यं निष्कारणं नरैः ॥ १५ ॥

वैरागि आत्माए अन्यनी निंदा न करवी

किं नाम सम्यग्वैराग्ये-ऽन्येषां दोषप्रघोषणैः ।
भवाभिनन्दिनामेव, परिवादे विदग्धता ॥ १६ ॥

निर्धननी साथे कोईने मित्राई होती नथी

वनानि दहतो वह्नेः, सखा भवति मारुतः ।
स एव दीपनाशाय, कृशे कस्याऽस्ति सौहृदम् ॥ १७ ॥

चक्षुगोचर वस्तु जोवाथी दोष नथी पण रागद्वेषथी दोष लागे छे

अशक्यं रूपमद्रष्टुं, चक्षुगोचरमागतम् ।
राग-द्वेषौ तु यौ तत्र, तौ बुधः परिवर्जयेत् ॥ १८ ॥

योग्यायोग्यनी परीक्षा करीने पछी देशना आपवी

बालादिभावमेवं, सम्यग्विज्ञाय देहिनां गुरुणा ।
सद्धर्मदेशनाऽपि हि, कर्तव्या तदनुसारेण ॥ १९ ॥

गंभीरतानी ओळखाण

यस्य प्रभावादाकाराः, क्रोध-हर्ष-भयादिषु ।
भावेषु नोपलभ्यन्ते, तद्गाम्भीर्यमुदाहृतम् ॥ २० ॥

भोगनी भयंकरता

आत्मसुखार्थं क्रियते भोगः, पश्चादेति शरीरे रोगः ।
रोगे जाते मरणं शरणं, तदपि न मुञ्चति पापाचरणम् ॥ २१ ॥

मन-वचन अने काया जेनां शुद्ध छे ते शुद्ध ज छे

चित्तं समाधिभिः शुद्धं, वदनं सत्यभाषणैः ।
ब्रह्मचर्यादिभिः कायः, शुद्धो गङ्गां विनाप्यसो ॥ २२ ॥

आटलां स्थाने मौन रहेवुं

भूमिपतावर्थपतौ बाले, वृद्धे तपोधिके विदुषि ।
योषिति मूर्खे गुरुषु, विदुषा नैवोत्तरं देयम् ॥ २३ ॥

आटली वस्तु बीजाने न कहेवी

स्वकीयदारमाहारं, सुकृतं द्रविणं गुणम् ।
दुष्कर्म मर्म मन्त्रञ्च, परेषां न प्रकाशयेत् ॥ २४ ॥

निराश थइने अतिथि ज्यांथी पाछो फरे छे तेनुं पुण्य नाश पामे छे

अतिथिर्यस्य भग्नाशो, गृहात्प्रतिनिवर्तते ।
स तस्मै दुष्कृतं दत्त्वा, पुण्यमादाय गच्छति ॥ २५ ॥

अंधपरंपरा करवी नही.

यस्यास्ति सर्वत्र गतिः स कस्मात्, स्वदेशरागेण हि याति नाशम् ।
तातस्य कूपोऽयमिति ब्रुवाणाः, क्षारं जलं कापुरुषाः पिबन्ति ॥ २६ ॥

आटलानो विश्वास करवो नही

बालाबला-बालिश-भूमिपाला, नटा विटा वानर-वारनार्यः ।
चौराश्वरा याचक-वञ्चकाश्च, भवन्ति नूनं क्षणरागिणोऽमी ॥२७॥

जे करवुं ते विचारीने करवुं

अपरीक्षितं न कर्तव्यं, कर्तव्यं सुपरीक्षितम् ।
पश्चाद्भवति संतापो, ब्राह्मणी नकुलं यथा ॥ २८ ॥

आपत्तिमां धैर्य धारण करवुं

आपत्सु संपतंतीषु, पूर्वकर्मनियोगतः ।
धैर्यमेव परित्राणं, न युक्तमनुशोचनम् ॥ २९ ॥

जेनाथी आपणने नुकशान थतुं होय तेने खुश राखवो

येषु दुष्टेषु दोषः स्याद्, योगक्षेमस्य भारत ! ।
सदा प्रसादनं तेषां, देवतानामिवाचरेत् ॥ ३० ॥

## १७ शकुनसूक्तानि

सारां शकुन

प्रशस्ताः शकुना यानेऽनुकूलपवनस्तथा ।
उत्साहो मनसश्चैतत् , सर्वं लाभस्य सूचकम् ॥ १ ॥

व्रजित्वा वामदिग्भागं, दक्षिणान्मधुरस्वरः ।
काकः पूरयते नित्यं, प्रस्थितानां मनोरथान् ॥ २ ॥

चक्रवाकभारद्वाज-हंसहारितसारसाः ।
कलविङ्कस्तु दात्यूह-चकोरजलकुक्कुटाः ॥ ३ ॥

वामः पठन् राजशुकः प्रयाणे, शुभं भवेद्दक्षिणतः प्रवेशे ।
वनेचराः काष्ठशुकाः प्रयातुः, स्युः सिद्धिदाः सम्मुखमापतन्तः ॥४॥

एतेषां लोमशश्चापि, दर्शनं मङ्गलप्रदम् ।
लटा-खञ्जन-चापानां, दक्षिणे गमनं शुभम् ॥ ५ ॥

टिट्टिभः कौशिकश्चापि, वामो राजशुकः शुभः ।
मयूरश्च तथा श्येनो, दक्षिणाद्वामगः शुभः ॥ ६ ॥

श्रमणस्तुरगो राजा, मयूरः कुञ्जरो वृषः ।
प्रस्थाने वा प्रवेशे वा, सर्वसिद्धिप्रदायकाः ॥ ७ ॥

पेथडकुमारने मांडवगढमां पेसतां थयेल शुकन

प्रविशन् तत्र सोऽपश्य-द्वामतोऽहिफणोपरि ।
कारं कारं स्वरं दुर्गां, लास्यलीलामुल्लासाम् ॥ ८ ॥

पेथडशाहनी शंका

प्रवेशे न शिवाय स्या-द्वामा दुर्गा कृतस्वरा ।
किं पुनः कृष्णसर्पस्य, फणोपरि निषेदुषी ॥ ९ ॥

कालदिगास्पदचेष्टा-विशेषमासाद्य खगरवादीनि ।
अशुभानि शुभानि शुभा-न्यशुभानि भवन्ति शकुनानि ॥१०॥

पेथडकुमारने शुकननुं फळ कथन

सर्वस्य मालवस्यास्य, धनिको धनकोटिभिः ।
पूज्यमानो भावी त्वं, बिरुदमात्रं तु पार्थिवः ॥ ११ ॥

शुभशुकन

जंबू-चास-मयूरे, भारद्दाये तहेव नउले ।
दंसणमेव पसत्थं, पयाहिणे सव्वसंपत्ती ॥ १२ ॥

अपशकुन

मइलकुचेले अब्भंगिएलए साण-खुज्ज-वडभेय ।
एए उ अप्पसत्था, हवंति खित्ताउ नित्ताणं ॥ १३ ॥
नारी पीवरगब्भा, बहुकुमारी य कट्ठभारो य ।
कासायवत्थ- कुच्चं-धरा य कज्जं न साहंति ॥ १४ ॥

सुशुकन

नंदी तूरं पुण्णस्स दंसणं संख-पडहसद्दो अ ।
भिंगार-छत्त-चामर-धय-पडागा पसत्थाई ॥ १५ ॥
समणं संजयं दंतं, सुमणं मोयगा दहिं ।
मीणं घंटं पडागं च, सिद्धमत्थं विआगरे ॥ १६ ॥
दर्शन-चेष्टा-स्वरगति-भक्ष्य-ग्रहणेषु अधिकं अधिकं ।
स्यात् । क्रमशो फलमेतेषां, समुदायः सकलफलहेतुः ॥ १७ ॥

प्रस्थाने छिंक विचार

वामा क्षेमा लाभम्मि, दाहिणा पच्छिमा नियत्तइ ।
निलाडुइया यच्छिक्का, कयंपि कज्जं विणासेइ ॥ १८ ॥

दुर्गानुं शुभाशुभ शुकन

गतिस्तारा स्वरो वामो, दुर्गायाः शुभदः स्मृतः ।
विपरीतः प्रवेशेषु, स एवाभीष्टदायकः ॥ १९ ॥

अत्यंत अशुभ शुकन

अङ्गारभस्मेन्धनरज्जुपङ्कः, पिण्याककर्पासतुषास्थिकेशाः ।
कृष्णावयवावस्करकृष्णधान्य-पाषाणविष्टाभुजगौषधानि ॥२०॥

तैलं गुडं चर्मवसाविभिन्नां, तिक्तं च भांडं लवणं तृणं च।
तक्रार्गलाशृंखलवृष्टिघाता-कार्ये क्वचित्त्रिंशदियं न शस्ता ॥२१॥

स्वपाद-यान-स्खलनं दशानां, खंजः क्वचिद्यानपलायनं च।
द्वाराभिघात-ध्वज-वस्त्रपाताः, प्रस्थानविघ्नं कथयंति यातुः २२

भूरयः खग-मृगाः समाकुला-स्तुल्यकालविहितारवाश्च ये।
ते भवन्ति परदेशयायिनां, देहिनां मरणनगरिणो ध्रुवम् ॥२३॥

मार्जारयुद्धारवदर्शनानि, कलिं कटुंबस्य परस्परस्य।
चित्तस्य कालुस्यकरं च सर्वं, गन्तुः प्रयाणप्रतिषेधकाराः ।२४।

दिगंबराचार्य कुमुदचंद्रने जीतवा जतां श्रीवादिदेवसूरिने
थयेल शुकन

नयनविषयं यातश्चाषः श्रुतं शिखिशब्दितं,
विषमहरिणश्रेणिर्हर्षात्प्रदक्षिणमागता।
तुहिनकिरणक्षेत्रे भानुर्महोदयमाश्रितः,
प्रकृतिमृदुलो वायुः पृष्ठानुगश्च व्यजृम्भत ॥ २५ ॥

आ वस्तुओ होय त्यारे न जवुं

उत्सवमशनं स्नानं, प्रगुणं चोपेक्ष्य मङ्गलमशेषम्।
असमापिते च सूतक-युगेऽनर्तौ च नो यायात् ॥ २६ ॥

## १०१ कविचातुर्यसूक्तानि

को मोदते ?[१] किमाश्चर्यं,[२] ? का वार्ता ?[३] कः पथः ? स्मृतः[४]।
इति मे चतुरः प्रश्नान्, पूरयित्वा जलं पिब ॥ १ ॥

दिवसस्याष्टमे भागे, शाकं पचति यो गृहे ।
अनृणी चाप्रवासी च, स वारिचर ! मोदते ॥ २ ॥

अहन्यहनि भूतानि, गच्छन्ति यममन्दिरम् ।
अपरे स्थातुमिच्छन्ति, किमाश्चर्यमतः परम् ॥ ३ ॥

अस्मिन् महामोहमये कटाहे, सूर्याग्निना रात्रिदिवेन्धनेन ।
मासर्तुदर्वीपरिघट्टनेन, भूतानि कालः पचतीति वार्ता ॥ ४ ॥
श्रुतिर्विभिन्ना स्मृतयोऽपि भिन्ना, नैको मुनिर्यस्य मतिर्न भिन्ना ।
धर्मस्य तत्त्वं निहितं गुहायां, महाजनो येन गतः स पन्थाः ॥५॥
चक्रः पप्रच्छ पान्थं कथय जनपदः कोऽपि सम्पत्स्यते मे,
वस्तुं नो यत्र रात्रिर्भवति स च विचिन्त्येति तं प्रत्युवाच ।
नीते मेरौ समाप्तिं कनकवितरणैः श्रीजगद्देवनाम्ना,
सूर्येऽनन्तर्हिते स्यात् कतिपयदिवसैर्वासराद्वैतसृष्टिः ॥ ६ ॥

कुमारपालभूपालं, त्वमहो जीवरक्षणे ।
सभासमक्षमादिष्टं, गुरुणा हेमसूरिणा ॥ ७ ॥

गौरीपदं नखाकारं, शशिनं शिरसा दधौ ।
इहैव गोपितः कर्ता, दत्तः षाण्मासिकोऽवधिः ॥ ८ ॥

कमले कमलोत्पत्तिः, श्रुयते न च दृश्यते ।
बाले तव मुखाम्भोजे, कथमिन्दिवरद्वयम् ॥ ९ ॥

अलङ्कारास्पदे बद्धं, मोचयित्वा जनं नृपः ।
कुतूहलमलङ्कारास्पदं नेष्यति हर्षतः ॥ १० ॥

कलियुग अने वस्तुपालनो संवाद

कलिः—

रे रे वातूललोकास्त्यजत निजनिजं सर्वथा धर्मकृत्यम्,
कार्यं चेज्जीवितव्यैरिहकलिसुभटः क्रुद्ध एवास्मि यस्मात्।

वस्तुपालः—

नित्यं श्रीसङ्घलोकाः कुरुत नवनवं निर्भया धर्ममेषः
प्राप्तोऽहं वस्तुपालः कलिनृपहृदये निर्दयं न्यस्य पादम् ॥११॥

कलिः—

किमिह कलिनरेन्द्रं नैव जानाति सोऽयं,
यदनुचितमिवोच्चैर्धर्मकृत्यं तनोति।

वस्तुपालः—

अमुमनुपमसत्यं धर्मकर्मैककृत्यम्
कलिकवलनकालं, वेत्ति नो वस्तुपालम् ॥ १२ ॥

सरस्वतीनुं वस्तुपालने कथन

स्वस्ति श्रीब्रह्मलोकात्कविजनजननी भारती ब्रह्मपुत्री,
धात्र्यां श्रीवस्तुपालं कुशलयति यथा कार्यमेतन्निवेद्यम्।
योऽभूत् कल्पद्रुकल्पः सकलसुमनसां नाधुना सोपि भोज-
स्तस्मात्सीदन्त एते जगति सुकृतिनो रक्षणीयास्त्वयैव ॥१३॥

क्षीरसमुद्रनुं वस्तुपालने कथन

स्वस्ति श्रीभूमिवासाद्विपिनपरिसरात्क्षीरनीराधिनाथः,
पृथ्व्यां श्रीवस्तुपालं क्षितिधवसचिवं बोधयत्यादरेण।
अस्या आस्माकपुत्र्याः कुपुरुषजनितः कोपि चापल्यदोषो-
निशेषः शेषलोकम्पृणगुणभवता मूलतो मार्जनीयः ॥ १४ ॥

वस्तुपालनी उदारभावना

नृपव्यापारपापेभ्यः, सुकृतं स्वीकृतं न यैः ।
तान् धूलिधावकेभ्योऽपि, मन्ये मूढतरान्नरान् ॥ १५ ॥

मेइणीसंभवित्थीतपाओ चक्खओ सुपुण अजाओ ।
जणणीसहोयरु नियजणओ जोयइ जगि सविसाओ ॥ १६ ॥

भावार्थः- मेइणीए - पुढवीए पाविया इति मेइणी-संभवा जा इत्थी न उण मेइणीसंभवा । तीए पुत्तो चक्खो-पवित्तो नामओ सो पुण उदरं दारिऊण कड्ढिओत्ति अजाओ-न पसूओ सो जणणीं भायरं जणयं गवेसइ त्ति भावत्थो ।

किं जीविअस्स चिण्हं ? का भज्जा होइ मयणरायस्स ? ।
किं पुप्फाण पहाणं ? परिणीया किं कुणइ बाला ? ॥ १७ ॥
( उत्तरः- सास रइ जाइ ).

उच्चैर्नवशतानि च, ग्रहास्तिष्ठन्ति दूरतः ।
परिग्रहाः समीपस्था, जनान् पीडन्ति सर्वतः ॥ १८ ॥

आद्येन हीनं जलधावदृष्टं, मध्येन हीनं भुवि वर्णनीयम् ।
अंत्येन हीनं धुनुते शरीरं, यस्याभिधानं स जिनो श्रिये वः ।१९।
( उत्तरः- शीतल ( नाथस्वामी )

जटिलोपि न च ब्रह्मा, त्रिनेत्रो नैव शङ्करः ।
अम्बुधरो न च मेघो, वनवासी नैव तापसः ॥ २० ॥
( उत्तरः- श्रीफलम् ).

पादपूर्ति समस्या

सकुण्डलं वा वदनं नवेति ।

कोइ पंडितनी पूर्ति

व्याक्षिप्तचित्तेन मया न ज्ञातं सकुण्डलं वा वदनं नवेति ॥

जैनमुनिए करेली पूर्ति

संतस्स दन्तस्स जिईंदियस्स,
अज्झप्पयोगे-गयमाणसस्स ।
किं मज्झ एएण विचिंतिएण,
सकुण्डलं वा वदनं नवेति ॥ २१ ॥

भोजराजानुं वर्णन

अद्य धारा निराधारा, निरालम्बा सरस्वती ।
पण्डिता रण्डिताः सर्वे, त्वयि भोज दिवं गते ॥ २२ ॥

अद्य धारा सदाधारा, सदालम्बा सरस्वती ।
पण्डिता मण्डिताः सर्वे, त्वयि भोज भुवि स्थिते ॥ २३ ॥

भोजराजना राजशासननुं भावि कथन

पञ्चपञ्चाशद्वर्षाणि, मासान् सप्त दिनत्रयम् ।
भोजदेवेन भोक्तव्यं, सगौडं दक्षिणापथम् ॥ २४ ॥

असद् निरुपण

एष वन्ध्यासुतो याति, खपुष्पकृतशेखरः ।
मृगतृष्णाम्भसि स्नातः, शशशृङ्गधनुर्धरः ॥ २५ ॥

चंद्रवर्णन

लक्ष्मीक्रीडातडागं रतिधवलगृहं दर्पणो दिग्वधूनां,
पुष्पं श्यामालतायास्त्रिभुवनजयिनो मन्मथस्यातपत्रम् ।
पिण्डीभूतं हरस्य स्मितममरसरित्पुण्डरीकं मृगाङ्को-
ज्योत्स्नापीयूषवापी जयति सितवृषस्तारकागोकुलस्य ॥२६॥

गुरुनी वस्तुपाल प्रत्ये अन्योक्ति

कोशं विकाशय कुशे शय संस्तालिं,
प्रीतिं कुरुष्व यदयं दिवसस्तवास्ते ।
दोषोदये निबिडराजकरप्रतापध्वान्ते,
समेष्यति पुनस्तव कः समीपम् ॥ २७ ॥

## १०३ गुणगुणिसमादरसूक्तानि

ये गुणिनो न जानन्ति, नाद्रियन्ते च ते गुणान् ।
अजागलस्तनस्येव, तेषां निष्फलजीवनम् ॥ १ ॥

गुणेष्वेवादरः कार्यः किमाटोपैः प्रयोजनम् ।
विक्रीयन्ते न घण्टाभि-र्गावः क्षीरविवर्जिताः ॥ २ ॥

गुणनी महत्ता

अहो मर्त्यतया तौल्य-मस्य मेऽपि गुणैः पुनः ।
द्वयोरप्यन्तरं रत्नो-पलयोरिव हा कियत् ॥ ३ ॥

लोकोथी अज्ञात केवली पण रत्नाधिकने वांदे छे

पूर्वरत्नाधिकं गुर्वादिकं वन्दते अर्हन्नपि केवल्यपि यावद्भवत्यनभिज्ञातो जानन् धर्मताम् ॥

गुणोनुं बहुमान

संतगुणकित्तणेण वि, पुरिसा लज्जन्ति जे महासत्ता ।
इयरा पुण आलियपसं-सणे वि हियये न मायंति ॥ ४ ॥

महाफलं खलु तहारूवाणं थेराणं भगवंताणं नामगोत्तस्स वि सवणाए ॥

जह गोअमाइआणं, नामाइ तिन्नि हुन्ति पावहरा ।
अंगारमद्दगस्स य, नामाइ तिन्नि पावयरा ॥ ५ ॥

विरला जानंति गुणा, विरला पालंति निद्धणा नेहा ।
विरला परकज्जकरा, परदुक्खे दुक्खिया विरला ॥ ६ ॥

## १२२. गीतार्थसूक्तानि

प्रथम सम्यग्ज्ञान प्राप्त करीने पछीज उपदेश आपवो-

पढमं सम्मं नाणं, पच्छा करणं परोवएसो य ।
असुणिय जहट्ठियत्था, परं अप्पाणं च नासंति ॥ १ ॥

[ प्रथमं सम्यग्ज्ञानं, पश्चात्करणं परोपदेशश्च ।
अज्ञातयथास्थितार्थाः, परमात्मानं च नाशयन्ति ॥ २ ॥

गीतार्थ अने गीतार्थनी निश्राविनानो विहार नथी

गीअत्थो अ विहारो, बिइओ गीयत्थमीसिओ भणिओ ।
एत्तो तइयविहारो, नाणुण्णाओ जिणवरेहिं ॥ ३ ॥

अगीतार्थ द्रव्यादि वस्तुओ अने उत्सर्ग-अपवादने जाणी न शकवाथी प्रायश्चित्तादिनो अधिकारी नथी

दव्वं खित्तं कालं भावं, पुरिसपडिसेवणाओ य ।
नवि जाणइ अगीओ, उसग्गववाइयं चेव ॥ ४ ॥

सुत्ते य इमं भणियं, अपच्छित्ते य देइ पच्छित्ते ।
पच्छित्ते अइमत्तं, आसायणा तस्स महइ उ ॥ ५ ॥

आचार्यनी परंपरामां आवेल वस्तुओ उत्थापक जमालिनी जेम नाश पामे छे

आयरियपरंपराए, आगयं जो अ आणुपुव्वीए ।
(उच्छेयबुद्धीए) को वेइछे अ वाई, जमालिनासं स नासिहिई ६

## १२७ नमस्कारमहामन्त्रमाहात्म्यसूक्तानि

न स्युर्भूतानि भीत्यै विरचयितुमलं व्यन्तरा नान्तरायं,
यक्षाः पुष्णन्ति रक्षां विदधति विविधां व्याधयो नापि बाधाम् ।
शक्ता नैवापकर्तुं ज्वलन-जल-गराद्युत्थदुर्गोपसर्गाः,
सम्यक्कण्ठोपकण्ठे लुठति तनुमतां श्रीनमस्कारमन्त्रे ॥ १ ॥

पञ्चादौ यत्पदानि त्रिभुवनपतिभिर्व्याहृता पञ्चतीर्थी,
तीर्थान्येवाष्टषष्टिजिनसमयरहस्यानि यस्याक्षराणि ।
यस्याष्टौ सम्पदश्चानुपमतममहासिद्धयोऽद्वैतशक्ति-
र्जीयाल्लोकद्वयस्याभिलषितफलदः श्रीनमस्कारमन्त्रः ॥ २ ॥

तथा पुण्यसमं मन्त्रं, जगत्त्रितयपावनम् ।
योगी पञ्चपरमेष्ठि–नमस्कारं विचिन्तयेत् ॥ ३ ॥

एनमेव महामन्त्रं, समाराध्येह योगिनः ।
त्रिलोक्यापि महीयन्तेऽधिगताः परमां श्रियम् ॥ ४ ॥

एकैकोप्यभिवाञ्छितानि वितरेद्ध्याताऽर्हतादिर्मुदा,
सञ्जेष्टया परमेष्ठिनः किमु परं पञ्चापि चानुस्मृताः ।
तत्कः स्वस्य रिपुः स्वरिच्छति न कः काङ्क्षेत मोक्षं न को–
योऽस्मिन् श्रीपरमेष्ठिपञ्चकनमस्कारे न बद्धादरः ॥ ५ ॥

किं दानैः किमु भूरिशास्त्रपठनैः किं देवपादार्चनैः,
किं ध्यानैस्तपसा च किं किमथवा चान्यैर्विवेकैरपि ।
चेत्संसारसरित्पतौ तरिसमा नैवास्ति कल्याणभू–
र्भक्तिः श्रीपरमेष्ठिपञ्चकनमस्कारे नृणां निश्चला ॥ ६ ॥

वह्न्युद्दीप्तगृहादनर्घमणिवज्जन्येष्वमोघास्त्रवत्,
सिन्धौ मज्जदनल्पनौफलकवत्पातेऽथवालम्बवत् ।
गृह्णन् पञ्चनमस्कृतिं सकलमप्यन्यद्विहायादरा–
ज्जीवो जीवितविप्लवेऽपि न भवत्येवापदामास्पदम् ॥ ७ ॥

स्थिति–गति–सुख–दुःख–स्वप्न–निद्रान्त–हर्म्याऽ–
टवि–निशि–दिन–पातोत्पातवेलासु येषाम् ।
व्रजति ना परमेष्ठिश्रेष्ठमन्त्रो मनस्तः,
त इह भवसमुद्राद् द्राग् बहिष्ठाद् भवन्ति ॥ ८ ॥

किमत्र मन्त्रौषधिमूलिकाभिः, किं गारुड–स्वर्गमणीन्द्रजालैः ।
स्फुरन्ति चित्ते यदि मन्त्रराज–पदानि कल्याणपदप्रदानि ॥९॥

अयं पञ्चनमस्कारः, परविद्याबलं खलु ।
हृदये ध्यातमात्रोऽपि, निहन्तीह न संशय ॥ १० ॥

त्रिविष्टपेऽपि तन्नास्ति, मन्त्रादस्माद्भवेन्न यत् ।
समं स्याद् विषमं वापि, विषमं सममप्यहो ॥ ११ ॥

आनयन्नात्मतादात्म्यं, पञ्चापि परमेष्ठिनः ।
मासिकानशनो मृत्वा, गाङ्गेयः प्रापदच्युतम् ॥ १२ ॥

श्रीमन्नमस्कारपदानि सर्व–सिद्धान्तसाराणि नवापि नूनम् ।
आद्यानि पञ्चातिमहान्ति तेषु, मुख्यं महाध्येयमिहामनन्ति ॥१३॥

संग्राम – सागर – करीन्द्र – भुजङ्ग – सिंह–
दुर्व्याधि – वह्नि – रिपु – बन्धनसंभवानि ।
चौर – ग्रह – भ्रम – निशाचर – शाकिनीनां,
नश्यन्ति पञ्चपरमेष्ठिपदैर्भयानि ॥ १४ ॥

एसो मंगलनिलओ, भयविलओ सयलसंघसुहजणओ ।
नवकारपरममंतो, चिंतियमित्तो सुहं देइ ॥ १५ ॥

अणेगजम्मंतरसंचियाणं, दुहाण सारीरिय–माणसाणं ।
कत्तोअ भव्वाण हविज्जनासो, न जाव पत्तो नवकारमंतो ॥१६।

पंचनमोकारे वि हु, अरिहंतपयं पयंपियं पढमं ।
भत्तीय तम्मि विहिया, संसारुच्छेयणं कुणइ ॥ १७ ॥

भोअणसमये सयणे, विवोहणे पवेसणे भये वसणे ।
पंचनमुक्कारं खलु, समरिज्जा सव्वकालं पि ॥ १८ ॥

तियसिंद–नरिंदनमं–सियाण निद्दड्ढघाइकम्माणं ।
निज्जियरिउनिवहाणं, नमो नमो जिणवरिंदाणं ॥ १९ ॥

तिहुयणसिहरंमि पइट्ठियाण निट्ठवियसव्वकलंकाणं ।
सासयसुहनिलयाणं, नमो नमो सव्वसिद्धाणं ॥ २० ॥

पंचविहायारसमुद–पारपत्ताण गुणमयंकाणं ।
आयरियाणं च तहा, नमो नमो नाणसूरीणं ॥ २१ ॥

सयलसुओयहिपारं–गयाण उवएसदाणदक्खाणं ।
निच्चमुवज्झायाणं, नमो नमो खवियमोहाणं ॥ २२ ॥

अइदुद्धराई पंच वि, धारंति महव्वयाई जे मुणिणो ।
तियलोयबंधवाणं, नमो नमो सव्वसाहूणं ॥ २३ ॥

इय 'पंचमहापरमिट्ठि–संथवं' जे कुणंति भावेण ।
पावंति ते अपावा, अजियसुहं निव्वुइं अइरा ॥ २४ ॥

बारसगुण अरिहंता, सिद्धा अट्ठेव सूरि छत्तीसं ।
उवज्झाया पणवीसं, साहू सगवीस अट्ठसयं ॥ २५ ॥

जेणेस नमुक्कारो, सरणं संसारसागरपडियाणं ।
कारणमसंखदुक्ख–क्खयस्स हेउ सिवपहस्स य ॥ २६ ॥

नवकारओ अन्नो, सारो मंतो न अत्थि तियलोए ।
तम्हा हु अणुदिणं चिय, पढिअव्वो परमभत्तिए ॥ २७ ॥

श्री नवकारमंत्रना १ लाखजापथी तीर्थंकरनामकर्म बंधाय

अमुष्य लक्षजापेन, जिनपूजापुरःसरम् ।
तीर्थकृन्नामकर्मापि, बध्यते नात्र संशयः ॥ २८ ॥

यो लक्षं जिनबद्धलक्ष्यसुमनाः सुव्यक्तवर्णक्रमं,
श्रद्धावान् विजितेन्द्रियो भवहरं मन्त्रं जपेच्छ्रावकः ।
पुष्पैः श्वेतसुगन्धिभिश्च विधिना लक्षप्रमाणैर्जिनं,
यः संपूजयते स विश्वमहितः श्रीतीर्थराजो भवेत् ॥ २९ ॥

त्रिकरणशुद्धिथी १०८ वखत जाप करनारने उपवासनुं फल मळे छे.

त्रिशुद्ध्या चिन्तयंस्तस्य; शतमष्टोत्तरं मुनिः ।
भुञ्जानोपि लभेतैव, चतुर्थतपसः फलम् ॥ ३० ॥

अंत्यअवस्थामां श्रीनवकारमंत्रना सततजापथी महापापी पण स्वर्गी बने.

हिंसावाननृतप्रियः परधनाहर्ता परस्त्रीरतः,
किञ्चान्येष्वपि लोकगर्हितमहापापेषु गाढोद्यतः ।
मन्त्रेशं स यदि स्मरेदविरतं प्राणात्यये सर्वदा (था),
दुष्कर्मार्जितदुर्गदुर्गतिरपि स्वर्गीभवेन् मानवः ॥ ३१ ॥

पञ्चतायाः क्षणे पञ्च, रत्नानि परमेष्ठिनाम् ।
आस्ये दधाति यस्तस्य, सद्गतिः स्याद्भवान्तरे ॥ ३२ ॥

आसतां मनुजा दूरे, तिरश्चामपि निश्चितम् ।
मन्त्रोऽसौ सद्गतिं दत्ते, प्रान्तकाले स्मृतोपि हि ॥ ३३ ॥

कृत्वा पापसहस्राणि, हत्वा जन्तुशतानि च ।
अमुं मन्त्रं समाराध्य, तिर्यञ्चोऽपि दिवं गताः ॥ ३४ ॥

## १४६ श्री तीर्थमहिमासूक्तानि

निश्चय अने व्यवहारथी तीर्थनी समजण

राग-दोसविमुक्को, चिरसेवियनाण-दंसण-चरित्तो ।
निच्छयनयेण तित्थं, अप्पच्चि (य) वुच्चए जइवि ॥ १ ॥

तहवि हु ववहारनये-ण जो पएसो पणट्ठपावाण ।
तित्थंकराण पएहिं, फरिसिओ सो परं तित्थं ॥ २ ॥

तीर्थंकरदेवो पण तीर्थने नमे छे.

कृतकृत्यतया तादृक्कल्पत्वाच्च जिनेश्वरान् ।
न नमस्यन्ति तीर्थं तु, नमन्त्यर्हन्नमस्कृतम् ॥ ३ ॥

श्री शत्रुंजय माहात्म्य

श्री शत्रुञ्जय-रैवताभिधगिरिद्वन्द्वेऽत्र यात्रोत्सवं,
दान-ब्रह्म-तपः-कृपाकृतरतिर्यः सन्मतिः सेवते ।
तीर्थस्यातिशयेन नारकगतिं तिर्यग्गतिश्च ध्रुवं,
नो कस्मिन्नपि जन्मनि स प्रध्वस्तदुष्कर्मतः ॥ ४ ॥

फणिपति-मघवाद्या यत्र देवाः समेयु-
र्भरत-सगरमुख्याश्चक्रिणः क्षोणिशक्राः ।
नमि-विनमिमुखास्ते सर्वविद्याधरेशा,
दशरथसुत-कुन्तीनन्दनाद्याश्च भूपाः ॥ ५ ॥

एषु श्रीजयसिंहदेवनृपतिस्तीर्थेषु यात्रां व्यधात्,
सिद्धः प्रोद्धरधर्मभूधरशिरःकोटीररत्नाङ्कुरः ।
राजर्षिस्तु कुमारपालविपुलापालः कृपालुः कलौ,
कृत्वा सङ्घमिहोपदेशवचसा श्रीहेमसूरिप्रभोः ॥ ६ ॥

पल्योपमसहस्रैकं, ध्यानाल्लक्षमभिग्रहात् ।
दुष्कर्म क्षीयते मार्गे, सागरोपमसङ्ख्यकम् ॥ ७ ॥
शत्रुञ्जये जिने दृष्टे, दुर्गतिद्वितयं क्षपेत् ।
पल्योपमसहस्रं तु, पूजा–स्नात्रविधानतः ॥ ८ ॥

श्री गिरनार माहात्म्य

सारं सिद्धगिरेर्यदेव विदितं यन्नेमिनः स्वामिनः,
कन्दर्पद्विपदर्पमर्दनहरे वीरावदातास्पदम् ।
यन्निःशङ्ख्यमहर्षिकेवलरमासंयोगसङ्केतभू–
स्तीर्थं श्रीगिरिनारनाम तदिदं दिष्टया नमस्कुर्महे ॥ ९ ॥

दीक्षा–केवल–निर्वृत्ति–कल्याणत्रिकमनन्ततीर्थकृताम् ।
युगपद्यैकमभवत्, स जयति गिरिनारतीर्थराजः ॥ १० ॥

आबु माहात्म्य

नागेन्द्र–चन्द्र–निर्वृत्ति–विद्याधरप्रमुखसकलसङ्घेन ।
अर्बुदकृतप्रतिष्ठो, युगादिजिनपुङ्गवो जयति ॥ ११ ॥

श्री वाग्भटदेवना संघनुं वर्णन

सङ्घो वाग्भटदेवेन, तथा चक्रेऽत्र मन्त्रिणा ।
भविष्यतामतीताना–मुपमानं यथाऽभवत् ॥ १२ ॥

वाहनौषधिपाथेयः, सहायवृषभादिकम् ।
यद्यस्य नास्ति तत्तस्मै, सर्वं देयं मया मुदा ॥ १३ ॥

### देशलसंघपतिनी शत्रुंजय तथा गिरनारनी यात्रा

तीर्थे स्थित्वा त्रिंशतिं वासराणि,
साधुः श्रीमान् देशलः सूनुयुक्तः ।
नत्वा सर्वाण्यर्हतामत्र बिम्बा-
न्याशु प्रातः पर्वतादुत्ततार ॥ १४ ॥

दिनानि दश तीर्थेऽस्मिन्, स्थित्वा देशलसङ्घपः ।
श्रीनेमिनमनुज्ञाप्य, गिरिनारादवातरत् ॥ १५ ॥

### श्री शत्रुंजयनां २१ नामो

[१] सिद्धक्षेत्रं [२] तीर्थराजो, [३] मरुदेवो [४] भगीरथः ।
[५] विमलाद्रिर्[६] बाहुबली, [७] सहस्रकमलस्तथा ॥ १६ ॥
[८] तालध्वजः [९] कदम्बश्च, [१०] शतपत्रो [११] नगाधिराट् ।
[१२] अष्टोत्तरः शतकूटः, [१३] सहस्रपत्र इत्यपि ॥ १७ ॥
[१४] ढङ्को [१५] लौहित्य[१६] कपर्दि-निवासः [१७] सिद्धिपर्वतः ।
[१८] शत्रुञ्जयस्तथा [१९] मुक्ति-निलयः [२०] सिद्धशेखरः ॥ १८ ॥
[२१] पुण्डरीकश्चेति नाम-धेयानामेकविंशतिः ।
गीयते तस्य तीर्थस्य, कृता सुरनरर्षिभिः ॥ १९ ॥

तीर्थयात्राथी थता फायदा

आरम्भाणां निवृत्तिर्द्रविणसफलता सङ्घवात्सल्यमुच्चै–
र्नैर्मल्यं दर्शनस्य प्रणयिजनहितं जीर्णचैत्यादिकृत्यम् ।
तीर्थोन्नत्यं जिनेन्द्रोदितवचनकृतिः तीर्थकृत्कर्मबन्धः,
सिद्धेरासन्नभावः सुरनरपदवी तीर्थयात्राफलानि ॥ २० ॥

तीर्थ कोने कहेवाय ?

सिद्धास्तीर्थकृतोऽनन्ता, यत्र सेत्स्यन्ति चापरे ।
मुक्तेर्लीलागृहं यत्र, तीर्थं तस्मै नमो नमः ॥ २१ ॥

छरीनी समजण

एकाहारी भूमिसंस्तारकारी,
पद्भ्यां चारी शुद्धसम्यक्त्वधारी ।
यात्राकाले सर्वसचित्तहारी,
पुण्यात्मा स्याद्ब्रह्मचारी विवेकी ॥ २२ ॥

तीर्थयात्रा त्रण प्रकारे

अष्टाह्निकाभिधामेकां, रथयात्रामथापराम् ।
तृतीयां तीर्थयात्रां चे-त्याहुर्यात्रां त्रिधा बुधाः ॥ २३ ॥

## १४७ श्रीजैनशासनमहत्तासूचकसूक्तानि

वीतरागशासननी अमूल्यता

द्युमणिस्पर्शपाषाण–दक्षिणावर्त्तशङ्खवत् ।
कृष्णचित्रकवल्लीव–द्वाभद्रं जिनशासनम् ॥ १ ॥

निव्वुइपहसासणयं, जयइ सया सव्वभावदेसणयं।
कुमयमयनासणयं, जिणिंदवरवीरसासणयं ॥ २ ॥

धन्योऽहं मानुष्यं जन्म, सुलब्धं सफलं मम।
यदत्रापि जिनेन्द्राणां, शासनं विश्वपावनम् ॥ ३ ॥

सर्वसुखमूलबीजं, सर्वार्थविनिश्चयप्रकाशकरम्।
सर्वगुणसिद्धिसाधन-धनमर्हच्छासनं जयति ॥ ४ ॥

जिनश्चित्ते गुरुर्नेत्रे, वाचि तत्त्वं श्रुतौ श्रुतम्।
करे दानं शिरस्याज्ञा, धर्मिणः तस्य नापरः ॥ ५ ॥

जिनमतनगरेऽस्मिन्मोहमत्तारिजेता,
जयति जनितधाम-धर्मनामा नरेन्द्रः।
नियतमपरिभूतं यस्य राजेन्द्रराज्यं,
विलसति नयपूतं तत्त्वसप्ताङ्गमेतत् ॥ ६ ॥

अनुपमेय वीतरागशासन

चिंतामणि-कप्पतरू-निहि-सुरधेणु-नरिंद-इंदेहिं।
कहं उवमिज्जइ सम्मं, इहलोइयेहिं सव्वेहिं ॥ ७ ॥

प्रत्यनिको सामे शक्ति फोरववी

साहूण चेइआणं, च पडिणीअं तह अवन्नवायं च।
जिणपवयणस्स अहियं, सव्वत्थामेण वारेइ ॥ ८ ॥

मनुष्यजन्मनी दुर्लभता

दुल्लहं खलु मणुयत्तं, जिणवयणं वीरियं च धम्मम्मि।
एयं लद्धुण सया, अपमाओ होइ कायव्वो ॥ ९ ॥

अप्रमादीज अहिंसक

आया चेव अहिंसा, आया हिंसंति निच्छओ एसो ।
जो होइ अप्पमत्तो, अहिंसओ हिंसओ इयरो ॥ १० ॥

प्रत्यनिकोने रोकी सर्वशक्तिथी शासनप्रभावना करवी

अहितं चैत्यबिम्बानां, निन्दकं मतभेदकम् ।
वारयेन्निखिलस्थाम्ना, पूर्वं सामप्रकाशनात् ॥ ११ ॥

इदं दर्शनसर्वस्व-मिदं दर्शनजीवितम् ।
सामर्थ्येन यदर्थेन, क्रियते शासनोन्नतिः ॥ १२ ॥

इदं ज्ञानमिदं तत्त्व-मिदं धर्मस्य शासनम् ।
यत्क्रियत आर्हते धर्मे, सर्वस्थाम्ना प्रभावना ॥ १३ ॥

संघना माटे साधु संपूर्ण चक्रीनासैन्यनो नाश करे तोपण आराधक

विभुरप्यवदद्भूप !, सङ्घार्थे चक्रिणो बलम् ।
निखिलं हन्यते शक्त्या, साधुना मोक्षबन्धुना ॥ १४ ॥

## १४८ पुराणादिषु जिनेश्वरदेवमाहात्म्यदर्शकसूक्तानि

श्री ऋषभदेवस्वामीनी उत्पत्ति पौराणिकमते

कुलादिबीजं सर्वेषां, प्रथमो विमलवाहनः ।
चक्षुष्मांश्च यशस्वी चा-भिचन्द्रोथ प्रसेनजित् ॥ १ ॥

मरूदेवश्च नाभिश्च, भरते कुलसत्तमः ।
अष्टमस्तु मरूदेव्यां, नाभेर्जात उरूक्रमः ॥ २ ॥

दर्शयन् वर्त्मवीराणां, सुरासुरनमस्कृतः ।
नीतित्रितयकर्ता यो, युगादौ प्रथमो जिनः ॥ ३ ॥

रैवताद्रौ जिनो नेमि-र्युगादिर्विमलाचले ।
ऋषीणामाश्रमादेव, तेषां मार्गस्य कारणम् ॥ ४ ॥

नाभिस्तु जनयेत्पुत्रं, मरुदेव्यां मनोहरम् ।
ऋषभं क्षत्रियश्रेष्ठं, सर्वक्षत्रस्य पूर्वकम् ॥ ५ ॥

ऋषभाद्भरतो जज्ञे, वीरपुत्रशताग्रजः ।
राज्येऽभिषिच्य भरतं, महाप्राव्राज्यमाश्रितः ॥ ६ ॥

नित्यानुभूतनिजलाभनिवृत्ततृष्णः,
श्रेयस्य सद्रचनया चिरसुप्तबुद्धेः ।
लोकस्य यः करुणयोऽभयमात्मलोक-
माख्यन्नमो भगवते ऋषभाय तस्मै ॥ ७ ॥

सत्युगमां दशब्राह्मणने जमाडतां जे फळ थाय ते फळ कलियुगमां जैनमुनिने दान आपवाथी थाय.

दशभिर्भोजितैर्विप्रै-र्यत्फलं जायते कृते ।
मुनेरर्हतो भक्तस्य, तत्फलं जायते कलौ ॥ ८ ॥

अडसठतीर्थनी यात्राथी जे फळ मळे ते फळ आदिनाथना स्मरण मात्रथी मळे.

अष्टषष्टिषु तीर्थेषु, यात्राया यत्फलं भवेत् ।
आदिनाथस्य देवस्य, स्मरणेनापि तत्फलम् ॥ ९ ॥

# १४९ श्रीगुरुमहिमासूक्तानि

जेनाथी धर्म पाम्या होइए ते धर्मगुरु प्रथम वांदवा योग्य छे-

यो येन स्थापितो धर्मे, गृहिणा साधुनाऽपि वा।
स तस्य जायते धर्म–गुरुर्धर्मोपदेशतः ॥ १ ॥

गुरोरपि गरियांस्तु, धर्माचार्यप्रकीर्तितः ।
स प्रथमं वन्दनीयः, पूजनीयश्च भावतः ॥ २ ॥

गुरु कोण ?

माता पिता कलाचार्यो, एतेषां ज्ञातयस्तथा ।
वृद्धा धर्मोपदेष्टारो, गुरुवर्गः सता मतः ॥ ३ ॥

माता–पितादिथी पण गुरु अधिक

माता पिता सुतो बन्धुः, प्रिया मित्रं च तन्नहि ।
कुर्वन्ति गुरवस्तुष्टा, यदकारणवत्सलाः ॥ ४ ॥

धर्मगुरुना नमनथी जे सुख थाय ते इंद्रादिकने पण न होय

राजा वा राजराजो वा, शक्रो वा न तदश्नुते ।
सुखं यल्लभते धर्म–गुरुपादनतो रतः ॥ ५ ॥

निर्भाग्योऽपि जडोऽप्यनाकृतिरपि प्राज्ञोपहास्योऽपि हि,
मूकोऽप्यप्रतिभोऽप्यसन्नपि जनानादेयवाक्योपि हि ।
पादास्पृश्यतमोऽपि सज्जनजनैर्नम्यः शिरोभि र्भवे–
द्यत्पादद्वितयप्रसादनविधेस्तेभ्यो गुरुभ्यो नमः ॥ ६ ॥

गुरुभक्तेः श्रुतज्ञानं, भवेत् कल्पतरूपमम् ।
लोकद्वितयभाविन्य-स्ततः स्युः सर्वसम्पदः ॥ ७॥

जननी जनकः स्वामी, गुरुश्चापि विशेषतः ॥ श्लोकार्धः
अप्रतिकार्याश्चत्वारो, सर्वसेवा गुणैरपि

विद्यागुरुना अविनयथी सारीरीते प्राप्तकरेल विद्या
अल्प फल दायक

जो परिभवइ अविणया, धम्मगुरुं जत्थ सिक्खए विज्जं ।
सा सुगहियावि विज्जा, दुक्खेण तस्स देइ फलं ॥ ८॥

चारे दिशामां गुरुनो साडात्रण हाथ अवग्रह राखवो
आयप्पमाणमेत्तो, चउदिसिं होइ उग्गहो गुरुणो ॥ श्लोकार्धः
कणयकमलेहिं गुरुणो चलणजुयलं अच्चिऊण पणमेइ ॥

अतस्तु नियमादेव, कल्याणं निखिलं सताम् ।
गुरुभक्तिसुखोपेतं, लोकद्वयहितावहम् ॥ ९॥

सद्गुरुनुं लक्षण

भिक्षामात्रोपजीवी समतृणकनको त्यक्तसावद्ययोगः,
षट्त्रिंशत्सङ्ख्यमुख्यप्रवरगुणगणालङ्कृतः सच्चरित्रः ।
ज्ञानाद्याचारसारः स्वपरसमयवित्सत्यधर्मोपदेष्टा,
सर्वज्ञोऽज्ञानवह्निर्जगति विजयते सद्गुरुः सत्यधामः ॥ १०॥

श्रीजिनेश्वरदेव अने केवलीना विरहमां श्रीआचार्यजः
शासनप्रकाशक छे

अत्थमिए जिणसुरे, केवलिचन्देवि जे पईवव्व ।
पयडंति इह पयत्थे, ते आयरिए नमंसामि ॥ ११॥

## गुरुमहिमा

गोयम सोहम जम्बु, पभवो सिज्जंभवाइया ।
सव्वे ते जुगप्पहाणा, तइ दिट्ठे ते सवि दिट्ठा ॥ १२ ॥

अहो ते निज्जियो कोहो, अहो माण पराजओ ।
अहो ते अज्जवं साहू, अहो ते मुत्तिमत्तवो ॥ १३ ॥

धन्यास्त एव निर्ग्रन्था, यैर्जिता विषयग्रहाः ।
तेभ्यो नोऽस्तु नमस्कारः, सर्वपापप्रणाशनः ॥ १४ ॥

चिंतामणिकप्पद्दुम—कामदुहाईणि दिव्ववत्थुणि ।
जण (मण) वंछियत्थकरणे, न गुरुणि गुरुपसायाओ ॥ १५ ॥

चन्दनागुरुकस्तुरी—कर्पूरकुंकुमद्रवैः ।
सौवर्णमणिमुक्ताद्यै—रङ्गपूजास्य निर्ममे ॥ १६ ॥

### गुरु पुरुषोने अर्पणभाव

विक्रीणते वा मूल्येन, ददते वा प्रसादतः ।
गुरवो हीत्यपि सतां, प्रमाणं नापरा गतिः ॥ १७ ॥

समश्रद्धाक्रिया एकप्ररूपणा व्यवहाराः पुनः साधवो लोकानां बोधिबीजमादधानाः तीर्थस्य प्रभावका भवन्ति मूलगुणसाम्याद् यत् किञ्चिद्गुणवैषम्यस्याऽ—प्रयोजकत्वाद् घटजनकदण्डेषु नीलपीतादिवैषम्यवत् ॥

## १५० गुरुस्तुतिस्वोपज्ञसूक्तानि

तपस्विनं महाशान्तं, गीतार्थं स्थविरं गुरुम् ।
सर्वसूरिशिरोरत्नं, सिद्धिसूरिं भजे सदा ॥ १ ॥

परभावात्सदा मुक्ता, रक्ताः स्वगुणरक्षणे ।
कर्माष्टनाशने दक्षा, विनयाख्यमुनीश्वराः ॥ २ ॥

भविनां भद्रदातारं, स्वान्यभद्रसदोद्यतम् ।
विजयाद्यं भद्रसूरिं, प्रणमामि मुनीश्वरम् ॥ ३ ॥

पंन्यासप्रवरो जीयात्सुन्दरविजयो गणी ।
यस्य रत्नत्रयाभ्यासे, सततं प्रचुरोद्यमः ॥ ४ ॥

## १५१ मुनिनिंदाफलदर्शकसूक्तानि

निवृत्ताः सर्वपापेभ्यः, प्रवृत्ताः पुण्यकर्मसु ।
अमी हि जगतः पूज्या, ज्यायांसो गुणसम्पदा ॥ १ ॥

एषां संयमिनां निन्दा, मन्दान्धा ये वितन्वते ।
खनयः खलु दुःखानां, ते भवन्ति भवे भवे ॥ २ ॥

परस्यापि भवेन्निंदा, नानानर्थपथाकरी ।
किं पुनः त्यक्तसङ्गानां, मुक्तिमार्गैकगामिनाम् ॥ ३ ॥

ततो निन्दा मुनीन्द्राणां, भ्रात मांतः परं कृथाः ।
अनात्मनीनमात्मज्ञः, कर्म प्रक्रमते हि कः ॥ ४ ॥

दौर्भाग्यं प्रगुणीकरोति तनुते दौर्गत्यमत्युल्बणं,
कीर्तिं कृन्तति दुर्गतिं च चिनुते सम्पादयत्यापदम्।
पापं प्रापयति प्रदीप्तमभितो धर्मं परिध्वंसते,
किं किं न व्यसनं तनोत्यसुमतां निन्दा मुनीन्द्राश्रया ॥ ५ ॥

## १५२ दीप्राद्दष्टिसूक्तानि

### दीप्राद्दष्टिजीवनु लक्षण

प्राणेभ्योऽपि गुरुर्धर्मः, सत्यामस्यामसंशयम् ।
प्राणांस्त्यजति धर्मार्थं, न धर्मं प्राणसङ्कटे ॥ १ ॥
एक एव सुहृद्धर्मो, मृतमप्यनुयाति यः ।
शरीरेण समं नाशं, सर्वमन्यत्तु गच्छति ॥ २ ॥
इत्थं सदाशयोपेतः, तत्त्वश्रवणतत्परः ।
प्राणेभ्यः परमं धर्मं, बलदेवः प्रपद्यते ॥ ३ ॥
क्षाराम्भत्यागतो यद्व—न्मधुरोदकयोगतः ।
बीजं प्ररोहमादत्ते, तद्वत्तत्त्वश्रुतेर्नरः ॥ ४ ॥
इह क्षाराम्भतुल्यश्च, भवयोगोऽखिलो मतः
मधुरोदकयोगेन, समा तत्त्वश्रुतिस्तथा ॥ ५ ॥
अतस्तु नियमादेव, कल्याणमखिलं सताम् ।
गुरुभक्तिसुखोपेतं, लोकद्वयहितावहम् ॥ ६ ॥
गुरुभक्तिप्रभावेन, तीर्थकृद्दर्शनं मतम् ।
[1]समापत्त्यादिभेदेन, निर्वाणैकनिबन्धनम् ॥ ७ ॥

१– समापत्तिः = ध्यानतः स्पर्शना ।

## १५३ वाणीसूक्तं

### वाणीना प्रकार अने स्थान

परा मनसि पश्यन्ती, हृदि कण्ठे च मध्यमा ।
मुखे च वैखरीत्याहु-र्भारतीं तामुपास्महे ॥ १ ॥

## १५४ श्री पर्युषणामाहात्म्यसूक्तानि

मन्त्राणां परमेष्ठिमन्त्रमहिमा तीर्थेषु शत्रुञ्जयो,
दाने प्राणिदया गुणेषु विनयो ब्रह्म व्रतेषु व्रतम् ।
संतोषो नियमे तपस्सु च शमस्तत्त्वेषु सद्दर्शनं,
सर्वज्ञोदितसर्वपर्वसु परं स्याद्वार्षिकं पर्व च ॥ १ ॥

## १५५ जीवनिर्गमनमार्गसूक्तानि

### जीवने शरीरमांथी निकळवाना पांचमार्ग अने तदनुसार गति

पंचविहे जीवस्स निज्जाणमग्गए। तं जहा पाएहिं उरूहिं उरेणं सिरेणं सव्वंगेहिं ॥

पाएहिं निज्जाणमाणे निरयगामि भवंति ।
ऊरुहिं निज्जाणमाणे तिरियगामि भवंति ॥

उरेण निज्जाणमाणे मणुअगामि भवंति ।
सिरेण निज्जाणमाणे देवगामि भवंति ॥

सव्वंगेहिं निज्जाणमाणे सिद्धिगइ पज्जवसाणे पण्णत्ते इति ॥

## १५६ चतुर्गतिजीवगमनकारणदर्शकसूक्तानि

### देवगतिनां कारणो

तपःसंयमदानोप—कारेषु निरतः सदा।
गुरुवाक्यरुचिर्जीवो, दयावांश्च दिवंगमी ॥ १ ॥

### मनुष्यगतिनां कारणो

मार्दवार्जवसम्पन्नो, गतदोषकषायकः।
न्यायवान् गुणगृह्यश्च, मनुष्यगतिभाग् भवेत् ॥ २ ॥

### तिर्यंच गतिनां कारणो

पिशुनो दुर्विनीतश्च, मित्रे शाठयरतः सदा।
आर्तध्यानेन जीवोऽयं, तिर्यग्गतिमवाप्नुयात् ॥ ३ ॥

### नरकगतिनां कारणो

जीवहिंसामृषावाद—स्तेनान्यस्त्रीनिषेवणैः।
परिग्रहकषायैश्च, विषयैर्विषयीकृतः ॥ ४ ॥

कृतघ्नो निर्दयः पापी, परद्रोहविधायकः।
रौद्रध्यानपरः क्रूरो, नरो नरकभाग् भवेत् ॥ ५ ॥

महापरिग्रहारंभो, मांसाहारी कषायभृत्।
पञ्चेन्द्रियविघाती च, जन्तुर्नरकमृच्छति ॥ ६ ॥

बध्नाति नरकायुस्तु, महारम्भात् परिग्रहात्।
पञ्चेन्द्रियवधान् मांसा—हारादपि च देहभृत् ॥ ७ ॥

पायमिह कूरकम्मा, भवसिद्धिया वि दाहिणिल्लेसु ।
नेरइयतिरियमणुआ–सुराइठाणेसु गच्छन्ति ॥ ८ ॥

नारकीना आयुष्यना बंधनां चार कारणो

महारंभयाए महापरिग्गहियाए कुणिमाहारेण ।
पंचिंदिअवहेणं जीवा निरयाउअं निअच्छंति ॥ ९ ॥

मनुष्यना आयुष्यना चार कारणो

चउहिं ठाणेहिं जीवा मणुस्साउअं निबंधंति तं जहा
पगति भद्दयाए पगति विणीअयाए साणुसयाए अमच्छरियाए॥

तापसो चरग पंचिन्द्रियतिर्यंचो अने श्रावकोनी उत्कृष्ट गति

तावस जा जोइसिया, चरगपरिवाय बंभलोगो जा ।
जा सहसारो पंचिंदिय–तिरिआ सड्ढा जाइ अच्चुयं जाव॥

## १५७ श्रीयतनासूक्तानि

जयणा धर्मनो सार छे

जयणा य पयत्तेण. कायव्वा एत्थ सव्वजोगेसु ।
जयणा उ धम्मसारो, जं भणिया वीयरागेहिं ॥ १ ॥

जयणा उ धम्मजणणी, जयणा धम्मस्स पालणी चेव ।
तवबुड्ढिकरी जयणा, एगंत सुहावहा जयणा ॥ २ ॥

जयणाए वट्टमाणो, जीवो सम्मत्तनाणचरणाणं ।
सद्धाबोहासेवण–भावेणाराहगो भणिओ ॥ ३ ॥

सांकडा मोढाना भाजनमां खावाथी रात्रीभोजननो दोष लागे

जे चेव अंधयारे दोसा, ते चेव संकडमुहंमि ॥

घर वहेवारमां पण जयणा राखवी

जं जं घरवावारं, कुणइ गिही तत्थ तत्थ आरंभो ।
आरंभे वि हु जयणं, तरतमजोएण चिंतेइ ॥ ४ ॥
यतनां विना प्राणातिपातविरमणस्य फलाभावात् ॥

## १५८ निशाभोजनत्यागात्यागगुणदोषदर्शकसूक्तानि

रात्रे न खानारने १५ उपवासनुं फल

ये रात्रौ सर्वदाऽऽहारं, न भुनक्ति सुमेधसः ।
तेषां पक्षोपवासस्य, फलं मासेन जायते ॥ १ ॥

रात्रीभोजननी त्याज्यता

अत्युग्रपापहेतुत्वाद्व-र्जयेन्निशि भोजनम् ॥ श्लोकार्धः ॥
मेधां पिपीलिका हन्ति, यूका कुर्याद् जलोदरम् ।
कुरुते मक्षिका वान्ति, कुष्टरोगं च कोलिकः ॥ २ ॥
संसजज्जीवसङ्घातं, भुञ्जाना निशिभोजनम् ।
राक्षसेभ्यो विशिष्यन्ते, मूढात्मनः कथं न ते ॥ ३ ॥
नोदकमपि पातव्यं, रात्रावत्र युधिष्ठिर ! ।
तपस्विना विशेषेण, गृहिणा च विवेकिना ॥ ४ ॥

# १५९ जैनेतिहासदर्शकसूक्तानि

### मुनिओने उपकरण राखवानी शास्त्रीयता

उपनीतं कुबेरेण, धर्मोपकरणं ततः ।
त्यक्तसङ्गोऽप्याददानो, गौतमोऽथेत्यचिंतयत् ॥ १ ॥

निरवद्यव्रतत्राणे, यदेतदुपयुज्यते ।
वस्त्र-पात्रादिकं ग्राह्यं, धर्मोपकरणं हि यत् ॥ २ ॥

छद्मस्थैरिह षड्जीव–निकाययतनापरैः ।
सम्यक्प्राणिदया कर्तुं, शक्येत कथमन्यथा ॥ ३ ॥

### नमि अने विनमिना पिताना नाम

अथ कच्छ–महाकच्छ–तनयौ विनयान्वितौ ।
आयान्तौ नमि–विनमि–नामानौ तद्वनाध्वना ॥ ४ ॥

### श्री अजितनाथस्वामीये पोताना घरदेरासरमां करेली जिनबिम्बोनी पूजा.

स्वामी ततश्च सुस्नातो, दिव्याभरणवस्त्रभृत् ।
संपूज्य गृहचैत्यान्त–र्बिम्बानि श्रीमदर्हताम् ॥ ५ ॥

शिबिकायां सुप्रभायां, निर्मितायां सुरासुरैः ।
निषसाद जगन्नाथः, पाल्के शक्रवत्तदा ॥ ६ ॥

शत्रुञ्जयमहात्म्य सर्ग ८ श्लोक ११३-११४

### दमयंतीने भिक्षुत्तिरैर्थीप आपेल भाविशांतिजिन प्रतिमा

पणिट्ठपुन्नपेरियाए निव्वुइ देवयाए समप्पिया नीए भावि

संतिजिणस्स, कणयमयपडिमा भणिया य सावच्छे इमा तुमे निच्चमच्चणिज्जा ।

### सीताजीनो रामने उत्तर

निर्विण्णा कर्मणामीदृग्, दुःखावर्तप्रदायिनाम् ।
ग्रहिष्यामि परिव्रज्यां, तेषामुच्छेदकारिणीम् ॥ ७ ॥

### कुबेर लोकपाले दमयंतीना छेल्ला भवनुं स्वरुप महाविदेहमां विचरता श्री विमलनाथ स्वामी पासे जाणेल तेनुं वसुदेवने कथन

सहेन्द्रेण वन्दनाय, गतस्यैतत्पुरा मया ।
महाविदेहे कथितं, विमलस्वामिनाऽर्हता ॥ ८ ॥
अस्मिन्नेव भवे ताव-दियं कनकवत्यहो ।
दशार्ह ! कर्माण्युन्मूल्य, निर्वाणं च गमिष्यति ॥ ९ ॥

### खंधकसूरिनी आचार्यपदवी

अभ्यस्तद्वादशाङ्गोऽथ, लब्धिरत्नैकरोहणः ।
आचार्यत्वे कृतः सर्व-विदा स्कन्दकसंयमी ॥ १० ॥

### चंपानगरीनी पोळ उघाडनार सुभद्रासतीनुं कथन

महसरिसा इच्छिज्जा, जा होइ महासई सुशीलधरा ।
चालणिसंठियउदया, उग्घाडउ सा इमं पोलिम् ॥ ११ ॥

### नेम-राजिमती अने कृष्णना भवो

[1]धण-धणवई [2]सोहम्मे, [3]चित्तगइ खयरो य रयणवई ।
[4]माहिंदे [5]अपराजिय-पीइमई आरणे [6]तत्तो ॥ १२ ॥

संखो जसमई भज्जा, ततो अपराजिए विमाणम्मि ।
नेमि-राईमई-चिय, नवमभवे दोवि वंदामि ॥ १३ ॥

कण्हो तइय पुढवीओ उवट्टित्ता, भारहे वासे सयदुवारे नयरे । पत्तमंडलियभवो, पव्वज्जं पडिवज्जिय, तित्थयरनामं पवज्जित्ता, वेमाणिए उववज्जित्ता, दुवालसमो-अमम नाम तित्थयरो भविस्सइ ॥

प्रद्युम्ननुं हरण थयुं त्यारे भारतमां विशिष्टज्ञानी न हता

गतेऽतिमुक्ते मुक्तिं नो, ज्ञानी कोऽप्यस्ति भारते। श्लोकार्धः

पांडवोनी पत्नीओनुं वर्णन

सा सानुरागा चिक्षेप, स्वयंवरणमालिकाम् ।
पञ्चानामपि कण्ठेषु, युगपत्पाण्डुजन्मनाम् ॥ १४ ॥
लक्ष्मीवतीं वेगवतीं, सुभद्रां विजयां रतिम् ।
ददुः क्रमात् पाण्डवेभ्यो, दशार्हा निजकन्यकाः ॥ १५ ॥

अंबादेवीनो संबंध

देवि ! त्वया पूर्वभवे तपांसि दानानि तीर्थाश्रयानि यानि कृतानि तेन त्वं यद्व्यन्तरसुन्दरीणां जातासि नः स्वामिनी सेवनीया ॥

श्रीनेमिनाथांङ्घ्रि-सरोजभृङ्गी, योगीश्वरी प्रार्थितकामधेनुः ।
अम्बा जनाम्बा त्रिदशी सुखाय, भूयात्करालम्बितराम्रलुम्बी॥१६॥

### तीर्थंकरोना नहि परणेला संबंधी मतांतर

मल्लिर्नेमिः पार्श्व इति, भाविनोऽपि त्रयो जिनाः ।
अकृतोद्वाहसाम्राज्याः, प्रव्रजिष्यन् विमुक्तये ॥ १७ ॥

### छद्मस्थ महावीरभगवानने सविमान वंदनकरवा आवेला चंद्र अने सूर्य

तत्रार्केन्दू सविमानौ, जिनेन्द्रं प्रतिमस्थितम् ।
भक्त्याभ्येत्य ववन्दाते, सुयात्राप्रश्नपूर्वकम् ॥ १८ ॥
(पर्व १० सर्ग ४ श्लो. ३३९)

### चेडाराजानी आराधना

तदा चानशनं कृत्वा, स्मृत्वा, पञ्चनमस्क्रिया ।
चेटको न्यपतत्कूपे, बद्धा यः पुत्रिको गले ॥ १९ ॥

तदा तदासनास्थैर्या–दागत्य धरणाधिपः ।
साधर्मिकं तमादाय, निनाय भवने निजे ॥ २० ॥

विधायाराधनां सम्यक्, प्रपाल्यानशनं च तत् ।
तत्रस्थ प्राप्य पञ्चत्वं, चेटकः त्रिदिवं ययौ ॥ २१ ॥

### देवीए कुणिकराजाने वैशालीनगरीना पतननुं कहेल भावी

समणे जइ कुलवालए, मागहियं गणियं गमिस्सए ।
लायाय असोगचंदए, वेसालिं नगरिं गहिस्सए ॥ २२ ॥

### श्रेणिकराजानी उत्पत्तिनो विचार

सेणिओ मओ पढमपत्थडे चउरासीइवाससहस्साऊ नारओ

जाओ। तओ उव्वट्टो, इहेव भारहे वासे महापउमनामा पढमतित्थयरो होहिसि।

अर्जुनमालीनो दीक्षार्थी उद्धार

प्रतिदिवसं सप्त जनान्, हत्वा संप्राप्य वीरजिनदीक्षाम्।
कृत्वाभिग्रहमसमं, षण्मास्या सोऽन्तकृज्जातः ॥ २३ ॥

सुदर्शन शेठ

अश्रौषीच्च जगन्नाथं, तीर्थनाथमुपागतम्।
वन्दितुं च ययौ तत्र, श्रद्धासम्भृतमानसः ॥ २४ ॥

वलभीपुरनो भंगनुं भावी कथन

का त्वं सुन्दरि जल्प दैवीसदृशे किं कारणं रोदिषि,
भङ्गं श्रीवलभीपुरस्य भगवन् पश्याम्यहं ग्रन्थदः।
भिक्षायां रुधिरं भविष्यति पयो लब्धं अवन्त्याश्रुभिः,
स्थातव्यं मुनिभिस्तदैव रुधिरं यस्मिन्पयो जायते ॥ २५ ॥

पणसयरीवासाइं, तिन्निसयाइं अइक्कमेऊणं।
विक्कमकालाउ तओ, वलहीभंगो समुप्पन्नो ॥ २६ ॥

दिगंबर अने पुनमिया गच्छनी उत्पत्ति

छच्च सयाइं नवुत्तराइं, तइआ सिद्धिं गयस्स वीरस्स।
तो बोडिआण दिट्ठी, रहवीरपुरे समुप्पन्ना ॥ २७ ॥

पुनमीया गच्छना आद्यसूरि

दुर्वादिद्विरदांकुशः, समयविच्छ्रेणीशिरोमण्डनं,
श्रीचन्द्रप्रभसूरिराट्, स भगवान् प्राचीकरत्पूर्णिमाम् ॥ २८ ॥

हरिभद्रसूरि महाराजना गुरुनी ओळखाण

समाप्ता चेयं शिष्यहिता नामावश्यकटीका कृतिः सिताम्बराचार्यजिनभद्रनिगदानुसारिणो विद्याधरकुलतिलकाचार्यजिनदत्तशिष्यस्य धर्मतो याकिनीमहत्तरसूनोः अल्पमतेराचार्यहरिभद्रस्य ॥

देवर्द्धिने हरिणगमेषिनुं संसार त्याग माटे सूचन

स्वभित्तिलिखितं श्लोकं (पत्रं), मित्र त्वं सफलीकुरु ।
हरिणगमेषी वक्ति, संसारं विषमं त्यज ॥ २९ ॥

माघ कविनी अंत्यावस्थानी स्थिति

सेवन्ते स्म गृहं यस्य, दासवद्भुभुजः पुरा ।
हाऽद्य भार्यासहायोऽयं, म्रियते माघपण्डितः ॥ ३० ॥

श्रीवस्तुपाल मंत्रीश्वरे करेली संघभक्ति

पुरप्रतोलीमारभ्य, मन्त्रीश्वरगृहावधि ।
एकच्छायोऽभवत्पन्था, नव्योल्लोचैस्तदोच्छ्रितैः ॥ ३१ ॥
प्रातराकारिताः सर्वे, राजहंसा इवोज्ज्वलाः ।
विशुद्धोभयपक्षास्ते, सङ्घेशाः सपरिच्छदाः ॥ ३२ ॥
सदाचाराः समं प्रापु-रष्टादशशतानि च ।
पद्माकरतयाख्यातं, मन्त्रीराजगृहाङ्गणम् ॥ ३३ ॥
मुक्ताफलैः फलैर्लाजैः, सलज्जा ललीता सती ।
सङ्घं वर्धापयामास, निजगेहाङ्गणागतम् ॥ ३४ ॥

प्रत्येकं सचिवस्तेषां, सर्वेषां मुदितस्तदा ।
दुग्धैर्गन्धोदकैः कोष्णैः, पदाम्भोजानि धौतवान् ॥ ३५ ॥
तेजःपाल ! कृपालु धुर्य विमल प्राग्वाटवंशध्वज ॥

अकबर बादशाहनो पूर्वजन्म

वसु-निधि-शर-चन्दे, तीर्थराजे प्रयागे ।
तपसि बहुलपक्षे, द्वादशीपूर्वयामे ॥
शिखिनि तनु जुहोभ्यखंडभूम्याधिपत्ये ।
सकलदुरितहारी ब्रह्मचारी मुकुन्दः ॥ ३६ ॥

नर्मदासुंदरीने साधुनो श्राप

ताम्बूलरसमक्षेप्सी-त्सोऽपतन् मुनिमस्तके ।
ततः प्रकुपितः स्माऽऽह, साधुर्भृकुटिभीषणः ॥ ३७ ॥
याऽऽच्छोटयति मां पापा, सा भूयात्प्रियवर्जिता ।
ममाऽभक्तिफलं प्राप्य, स्वाद्यतां शोकजो रसः (युग्मम्) ॥३८॥
तच्छ्रुत्वा वचनं क्रूरं, दुःसहं चक्रपातवत् ।
उत्तीर्य जालकादाशु, वस्त्रैर्मुनिममार्जयत् ॥ ३९ ॥
अपतत्पादयोस्तस्य, निन्दन्ती बहुशः कृतम् ।
दैन्येन विनयेनाऽपि, क्षमयस्वेदमाख्यत ॥ ४० ॥
अक्षिपं दुःखपाथोधौ, चात्मानं त्वदभक्तितः ।
अभुक्ष्वं भोगसौख्यानि, मुक्तताम्बूलदम्भतः ॥ ४१ ॥
निंद्येभ्योऽपि निंद्याऽहं, पापेभ्योऽपि च पापिनी ।
यन्मया चक्षुषा साधु-र्वीक्षितो न हितेच्छया ॥ ४२ ॥

अभव्योनां नाम

[१]संगमो य [२]कालसूरी, [३]कविला [४]अंगार-[५]पाल[६]या दोवि ।
[७]नो जीव[८]गुट्ठमाहिला, [९]उदाइनिवमारओ अभव्वा ॥ १ ॥

[१]संगम-[२]कालयसूरी, [३]कविला [४]अंगार-[५/६]पालया दोवि ।
एए सत्त अभव्वा, [७]उदाइनिवमारओ चेव ॥ २ ॥

अभव्योनुं पूर्वनुं ज्ञान पण द्रव्यश्रुत

अभव्यानां पूर्वधरलब्धेरभावाद् द्रव्यश्रुतमेव लभते ॥
किञ्चिदूनानि दशपूर्वाणि यावल्लभते ॥

अभव्योने जिनेश्वरदेवथी पण बोध थतो नथी

सर्वस्यापि तमो नष्टमुदिते जिनभास्करे ।
कौशिकानामिवान्धत्व-मभव्यानामभूच्च तत् ॥ ३ ॥

वह्निनापि न सिद्ध्यन्ति, यथा कङ्कडुका कणाः ।
तथा सिद्धिरभव्यानां, जिनेनापि न जायते ॥ ४ ॥

यथोखरक्षितौ धान्यं, न स्याद्वृष्टेऽपि नीरदे ।
बोधो न स्यादभव्यानां, जिनदेशनया तथा ॥ ५ ॥

## १६१ तिथिचर्चासूक्तानि

तिथिश्च प्रातःप्रत्याख्यानवेलायां या स्यात् सा प्रमाणं सूर्योदयानुसारेण लोकेपि दिवसादिव्यवहारात् ।

जे तिथिमां सूर्य उगे ते दिवसे तेज तिथि गणाय

आहुरपि--

चाउम्मासिअ वरिसे, पक्खिय पंचट्ठमीसु नायव्वा ।
ताओ तिहिओ जासिं, उदेइ सूरो न अन्नाओ ॥ १ ॥

जे तिथिमां सूर्य उग्यो होय तेज तिथिमां पूजादि कार्य करवां

पूआ पच्चक्खाणं, पडिक्कमणं तहय नियमगहणं च ।
जीए उदेइ सूरो, तीइ तिहीए उ कायव्वं ॥ २ ॥

बीजीमां करे तो आज्ञाभंगादि दोषो लागे

उदयंमि जा तिही सा, पमाणमि अ रीइ कीरमाणीए ।
आणाभंगणवत्था–मिच्छत्त विराहणं पावे ॥ ३ ॥

तथा पाराशरस्मृत्यादौ--

आदित्योदयवेलायां, या स्तोकापि तिथिर्भवेत् ।
सा संपूर्णेऽह्नि मन्तव्या, प्रभूता नोदयं विना ॥ ४ ॥

छन्हं तिहीणमज्झे, का तिही अज्जवासरे ।
किं वा कल्लाणगं अज्ज, लोगनाहाण संतियं ॥ ५ ॥

यदुक्तं पंचमांगे--

अट्ठमी--चउदसी--पुन्निमा य,
तहमावसा हवइ पव्वं ।
मासम्मि पव्वछक्कं, तिन्निय पव्वाइं पक्खम्मि ॥६॥

उमास्वाति प्रघोष

क्षये पूर्वा तिथिः कार्या, वृद्धौ कार्या तथोत्तरा ।
श्रीवीरज्ञाननिर्वाणं, कार्यं लोकानुगैरिह ॥ ७ ॥

## १६२ सन्ध्यानिषेधकार्यसूक्तानि

संध्या वखते टाळवा योग्य चार वस्तुओ

चत्वारि खलु कर्माणि, संध्याकाले विवर्जयेत् ।
*आहारं मैथुनं निद्रां, स्वाध्यायं च विशेषतः ॥ १ ॥*

आहाराज्जायते रोगा, दुष्टगर्भश्च मैथुनात् ।
निद्रातो धननाशः स्यात्, स्वाध्यायान्मरणं भवेत् ॥ २ ॥

चार संध्याए स्वाध्याय न करवो

संझा चउवि अणुदये सूरिये, मज्झण्हिं अत्थमणे ।
अद्धरत्ते एयासु चउसु सज्झायं न करिंति ॥ ३ ॥

## १६३ वैद्यलक्षणसूक्तानि

वैद्यना गुणो

कालज्ञानविदांवरो मधुरवाक् शान्तः शुचिः शास्त्रवि-
द्धीरो धर्मपरो निदानचतुरो रोगप्रयोगे पटुः ।
सन्तुष्टः सदयोऽपमृत्युभयहृन्मृत्युक्षणज्ञो गुणी,
सम्मूढः प्रतिकारकर्मणि न यो वन्द्यः स वैद्योत्तमः ॥ १ ॥

आयुर्वेद कृताभ्यासः, सर्वज्ञः प्रियदर्शनः ।
आर्यशीलः प्रसन्नात्मा, वैद्य एषोऽभिधीयते ॥ २ ॥

पांच प्रकारना वैद्यो आदर पामता नथी

पञ्च वैद्या न शोभन्ते, धन्वन्तरिसमा यदि ।
कुचेलः कर्कशः स्तब्धः, स्वाधीनः स्वयमागतः ॥ ३ ॥

## १६४ ज्योतिषसूक्तानि

विवाहादि निषेध वखत

गुरुक्षेत्रगते भानौ, भानुक्षेत्रे गते गुरौ ।
विवाहादि न कुर्वन्ते, वाञ्छन् शुभपरंपराम् ॥ १ ॥

आठमथी युक्त गुरु तजवा योग्य. चौदशे शनी प्रशस्त.

गुरुरप्यष्टमीयुक्तः, त्यज्यते शुभकर्मणि ।
मन्दोऽपि शस्यते तज्ज्ञै-श्चतुर्दश्यामुपागतः ॥ २ ॥

छत्रयोग

द्वितीये द्वादशे मूर्त्तौ, सप्तमे भवने ग्रहाः ।
छत्रयोगस्तदा ज्ञेयः, पुत्रो जातो नृपो भवेत् ॥ ३ ॥

सिंहासन योग

धने व्यये रिपुस्थाने, मृत्युस्थाने यदा ग्रहाः ।
योगः सिंहासनो नाम, देवानामपि दुर्लभः ॥ ४ ॥

बलयोग

तृतीये पञ्चमे स्थाने, नवमैकादशे ग्रहाः ।
बलयोगः तदाख्यातः, सर्वसौख्यकरः सदा ॥ ५ ॥

जीवयोग

चन्द्रात् सप्तमगो जीवो-ऽथवा स्याच्चन्द्रसंयुतः ।
जीवयोगं तमित्याहुः, चिरायुः सुखवान् भवेत् ॥ ६ ॥

चतुःसागर योग

केन्द्रस्थानेषु सर्वेषु, (१-४-७-१०) यदि सौम्यग्रहास्तदा ।
चतुःसागरयोगोऽयं, देवानामपि दुर्लभः ॥ ७ ॥

## १६५ सामुद्रिके स्वप्नादिसूक्तानि

अलंकृतानां द्रव्याणां, वाजिवारणयोस्तथा ।
वृषभस्य च शुक्लस्य, दर्शने चाप्नुयाद्यशः ॥ १ ॥

मुत्रं वा कुरुते स्वप्ने, पुरीषं चापि लोहितम् ।
प्रतिबुद्ध्येत यः सोऽर्थनाशं प्राप्नोति निश्चितम् ॥ २ ॥

गजारोहणाद्भवेद्राज्यं, श्रीप्राप्तिः श्रीफलागमात् ।
पुत्राप्तिर्फलिताम्रस्य, सौभाग्यं माल्यदर्शनात् ॥ ३ ॥

अंगस्फुरण विचार

सिरफुरणे किर रज्जं, पियमेलो होइ बाहुस्फुरणम्मि ।
अच्छिफुरणंमि अ पियं, अहरे पियसंगमो होइ ॥ ४ ॥

शिरसः स्फुरणे राज्यं, हृदयस्फुरणे सुखम् ।
बाह्वोश्च मित्रमेलापो, जङ्घयोर्भोगसम्भवः ॥ ५ ॥

## १६६ अनेकार्थशब्दसूक्तानि

पद शब्दना अर्थ

पदं स्थाने विभक्त्यन्ते, शब्दे वाक्यैकवस्तुनः ।
त्राणे पादे पादचिह्ने, व्यवसायप्रदेशयोः ॥ १ ॥

तुला शब्दना अर्थ

तुलासूत्रेऽश्वादिरश्मौ, सुवर्णे हलिपादपे ।
बन्धने किरणे बन्धां, भुजे च प्रग्रहं विदुः ॥ २ ॥

योग शब्दना अर्थ

जोगो विरियं थामो, उच्छाह परकमो तहा चिट्ठा ।
सत्ती सामत्थं चिय, जोगस्स हवंति पज्जाया ॥ ३ ॥

योगो वीर्यं स्थाम, उत्साहः पराक्रमस्तथा चेष्टा ।
शक्तिः सामर्थ्यं चैव, योगस्य भवन्ति पर्यायाः ॥ ४ ॥

लक्ष्मी शब्दना अर्थ

लक्ष्मीः पद्मा रमा या मा, ता सा श्रीः कमलेन्दिरा ।
हरिप्रिया पद्मवासा, क्षीरोदतनयापि च ॥ ५ ॥

महानंद शब्दना अर्थ

महानन्दोऽमृतं सिद्धिः, कैवल्यमपुनर्भवः ।
शिवं निःश्रेयसं श्रेयो, निर्वाणं ब्रह्मनिर्वृत्तिः ॥ ६ ॥

महोदयः सर्वदुःख-क्षयो निर्वाणमक्षरम् ।
मुक्तिर्मोक्षोऽपवर्गोऽथ, मुक्तिपर्यायवाचकाः ॥ ७ ॥

आंबील शब्दना अर्थ

आंबील नरस जलं, दुप्पायं धाउसोसणं ।
कामग्घं मंगलं सीयं, एगट्ठा अंबिलस्सावि ॥ ८ ॥

ॐकारमां ब्रह्मा-विष्णु अने महेश

अकारो विष्णुरुद्दिष्ट, उकारस्तु महेश्वरः ।
मकारस्तु स्मृतो ब्रह्मा, प्रणवस्तु त्रयार्थकः ॥ ९ ॥

निर्वाण शब्दना अर्थ

निर्वाणं निर्वृत्तौ मोक्षे, विनाशे गजमज्जने । श्लोकार्धः

अष्टमूर्तिनां नाम

पृथ्वी[१] सलिलं[२] तेजो[३], वायुराकाशमेव[४,५] च ।
सूर्य[६] चन्द्रमसौ[७] सोमयाजी[८] चेत्यष्टमूर्त्तयः ॥ १० ॥

क्षत्रिय शब्दनी व्युत्पत्ति

क्षतात्किल त्रायते इत्युदग्रः, क्षत्रस्य शब्दो भुवनेषु रूढः ।
राज्येन किं तद्विपरीतवृत्तेः, प्राणैरुपाक्रोशमलीमसैर्वा ॥११॥

नित्यनुं लक्षण

अप्रच्युतानुत्पन्नस्थिरैकस्वभावं नित्यम् ।

अनित्यनुं लक्षण

अताद्वस्थ्यमनित्यम् ।

मंगलना भेद तथा तेनां नाम

मङ्गलं त्रिविधं प्रोक्तं, शास्त्रादीनां मुखादिषु ।
आशीर्वादनमस्कार-वस्तुनिर्देशभेदतः ॥ १२ ॥

धर्म शब्दना अर्थ

धर्मो यमोपमापुण्य--स्वभावाचारधन्वसु ।
सत्सङ्गेऽर्हत्यहिंसादौ, न्यायोपनिषदोरपि ॥ १३ ॥

पतंग शब्दना अर्थ

पतङ्गो द्योतयन् विश्वं, कस्य नानन्दकारणम् ।
प्रदीपरूपमालोक्य, पतङ्गो नाथमाश्रितः ॥ १४ ॥

सं सोक्खंति पवुच्चइ, दिट्ठे तं होइ सव्वजीवाणं ।
तो संभवो जेणेसो, सव्वे वि हु संभवा एवं ॥ १५ ॥

परिप्लवः परिपेलवः असारः निस्सारः अर्थाद् औपशमिकादिप्रशस्तभावहीनः अव्यभिचारिमोक्षसाधनहीनः इति पर्यायाः ।

## १६७ श्रीलोकोक्ति कहेवतो

अव्याक्षेपो भविष्यन्त्याः, कार्यसिद्धे हि लक्षणम् ॥ श्लोकार्धः
चित्तोत्साहो भविष्यन्त्याः, कार्यसिद्धे हि लक्षणम् ॥ श्लोकार्धः
भवन्ति भाविभावानां, कालचेष्टा हि सूचकाः ॥ श्लोकार्धः
कुर्वन्ति न हि शास्त्रज्ञाः कार्यं शकुनवारितम् ॥ श्लोकार्धः
शतशोऽपि भवान् याति, संस्कारः स्नेहवैरयोः ॥ श्लोकार्धः
नहीर्ष्ययापि विहितं, दर्शनं विफलं सताम् ॥ श्लोकार्धः
एकद्रव्याभिलाषो हि, परमं वैरकारणम् ॥ श्लोकार्धः
वैराग्यमातरं श्रुत्वा, देशनां भवनाशनीम् ॥ श्लोकार्धः

भवेत्रिभुवनेनापि, भक्तिः पूर्णा हि नाऽर्हताम् ॥ श्लोकार्धः
सङ्गः सत्पुरुषाणां हि, सर्वकल्याणकामधुक् ॥ श्लोकार्धः
स्त्रीधनायुष्कभोज्येषु, प्रायोऽतृप्ता हि जन्तवः ॥ श्लोकार्धः
वयो मात्रेण न गुरुर्गुरुवदाचरन् ॥
न हि तन्त्रान्तरीयाः सर्वथैव विपरीतवादिनः ॥
विकारहेतौ सति विक्रियन्ते, येषां न चेतांसि त एव धीराः ॥ श्लोकार्धः
यत्पूर्वं विधिना ललाटलिखितं तन्मार्जयितुं कः क्षमः ॥
धन्यानामेव जायन्ते जाताश्चारित्रधारिणः ॥ श्लोकार्धः
उल्लङ्घयन्ति तत्त्वज्ञा, गुरुवाक्यं न कर्हिचित् ॥ श्लोकार्धः
प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ॥ श्लोकार्धः
एकाकिना न गन्तव्यं, यदि कार्यशतं भवेत् ॥ श्लोकार्धः

## १६८ पौराणिकमान्यताखंडनसूक्तानि

शुद्र पण ब्राह्मण अने ब्राह्मण पण शुद्र कहेवाय

शुद्रोपि शीलसम्पन्नो, गुणवान् ब्राह्मणो मतः ।
ब्राह्मणोपि क्रियाहीनः, शुद्रापत्यसमो भवेत् ॥ १ ॥

सर्वजातिषु चाण्डालाः सर्वजातिषु ब्राह्मणाः ।
ब्राह्मणेष्वपि चाण्डाला—श्चाण्डालेष्वपि ब्राह्मणाः ॥ २ ॥

पांच यमने नही सेवनार ब्राह्मण पतित छे.

हिंसकोऽनृतवादी च, चौर्ये चाभिरतश्च यः ।
परदारोपसेवी च, सर्वे ते पतिता द्विजाः ॥ ३ ॥

सर्व जातिमां ब्राह्मणो होइ शके

ब्रह्मचर्यतपोयुक्ताः, समानलोष्ठकाञ्चनाः ।
सर्वभूतदयावन्तो, ब्राह्मणाः सर्वजातिषु ॥ ४ ॥

तेनां उदाहरणो

कैवर्तीगर्भसंभूतो, व्यासो नाम महामुनिः ।
तपसा ब्राह्मणो जातः, तस्माज्जातिरकारणम् ॥ ५ ॥
हरिणीगर्भसंभूत, ऋष्यश्रृंगो महामुनिः ।
तपसा ब्राह्मणो जातः, तस्माज्जातिरकारणम् ॥ ६ ॥
यः शुकीगर्भसंभूतः, शुको नाम महामुनिः ।
तपसा ब्राह्मणो जातः तस्माज्जातिरकारणम् ॥ ७ ॥
मण्डूकीगर्भसंभूतो, माण्डव्यश्च महामुनिः ।
तपसा ब्राह्मणो जातः, तस्माज्जातिरकारणम् ॥ ८ ॥
उर्वशीगर्भसंभूतो, वशिष्टश्च महामुनिः ।
तपसा ब्राह्मणो जातः, तस्माज्जातिरकारणम् ॥ ९ ॥
न तेषां ब्राह्मणी माता, संस्काराश्च न विद्यते ।
तपसा ब्राह्मणा जाताः, तस्माज्जातिरकारणम् ॥ १० ॥

ब्रह्मा-विष्णु अने महादेव एकमूर्ति माननार विचारे

प्रजापतिसुतो ब्रह्मा, माता पद्मावती स्मृता ।
अभिजिज्जन्मनक्षत्र-मेकमूर्तिः कथं भवेत् ॥ ११ ॥

वसुदेवसुतो विष्णु-र्माता वै देवकी स्मृता ।
श्रवणं जन्मनक्षत्र-मेकमूर्तिः कथं भवेत् ॥ १२ ॥
पेढालस्य सुतो रुद्रो, माता वै सत्यकी स्मृता ।
मूलं तु जन्मनक्षत्र-मेकमूर्तिः कथं भवेत् ॥ १३ ॥
रक्तवर्णो भवेद्ब्रह्मा, श्वेतवर्णो महेश्वरः ।
कृष्णवर्णो भवेद्विष्णु-रेकमूर्तिः कथं भवेत् ॥ १४ ॥
चतुर्मुखो भवेद्ब्रह्मा, त्रिनेत्रस्तु महेश्वरः ।
चतुर्भुजो भवेद्विष्णु-रेकमूर्तिः कथं भवेत् ॥ १५ ॥
हंसवाहो भवेद्ब्रह्मा, वृषवाहस्तु महेश्वरः ।
गरुडयानो भवेद्विष्णु-रेकमूर्तिः कथं भवेत् ॥ १६ ॥
पद्महस्तो भवेद्ब्रह्मा, शूलपाणिर्महेश्वरः ।
[1]शङ्खचक्रधरो विष्णु-रेकमूर्तिः कथं भवेत् ॥ १७ ॥

महादेवनुं परस्पर विरुद्ध चेष्टित

दिग्वासा यदि तत् किमस्य धनुषा सास्त्रस्य किं भस्मना,
भस्माथास्य किमङ्गना तदपि किं कामं परिद्वेष्टि किम् ।
इत्यन्योन्यविरुद्धचेष्टितमिदं स्वस्वामिनश्चिन्तयन्,
भृङ्गी शुष्कशिरापिनद्धशिरसो धत्तेऽस्थिशेषं वपुः ॥ १८ ॥

ब्राह्मणोज धर्मना अधिकारी छे ते मान्यता बराबर नथी.

मुखजानामयं धर्मो, यद्विष्णोर्लिङ्गधारणम् ।
बाहुजातोरूजातानामयं धर्मो न विद्यते ॥ १९ ॥

---

१- चक्रपाणि र्भवेद्विष्णुः ।

इति निषेधाद्ब्राह्मणस्यैव प्रव्रज्या न क्षत्रियादेः, तथापि यदहरेव विरजेत् तदहरेव प्रव्रजेत्, तथा त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमा, इति सूत्रकारवचनम् ॥

## १६९ उत्तमादिपुरुषदर्शकसूक्तानि

उत्तम-मध्यम अने अधमनी ओळखाणो

कर्माहितमिह चामुत्र, चाधमतमो नरः समारभते ।
इह फलमेव त्वधमो, विमध्यमस्तूभयफलार्थम् ॥ १ ॥

परलोकहितायैव, प्रवर्तते मध्यमः क्रियासु सदा ।
मोक्षायैव तु घटते, विशिष्टमतिरुत्तमः पुरुषः ॥ २ ॥

तुच्छ देहस्य सौन्दर्याद्रज्यन्ते मध्यमा गिराम् ।
चित्तस्य तूत्तमा जीवे, त्रयमेकत्र दुर्लभम् ॥ ३ ॥

उत्तमा ह्यात्मचिन्ता च, मोहचिन्ता च मध्यमाः ।
अधमाः कामचिन्ता च, परचिन्ताऽधमाधमाः ॥ ४ ॥

न काञ्चनसमाश्रितः, श्रियमियर्ति काचोऽधिकाम् ।
न वापरुचितां व्रजत्यपमलो मणिः केवलः ॥ ५ ॥

लब्ध्वापि सम्पदो दीनो, हीनत्वं नैव मुञ्चति ।
शिरच्छेदेऽपि धीरस्तु, वीरत्वं नैव मुञ्चति ॥ ६ ॥

सज्जनानां वचो द्रव्य-सहस्रादतिरिच्यते ।
स्निग्धश्चालोकितं लक्षात्, सौहार्दं कोटितस्तथा ॥ ७ ॥

जलधूलीधरित्र्यादि-रेखावदितरन्नृणाम् ।
परं पाषाणरेखेव, प्रतिपन्नं महात्मनाम् ॥ ८ ॥

आटला माणसो पोताना तुल्यने सहन करता नथी

कुलवान् धनवान् विद्वान्, क्रियावान् नृपमानवान् ।
नृपस्तपस्वी दाता च, स्वतुल्यं सहते न हि ॥ ९ ॥

सत्पुरुषोनो क्रोध नीचना स्नेह जेवो होय

न भवति भवति च न चिरं, भवति चिरं चेत् फले विसंवदति ।
कोपः सत्पुरुषाणां, तुल्यः स्नेहेन नीचानाम् ॥ १० ॥

विश्वस्तं ये विघ्नन्ति, स्वामिनं ये नराधमाः ।
धर्माक्षरप्रदातारं, स्वं मन्यन्ते न ये गुरुम् ॥ ११ ॥

दुर्लभं संयमं प्राप्य, ये त्यजन्ति नराधमाः ।
अदुष्टापतितां भार्यां, ये त्यजन्ति विना व्रतम् ॥ १२ ॥

वियोजयन्ति ये बालान्, गवां स्त्रीणां गृहेण वा ।
तेषां पापेन लिप्येऽहं, यदि गृह्णामि ते प्रियाम् ॥ १३ ॥

## १७० पुरुषार्थ सूक्तानि

चार पुरुषार्थ संबंधी प्रश्न अने तेनी व्याख्या

धर्मार्थकाममोक्षाख्या-नमून् शास्त्रसमर्थितान् ।
चतुरः पुरुषार्थान् मे, पुरश्चतुर ! वर्णय ॥ १ ॥

अर्थस्य मूलं निकृतिः क्षमा च,
कामस्य वित्तं च वपुर्वयश्च ।

धर्मस्य दानं च दया दमश्च,
मोक्षस्य सर्वोपरमः क्रियाश्च ॥ २ ॥

धर्मार्थौ तावनर्थौ हि, कामान् जनयतोऽत्र यौ ।
तस्मात्र धर्मार्थौ चाथ, अर्थौ कामफलौ मतौ ॥ ३ ॥

किन्तु मोक्षफलावेव, पुरुषार्थाविमौ मतौ ।
अलौकिक मोक्षोऽयं, मुनिलोकविलोकनात् ॥ ४ ॥

जन्मादिबाधाहीनश्च सर्वोत्तमसुखप्रदः ॥ श्लोकार्धः

चार पुरुषार्थनुं स्वरूप

तत्त्वरत्नत्रयाधारः, सर्वभूतहितप्रदः ।
चारित्रलक्षणो धर्मः, कस्य शर्मकरो न हि ॥ ५ ॥

हिंसास्तेयपरद्रोह–मोहक्लेशविवर्जितः ।
सप्तक्षेत्रोपयोगी स्या–दर्थोऽनर्थविनाशकः ॥ ६ ॥

जातिस्वभावगुणभृल्लुप्तान्यकरणः क्षणम् ।
धर्मार्थाबाधकः कामो, दम्पत्योर्भावबन्धनम् ॥ ७ ॥

कषायदोषापगतः, साम्यवान् जितमानसः ।
शुक्लध्यानमयः स्वात्मा–ऽध्यक्षो मोक्ष उदीरितः ॥ ८ ॥

## १७१ विविधविषयविचारणासूक्तानि

अमोघ वस्तुओ

अमोघा वासरे विद्यु–दमोघं निशि गर्जितम् ।
अमोघा चोत्तमा वाणी, अमोघं देवदर्शनम् ॥ १ ॥

बदलो वाळी न शकाय तेवा चार

जननी जनकः स्वामी, गुरुश्चापि विशेषतः ।
यतो दुष्प्रतिकार्याणि, चत्वार्येतानि सर्वथा ॥ २ ॥

नाम लेवाने पण अयोग्य

प्रत्यनीका गुरौ ये च, ये च विश्वासघातकाः ।
बालस्त्रीघातका ये च, ते स्युरग्राह्यनामकाः ॥ ३ ॥

शोकना भाइओ

देहक्षयो जने हास्यं, दीनत्वं बुद्धिविस्मृतिः ।
प्रारब्धकार्यनाशश्च, शोकस्यैते सहोदराः ॥ ४ ॥

विवेक

यः काकिणीमप्यपथप्रपन्ना--मन्वेषते निष्कसहस्रतुल्याम् ।
कालेन कोटिष्वपि मुक्तहस्त-स्तस्यानुबन्धं न जहाति [लक्ष्मीः

अवसरोचित कार्य

उत्पद्यते हि साऽवस्था, देशकालभयान् प्रति ।
यस्यामकार्यं कार्यं स्यात्, कर्मकार्यं च वर्जयेत् ॥ ६ ॥

गर्भनो क्रम

सप्ताहं कललं विद्यात्, ततः सप्ताहमर्बुदम् ।
अर्बुदाज्जायते पेशी, पेशीतोपि घनं भवेत् ॥ ७ ॥

सात धातुना नाम

रसासृग्मांसमेदोऽस्थि-मज्जानः शुक्रसंयुताः ।
शरीरस्था इमे ज्ञेयाः, पण्डितैः सप्त धातवः ॥ ८ ॥

अग्निनी सात जीभो

१ २ ३ ४ ५
काली कराली मनोजवा च, सुलोहिता चैव सुधूम्रवर्णा ।

६ ७
उग्रा प्रदीप्ता च कुपीटयोनेः, सप्तैव कीलाः कथिताश्च जिह्वाः

दुर्भिक्षनुं कारण

पञ्चार्काः पञ्च भौमाश्च, पञ्च सूर्यसुतास्तथा ।
एकमासे यदायाता-स्तदा दुर्भिक्षसम्भवः ॥ १० ॥

महाजन कोण कहेवाय?

महाजनो येन गतः स पन्था, इति प्रसिद्धं वचनं मुनीनाम् ।
महाजनत्वञ्च महाव्रताना-मतस्तदुद्दिष्टं हि हितं मतं ते ।११।

बोधि बीजनुं कारण

जो च्चिय सुहभावो, खलु सव्वन्नुमयंमि होइ परिसुद्धो ।
सो च्चिय जायइ बीयं, बोहिए तेण णाणेण ॥ १२ ॥
जा च्चिय गुणपडिवत्ती, सव्वन्नुमयम्मि होइ पडिसुद्धा ।
सा च्चिय जायइ बीयं, बोहीए तेण णाणेण ॥ १३ ॥

अनंत संसारनां कारणो

तित्थयरपवयणसुअ-आयरियं गणहरं महिड्ढीअं ।
आसायंतो बहुसो, अणंतसंसारिओ होइ ॥ १४ ॥

आचार्यनी आठ संपद्

१ २ ३ ४ ५ ६ ७
आयार-सुय-सरीरे, वयणे-वायण-मई पयोगमई ।

८
एए सुसंपया खलु, अट्ठमिआ संगहपरिन्ना ॥ १५ ॥

जे सया संन्निहिं कामे, गिही पव्वइए न से ॥ श्लोकार्धः

मुत्रादिना रोधथी थतुं नुकशान

तिन्नि सल्ला महाराय, असिं देहे पइट्ठिया ।
वायमुत्तपुरीसाणं, पत्तवेगं न धारये ॥ १६ ॥

मुत्तनिरोहे चक्खू, वच्चनिरोहे जीवियं चयइ ।
उड्ढनिरोहे कोढं, गेलन्नं वा भवे तिसुवि ॥ १७ ॥

*मननां शल्य*

सामी अविसेसन्नू, अविणीओ परियणो परवसत्तं ।
भज्जा य अणणुरूवा, चत्तारि मणस्स सल्लाइं ॥ १८ ॥

सात प्रकारनां सुख

[१]ताम्बुलं [२]सिरिखण्डं, [३]सज्जगुट्ठी [४]सगोरसा साली ।
[५]मालइमाला [६]वाला, [७]वरगेयं सत्त सुक्खाइं ॥ १९ ॥

जेनी जेवी भावना तेवुं तेनुं फल

मन्त्रे देवे गुरौ तीर्थे, दैवज्ञे स्वप्नभेषजे ।
यादृशी भावना यस्य, सिद्धिर्भवति तादृशी ॥ २० ॥

देवांशी मनुष्यनुं लक्षण

देवपूजा दया दानं, दाक्षिण्यं दमदक्षते ।
यस्यैते षड् दकाराः स्युः, स देवांशी नरः स्मृतः ॥ २१ ॥

कुलटाओनी स्थिति

सुवेषं पुरुषं दृष्ट्वा, भ्रातरं यदि वा सुतम् ।
योनिः क्लिद्यति नारीणां, सत्यं सत्यं हि नारद ! ॥ २२ ॥

दरिद्रता नाशक उपाय

इक्षुक्षेत्रं समुद्रश्च, यानं पाषाण एव च ।
प्रसादो भूभुजां घ्नन्ति, क्षणादेव दरिद्रताम् ॥ २३ ॥

उत्तम पुरुष

यं प्रशंसन्ति राजानो, यं प्रशंसन्ति सज्जनाः ।
गुरवो यं प्रशंसन्ति, तमाहुः पुरुषोत्तमम् ॥ २४ ॥

पुराणना पांच प्रकार

सर्गश्च प्रतिसर्गश्च, वंशो मन्वन्तराणि च ।
वंशानुवंशचरितं, पुराणं पञ्चलक्षणम् ॥ २५ ॥

रोगोत्पत्तिना छ प्रकार

अत्यम्बुपानाद्विषमासनाच्च, दिवाशयाज्जागरणाच्च रात्रौ ।
सन्धारणान्मूत्रपुरीषयोश्च, षड्भिः प्रकारैः प्रभवन्ति रोगाः ॥

मूर्खने उपदेश नकामो

मूर्खाणामग्रतो वाचां, विलासो वाग्मिनां मुधा ।
लास्यं वेशस्त्रजां यद्वत्, पुरतोऽन्धसभासदाम् ॥ २७ ॥

आरोग्य विचार

दन्तानां मञ्जनं श्रेष्ठं, कर्णानां दन्तधावनम् ।
शिरोऽभ्यङ्गश्च पादानां, पादाभ्यङ्गश्च चक्षुषः ॥ २८ ॥

स्वर्गमांथी पाडनारी वस्तुओ

प्रभास्वं ब्रह्महत्या च, दरिद्रस्य च यद्धनम् ।
गुरुपत्नी देवद्रव्यं, स्वर्गस्थमपि पातयेत् ॥ २९ ॥

राजादिनी शुभदृष्टि लाभना माटे

राजवैद्यगुरूणां दृग्, दारिद्र्यव्याधिपापहृत् ।
पतत्युपरि कस्यापि, भाग्यस्याभ्युदये सति ॥ ३० ॥

मोतीनी उत्पत्तिनां स्थान

हस्तिमस्तकदन्तौ तु, दंष्ट्रा शुनवराहयोः ।
मघो भुजङ्गमो वेणुर्मत्स्यो मौक्तिकयोनयः ॥ ३१ ॥

संक्रामक रोग

ज्वरो भगन्दरः कुष्ठः, क्षयश्चैव चतुर्थकः ।
एते संस्पर्शतो रोगाः, संक्रामन्ति नरान्नरम् ॥ ३२ ॥

कमलनुं उपहासकारी नियमोनुं वर्णन

मर्तव्यं न निजेच्छया न वितथं वर्षे द्विपक्षीं विना,
वक्त्रे नाक्षतनालिकेरवदनक्षेपो न कार्यो मया ।
पक्वान्नेषु कवेल्लुकानि मिहिरस्नुह्यादि दुग्धानि च,
क्षीरेषु रुछगणं गणीन्द्र हरितेष्वाहारणीयं न मे ॥ ३३ ॥

पौराणिक मते सातनगरी मोक्षदायक

अयोध्या मथुरा माया, काशी काञ्ची अवन्तिका ।
पूरी द्वारवती चैव, सप्तैता मोक्षदायिकाः ॥ ३४ ॥

अजीर्णनां चिन्ह

मलवातयोर्विगन्धो, विड्भेदो गात्रगौरवमरुच्यम् ।
अविशुद्धश्चोद्गारः, षडजीर्णे व्यक्तलिङ्गानि ॥ ३५ ॥

संसारवृक्षनां बे उत्तमफल

संसारविषवृक्षस्य, द्वे एव रसवत्फले ।
काव्यामृतरसास्वादः, सङ्गमः सज्जनैः सह ॥ ३६ ॥

शास्त्र कोने कहेवाय

शास्त्रं तदुच्यते शास्ति, त्रायते च यदंहतः ।
तदिदं न भवत्येव, शास्त्रमंहसि पातनात् ॥ ३७ ॥

साहित्यनी व्याख्याना छ प्रकार

संहिता च पदं चैव, पदार्थः पदविग्रहः ।
चालना प्रत्यवस्थानं, व्याख्या तन्त्रस्य षड्विधा ॥ ३८ ॥

आसनोनां नाम

पर्यङ्कवीरवज्राब्जभद्रदण्डासनानि च ।
उत्कटिका गोदोहिका, कायोत्सर्गस्तथासनम् ॥ ३९ ॥

पुत्री पारकीज थाय

पितृभ्यां पालिताप्युच्चैः, परकीयैव पुत्रिका ।
यान्ति परगृहं पित्रोः, सर्वस्वं वा जिघृक्षति ॥ ४० ॥

ताडना सहनतुं फळ

पितृभिस्ताडितः पुत्रः, शिष्यश्च गुरुशिक्षितः ।
घनाहतं सुवर्णं च, जायते जनमण्डनम् ॥ ४१ ॥

अधिकारादिथी नरक प्राप्ति

अधिकारास्त्रिभिर्मासै-र्मठापत्यास्त्रिभिर्दिनैः ।
शीघ्रं नरकवाञ्छा चे-द्दिनमेकं पुरोहितः ॥ ४२ ॥

कोनी साथे केम वर्तवुं

उत्तमं प्रणिपातेन, शूरं भेदेन योजयेत् ।
नीचमल्पप्रदानेन, सदृशं च पराक्रमैः ॥ ४३ ॥

अपमानादिथी थयेल रोगादि अनेक भवोमां पण प्राप्त थाय छे.

अवमानात् परिभ्रंशा-द्वधबन्धनधनक्षयात् ।
प्राप्ता रोगाश्च शोकाश्च, जात्यन्तरशतेष्वपि ॥ ४४ ॥

नेतरना वृक्ष पासे सर्प झेर वगरनो बने छे

श्रूयते किल वेतसमवाप्य निर्विषा भवन्ति सर्पाः ॥

कुशळ मनुष्य अंधादिकने ज्यां लइ जाय त्यां जाय

अन्धो नरपते-श्चित्तं, व्याख्यानं महिला जलम् ।
तत्रैतानि हि गच्छन्ति, नीयन्ते यत्र शिक्षितैः ॥ ४५ ॥

कोण कोनो गुरु

गुरुरग्निर्द्विजातीनां, वर्णानां ब्राह्मणो गुरुः ।
पतिरेव गुरुः स्त्रीणां, सर्वस्याभ्यागतो गुरुः ॥ ४६ ॥

उत्तम पुरुषज रक्षक छे

अबलानामनाथानां, दीनानामथ दुःखिनाम् ।
परैश्च परिभूतानां, त्राता कः सत्तमात्परः ॥ ४७ ॥

पसंदगीना प्रकार

वरं वरयते कन्या, माता वित्तं पिता श्रुतम् ।
बान्धवाः स्वाजन्यं च, मिष्टान्नमपरे जनाः ॥ ४८ ॥

पृथ्वी उपर स्वर्ग

धनाढयता राजकुले च मानं,
प्रियानुकूला तनया विनीताः ।
धर्मे मतिः सज्जनसङ्गतिश्च,
षट्स्वर्गलोका जगतीतलेऽपि ॥ ४९ ॥

श्रीपालने विमलेश्वरे आपेल हारनुं महात्म्य

इच्छाकृतिर्व्योमगतिः कलासु प्रौढिर्जय सर्वविषापहारः ।
कण्ठस्थिते यत्र भवत्यवश्यं कुमार ! हारं तदमुं गृहाण ॥५०॥

व्याकरणना सूत्रोना छ प्रकार

संज्ञा च परिभाषा च, विधिनियमनिषेध एव च ।
अतिदेशोऽधिकारश्च, षड्विधं सूत्रलक्षणम् ॥ ५१ ॥

पृथ्वीना फलने भोगवनार त्रण व्यक्ति

सुवर्णपुष्पां पृथ्वीं, चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च, यश्च जानाति सेवितुम् ॥ ५२ ॥

तपस्यादिनां अजीर्ण

अजीर्णं तपसः क्रोधो, ज्ञानाजीर्णमहंकृतिः ।
परतप्तिः क्रियाजीर्ण–मन्नाजीर्णे विशुचिका ॥ ५३ ॥

बधानो रक्षक राजा

दुर्बलानामनाथानां, बालवृद्धतपस्विनाम् ।
अनार्यैः परिभूतानां, सर्वेषां पार्थिवो गतिः ॥ ५४ ॥

आ वस्तुओमां मुख न जोवुं

न तैले न जले नास्त्रे, न मुत्रे रुधिरे न च।
वीक्षते वदनं विद्वा–न्नित्थमायुस्तु हीयते: ॥ ५५ ॥

कोण कोनो मित्र

रोगिणां सुहृदो वैद्य:, प्रभूणां चाटुकारिण: ।
मुनयो दु:खदग्धानां, गणिकाक्षीणसम्पदाम् ॥ ५६ ॥

आ सातेय चोर कहेवाय

चौरश्चौरापको मन्त्री, भेदज्ञ: काणकक्रयी ।
अन्नद: स्थानदश्चैव, चोर: सप्तविध: स्मृत: ॥ ५७ ॥

ब्राह्मणादिने क्षमादि अशुभ

द्विजन्मन: क्षमा मातु–र्द्वेष: प्रेम पणस्त्रिया: ।
नियोगिनां च दाक्षिण्य–मरिष्टानां चतुष्टयम् ॥ ५८ ॥

मौन रहेवानां स्थान

भोजने मैथुने स्नाने, वमने दंतधावने ।
विडुत्सर्गे मुत्रत्यागे, मौनं कुर्यान्महामति: ॥ ५९ ॥

आ पांचे जीववा छतां मरेला

जीवन्तोऽपि मृता: पञ्च, व्यासेन परिकीर्तिता: ।
दरिद्री व्याधितो मूर्ख:, प्रवासी नित्यसेवक: ॥ ६० ॥

देशांतर जनारनी योग्यता

इन्द्रियाणि वशे यस्य, स्त्रीभिर्यो न विलुभ्यते ।
वक्तुं यो प्रतिजानाति, याति देशान्तराणि स: ॥ ६१ ॥

नबळा माणसोनो कोश

कलुषः कुटिलः कुण्डः, कितवः क्रोधनः कुधीः ।
कृतघ्नः कृपणः क्रूरः, कठोरः कोऽपि नाऽभवत् ॥ ६२ ॥

पृथ्वी उपरनां त्रण रत्नो

पृथिव्यां त्रिणि रत्नानि, जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु, रत्नसंज्ञाऽभिधियते ॥ ६३ ॥

मदनमंजरीनी पति माटे प्रतिज्ञा

शब्दवेधं धनुर्वेधं, भाषाः शिल्पकलाः समाः ।
यो वेत्ति स्पष्टमष्टाङ्ग–निमित्तं च स मे पतिः ॥ ६४ ॥

वस्तुओनु अंतर

वाजिवारणलोहानां, काष्टपाषाणवाससाम् ।
नारीपुरुषतोयाना–मन्तरं महदन्तरम् ॥ ६५ ॥

म्लेच्छ जातिओ

पुलिन्दा नाहला नेष्टाः, शबरा बरटा भटाः ।
माला भिल्लाः किराताश्च, सर्वेपि म्लेच्छजातयः ॥ ६६ ॥

संगीतना सात स्वरो

षड्जऋषभगान्धारा, मध्यमः पञ्चमस्तथा ।
धैवतो निषधः सप्त, तन्त्रीकण्ठोद्भवाः स्वराः ॥ ६७ ॥

राजकुलमां जवाथी फायदो

गन्तव्यं राजकुले, द्रष्टव्या राजपूजिता लोकाः ।
यद्यपि न भवंत्यर्था, भवंत्यनर्थप्रतिघाताः ॥ ६८ ॥

### सात विकार होवा छतां विकार रहित

१ २ ३ ४ ५ ६ ७
विभुताविक्रमविद्या-विदग्धतावित्तवितरणविवेकैः ।
यः सप्तभिर्विकारैः, कलितोऽपि बभार न विकारम् ॥ ६९ ॥

### षड्वर्गनो त्यागी सुखी थाय

कामः क्रोधस्तथा लोभो, हर्षो मानो मदस्तथा ।
षड्वर्गमुत्सृजेदेनं, तस्मिन् त्यक्ते सुखी भवेत् ॥ ७० ॥

### शांतिनुं स्वरूप

शमसंवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिलक्षणसम्यग्दर्शन-ज्ञानकलापः शान्तिरुच्यते ।

### हिन्दुनुं लक्षण

हिंसया दूयते चित्तं तेन हिन्दुरितीरितः ।

### निर्जरा अने मोक्षनो तफावत

ननु निर्जरामोक्षयोः कः प्रतिविशेषः उच्यते ! देशतः कर्मक्षयो निर्जरा, सर्वतस्तु मोक्षः ॥

### नमस्कारना पांच प्रकार अने व्याख्या

प्रहास-विनय-प्रेम-प्रभु-भावभेदतो नमस्कारः पञ्चधा ।
तत्र मत्सरेण अवहेलनया च कस्यापि यो नमस्कारः
स प्रहासः । पित्रादिभ्यो यः स विनयः । मित्रादीनां यः
स प्रेमः । पार्थिवादीनां यः स प्रभुः । गुर्वादिषु यः स भावः ।

### उर्ध्व अने अधो दिशानी ओळखाण

विमलेति वितिमिरत्वादूर्ध्वदिशो नामधेयं, तमेत्यन्धकारयुक्तत्वेन रात्रितुल्यत्वादधोदिशश्चेति ॥

### चरण अने करणनी समजण

चरणकरणयोः कः प्रतिविशेषः ? इति, अत्रोच्यते–नित्यानुष्ठानं चरणं, यत्तु प्रयोजनसमापन्ने तत्करणम् । तथा च व्रतादि सर्वकालं चर्यते न पुनः व्रतशून्यः कश्चित्कालः इति, पिण्डविशुद्ध्यादि तु प्रयोजने समापन्ने क्रियते ॥

### आत्मदमननी जरूर

अप्पा चेव दमेयव्वो, अप्पा हु खलु दुद्दमो ।
अप्पा दंतो सुही होइ, अस्सिं लोए परत्थ य ॥ ७१ ॥

### कोण शेमां शूर,

युद्धे सूरा वासुदेवा, क्षमासूरा अरिहंता ।
तपसूरा अणगारा, भोगसूरा चक्कवट्टी य ॥ ७२ ॥

### कामनी विषमता

सल्लं कामा विसं कामा, कामा आसीविसोपमा ।
कामे पत्थेमाणा, अकामा जन्ति दुग्गइं ॥ ७३ ॥

### वीतरागना सुख आगळ कामसुखनी तुच्छता

जं च काम सुहं लोए, जं च दिव्वं महासुहं ।
वीयरायसुहस्स तं, णंतभागं पि नग्घइ ॥ ७४ ॥

नरकनी दश प्रकारनी वेदना

नारया दसविहवेयण, सि-उसिण-खु-पिवास-कंडूहिं।
पारवसं च जर-दाह-भय-सोगं च वेयन्ति ॥ ७५ ॥

सोनाना आठ गुण

विसघाइ रसायण, मंगलत्थ विणए पयाहिणावत्ते।
गरुए अउज्झ कुट्ठे, अट्ठ सुवण्णे गुणा होंति ॥ ७६ ॥

उत्सुस्तच्चारनालाद्यं नवधा गणधारिणः।

उस्सेइमं संसेइमं, चाउलोदगं तिलतुसजवाणं।
आयामं सोवीरं सुद्धवियडं जलं नवहा ॥ ७७ ॥

राग-द्वेषमां चारे कषायो

रागे दुविहे-माया लोभे य, दोसे दुविहे-कोहे य माणे य ॥:
आचारकप्पमाइ सेसं सव्वं सुअं विणिदिट्ठमिति ॥

मिथ्यात्वादिथी भावितोने समजाववा मुश्केल

मिच्छत्तभावियाणं, दुवियड्ढमतीण वामसीलाणं।
आइक्खिउं विभइउं, उवणेउं वावि दुक्खं ॥ ७८॥

दश रसनां नाम

श्रृंगारवीरौ बीभत्सं, रौद्रं हास्यं भयानकम्।
करुणा चाद्भुतं शान्तं, वात्सल्यं च रसा दश ॥ ७९ ॥

अंजनासुन्दरीनो पश्चात्ताप

पाणिग्रहात्प्रभृति मुक्ताया स्वामिना मम ।
द्वाविंशति समा जग्मु-र्जीवाम्यद्यापि पापिनी ॥ ८० ॥

अभयकुमारनी विचारणा अने गुणो

नूनमासन्नभव्यः स, महात्मा राजपुत्रकः ।
अभव्यदुर्भव्यानां न, मया सख्यकामना ॥ ८१ ॥
गुणा न केऽपि ते सन्ति, येऽभये न कृतास्पदाः ।
जीवाकारा इवाम्भोधौ, स्वयंभूरमणाभिधे ॥ ८२ ॥

सारूं भोजन पण ठंडु थवाथी विरस बने छे

ततश्च शीतलीभूतं, सद्भोज्यं विरसं भवेत् ।
सदन्नेपि हि शीते स्या, द्वैरस्यं हि किं पुनः परे ॥ ८३ ॥

आ वस्तु करवावालो सिदातो नथी

कृतज्ञस्वामिसंसर्ग-मुत्तमस्त्रीपरिग्रहम् ।
कुर्वन् मित्रमलोभञ्च, नरो नैवावसीदति ॥ ८४ ॥

उत्तमैः सह साङ्गत्यं, पण्डितैः सह मित्रताम् ।
अलुब्धैः सह प्रस्थानं, कुर्वाणो नैव सीदति ॥ ८५ ॥

पहेला रहेवामां लाभ

दाने पाने शयने, व्याख्याने भोजने सभास्थाने ।
क्रयविक्रयेऽतिथित्वे, राजकुले पूर्णफलमाद्यः ॥ ८६ ॥

पाछल रहेवामां लाभ

शून्येऽरण्ये भवने, ग्रामे तोये वने च सङ्ग्रामे ।
*आरोहेप्यवरोहे, च पुरः सरेन्न पथि रात्रौ च ॥ ८७ ॥*

आटला स्वभावथीज शत्रु छे

स्वभावतो भवन्त्येते–ऽरयो दुर्वृत्त एव च ।
ऋणकारी पिता शत्रुः, माता स्त्री व्यभिचारिणी ॥ ८८ ॥

दुष्टानां भूपतिः शत्रुः, कुलटानां पतिव्रता ।
साधुः खलानां शत्रुः स्या–न्मूर्खाणां पण्डितो रिपुः ॥ ८९ ॥

सेवा सुखानां व्यसनं धनानां,
याञ्चा गुणानां कुनृपः प्रजानाम् ।
प्रनष्टशीलश्च सुतः कुलानां,
मूलावघाती कठिनः कुठारः ॥ ९० ॥

अवर्णवादो महापापकारी, अवर्णवादो नरकावतारी ।
अवर्णवादो हरते गुणालीं, अवर्णवादं त्यज भाग्यशालिन् ॥

चिन्तया वर्धते व्याधिः, चिन्तया क्षीयते तनुः ।
चिन्तया हीयते बुद्धिः, तस्मात्कार्या न सा बुधैः ॥ ९२ ॥

मनुष्य जन्मनां छ स्वर्गो

धनाढ्यता राजकुले च मानं,
प्रियानुकुला ( सुशीला ) तनया विनीताः ।
धर्मे मतिः सज्जनसङ्गतिश्च,
षड् जीवलोके स्वर्गा भवन्ति ॥ ९३ ॥

धीरतानुं परिणाम

भानुश्च मन्त्री दयिता च सरस्वती,
मृत्युं गता सा नृपकैतवेन ।

गङ्गागतस्तां पुनरेव लेभे,
जीवन्नरो भद्र शतानि पश्यति ॥ ९४ ॥

आटलाने लक्ष्मी टकती नथी

कुचैलिनं दंतमलावधारिणं,
बह्वाशिनं निष्ठुरवाग्भाषिणम् ।
सूर्योदये चास्तमने च शायिनं,
विमुञ्चति श्रीर्यदि चक्रपाणिनम् ॥ ९५ ॥

सात्त्विक-राजस-तामस-त्रण भावनुं स्वरुप

यत्तदग्रे विषमिव, परिणामेऽमृतोपमम् ।
तत् सुखं सात्त्विकं प्रोक्त-मात्मबुद्धिस्वभावजम् ॥ ९६ ॥
विषयेन्द्रियसंयोगाद्, यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव, च तत्सुखं राजसं स्मृतम् ॥ ९७ ॥
यदग्रे चानुबन्धे च, सुखं मोहेन ह्यात्मनः ।
निद्रालस्यप्रमादोत्थं, तत् तामसमुदाहृतम् ॥ ९८ ॥

सज्जनने शिखामण

सहकारे चिरं स्थित्वा, सलिलं बालकोकिल ! ।
तं हित्वाऽद्य करीरेषु, विचरन्न विलज्जसे ॥ ९९ ॥
कलकण्ठ ! यथा शोभा, सहकारे भवद्गिरः ।
खदिरे वा पलाशे वा, किं सा स्यात्प्रविचारय ॥ १०० ॥

शैत्यं नाम गुणस्तवैव भवतः स्वाभाविकी स्वच्छता,
किं ब्रूमः शुचितां व्रजन्त्यशुचयः सङ्गेन यस्यापरे।
किं चातः परमस्ति ते स्तुतिपदं, त्वं जीवितं देहिनां,
त्वं चेन्नीचपथेन गच्छसि पयः! कस्त्वां निरोद्धुं क्षमः ॥१०१॥

निष्कारण प्रीति क्यांकज होय

प्रीतिर्जन्मनि वासतोप्युपकृतेः सम्बन्धतो लिप्सया,
विन्ध्ये हस्तिवदम्बुजे मधुपवच्चन्द्रे पयोराशिवत्।
अब्दे चातकवदसुमतां सर्वत्र नैमित्तिकी,
या निष्कारणबन्धुरा शिखिवदम्भोदे क्वचित् सा पुनः ॥१०२॥

दामनकनुं नसीब

कथमस्य महापुंसः, कामस्येव वपुःश्रिया।
प्रदीयते विषं घोरं, दीयते हि विषा खलु ॥ १०३ ॥

अमृतना कुंडोनुं स्थान

पाताले नवामृतकुण्डानि सन्ति नागकुलैरधिष्ठितानि इति श्रुतिः।

वापीकूपसरोलक्षैः, सुधासोदरवारिभिः।
नागलोकं नवसुधा,-कुण्डं परिबभूव सा ॥ १०४ ॥

ब्रह्मानां पांच दुश्चरित

भिक्षुर्विलासी निर्धनश्च कामी, वृद्धो विटः प्रव्रजितश्च मूर्खः।
पण्याङ्गना रूपविलासहीना, प्रजापतेर्दुश्चरितानि पञ्च ॥१०५॥

कन्यादाननुं पाप

भवभ्रमणबीजेन, दाम्पत्येन नियोजिता ।
योजयित्रे परं कन्या, पाप्मानमुपयच्छति ॥ १०६ ॥

अढारभार वनस्पतिनी समजण

चत्वारो पुष्पका भारा, अष्टौ च फलपुष्पिका ।
स्युर्वल्लीनां च षड्भाराः, शेषनागेन भाषितम् ॥ १०७ ॥

कटुकस्य भाराश्चत्वारि, द्वे भारे तिक्तमुच्यते ।
त्रीणि भारं भवेन्मिष्ठं, मधुरं भारकं त्रयम् ॥ १०८ ॥

क्षारं च भारमेकं तु, कषायं भारकद्वयम् ।
सविषं भारमेकं तु, द्वौ भारौ निर्विषौ तथा ॥ १०९ ॥

षड्भाराः कण्टका ज्ञेयाः, षड्भाराः सुगन्धकाः ।
षड्भाराश्च निर्गन्धा, भारानष्टादश विदुः ॥ ११० ॥

समाकुञ्चितवामजानुर्भूमिविन्यस्तदक्षिणजानुर्ललाटपट्टि-घटितकरकुड्मलः पठती ति जीवाभिगमादिष्वभिधीयते ॥

तथा—

पर्यङ्कासनस्थः शिरोधिनिवेशितकरकोरकः, तं पठन्तीत्यस्यापि ज्ञाताधर्मकथासु दर्शनात्तथा हरिभद्राचार्येणापि चैत्यवन्दनवृत्तौ क्षितिनिहितजानुकरतलो भुवनगुरौ विनिवेशितनयनमानसः प्रणिपातदण्डकं पठति इत्यादि सर्वाणि प्रमाणग्रन्थप्रणीतानि विनयसमर्थकानि अविरुद्धानि ज्ञेयानि ॥

# श्री चैत्यवंदन विभागः

## श्रीशुभशीलगणिविरचितं श्रीनाभेयस्तोत्रम् ।

(१)

सुरासुरमहीनाथ-मौलिमालानतक्रमम् ।
श्रीशत्रुंजयकोटीर-मणि श्रीऋषभं स्तुवे ॥ १ ॥
विभो ! त्वत्पादराजीवं, ये सेवन्ते जनाः सदा ।
सुरासुरनृपश्रेणि-र्भजते तान् सुभक्तितः ॥ २ ॥
तनोसि त्वं विभो ! यस्य, मानसे वासमन्वहम् ।
तस्य पापानि गच्छन्ति, तमांसीव दिनोदयात् ॥ ३ ॥
निरीक्ष्य त्वन्मुखाम्भोजं, सुरासुरसुखप्रदम् ।
कृतार्थोऽहमभूवं, श्री-नाभिभूपालनन्दन ! ॥ ४ ॥
सुवर्णवर्णसंकाश-देहद्युतिभरप्रभो ! ।
निजाङ्घ्रिकमलावासं, देहि मे नाभिनन्दन ! ॥ ५ ॥

## श्रीसिद्धसेनदिवाकरप्रणीतं सिद्धगिरिस्था-दिदेव-चैत्यवन्दनम् ।

(२)

भव्याङ्गभृत्कोकिलपुण्डरीकं, दुष्कर्मरुक्छेदनपुण्डरीकम् ।
पद्भ्यां पवित्रीकृतपुण्डरीकं, नताखिलाखण्डलपुण्डरीकम् ॥१॥
उन्मत्तमोहद्विपपुण्डरीकं, बाल्ये कृतार्थीकृतपुण्डरीकम् ।
शिरस्तुषाराड्धृतपुण्डरीकं, त्वां स्तौमि चश्वत् पदपुण्डरीकम् ॥२॥

स मङ्गलं वो वृषभध्वजः कुर्याज्जटावलीसंवृतांशमण्डलः ।
यदीयमङ्गं किल सर्वमङ्गलाश्रितं प्रमोदाय न यस्य जायते ॥३॥

## कलिकालसर्वज्ञप्रणीत श्रीरावणकृतशान्ति-नाथ स्वामी चैत्यवंदनम् ।

(३)

देवाधिदेवाय जग-त्तायिने परमात्मने ।
श्रीमते शान्तिनाथाय, षोडशायार्हते नमः ॥ १ ॥

श्रीशान्तिनाथ ! भगवन्, भवाम्भोनिधितारण ! ।
सर्वार्थसिद्धमन्त्राय, त्वन्नाम्नेऽपि नमोनमः ॥ २ ॥

ये तवाष्टविधां पूजां, कुर्वन्ति परमेश्वर ! ।
अष्टापि सिद्धयः तेषां, करस्था अणिमादयः ॥ ३ ॥

धन्यान्यक्षीणि यानि त्वां, पश्यन्ति प्रतिवासरम् ।
तेभ्योपि हृदयं धन्यं, यद् दृष्टो येन धार्यसे ॥ ४ ॥

देव ! त्वत्पादसंस्पर्शा-दपि स्यान्निर्मलो जनः ।
अयोऽपि हेमीभवति, स्पर्शवेधिरसान्न किम् ! ॥ ५ ॥

त्वत्पादाब्जप्रणामेन, नित्यं भूलुण्ठनैः प्रभो ! ।
शृङ्गारतिलकीभूयान्, मम भाले किणावलिः ॥ ६ ॥

भूयो भूयः प्रार्थये त्वा-मिदमेव जगद्विभो ! ।
भगवन् ! भूयसी भूया-त्त्वयि भक्तिर्भवे भवे ॥ ७ ॥

## श्रीकलिकालसर्वज्ञप्रणीतं वीतरागचैत्य-वन्दनम् ।

(४)

स्वामिन् ! क्व धीदरिद्रोऽहं, क्व च त्वं गुणपर्वतः ।
अभिष्टोष्ये तथापि त्वां, भक्त्याऽतिमुखरीकृतः ॥ १ ॥
अनन्तैर्दर्शनज्ञान–वीर्यानन्दैर्जगत्प्रभो ! ।
रत्नै रत्नाकर इव, त्वमिहैको विराजसे ॥ २ ॥
देवेह भारते क्षेत्रे, चिरं नष्टस्य सर्वथा ।
धर्मस्यासि प्ररोहाय, बीजमेकं तरोरिव ॥ ३ ॥
अनुत्तरसुराणां त्वं, तत्रस्थानामिह स्थितः ।
वेत्सि छिनत्सि संदेहा–न्न महात्म्यात्रधिस्तव ॥ ४ ॥
देव ! त्वद्भक्तिहीनानां, तपांस्यतिमहान्त्यपि ।
अबोद्धृणामिव ग्रन्था–भ्यासः क्लेशाय केवलम् ॥ ५ ॥
यस्त्वां स्तवीति यो द्वेष्टि, समस्त्वमुभयोस्तयोः ।
शुभाशुभं फलं किन्तु, भिन्नं चित्रियते हि नः ॥ ६ ॥
धृश्रियःऽपि न तोषो मे, नाथ ! नाथाम्यतस्ततः ।
भगवन् ! भूयसी भूयात्, त्वयि भक्तिर्ममाक्षया ॥ ७ ॥

## द्वितीयं चैत्यवन्दनम् ।

(५)

अपि सर्वात्मना स्तोतु–मशक्या योगिपुङ्गवैः ।
स्तुत्याः क्व ते गुणाः स्तोता, क्वाहं नित्य प्रमद्वरः ॥ १ ॥

तथापि नाथ ! स्तोष्यामि, यथाशक्ति भवद्गुणान् ।
दीर्घाध्वनि व्रजन् खञ्जः, किं केनापि निवार्यते ॥ २ ॥
भवदुःखातपक्लेश–विवशानां शरीरिणाम् ।
छत्रच्छायायमानाङ्घ्रिच्छाय ! त्रायस्व नः प्रभो ! ॥ ३ ॥
मध्यं दिनादित्य इव, त्वयि प्रभवति प्रभो ! ।
संकुञ्चत्यभितः कर्म, देहच्छायेव देहिनाम् ॥ ४ ॥
तिर्यञ्चोऽपि हि ते धन्या, ये त्वां पश्यन्ति सर्वदा ।
भवद्दर्शनवन्ध्यास्तु, त्रिविष्टपसदोऽपि न ॥ ५ ॥
प्रकृष्टेभ्यः प्रकृष्टास्ते, भविकास्त्रिजगत्पते ! ।
येषां हृदयचैत्येषु, एको त्वमधिदेवता ॥ ६ ॥
एकं याचे भवत् पादाद्, ग्रामाद् ग्रामं पुरात् पुरम् ।
विहरन्नपि मा जातु, विहासीः हृदयं मम ॥ ७ ॥

## नागेन्द्रगच्छीय श्रीमद्देवेन्द्रसूरिप्रणीत चतुर्विंशतिजिनस्तोत्रम् ।

(६)

जयादिनाथ ! प्रथितार्थसार्थः, जयाजित ! स्वैरजिताग्निवर्गः ।
जयापुनः संभवः संभव ! त्वं, जयाभिनन्दिन्नभिनन्दनेश ॥१॥
निधेहि धर्मे सुमते ! मतिं मे,
त्वं सद्म पद्मप्रभ ! देहि मुक्तौ ।
सुपार्श्व ! पार्श्वे कुरु मे विवेकं,
चन्द्रप्रभ ! छिन्द्धि तमो विमोहम् ॥ २ ॥

पुण्ये विधौ मां सुविधे ! विधेहि,
कर्मानलः शीतल ! शीतलोऽस्तु ।
श्रेयांस मे श्रेयसि धेहि चित्तं,
त्रिधास्तु पूजा त्वयि वासुपूज्य ! ॥ ३ ॥
कुरुष्व जीवं विमलामलं मे,
कर्माण्यनन्तानि लुनीह्यनन्त ! ।
श्रीधर्म ! धर्मस्तव मां पुनातु,
शान्ते ! भव त्वं दुरितोपशान्त्यै ॥ ४ ॥
दुष्कर्मकन्थामथनोस्तु कुन्थु-ररो हरत्वैनसि मे प्रवृत्तिम् ।
कल्याणवल्लीं वितनोतु मल्लिः, सत्यव्रतं यच्छतु सुव्रतो मे ॥५॥
नमिर्भ्रमिं रक्षतु मे भवोत्थां, लुनातु नेमिस्तु कषायवृक्षान् ।
मथ्नातु पार्श्वो दुरिताब्धिवार्धिं, श्रीवीरनाथं शरणं प्रपद्ये ॥६॥
संसारमार्गभ्रमणेन तप्तं,
संभूय भूयस्तरपुण्यवृष्ट्या ।
पुष्णन्तु तेऽष्टापदपर्वतस्था,
जिनाम्बुदाः श्रीभरतार्चिता माम् ॥ ७ ॥

## श्रीपञ्चषष्ठियन्त्रस्तोत्रं लिख्यते ।

(७)

आदौ नेमिजिनं नौमि, संभवं सुविधिं तथा ।
धर्मनाथं महादेवं, शान्तिं शान्तिकरं सदा ॥ १ ॥
अनन्तं सुव्रतं भक्त्या, नमिनाथं जिनोत्तमम् ।
अजितं जितकन्दर्पं, चन्द्रं चन्द्रसमप्रभम् ॥ २ ॥

आदिनाथं महादेवं, सुपार्श्वं विमलं जिनम् ।
मल्लिनाथं गुणोपेतं, धनुषां पञ्चविंशतिम् ॥ ३ ॥

अरनाथं महावीरं, सुमतिं च जगद्गुरुम् ।
श्रीपद्मप्रभनामानं, वासुपूज्यं सुरैर्नतम् ॥ ४ ॥

शीतलं शीतलं लोके, श्रेयांसं श्रेयसे सदा ।
कुन्थुनाथं च वामेयं, श्रीअभिनन्दनं विभुम् ॥ ५ ॥

जिनानां नामभिर्बद्धः, पञ्चषष्ठिसमुद्भवः ।
यंत्रोऽयं राजते यत्र, तत्र सौख्यं निरन्तरम् ॥ ६ ॥

यस्मिन् गृहे महाभक्त्या, यन्त्रोऽयं पूज्यते बुधैः ।
भूतप्रेतपिशाचाद्यैर्भयं तत्र न विद्यते ॥ ७ ॥

सकलगुणनिधानं यन्त्रमेनं विशुद्धं,
हृदयकमलकोशे धीमतां ध्येयरूपम् ।
श्रीजयतिलकगुरु सूरिराजस्य शिष्यो–
वदति सुखनिधानं मोक्षलक्ष्मीनिवासम् ॥ ८ ॥

## श्रीहेमचन्द्रसूरिप्रणीत चैत्यवन्दनम् ।

(८)

नमस्तुभ्यं जगन्नाथ ! त्रैलोक्याम्भोजभास्कर ! ।
संसारमरुकल्पद्रो !, विश्वोद्धारणबान्धव ! ॥ १ ॥
वन्दनीयो मुहूर्तोऽयं, यत्र ते धर्मजन्मनः ।
अपुनर्जन्मनो जन्म, दुःखच्छिद्विश्वजन्मिनाम् ॥ २ ॥

मनुष्याः, खलु ते धन्या, ये त्वां द्रक्ष्यन्त्यहर्निशम् ।
यथासमयमेव त्वां, द्रष्टारः कीदृशा वयम् ॥ ३ ॥
सास्तु तावत्तव सुधा-सध्रीची धर्मदेशना ।
त्वद्दर्शनमपि श्रेयो, विश्राणयति जन्मिनाम् ॥ ४ ॥
न कश्चिदुपमापात्रं, भवतो भवतारकः ।
ब्रूमः त्वत्तुल्यमेव त्वां, यदि ते तर्हि का कथा ॥ ५ ॥
नास्मि वक्तुमलं नाथ !, सद्भूतानपि ते गुणान् ।
स्वयंभूरमणाम्भोधे-र्मातुमम्भांसि कः क्षमः ॥ ६ ॥

(९)

## कलिकालसर्वज्ञ हेमचन्द्रसूरि-म-प्रणीतं
## चैत्यवन्दनम्

नमोऽर्हते भगवते, स्वयंबुद्धाय वेधसे ।
तीर्थंकरायादिकृते, पुरुषेषूत्तमाय ते ॥ १ ॥
नमो लोकप्रदीपाय, लोकप्रद्योतकारिणे ।
लोकोत्तमाय लोकाधी-शाय लोकहिताय ते ॥ २ ॥
नमस्ते पुरुषवर-पुण्डरीकाय शंभवे ।
पुरुषसिंहाय पुरु-षैकगन्धद्विपाय ते ॥ ३ ॥
चक्षुर्दायाभयदाय-बोधिदायाध्वदायिने ।
धर्मदाय धर्मदेष्ट्रे, नमः शरणदायिने ॥ ४ ॥
धर्मसारथये धर्म-नेत्रे धर्मैकचक्रिणे ।
व्यावृत्तच्छद्मने सम्यग्-ज्ञानदर्शन धारिणे ॥ ५ ॥

जिनाय ते जापकाय, तीर्णाय तारकाय च।
विमुक्ताय मोचकाय, नमो बुद्धाय बोधिने ॥ ६ ॥
सर्वज्ञाय नमस्तुभ्यं, स्वामिने सर्वदर्शिने।
सर्वातिशयपात्राय, कर्माष्टकनिषूदिने ॥ ७ ॥
तुभ्यं क्षेत्राय पात्राय, तीर्थाय परमात्मने।
स्याद्वादवादिने वीत-रागाय मुनये नमः ॥ ८ ॥
पूज्यानामपि पूज्याय, महद्भ्योपि महीयसे।
आचार्याणामाचार्याय, ज्येष्ठानां ज्यायसे नमः ॥ ९ ॥
नमो विश्वभुवे तुभ्यं, योगिनाथाय योगिने।
पावनाय पवित्रायाऽ-नुत्तरायोत्तराय च ॥ १० ॥

(१०)

## श्रीमदर्हतः चैत्यवन्दनम्

एकस्माद् रणरणकः, परस्माच्च न नैपुणम्।
स्तोत्रे ते भव्यशक्तिभ्यां, चेतो दोलायते मम ॥ १ ॥
तथापि त्वां यथाशक्ति, नाथ ! स्तुतिपथं नये।
मशकोपि किमु व्योम, नोत्प्लवेत स्ववेगतः ॥ २ ॥
कथं तवामितदातु-र्मितदाः स्वर्द्रुमादयः।
उपमामुपयान्तीति, नोपमेयोसि केनचित् ॥ ३ ॥
न प्रसीदसि कस्यापि, न ददासि किञ्चन।
तदप्याराध्यसे सर्वै-रहो ते रीतिरद्भुता ॥ ४ ॥
निर्ममोपि जगत्त्राता, निःसङ्गोपि जगत्प्रभुः।
लोकोत्तरस्वरूपाय, निरूपाय नमोऽस्तु ते ॥ ५ ॥

(११)

## श्रीदेवेन्द्रसूरिपूज्यपादप्रणीतं स्तोत्रम्

कल्पद्रुमाद्यतिक्रान्ता, त्वदाज्ञा देव देहिनाम् ।
प्रसूते या फलैर्नित्य-मिहामुत्राप्यचिन्तितैः ॥ १ ॥

शारीरमानसासङ्ख्य-दुःखलक्षक्षयंकरी ।
कथं सुधासदृक्षा स्या-त्त्वदाज्ञा शिवसौख्यदा ॥ २ ॥

सदोद्योता गतस्नेहा, निश्चला च निरंजना ।
त्वदाज्ञा जगतामीश !, नव्य दीपायते नृणाम् ॥ ३ ॥

त्वदाज्ञैकावली चेयं, ज्ञानादिवररत्निका ।
हृत्स्थयापि यया जीवा, निर्ग्रन्थाः स्युः तदद्भुतम् ॥ ४ ॥

कर्मारिवीर श्रीवीर !, त्वदाज्ञां ये तु कुर्वते ।
त्रैलोक्यपि करोत्याज्ञां, तेषां सौभाग्यशालिनाम् ॥ ५ ॥

देवाधिदेव ! देवेन्द्र-वृन्दवन्द्यपदद्वय ! ।
त्वदाज्ञा हृदि मे नित्य-मस्तु मेरुरिव स्थिरा ॥ ६ ॥

(१२)

## श्रीशत्रुंजयमहात्म्ये धनेश्वरसूरिप्रणीतं जिनस्तोत्रम् ।

क्वाऽहं बुद्धिधनैर्हीनः, क्व च त्वं गुणसागरः ।
तथापि त्वां स्तवीम्येषस्त्वद्भक्तिमुखरीकृतः ॥ १ ॥

त्वया हतास्तपोऽस्त्रेण, सर्वथाऽन्येन दुर्जयाः ।
रागाद्या रिपवः स्वामि-न्नात्मनः स्वार्थघातकाः ॥ २ ॥

रागाद्यै रिपुभिर्देवा-भासा अन्ये विडम्बिताः ।
पश्यन्ति ते बहिः शत्रून्, विहायान्तर्निकर्तिनः ॥ ३ ॥

अनन्तज्ञानमहात्म्य–वारिधे ! चतुर ! प्रभो ! ।
जगत्प्रदीप ! भगवन् ! नाभेय ! भवते नमः ॥ ४ ॥

अष्टाङ्गानि तथा नाथ !, भवान् योगस्य निर्ममे ।
यथा तानि प्रवर्तन्ते, कर्माष्टकनिपिष्टये ॥ ५ ॥

शत्रुञ्जयशिरोरत्नं, श्रीनाभिकुलभास्करम् ।
स्वर्गापवर्गव्यापार–निदानं त्वां विभो ! स्तुमः ॥ ६ ॥

रत्नेन काञ्चनमिव, तेजसैव नभोमणिः ।
अलङ्कृतं त्वया नाथ !, तीर्थं शत्रुञ्जयं ह्यदः ॥ ७ ॥

नाभ्यर्थये स्वर्गसुखं, न मोक्षं न नरश्रियम् ।
सदा त्वत्पादपद्मानि, वसन्तु मम मानसे ॥ ८ ॥

(१२)

## श्रीकलिकालसर्वज्ञ हेमचन्द्रसूरीश्वरप्रणीतं तीर्थंकरचैत्यवंदनम् ।

देवत्वज्जन्मकल्याणे–नापि कल्याणभाग्महो ।
किं पुनः पादकमलै–र्यत्र त्वं विहरिष्यसे ॥ १ ॥

त्वद्दर्शनसुखप्राप्ता, कृतकृत्या दृशोऽधुना ।
कृतार्थाः प्राणयश्चैते, भगवन् पूजितोसि यैः ॥ २ ॥

जगन्नाथ ! प्रशंसामि, संसारमपि सम्प्रति ।
यत्र त्वद्दर्शनं देव !, मुक्तेरेकनिबन्धनम् ॥ ३ ॥

उर्मयोपि हि गण्यन्ते, स्वयंभूरमणोदधेः ।
त्वातिशयपात्रस्य, न पुनर्मादृशैर्गुणाः ॥ ४ ॥

धर्मैकमण्डपस्तम्भ !, जगदुद्योतभास्कर ! ।
कृपावल्ली महावृक्ष !, रक्ष विश्वं जगत्पते ! ॥ ५ ॥

निर्वृते: संवृतद्वार-समुद्घाटन कुश्चिका ।
धन्यैः शरीरिभिर्देव !, श्रोष्यते तव देशना ॥ ६ ॥
न कल्पान्तरसाम्राज्यं, नानुत्तरनिवासिताम् ।
वांछामि किन्तु शुश्रूषां, भवतः पादपद्मयो: ॥ ७ ॥

(१४)

## कलिकालसर्वज्ञ हेमचंद्रसूरि म० प्रणीतं चैत्यवंदनम्

अस्मिन्नसारे संसारे, मरौ सञ्चारिणां चिरात् ।
त्वद्दर्शनमभूदेव !, देहभाजां सुधाप्रपा ॥ १ ॥
रूपेणाप्रतिरूपं त्वा-मश्रान्तं पश्यतां सताम् ।
कृतार्थेयं समभव-द्देवानां निर्निमेषता ॥ २ ॥
जगत्त्रितयनाथत्वं, ज्ञानत्रितयधारिता ।
इदमाजन्मसिद्धं ते, शीतलत्वमिवाम्भसाम् ॥ ३ ॥
अपारो दुस्तरश्चायं, सदा संसारसागरः ।
जानुदघ्नोधुना नाथ !, त्वत्प्रसादाद्भविष्यति ॥ ४ ॥
रागादिषु नृशंसेन, सर्वात्मसु कृपालुना ।
भीमकान्तगुणेनोच्चैः, साम्राज्यं साधितं त्वया ॥ ५ ॥
महीयसामपि महान्, महनीयो महात्मनाम् ।
अहो मे स्तुवतः स्वामी, स्तुतेर्गोचरमागमत् ॥ ६ ॥
भूयो भूयो भवत्पाद-दर्शनं मे भवत्विति ।
आशंसामि जगन्नाथ !, निर्वाणमपि नापरम् ॥ ७ ॥

(१५)

## कलिकालसर्वज्ञप्रणीतं चैत्यवंदनम्

चक्रिणां नैव चक्रेण, न चक्रेणार्द्धचक्रिणाम् ।
न चेशानस्य शूलेन, न वज्रेण ममापि वा ॥ १ ॥

न चास्त्रैरपरेन्द्राणां, यानि भेद्यानि जातुचित् ।
तानि कर्माणि भिद्यन्ते, दर्शनेनापि नाथ ! ते ॥ २ ॥

नैव क्षीरोदवेलाभि-र्न प्रभाभिः क्षपापतेः ।
नैव वारिधरासारैः-र्न च गोशीर्षचन्दनैः ॥ ३ ॥

न वा निरन्तरै रम्भा-शमैः शाम्यन्ति ये खलु ।
सर्वे ते दुःखसन्तापाः, शीर्यन्ते दर्शनेन ते ॥ ४ ॥

न ये नानाविधैः क्वाथै-श्चूर्णैश्च विविधैर्न ये ।
न च प्राज्यैः प्रलेपैर्ये, न च ये शस्त्रकर्मभिः ॥ ५ ॥

न च मन्त्रप्रयोगैर्ये, छिद्यन्ते जातु देहिनाम् ।
आमयास्ते प्रलीयन्ते, दर्शनेनापि ते प्रभो ! ॥ ६ ॥

खलूक्त्वा यदि वानल्प-मल्पमेतद्ब्रवीम्यहम् ।
यत् किञ्चिदप्यसाध्यं, तत् साध्यते दर्शनेन ते ॥ ७ ॥

तद्दर्शनस्यास्य फल-मिच्छाम्येतज्जगत्पते ! ।
भूयो भूयः सम्प्रतीव, भवद्दर्शनमस्तु मे ॥ ८ ॥

(१६)

## श्रीनेमनाथस्वामि चैत्यवंदनम् ।

इन्द्रोपेन्द्रौ पुनर्नन्या, जिनेन्द्रमथ नेमिनम् ।
प्रारेभाते स्तोतुमेव, गिरा भक्तिपवित्रया ॥ १ ॥

नमस्तुभ्यं जगन्नाथ !, विश्वविश्वोपकारिणे ।
आजन्मब्रह्मनिष्ठाय, दयाधिराय तायिने ॥ २ ॥
स्वामिन् घातिनि कर्माणि, स्वानि घातितवानसि ।
शुक्लध्यानेन दिवसैः, चतुः–पञ्चशतापि हि ॥ ३ ॥
न केवलं यदुकुलं, त्वया नाथ ! विभूषितम् ।
इदं जगत्त्रयमपि, केवलालोकभास्वता ॥ ४ ॥
अस्ताघोयं तथा स्वामिन्, नपारश्च भवाम्बुधिः ।
गुल्फगोपदमात्रं स, स्यात् त्वत्पादप्रसादतः ॥ ५ ॥
जयत्रिलोकीजनकल्पपादपा–पुनर्भव श्रीपरिरम्भलोलुपः ।
जयप्रमोदाङ्कुरकोटिवारिमुग्, जयप्रभाभर्त्सित नीलरत्नरुक् ॥
तरीव वार्द्धौ तमसीव शारदा, रविर्दिनीश सरसीव धन्वनि ।
दरिद्रतायामिव सेवधिर्मया, कलौ जिनेन्द्रो त्वमलंभि दुर्लभः ॥

( १७ )

## अथ श्रीसिद्धाद्रिस्तोत्रम् ।

श्रीपुण्डरीकगणभृत्प्रथमं प्रपेदे,
यं पुण्डरीकमिव मञ्जुलचञ्चरीकः ।
यं स्तौति पुण्डरिकिणीनगरीस्थसार्वः,
तं पुण्डरीकगिरिनाथमहं नमामि ॥ १ ॥
यत्राऽभवन् जिनगणेश्वर साधुसङ्घाः,
सिद्धाः प्रशान्तदुरिता बहुकोटिसंख्याः ।
तेनेदमास्पदमहो विमलं प्रसिद्धं,
युक्ताह्वयं विमलशैलमहं स्तुवे तम् ॥ २ ॥
पापं व्यपोहति करोति समृद्धिभावं,
दुक्खं छिनत्ति विपुलां श्रियमातनोति ।

पुण्यं दधाति वितनोति समीहितानि,
दृष्टोप्यसौ गिरिपतिः शुभदर्शनेन ॥ ३ ॥
तस्योपरि प्रवरतीर्थपतिर्वृषाङ्को-
मुख्यो जिनेषु स यथागिरिषु प्रसिद्धः ।
तत्पादपूजनपरा भुवि ये नराः स्युः,
तेषां क्रमौ त्रिभुवनान्यपि पूजयन्ति ॥ ४ ॥
नो व्याधिराधिरपि दुष्ट भुजङ्गमा नो
नो शाकिनी न परमोर्चिगणो न चाम्भः ।
नो वैरिणो न च नृपाः परितापयन्ति,
सिद्धाद्रिमण्डनयुगादि जिनप्रसादात् ॥ ५ ॥
चिन्तामणिः सुरतरुः सुरधेनु काम-
कुंभौ सुराश्च निखिला मयि सुप्रसन्नाः ।
जाताः स्वयं प्रबलसाधनयन्त्रिता वा,
त्वद्दर्शनेन भवसंतति दुर्लभेन ॥ ६ ॥
अस्मिन् भवे परभवे निखिलेऽपि देव !
पापानि यानि विहितान्यहितप्रदानि ।
वाक्कायमानसभवानि मयातिमौढ्यात्;
त्वद्दर्शनेन विफलानि भवन्तु तानि ॥ ७ ॥
सूरीशहीरविजयस्य गुरोः प्रसादा-
दित्थं स्तुतः सुविनयेन युगादिदेवः ।
शत्रुंजयाद्रिशिखरे मुकुटोपमानो,
देयादसौ विपुलमञ्जुलमङ्गलालीः ॥ ६ ॥

(१८)

## वीतराग स्तोत्र अंतर्गतं चैत्यवंदन

नपरं नाम मृद्वेव, कठोरमपि किञ्चन ।
विशेषज्ञाय विज्ञप्यं, स्वामिने स्वान्तशुद्धये ॥ १ ॥

न पक्षिपशुसिंहादि–वाहनासीनविग्रहः ।
न नेत्रवक्त्रगात्रादि–विकारविकृताकृतिः ॥ २ ॥

न शूलचापचक्रादि–शस्त्राङ्ककरपल्लवः ।
नाङ्गनाकमनीयाङ्ग–परिष्वंगपरायण: ॥ ३ ॥
न गर्हणीयचरित्र–प्रकम्पितमहाजनः ।
न प्रकोपप्रसादादि–विडम्बितनरामरः ॥ ४ ॥

न जगज्जननस्थेम–विनाशविहितादरः ।
न लास्यहास्यगीतादि–विप्लवोपप्लुतस्थितिः ॥ ५ ॥
तदेवं सर्वदेवेभ्यः, सर्वथा त्वं विलक्षणः
देवत्वेन प्रतिष्ठाप्यः, कथं नाम परीक्षकैः ॥ ६ ॥

अनुश्रोतः सरत्पर्ण–तृणकाष्ठादियुक्तिमत् ।
प्रतिश्रोतः श्रयद्वस्तु, कया युक्त्या प्रतीयताम् ॥ ७ ॥
अथवालं मन्दबुद्धि–परीक्षकपरीक्षणैः ।
ममापि कृतमेतेन, वैयात्येन जगत्प्रभो ! ॥ ८ ॥
यदेव सर्वसंसारि–जन्तुरूपविलक्षणम् ।
परीक्षन्तां कृतधियः, तदेव तव लक्षणम् ॥९॥

क्रोधलोभभयाक्रान्तं, जगदस्माद्विलक्षणः ।
न गोचरो मृदुधियां, वीतराग ! कथंचन ॥ १० ॥

संपूर्णम्

## जुदा जुदा विषयमां मलेलां काव्यो

**सूर्योदय समये जन्मेल बालक लांबु आयुष भोगवे छे अने लक्ष्मी घणी पामे छे**

सूर्योदस्य वेलायां, जायते यस्य जन्म तु ।
तस्य दीर्घं भवेदायुः, पद्मायाः उदयः पुनः ॥ १ ॥

**आवी उत्तम पत्नी पुण्यवानने मले छे**

आदौ धर्मधुरा कुटुम्बनिचये क्षीणे च सा धारिणी ।
विश्वासे च सखी हिते च भगिनी लज्जावशाच्च स्नुषा ॥
व्याधौ शोकपरिप्लुते च जननी शय्यास्थिते कामिनी ।
त्रैलोक्येऽपि न विद्यते भुवि नृणां भार्यासमो बांधवः ॥२॥

**पुण्यानुबंधि पुण्यथी मलेली सगवडो**

पत्नी प्रेमवती सुतः सुविनयो भ्राता गुणालङ्कृतः ।
स्निग्धो बन्धुजनः सखातिचतुरो–नित्यं प्रसन्नः प्रभुः ॥
निर्लोभोऽनुचरः स्वबन्धु–सुयति–प्रायोपभोग्यं धनं ।
पुण्यानामुदयेन सन्ततमिदं कस्यापि संपद्यते ॥ ३ ॥

**आर्त्त-रौद्र-धर्म-अने शुक्लध्यान वाळाओनी गतिओनी समजण**

आर्ते तिर्यग् गति स्तथा गतिरधो ध्याने च रौद्रे सदा ।
धर्मे देवगतिः शुभं च हि फलं–शुक्ले तु जन्मक्षयः ॥

तस्माद् व्याधिकृतान्तके हितकरे संसार निस्तारके ।
ध्याने शुक्लवरे रजःप्रमथने कुर्यात् प्रयत्नं बुधः ॥४॥

कोईने क्यारे पण नहीं नमनारो पण पत्नीना पगोमां पडे छे.

जे नामंति न सीसं कस्सवि, भुवणे वि जे महासुहडा ।
रागंधा गलिअबला, रुलंति महिलाण चरणतळे ॥ ५ ॥

हत्थी दम्मइ संवच्छरेण, मासेण दम्मइ तुरगो ।
महिलाए किर पुरिसो, दमए एगेण दिवसेण ॥ ६ ॥

सम्मोहयन्ति मदयन्ति विडंबयन्ति ।
निर्भर्त्सयन्ति रमयन्ति विसादयन्ति ॥
एताः प्रविश्य सदयं हृदयं नराणां ।
किं नाम वामनयना न समाचरन्ति ॥ ७ ॥

आवी उत्तम सामग्री निर्दंभ धर्म आराधनाथी मळे छे

स्थाने निवासः सकलं कलत्रं, पुत्रः पवित्रः सुजनानुरागः ।
न्यायाच्च वित्तं स्वहितं च चित्तं, निश्छद्मधर्मस्य सुखानि सप्त
॥८॥

महापुण्यनो उदय होय तेवाओनेज-पुत्र-मित्र अने
पत्नी सारां मळे छे

प्रीणाति यः सुचरितैः पितरं स पुत्रो,
यद्भर्तुरेव हितमिच्छति तत् कलत्रम् ।
तन्मित्रमापदि सुखे च समक्रियं य-
देतत्त्रयं जगति पुण्यकृतो लभन्ते ॥ ९ ॥

ज्ञानी महापुरुषोए माता-पिताने तीर्थनी उपमा आपी छे

मातृ पितृसमं तीर्थं, विद्यते न जगत् त्रये ।
यतः प्राप्नोति सुलभो, नृभवः शिवशर्मदः ॥ १० ॥

जणणी जम्मभूमी पच्छिमनिद्दा सुभासिया गुट्ठी ।
मणइट्ठं माणुस्सं, पंचवि दुक्खेण मुच्चंति ॥ ११ ॥

आशानी अधमता

आशैव राक्षसी पुंसा-माशैव विषमञ्जरी ।
आशैव जीर्णमदिरा, धिगाशा सर्वदोषभूः ॥ १२ ॥

शरीरं श्लथते नाशा, रूपं याति न पापधीः ।
जरा स्फुरति न ज्ञानं, धिक् स्वरूपं शरीरिणां ॥ १३ ॥

गुरुपूजन द्रव्य जीर्णोद्धारमां जाय छे

निर्लोभत्वात् तदाचार्यैं, जगृहे न नृपार्पिता ।
कथितस्यान् नृपः पश्चात्, स्वर्णकोटि लली नहि ॥ १४ ॥

सूरेरनुज्ञया जीर्णोद्धारे, सा व्ययिता तदा ।
ततो राजवहिकायां, लिखितं धीसखैरिति ॥ १५ ॥

धर्मलाभ इति प्रोक्ते, दूरादुच्छ्रितपाणये ।
सूरये सिद्धसेनाय, ददौ कोटिं नराधिपः ॥ १६ ॥

इति श्लो. ३ विक्रमचरित्र सर्ग ५ पृ. ६३ श्लो. १२८।२९।३०

तदा कोटी सुवर्णस्य, गुरुभ्यो मेदिनी भुजा ।
दत्ता ते जगृहे नैव, निरीहत्वाद् गुरूत्तमैः ॥ १७ ॥

ततो जीर्णजिनागारो, द्वारे रैकोटिरेकिका ।
व्ययिता भूभुजा सङ्घ–युक्तेन गुरुवाक्यतः ॥ १८ ॥

आरोग्य माटे

तिन्नि सल्ला महाराय ? अस्सि देहे पइट्ठिया ।
वाउ–मुत्त–पुरीसाणं, खणमित्त न धारए ॥ १९ ॥

कामांधो

कृत्याकृत्ये न जानन्ति, न जानन्ति हिताहिते ।
कामान्धा मानवा जडा–धत्तूरबीजका इव ॥ २० ॥

गुणी आत्माओ

विरला जाणंति गुणा, विरला पिच्छन्ति अत्तणो दोसे ।
विरला परकज्जकरा–परदुक्खे दुक्खिआ विरला ॥ २१ ॥

वीतरागशासन आराधक जीवोने एक पण उत्तम वस्तु अलभ्य नथी

तन्नास्ति जगति मध्ये, वस्तु कल्पद्रुमादिकं ।
जिनधर्मैकसक्तानां, जीवानां यन्न सिध्यति ॥ २२ ॥

मांस भक्षणनी अधमता

वराका वंचिता नूनं, परलोक सुखेन ते ।
जन्मापि निष्फलं तेषां, येषां मांसाशने मतिः ॥२३॥
अशाश्वतस्य तुच्छस्य, शरीरस्यास्य हेतवे ।
मारयंतीह ये जीवान्, किं ते जगति शाश्वताः ॥ २४ ॥

द्यूतनी दुष्टता

द्यूतं सर्वापदां धाम, द्यूतं दीव्यन्ति दुर्धियः ।
द्यूतेन कुलमालिन्यं, द्यूताय श्लाघतेऽधमः ॥ २५॥

उत्तमना त्रणे योग सारा

वचने मानसे काये, क्रियायां च निरंतरं ।
स्वभावो विद्यते तुल्य:, सज्जनानां शरीरिणां ॥ २६ ॥

उपकर्तुं प्रियं वक्तुं, कर्त्तुं स्नेहमकृत्रिमं ।
सुजनानां स्वभावोयं, केनेन्दुः शिशिरीकृतः ॥ २७ ॥

शास्त्रं बोधाय, दानाय, धनं धर्माय जीवितं ।
वपुः परोपकाराय, धारयन्ति मनीषिणः ॥ २८ ॥

पात्रार्थं भोजनं येषां, दानार्थं च धनार्जनं ।
धर्मार्थं जीवितं येषां, ते नराः स्वर्गगामिनः ॥ २९ ॥

अमंत्रमक्षरं नास्ति, नास्ति मूल मनौषधम् ;
निर्गुणा पृथ्वी नास्ति, आम्नाया खलु दुर्लभाः ॥३०॥

अमृतना कुंडो जेवा आत्माना नव गुणो

चेतः सान्द्रतरं वचः सुमधुरं दृष्टिः प्रसन्नोज्वला ।
शक्तिः क्षान्तियुता मतिः श्रितनया श्री दीनदैन्यापहा ॥
रूपं शीलयुतं श्रुतं गतमदं स्वामित्व-मुत्सेकता-
निर्मुक्तं-प्रकटान्यहो नवसुधा-कुण्डान्यमून्युत्तमे ॥ ३१ ॥

परस्त्रीसेवन पाप

प्राणसंदेहजननं, परमं वैरकारणं ।
लोकद्वयविरुद्धं च, परस्त्रीगमनं त्यजेत् ॥ ३२ ॥

सर्वस्वहरणं बन्धं, शरीरावयवच्छिदां ।
मृतश्च नरकं घोरं, लभते पारदारिकः ॥ ३३ ॥

विक्रमाक्रान्त विश्वो पि, परस्त्रीषु रिरंसया।
कृत्वा कुलक्षयं प्राप, नरकं दशकन्धरः ॥ ३४ ॥

पुण्यानुबंधि पुण्योदय

आरोग्यभाग्याभ्युदयप्रभुत्वं । सत्त्वं शरीरे च जने महत्त्वं ॥
तत्त्वं च चिते सदने च संपत् । संपद्यते पुण्यवशेन पुंसां ॥३५॥
अपि लभ्यते सुराज्यं, लभ्यन्ते पुरवराणि रम्याणि।
नहि लभ्यते विशुद्धः, सर्वज्ञोक्तो महाधर्मः ॥ ३६ ॥
माणुस्सखित्त-जाइ-कुल-रूवारुग्गमाउअं बुद्धी।
सवणगहणसद्धा, संजमो अ लोगम्मि दुलहाइं ॥ ३७ ॥
दानं सुपात्रे विशदं च शीलं, तपो विचित्रं शुभभावना च।
भवार्णवोत्तारणसत्तरण्डं, धर्मं चतुर्द्धा मुनयो वदन्ति ॥ ३८॥

महासतीओनुं सगपण

पितृ-मातृ सखीबन्धु-जनो बाल्येपि यो भवेत्।
तरुणीनां च तारुण्ये, एकएव प्रियः प्रियः ॥ ३९ ॥

महापापी मनुष्यो

कूटसाक्षी मृषाभाषी, कृतघ्नो दीर्घरोषणः।
मद्यपापर्द्धिकृन्नीरै-र्न शुध्यति कदाचन ॥ ४० ॥

जिनालय महीमा

रम्यं येन जिनालयं निजभुजोपात्तेन कारापितं।
मोक्षार्थं स्वधनेन शुद्धमनसा पुंसा सदाचारिणा।
बद्धं तेन नरामरेन्द्रमहितं तीर्थेश्वराणां पदं।
प्राप्तं जन्मफलं पुनर्जिनमतं गोत्रं समुद्योतितं ॥ ४१ ॥

अति उच्च अनुष्ठान

प्रासादः प्रतिमा यात्रा, प्रतिष्ठा च प्रभावना ।
अमार्युद्घोषणादीनि, महापुण्यानि देहिनां ॥४२॥

साचा पुण्यवान दानी=दान देनारा जाणवा

आरोहन्ति सुखासनान्यपटवो, नागान् हयान् तज्जुषः ।
ताम्बूलाद्युपभुञ्जते नटविटा, खादन्ति हस्त्यादयः ॥
प्रासादे चटकादयो निवसन्त्येते न पात्रं स्तुतेः ।
स स्तुत्यो भुवने प्रयच्छति कृती लोकाय यः कामितं ॥४३॥

शून्य वस्तुना मालिको घणा

राज्यं भोज्यं च शय्या च, वरवेश्म वराङ्गना ।
धनं चैतानि शून्यत्वेऽधिष्ठीयन्ते ध्रुवं परैः ॥४४॥

केवलज्ञानी

सम्भिन्नं पासंतो, लोगमलोगं च सव्वओ सव्वं ।
तं नत्थि जं न पासइ, भूयं भव्वं भविस्सं च ॥४५॥

नरकमांथी आवेला जीवोना स्वभाव

विरोधिता बन्धुजनेषु नित्यं, सरोगता मूर्खजनेषु संगः ।
क्रूरस्वभावः कटुवाक् सरोषः। नरस्य चिह्नं नरकागतस्य ।४६।

स्वर्गमांथी आवेला

स्वर्गच्युताना मिह जीवलोके,
चत्वारि नित्यं हृदये वसन्ति ।
दानप्रसंगो (दानप्रवाहो.) विमला च वाणी,
देवार्चनं सद्गुरु सेवनं च ॥४७॥

### शुद्ध धर्मनुं फल

सद्वंशजन्म गृहिणी स्पृहणीयशीला ।
लीलायितं वपुषि पौरुषभूषणा श्री. ।
पुत्राः पवित्र चरित्राः सुहृदोऽपदोषाः ।
स्युर्धर्मतः खलु फलानि पचेलिमानि ॥४८॥

राजपुत्रोमां सहज विनय गुण होय छे. पंडितोनी भाषामां संस्कार होय, द्यूतकारोनी भाषामां लगभग असत्य होय छे. तेम स्त्रीओमां मायानी बहुलता होय छे.

विनयं राजपुत्रेभ्यः, पण्डितेभ्यः सुभाषितं ।
अनृतं द्यूतकारेभ्यः, स्त्रीभ्यः शिक्षेत कैतवं ॥४९॥

### स्त्री मरीने पुरुष पण थाय छे

संतुट्ठा सुविणीया, अज्जवजुत्ता जो थिरा निच्चं ।
सच्चं जंपइ महिला, सा पुरिसो होइ मरिऊण ॥५०॥

### पुरुष पण मरीने स्त्री थाय छे

जो चवलो सढभावो, माया कवडेहिं वञ्चए सयणं ।
नहि कस्स य विसत्थो, सो पुरिसो महिलिया होइ ॥५१॥

### शत्रुंजय दर्शननुं माहात्म्य

पुण्यं चिनोति नरजन्म फलं तनोति,
पापं लुनाति नयनानि सतां पुनाति ।
दूरेपि दर्शनपथं समुपागतो यः ।
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥५२॥

मनुष्य जन्मनां फल

पूज्य पूजा दया, दानं, तीर्थयात्रा जपः तपः ।
श्रुतं परोपकारश्च, मर्त्यजन्मफलाष्टकं ॥५३॥

पंडितोनो स्वभाव

अतीतं नैव शोचन्ति, भविष्यं नैव चिन्तयेत् ।
वर्तमानेन कालेन, वर्तयन्ति विचक्षणा ॥५४॥

पांच चांडालो

कूटसाक्षी–मृषाभाषी, कृतघ्नो दीर्घरोषणः ।
चत्वारः कर्मचांडाला, पंचमो जातिसंभवः ॥५५॥

उत्तम अने दुष्ट

उत्तमानां मनो गच्छत्, कुमार्गाद् वलति स्वयं ।
दुष्टानां पापिनां नृणां, नोपदेशशतैरपि ॥५६॥

अज्ञानथी तप अने कष्ट करीने असुरो थाय छे

बालतवे पडिबद्धा, उक्कडरोसा तवेण गारविया ।
वेरेण य पडिबद्धा, मरिउं असुरेसु जायन्ति ॥५७॥
रज्जुग्गह-विसभक्खण-जल-जलण पवेस-तण्ह-छुह-दुहओ ।
गिरिसिरपडणाउ मुआ, सुहभावा हुंति वंतरिया ॥५८॥

कोण क्यां सुधी देवलोकोमां उपजे छे

तावस जा जोइसीया, चरगपरिव्वाय बंभलोगो जा ।
जा सहसारो पंचिंदियतिरिय जा अच्चुओ सड्ढा ॥५९॥

जैन शासननो व्यवहार

ववहारो विहु बलवं जंछउमत्थंपि वंदइ अरिहा ।
जा होइ अणाभिन्नो, जाणंतो धम्मयं एयं ॥६०॥

श्रीतीर्थपान्थरजसा विरजीभवन्ति ।
तीर्थेषु बंभ्रमणतो न भवे भ्रमन्ति ।
तीर्थव्ययादिह नराः स्थिरसंपदः स्युः ।
तीर्थेश्वरार्चनकृतो जगदर्चनीया ॥६१॥

पुत्रने दीक्षा अपावनार कुटुंबने धन्यवाद

धन्ना जणणी जणया, धन्ना विय बंधवा सुकयत्था ।
पव्वज्जाए जुग्गं पुत्तं, परिपालियं जेहिं ॥६२॥

युगलिक तिर्यंचो पण देवगति ज पामे छे

नरतिरि असंखजीवी, सव्वे नियमेण जंति देवेसुं ।
निअआउअ-समहीणाउएसु, ईसाणअंतेसु ॥६३॥

जिनेश्वर देवोनी कल्याणक भूमिओ-वांदवी अने मोटी आवक थाय तो पण अनार्य क्षेत्रोमां वसवुं नहीं

निक्खमण-नाण-निव्वाण-जम्म भूमीओ वंदइ जिणाणं ।
नय वि सइ साहुविरहियंमि देसे बहुगुणेवि ॥६४॥

शुकराजाने बावन भव पहेलां बांधेलुं कर्म उदयमां आव्युं

महोदयमुनिः प्राहः, शुकराजाधुना शृणु ।
इतो भवाद् द्विपञ्चाशत्तमे भूपभवे त्वया ॥६५॥
उद्दाल्य छलतो राज्यं, गृहीतं यस्य वेगतः ।
तेन तेऽस्मिन् भवे राज्यं, जगृहे शुकभूपते ? ॥६६॥

वीतरागना मुनिराजो-ज्योतिष-निमित्त-अक्षर-कौतुक आदेश-भूतिकर्म-करे करावे अनुमोदे नही

जोइस-निमित्त-अक्खर-कोऊअ-आएस-भूइकम्मेहिं ।
कारणाणुमोअणेहिं, साहुस्स तवक्खओ होइ ॥६७॥

जगतना स्वभावो

पत्रं नैव यदा करीर विटपे, दोषो वसन्तस्य किम् ।
नोलूको हि विलोकते यदि दिवा, सूर्यस्य किं दूषणं ॥
वर्षा नैव पतन्ति चातक मुखे, मेघस्य किं दूषणं ।
यत् पूर्वं विधिना ललाटफलकेऽलेखि प्रमाणं हि तत् ॥६८॥

पुण्यथी सर्व मले छे.

आरोग्यं सौभाग्यं, धनाढ्यता नायकत्वमानंदः ।
कृतपुण्यस्य स्यादिह, सदा जयो वांच्छितावाप्तिः ॥६९॥

अभयदाननां फल

आरोग्यं धन संपत्तिः, सौभाग्यं दीर्घजीवितं ।
भवत्यभयदानेन, गुणा इत्येवमादयः ॥ ७० ॥

ज्ञानं च सफलं तस्य, नीतयः सफला तथा ।
सफलं मानुषत्वं चाभयदानेस्ति यस्य धीः ॥ ७१ ॥

दया यस्य तपः तस्य, शीलं, सर्वगुणा अपि ।
दयाहीनस्य नो शीलं, न तपो न गुणा अपि ॥ ७२ ॥

यः करोत्यर्थदानेना–दारिद्र्यमखिलं जगत् ।
एकं हिनस्ति जीवं च, सर्वं तस्य निरर्थकं ॥ ७३ ॥

सर्वधर्मक्रियामूलं, सर्वसौख्यैककारणं ।
सर्वजीवाभयं दानं, सर्वदर्शनसंमतम् ॥ ७४ ॥

मनुष्यजन्मनो सफलता

निद्रान्ते परमेष्ठि संस्मृतिरथो देवार्चन व्यापृतिः
साधुभ्यः प्रणतिः प्रमादविरतिः सिद्धान्त तत्त्वश्रुतिः ॥
सर्वस्योपकृतिः शुचिव्यवहृतिः सत्पात्रदाने रतिः ।
श्रेयोनिर्मलधर्मकर्म निरतिः श्लाघ्या नराणां स्थितिः ॥७५॥

एक दिवसना दीक्षित साधुने चिरदीक्षिता साध्वीजी वांदे छे

वृद्धाभि र्भिक्षुणीभिश्च, सदिभ्याभिश्च सादरं ।
वंदितः स यती रङ्कः, सदालापनपूर्वकम् ॥ ७६ ॥

अणुगम्मए भगवई, रायसुअज्जासहस्सविंदेहिं ।
तहवि न करेइ माणं, परियच्छइ तं तहा नूणं ॥ ७७ ॥

दिणदिक्खयस्स दमगस्स, अभिमुहा अज्जचंदणा अज्जा ।
नेच्छइ आसण गहणं, सो विणओ सव्वअज्जाणं ॥ ७८ ॥

यदा स वन्दितः साधुः, रङ्कः साध्वीभिरादरात् ।
तदादध्यावयं जैन-धर्मो वर्यतमो ननु ॥ ७९ ॥

आमराजानुं बप्पभट्टसूरि प्रत्ये

तां च कोटीं सुवर्णस्य, धर्मामो मेदिनीपती ।
अर्हद्जीर्णालयोद्धारे, व्ययति स्म प्रमोदतः ॥ ८० ॥

उत्तम गृहिणी

गृहचिंताभरहरणं, मतिवितरणमखिलपात्र सत् करणं ।
किं किं न फलति गृहिणां, गृहिणी गृहकल्पवल्लीवत् ॥८१ ॥

---

# सुभाषितसुक्त रत्नमाला संस्कृतनुं

## शुद्धिपत्रक

| अशुद्ध शब्दो | शुद्ध शब्दो | पृ. | ली. |
|---|---|---|---|
| सूक्ता | सूक्त | २ | १८ |
| स्वामिस्त्व | स्वामिस्त्व | ५ | २० |
| मभव | प्रभव | ६ | ८ |
| यद्धत | यद्धत् | १६ | १२ |
| पथं | पथः | २५ | १५ |

| अशुद्ध शब्दो | शुद्ध शब्दो | पृ. | ली. |
|---|---|---|---|
| तौ | ० | ३५ | ७ |
| प्राप्त | चाप्त | ३८ | १० |
| प्रेयसि | प्रेयसी | ३९ | ७ |
| कुशल | कुशलं | ४५ | १ |
| रागिणां | रोगिणां | ४५ | ५ |
| अतीत | अतीव | ४६ | १७ |
| विपुलैक | विकलैः विपुलैः | ६० | ७ |
| श्लघयता | श्लाघ्यता | ८४ | ७ |
| तीर्थकरो गुरे | तीर्थकरे गुरौ | ८६ | ५ |
| अन्नन्न | अन्नन्ना | ८६ | ९ |
| सङ्गमऽ | सङ्गम | ८६ | २० |
| अत्थायोत्थाय | उत्थायोत्थाय | १२१ | १७ |
| बहुनी | बहूनां | १३१ | ९ |
| मेअवसरे | मेअवसरेअ | १३३ | १ |
| अनादिनि गोद्र | अनादिनिगोद | १३६ | १७ |
| कीर्तयः | कीर्तये | १३९ | ११ |
| ध्यानत्व | ध्यानस्य | १३९ | १९ |
| दुविधैः | दुर्विधैः | १५२ | १६ |
| क्रोधोभाण्ड | मद्यभाण्ड | १७३ | १८ |
| बूते | ब्रूते | १७३ | १९ |
| चृपण | वृषण | १८६ | ९ |
| तमालपत्रवद्भूद् हहा अंगावलीभंगुरं | तमालपत्रवद्भू दंगावलीभंगुरं | ६ | १४ |
| स पण्डितः | स पण्डितःस | २०२ | ११ |
| य: | य | २०५ | ९ |
| आर्या | भार्या | २५५ | १५ |
| शाकिनां | शाकिनी | २५५ | १६ |
| मनन्तरते | मनङ्करते | २५७ | ७ |

| अशुद्ध शब्दो | शुद्ध शब्दो | पृ. | श्लो. |
|---|---|---|---|
| बदन्तिम् | वदन्ति | २५७ | १६ |
| गुरुश्येयं | गुरु श्रेयं | २५८ | १३ |
| वीचय | दीर्घयं | २५९ | १० |
| यस्य य | यस्य म | २६१ | ६ |
| देहगर्भात् | गेहगर्भात् | २६२ | २० |
| भूतपञ्चश्मनी | पञ्चभूतवमनी | २७४ | ५ |
| मरणपद्वीं | स्मरणपद्वी | २७६ | ४ |
| तेऽहङ्कृति | भूतेऽहंकृति | २७६ | १५ |
| सूरि | सूरिः | २८० | १६ |
| मद्ध | मद्य | २८७ | १५ |
| पणस्त्री | पण्यस्त्री | २८८ | ९ |
| तथांशुके | तथांशुके | २८९ | ४ |
| ताडता | ताडंतो | २९१ | १४ |
| सावज्जणवज्जाणं | सावज्जणवज्जाण वयणाणं | २९२ | १ |
| शखिनः | शाखिनः | २९५ | १३ |
| समयष्वेक | समयेष्वेक | ३०० | १९ |
| नामेहि | नामेहि | ३०२ | २ |
| माणसं | माणसं माणसं | ३०४ | १८ |
| न संतरणे | नईसंतरणे | ३१० | १४ |
| इरियावाहिया | इरियावहिया | ३११ | ९ |
| इरियावाहिआईआ | इरियावहिआईआ | ३११ | १८ |
| सेलकुड्डसमाणा | सेलकुडसमाणा | ३१२ | ५ |
| जावइ | जीवइ | ३१३ | ५ |

पहेलो भाग संपूर्ण

भाग बीजो

| | | | |
|---|---|---|---|
| क्षुत्क्रमनिद्राअरा | क्षुत्कामनिद्राकरा | ३२० | ५ |
| कीरणावलिः | कीणावलिः | ३२१ | ३ |
| सोउं | सोउण | ३२२ | ९ |

| अशुद्ध शब्दो | शुद्ध शब्दो | पृ. | ली. |
|---|---|---|---|
| प्राणवधादिकानां | प्राणिवधादिकानां | ३२४ | २ |
| धर्मःसुहृत् | धर्मःसुहृत् | ३२५ | ३ |
| परमात्मास्वरूपो | परमात्मस्वरूपो | ३२८ | ४ |
| सचेतसा | सुचेतसां | ३२९ | ८ |
| संङ्कलपात् | संकल्पात् | ३२९ | ९ |
| प्रातः | प्राप्ताः | ३४५ | १४ |
| विगेरेना | विगेरेमां | ३५४ | १३ |
| तटादि | तटाकादि | ३५४ | १९ |
| असावाद्य | असावद्य | ३५४ | २० |
| विद्विप्यन्ति | विद्विष्यन्ति | ३८७ | १२ |
| पच्छिते | पच्छितं | ४२३ | ५ |
| बेइछे अवाई | बेइ छेअवाई | ४२३ | १० |
| सङ्गतिः | सङ्गतिः | ४२७ | १९ |
| रैवतादौ | रैवताद्रौ | ४३४ | ३ |
| सता | सतां | ४३५ | ९ |
| श्लोकार्धः | o | ४३६ | ३ |
| तमःसंयम | तपःसंयम | ४४१ | २ |
| शाठयरतः | शाठ्यरतः | ४४१ | ९ |
| विश्व | विश्वं | ४५८ | ५ |
| लब्धूवापि | लब्ध्वापि | ४६२ | १६ |
| वियोजयन्ति | वियोजयंति | ४६३ | १३ |
| सवोत्तम | सर्वोत्तम | ४६४ | ७ |
| मठापत्यात् | माठापत्यात् | ४७० | २० |
| अभव्यदुर्भव्या नां. | अभव्यदुर्भव्यानां च | ४७८ | ६ |
| मारकं त्रयं | मारकत्रयं | ४८२ | ८ |
| निर्विषो | निर्विषौ | ४८२ | १० |

पृ. ४८२ मां श्लो. ११० नीचे आ प्रमाणे समजवु

चैत्यवंदननी त्रण मुद्राओ

| | | | |
|---|---|---|---|
| यस्य | कस्य | ४८४ | २ |

## – अमारां प्रकाशनो –

१ सुभाषित सूक्त संग्रह संस्कृत–खपी गयुं छे
२ ,, ,, ,, गुजराती ,,
३ कल्पसूत्र सुबोधिका नं. १२५० खपी गयुं छे
४ जयानंद केवली चरित्र पद्य ५०० ,,
५ हेमप्रकाश भाग बीजो–मळेलुं. थोडी नकल
६ पंच परमेष्ठि नमस्कार याने जैन धर्मनुं स्वरूप
आवृत्ति पेली खपी गयुं
७ पंच परमेष्ठि नमस्कार आवृत्ति बीजी थोडी नकल छे
८ नवपद दर्शन थोडी नकल छे
९ जिनश्वरदेवनी आज्ञा याने साची माणसाई ,,
१० गुजराती सुभाषित सूक्त रत्नावली नं. १००० तैयार छे.
११ संस्कृत सुभाषित सूक्त रत्नमाला नं. १००० थोडा वखतमां तैयार थशे.

उपरोक्त बधां पुस्तक सीलीक होय त्यां सुधी लेनारनी पूरी ओळखाण पछी अवश्य वांचे तेवाओने हाथोहाथ भेट अपाय छे

## पुस्तक लेनार-संस्कृतना अभ्यासी-साधु मुनिराजो तथा साध्वीजी महाराजो प्रत्ये नम्र प्रार्थना.

जैन शासनना सिद्धान्तोनुं वर्णन छे.

व्याख्यानकारने उपयोगी काव्यो छे.

वैराग्यने पोषक काव्यो घणां छे.

आत्माने जगाडनार काव्यो छे.

व्याख्यानना अर्थने जरुरी काव्यो छे.

लगभग ५०-६० वर्षथी पुस्तको घणां छपायां छे. अने कबाटोमां पूराई गयां छे, आवां पुस्तको पण घणां छपायां छे.

परंतु अमारो आ नानकडो ग्रन्थ-खास व्याख्यानना अर्थी आत्माओने आपवो छे.

जेओ अवश्य वांचवा इच्छता होय, तेमोने जोई-लईने आपवामां आवशे.

पोताना नामथी मारफते मंगावी शकाय छे. अने हाथोहाथ अपाय छे. पोस्ट के रेलवे पारसलनी सगवड नथी.

—प्रकाशको